THE WHITE YAJURVEDA

EDITED

BY

Dr. ALBRECHT WEBER

DOCENT OF THE SANSCRIT-LANGUAGE AT THE UNIVERSITY OF BERLIN, MEMBER OF THE ROYAL BAVARIAN ACADEMY OF SCIENCES IN MUNICH AND OF THE GERMAN ORIENTAL SOCIETY, ASSOCIATED MEMBER OF THE ASIATIC SOCIETY IN PARIS, CORRESPONDING MEMBER OF THE AMERICAN ORIENTAL SOCIETY.

IN THREE PARTS.

Part I. The Vâjasaneyi-Sanhitâ in the Mâdhyandina- and the Kâṇva-Çâkhâ with the commentary of Mahîdhara.

Part II. The Çatapatha-Brâhmaṇa in the Mâdhyandina-Çâkhâ with extracts from the commentaries of Sâyaṇa, Harisvâmin and Dvivedaganga.

Part III. The Çrauta-sûtra of Kâtyâyana with extracts from the commentaries of Karka and Yâjnikadeva.

Printed under the patronage of the Hon. Court of Directors of the East-India-Company.

BERLIN

FERD. DÜMMLER'S VERLAGSBUCHHANDLUNG.

LONDON

WILLIAMS AND NORGATE. 14 HENRIETTA-STREET COVENT-GARDEN.

1855.

THE ÇATAPATHA-BRÂHMAṆA

IN THE

MÂDHYANDINA-ÇÂKHÂ WITH EXTRACTS FROM THE COMMENTARIES OF SÂYAṆA, HARISVÂMIN AND DVIVEDAGAṄGA

EDITED BY

DR. ALBRECHT WEBER.

श्रीशुक्लयजुर्वेदे
शतपथब्राह्मणम्
माध्यन्दिनीयां शाखामनुसृत्य
श्रीमत्सायणाचार्यहरिस्वामिद्विवेदगङ्गकृतभाष्येभ्यः सारमुद्धृत्य
अल्ब्रेर्तेन वेबेरेण शोधितम्
प्रुष्यनाम्नि जनपदे बेर्लीनाख्यायां राजधान्यां मुद्रितम्
संवत्सरे १८५५.

BERLIN
FERD. DÜMMLER'S VERLAGSBUCHHANDLUNG.
LONDON
WILLIAMS AND NORGATE. 14 HENRIETTA-STREET COVENT-GARDEN.

1855.

PRINTED AT THE PRESS OF THE ROYAL ACADEMY
OF SCIENCES IN BERLIN.

TO HIS EXCELLENCY

THE CHEVALIER Dr. C. C. J. BUNSEN

THE NOBLE FRIEND AND PATRON OF LINGUISTIC STUDIES,
ALIKE CELEBRATED AS SCHOLAR AND AS STATESMAN,

WITH PROFOUND RESPECT

DEDICATED

BY THE GRATEFUL EDITOR.

This edition of the Brâhmanas of the white Yajurveda is destined only to comprehend the text. An introductory essay, a glossary, a partial translation and deeper researches into all the materials, treasured up here and in the sûtras of *Kâtyâyana*, shall follow in a separate work on the Yajur-Vedic ceremonies. Therefore I shall here content myself with enumerating the critical apparatus, exstant in Europe, and giving a short explanation of the accents. —

A. I Manuscripts of the text of the *Çatapatha Brâhmaṇa*: *a.* in the *Mâdhyandina-Çâkhâ*: —

There is exstant a very great number of old as well as recent copies of it: Those, which chiefly (with the exception only of the first book and part of the thirteenth) furnished the text for this edition, exist in the *Chambers-Collection* and I take this opportunity to congratulate the Royal Library of *Berlin* upon this splendid donation made to it by the present *King of Prussia* through the care of the Chevalier *Bunsen*. Next to these manuscripts in value stands the copy (= M) of the Rev. Dr. *Mill*, now added to the *Bodleian* library, the greater part of which, viz. the books I-V and VII-XIII is written Samvat 1705-7 in *çrîvṛiddhanagara* by *Dâmodara* son of *Purushottama* and accented forty years after by *Vidyâdhara*. I shall now proceed to notice the single books with their respective manuscripts. (*) —

I. *Haviryajna*: begins व्रतमुपैष्यन्नन्तरेणाहवनीयम् (7 prapâṭhaka, 9 adhyâya, 37 brâhmaṇa, 837 kaṇḍikâ). M foll 117. — Bodlei. Wils. 363 (= B.). Samvat 1709. foll. 152 (ten leaves are wanting from 8, 2, 10 - 9, 1, 12 incl.). nr. 368 (= C.) S. 1654. foll. 123. nr. 67. nr. 71. — E. I. H. 2143 (= I.). — Paris Bibl. Nationale D 161. —

(*) All the copies are accented with the exception of Bodlei. Wils. 67 (1-3). 63 (4-8). 62 (9-14). 71 (1-3. 7. 13 twice). 70 (6. 14. 4. 11. 9. 12. 8. 5). E. I. H. 2143 (1-7). 309 (8-14). 1277 (2. 3). and partly of Chamb. No. 39 (10 twice. 2-5. 7-9. written in Benares S. 1851. Çâke 1716 krodhananâmasamvatsare). *These* copies are recently written and very incorrect.

II. *Ekapâdikâ* begins स यदाऽइतश्चेतश्च (5 prap. 6 adhy. 24 brâhm. 549 kaṇḍ.) Chamb. 3 written S. 1681 in Kâçî by Gangârâmamicra. foll. 116. nr. 39. — M. foll. 84. — Bodl. Wils. 366 foll. 62. nr. 67. nr. 71. — E. I. H. 2143. nr. 1277 nr. 583. foll. 27. — Paris D 147. —

III. *Adhvara* begins देवयजनं ज्रोषयन्ते (7 prap. 9 adhy. 37 brâhm. 859 kaṇḍ.) Chamb 1. foll. 181 written by the same scribe as nr. 3. - nr. 39. — M. foll. 125. — Bodl. Wils. 359 S. 1585 foll. 116. nr. 383. S. 1688. foll. 333. nr. 67. nr. 71. — E. I. H. 1277. 2143. —

IV. *Graha* begins प्राणो ह वाऽअस्योपाꣳशुः (5 prap. 6 adhy. 39 br. 649 k.) Chamb. 5. foll. 240. S. 1689. Câke 1554. angirânâmasamvatsare written in Benares âbhîrajnâtîyarânâraṅganâthasutanâmâjikena. nr. 39. — M. foll. 90 accented S. 1745 by Someçvara. — Bodl. W. 365. nr. 63. nr. 70. — E. I. H. 2143. — Paris D 162. —

V. *Sava* begins देवाश्च वाऽअसुराश्च (4 pr. 5 adhy. 25 br. 471 k.) Chamb. 6. foll. 109. S. 1683. written by the same scribe as nr. 1 and 3. nr. 16. foll. 89. S. 1648. nr. 21. foll. 59. S. 1572. nr. 39 (till to ३. १. ८.). — M foll. 68. accented S. 1713 by Laghunâtha. — Bodl. W. 452. foll. 113. S. 1610. nr. 63. nr. 70. — E. I. H. 2143. — Paris D. 144. —

VI. *Ûshasambharaṇa* begins असद्वाऽइदमग्रऽआसीत् (5 pr. 8 adhy. 27 br. 540 k.) Chamb. 7. foll. 170. nr. 17. foll. 108. S. 1545. Câke 1461 written çrîmat hansapurapattane revâçrînarmadâyâ daxine tate on the order of Modhajnâtîya Bhattakeçava. nr. 19. foll. 60. — M foll. 139 written S. 1628 and accented by Mahâdeva. — Bodl. W. 454. foll. 165. S. 1610. nr. 457. S. 1688. foll. 211. nr. 63. nr. 70. — E. I. H. 2143. — Paris D. 148. 173. —

VII. *Hastishaṭ nâma kâṇḍam* (*) begins गार्हपत्यं चेष्यन् (4 pr. 5 adhy. 12 br. 398 k.) Chamb. 9. foll. 115. nr. 39. — M. foll. 60. — Bodl. W. 462. foll. 114. S. 1571. nr. 63. nr. 71. — E. I. H. 268. 2143. — Paris D. 196. —

VIII. *Citi* begins प्राणभृत उपदधाति (4 pr. 7 adhy. 27 br. 437 k.) Chamb. nr. 20. foll. 86. S. 1739. nr. 39. — M. foll. 72. — Bodl. W. 363. foll. 96. nr. 63. nr. 70. — E. I. H. 268. 309. — Paris D. 195. —

IX. *Samciti* begins अथातः शतरुद्रियम् (4 pr. 5 adhy. 15 br. 401 k.) Chamb

(*) The name of this kâṇḍa is rather questionable: the one above mentioned is taken from M. as the best authority. The other manuscripts in the Mâdhyandina as well as the Kânva Çâkhâ call it Hastighata. Is hastin = one? hastishat = seven? See A. W. v. Schlegel Réflexions sur l'étude des langues asiatiques p. 197 - 199.

14. foll. 103. S. 1586. nr. 18. foll. 61. S. 1671. nr. 39. — M. foll. 66. — Bodl. W. 363, 3. foll. 75. S. 1692. nr. 389. nr. 62. nr. 70. — E. I. H. 309. —

X. *Agnirahasya* begins अग्निर्वाऽएष पुरस्ताच्चीयते (4 pr. 6 adhy. 31 br. 369 k.) Chamb. 11. foll. 60. S. 1485 (A. D. 1428). nr. 39. twice. — M. foll. 58. accented S. 1715. by Krishnaputra Prabhûjika (?). — Bodl. W. 461. foll. 99. S. 1655. nr. 62. — E. I. H. 309. —

XI. *Ashṭâdhyâyi* begins संवत्सरो वै यज्ञः (4 pr. 8 adhy. 42 br. 437 k.) Chamb. 12. foll. 116. — M. foll. 59. — Bodl. W. 369, 1. S. 1645. foll. 86. nr. 62. nr. 70. — E. I. H. 309. — Paris D. 146. —

XII. *Madhyama* begins अयं वै यज्ञो योऽयं पवते (4 pr. 9 adhy. 29 br. 459 k.) Chamb. 13. foll. 69. — M. foll. 62. — Bodl. W. 62. nr. 70. — E. I. H. 309. — Paris D. 159. —

XIII. *Açvamedha* begins ब्रह्मौदनं पचति (4 pr. 8 adhy. 43 br. 430 k.) Chamb. 22. foll. 7. a fragment beginning from 8, 1, 1. — M. foll. 60. — Bodl. W. 365 (= B.). foll. 78. S. 1691. nr. 453 (= C.). foll. 81. S. 1808. nr. 62. nr. 71. — E. I. H. 268. 309. — Paris D. 160. —

XIV. Âraṇyakam begins देवा ह वै सत्रं निषेदुः (7 pr. 9 adhy. 50 br. 796 k.) Chamb. 15. foll. 173. S. 1583. — M. foll. 167. written by Pîtâmbara in Benares. — E. I. H. 309. —

Detached from this kâṇḍa is the *Vṛihad*-Âraṇyakam, beginning with the thirth prapâṭhaka: द्वया ह प्राजापत्या देवाश्चासुराश्च. Bodl. W. 365. foll. 75. unaccented. nr. 62. nr. 70. — E. I. H. 309. 1471. — Paris D. 163. 59g. —

b. in the *Kâṇva-Çâkhâ*. — Not having yet discovered a complete and correct copy of this Çâkhâ — three books are still wanting and some of the manuscripts of the other 14 books are rather incorrect — I could not venture to give in my edition also the text of this Çâkhâ, especially as its differences from the Mâdhyandina-Çâkhâ are so very numerous and important, you may look at »the readings of almost every passage«, as well at the single words and their orthography or even accentuation as at the whole kaṇḍikâs and their number or distribution. The best copy extant in Europe is in the collection of the Rev. Dr. Mill, now deposited in the Bodleian library: it contains eleven kâṇḍas written and accented by three different scribes (I. withont any date by the one: IV. V. XIV. foll. 1-23a. Samvat 1651 by an other: II. VI. VII. X. XII. XIV. from foll 23,b-48. XV. XVII. Samvat 1875 by the thirth). Other copies are extant only (with the exception of the kâṇḍas I. and XVII.) in Paris. Bibl. Nat. D. 167-

172. 180-187 (= P.), which I am sorry to say I could not for want of time sufficiently examine. From a list written on the reverse of the first leaf of the fourth book and of the 48th leaf of the fourteenth in M. I take the names and the number of verses of the different kâṇḍas. —

I. *Ekapâdikâ* begins स वै सम्भारात्सम्भरति (6 adhy. 22 brâhm. 367 kaṇḍikâs). M. foll. 100. — E. I. H. 1560. see Colebrooke miscell. ess. I, 60 not. — P. 180. —

II. *Haviryajna* begins स वै व्रतमुपैष्यन् (8 adhy. 32 br. 572 k.) M. foll. 59. — P. 181. —

III. *Uddhâri* (124 k.) is wanting. —

IV. *Adhvara* begins तद्वै देवयजनमीक्षन्ते (628 k.) M. foll. 49. contains only the prathana *ança* in 4 adhy. 16 br. 272 k. — P. 184 b. —

V. *Graha* begins प्राणो ह वाऽअस्योपाꣳशुः (8 adhy. 38 br. 475 k.) M. foll. 82. — P. 183. —

VI. *Vâjapeya* begins देवाश्च ह वाऽअसुराश्चोभये (2 adhy. 6 br. 100 k.) M. foll. 12. — P. 185 a. —

VII. *Râjasûya* begins स वै पूर्णाहुतिं जुहोति (5 adhy. 19 br. 288 k.) M. foll. 28. — P. 185 b. —

VIII. *Ûshasambharaṇa* begins असद्वाऽइदमग्रऽआसीत् (8 adhy. 27 br. 525 k. [509 in the list]) P. 167. the first 82 leaves are written by the same scribe as P. 168 and 169., foll. 83-85 are dated S. 1806. —

IX. *Hastighaṭa* (see Wilson Sanskrit dictionary: घट *an elephants frontal sinus*) begins अथातो नैऋतीर्हरन्ति (5 adhy. 16 br. 261 k. [257 the list]) P. 168. S. 1649. foll. 51 (= A.). nr. 172 (= B.) most likely a copy of the preceding, written S. 1852. Çâke 1717. foll. 46. —

X. *Citi* begins प्राणभृत उपदधाति (5 adhy. 20 br. 241 k) M. foll. 25. — P. 186 a. —

XI. *Samciti* begins नाकसद् उपदधाति (7 adhy. 20 br. 441 k.) P. 169. S. 1651. nr. 171 a copy thereof. —

XII. *Agnirahasya* begins अग्निरेष पुरस्ताच्चीयते (6 adhy. 28 br. 286 k.) M. foll. 39. — P. 186 b. —

XIII. *Ashṭâdhyâyi* (252 k.) is wanting. —

XIV. *Madhyama* begins अयं वै यज्ञो योऽयं पवते (8 adhy. 29 br. 382 k.) M. foll. 48. — P. 187 a. —

XV. *Açvamedha* begins ब्रह्मौदनं पचति (7 adhy. 40 br. 308 k.) M. foll. 29. — P. 187 b. —

XVI. *Pravargya* begins (?) अथास्मै श्मशानं कुर्वन्ति (180 k.) is wanting. —

XVII. *Upanishad* begins उषा वाऽअश्वस्य मेध्यस्य (6 adhy. 47 br. 446 k.) M. foll. 53. — Bodl. W. 369. foll. 73. a recent copy. nr. 485 a. a fragment. — P. 182. — Chamb. 122 twice. 1., foll. 99. S. 1840. 2., foll. 85. nr. 395 fragments. — Edited by *Poley* 1844 Bonn. —

II. Manuscripts of the commentaries on the *Çatapatha-Brâhmaṇa*. —

1. *Sâyaṇâcârya's Mâdhavîya Vedârthaprakâça*: when quoted in the commentaries on the Kâtyâyanasûtra — and this happens very rarely —, this commentary is quoted by इति माधवः. The copies thereof, extant in the E. I. H. and in the Wilson-Collection of the Bodleian library, are very modern, incorrect and defective: and as all of them, with the only exception of E. I. H. 613, partake of the same blunders and interruptions, they have most likely been copied from the *same* manuscript: they contain the explanation of only eight books, viz: *kâṇḍa I* as far as the end of the third brâhmana in the seventh adhyâya. E. I. H. 657 (A.) foll. 67. nr. 1509 (B.) foll. 123. Bodl. Wils. 2 (C.) foll. 87. — *kâṇḍa II* E. I. H. 657. foll. 64. — *kâṇḍa III* ibid. (A.) foll. 69. Bodl. W. 3 (B.) foll. 129. — *kâṇḍa V* E. I. H. 657 (A.) foll. 66. Bodl. W. 3 (B.) foll. 64. — *kâṇḍa VII* E. I. H. 149 (A.) foll. 66. Bodl. W. 4 (B.) foll. 65. — *kâṇḍa IX* in the same numbers A. foll. 44. B. foll. 58. — *kâṇḍa X* E. I. H. 149 (A.). most defective fragments. foll. 39. nr. 613 (B.). S. 1610. foll. 185. — *kâṇḍa XI* E. I. H. 1071 (A.) foll. 67. Bodl. W. 4 (B.). foll. 104. —

2. Âcârya-*Harisvâminah* kritau Catapathabhâshyam: quoted throughout the commentaries on Kâtyâyana by: इति हरिस्वामिनः. The copies of this commentary are even more defective and incorrect then those of the Mâdhavîyabhâshya: they are bound together with these and written by the same scribes (*): they contain the explanation of only three *kâṇḍas*, viz: of *kâṇḍa II*. Bodl. W.

(*) There are four scribes of the three copies 149. 657. 1071 of the E. I. H. *kâṇḍa* I and *k.* II as far as fol. 16 have been written by the one, *kâṇḍa* II from fol. 17 and the *kâṇḍas* III. VII. IX. XI by another, the *kâṇḍas* V. VIII. X. XIII as far as fol. 19 by a third, and *kâṇḍa* XIII foll. 20-24. by a fourth. — Three scribes are to be discerned in the three copies 2-4 of the Bodl. Wils. Coll. The *kâṇḍas* I. VII. IX have been copied by the one, the *kâṇḍas* II. V by another, the *kâṇḍas* III. XI by a third. —

2. foll. 54. — *kâṇḍa VIII* E. I. H. 657. foll. 36. — *kâṇḍa XIII* E. I. H. 149. foll. 24: and partly of a fourth, viz: of *the first kâṇḍa* from the *fourth brâhmaṇa* of the *seventh* adhyâya (where the common copy of the *Mâdhavîyabhâshya* failed) as far as the end (in B. only as far as VIII, 3, 14), occupying 12 leaves in A. nine in B. and sixteen in C. —

3. Dvivedaçrînârâyanasûnu *Dviveda Ganga's* commentary of the *Mâdhyandina* Âraṇyaka: a very excellent copy (= M.) in the collection of the Rev. Dr. Mill, since added to the Bodleian library: foll. 322. —

There are extant in Europe several copies of commentaries on the *Vrihad-Aranyaka* in the *Kâṇvaçâkhâ*, but as they have been already published by Dr. Roer in the Bibliotheca Indica nro. 6. Calcutta 1848, I do not think it necessary to notice them here.

III. *Rishitarpaṇam.* Cham 506 b. 735. foll. 11. a sort of *anukramaṇî* of the *Mâdhyandina Çatapatha Brâhmaṇa,* enumerating *a.* the *beginning* words (*pratîkâni*) 1) of each *adhyâya.* 2) of each *hundred* of (the 7624) *kaṇḍikâs* (2800-5400 are enumerated twice differently). 3) of each *prapâṭhaka.* 4) of the *last* kaṇḍikâ of each kâṇḍa: *b.* the closing words of each kâṇḍa. —

B. The accentuation in the manuscripts of the Çatapatha Brâhmaṇa is rather strange, as there only *one* sign is made use of, an horizontal stroke beneath the line, for denoting the *udâtta* as well as the *svarita.* The udâtta has the stroke beneath itself: नृषद्म्, the svarita beneath the preceding syllable: वीर्यम्. To avoid this ambiguity I have denoted the svarita in this edition by *two* horizontal strokes beneath the preceding syllable: वीर्यम्. — Before a following *accented* syllable the preceding *udâtta* loses its denotation: 1) before an *udâtta:* केतपूः केतम् instead of °पूः केतम्, मह्यो ये धनम् i. of मह्यो ये धनम्, पर्णा न वेरनु i. of पर्णा न वेरनु, अग्निर्हि वै धूरथ i. of अग्निर्हि वै धूरथ (१.१.२.१.), but रथवाही सा हि न स्त्री न पुमान् i. of °ही सा हि न स्त्री न पुमान् (५.५.४.३५.), as there would be wanting too many signs. A *seeming* exception only is यं-यमसुराणाम् १.६.३.२८, as the second यम् is not accented: see पाणिनिसू° ८.१.३. 2) before a *svarita:* नेधृद्धम् १.७.२.१., मानुषं नेधृद्धम्, यज्ञो वै स्वः, देवा वै स्वः. — The preceding *svarita* on the contrary retains its denotation be-

fore a following accented syllable: 1) before an *udâtta*: यज्ञो वै स्वरुः, देवा वै स्वरगन्म, एवैतत्. 2) before a *svarita*: वोदानीतान् ॥५॥ सोऽभ्युन्नति (*) ५. १.४.६., इति सैषितम् १.४.१.२६., देवाः सैषितम् — The *udâtta* changes into the *svarita* (and the original *svarita* remains unaltered: अनुवाक्येयम् १.७.२.११.) in *all* cases of crasis with a following *unaccented* vowel, see my *Vâjasaneyasanhitae specimen* II p.7 follow. (Berlin 1847 Asher) and *Roth* in his edition of *Yâska's Nirukta* I p. LX. (Göttingen 1848 Dieterich). The only continual exception is made by the praepositions आ and प्र, which remain *udâtta*: एहि ५.२.१.१०. प्राह, प्राधन्वन् १.५.१.२०., प्रारोचत १.६.२.८.: besides the *udâtta* is occasionally retained (against पाणि° ८.२.४.) in the declension, but alternating *even in the same words* with the *svarita*: दशम्या and दशम्या Instr. of दशमी. — The *udâtta* is regular in all cases of crasis with a following *accented* vowel: एवाकृतिम्, एवेति instead of एव आ इति १.४.१.५., आग्नेऽध्यूहति i. of आग्ने अध्यूहति १.५.३.२०., सुष्वेति i. of सुष्वा इति १.७.१.१६., याज्याथ i. of याज्या अथ १.७.२.७. —

(*) The denotation and the reciprocal influence of the accents does in general not undergo any alteration from the divisions of the *pratîkas*, the *kandikâs* or the *brâhmanas*, with the only exception that the underlineal stroke is changed into three dots in the manuscripts: तत् ॥१॥ सु, and in this edition respectively also into six of them, if the following svarita is denoted: तत् ॥१॥ सोऽभि°.

Berlin March 1849.

The Editor.

ओम् । नमो गणेशाय ॥ व्रतमुपैष्यन् । अन्तरेणाहवनीयं च गार्हपत्यं च प्राङ्शिष्टन्नप उपस्पृशति तद्यदप उपस्पृशत्यमेध्यो वै पुरुषो यदनृतं वदति तेन पूतिरन्तरतो मेध्या वाऽआपो मेध्यो भूत्वा व्रतमुपायानीति पवित्रं वाऽआपः पवित्रपूतो व्रतमुपायानीति तस्माद्वाऽअप उपस्पृशति ॥ १ ॥ सोऽग्निमेवाभीक्षमाणो व्रतमुपैति । अग्ने व्रतपते व्रतं चरिष्यामि तच्छकेयं तन्मे राध्यतामित्यग्निर्वै देवानां व्रतपतिस्तस्माऽएवैतत्प्राह व्रतं चरिष्यामि तच्छकेयं तन्मे राध्यतामिति नात्र तिरोहितमिवास्ति ॥ २ ॥ अथ सꣳस्थिते विसृजते । अग्ने व्रतपते व्रतमचारिषं तदशकं तन्मेऽराधीत्यशकद्धेतद्यो यज्ञस्य सꣳस्थामगन्नराधि ह्यस्मै यो यज्ञस्य सꣳस्थामगन्नेतेन न्वेव भूयिष्ठा-इव व्रतमुपयन्त्येनेन त्वेवोपेयात् ॥ ३ ॥ द्वयं वाऽइदं न तृतीयमस्ति । सत्यं चैवानृतं च सत्यमेव देवा अनृतं मनुष्या इदमहमनृतात्सत्यमुपैमीति तन्मनुष्येभ्यो देवानुपैति ॥ ४ ॥ स वै सत्यमेव वदेत् । एतद्वै देवा व्रतं चरन्ति यत्सत्यं तस्मात्ति यशो यशो ह भवति य एवं विद्वांत्सत्यं वदति ॥ ५ ॥ अथ सꣳस्थिते विसृजते । इदमहं य एवास्मि सोऽस्मीत्यमानुषऽइव वाऽएतद्भवति यद्व्रतमुपैति न हि तदवकल्पते यद्ब्रूयादिदमहꣳ सत्यादनृतमुपैमीति तद्ध खलु पुनर्मानुषो भवति तस्मादिदमहं य एवास्मि सोऽस्मीत्येवं व्रतं विसृजेत ॥ ६ ॥ अथातोऽशनानशनस्यैव । तद्ध स्माहाऽऽसावयसोऽनशनमेव व्रतं मेने मनो ह वै देवा मनुष्यस्याजानन्ति तऽएनमेतद्व्रतमुपयन्तं विदुः प्रातर्नो यक्ष्यत

ऽर्ह॑ति॒ तेऽस्य॒ विश्वे॑ दे॒वा गृ॒हानाग॑च्छन्ति॒ तेऽस्य॑ गृ॒हेष्वुप॑वसन्ति॒ स उ॒पव॑सथः ॥७॥ तन्वे॑वानव॒क्लृप्तम्॑ । यो मनु॒ष्येष्व॑नश्नत्सु॒ पूर्वोऽश्नी॑यादथ॒ किमु॒ यो दे॒वेष्व॑नश्नत्सु॒ पूर्वोऽश्नी॑यात्तस्मा॒दु नैवाश्नी॑यात् ॥८॥ तदु॑ होवाच याज्ञव॒ल्क्यः । यदि॒ नाश्नाति॑ पितृदे॒वत्यो॑ भवति॒ यद्यु॒श्नाति॑ दे॒वान॒त्यश्ना॑तीति॒ स यदे॒वाशि॑तम॒नशि॑तं॒ तद॑श्नीयादि॒ति यस्य॒ वै हवि॑र्न॒ गृह्य॑न्ति॒ तद॑शित॒मन॑शितꣳ॒ स यद॑श्नाति॒ तेना॑पितृदे॒वत्यो॑ भवति॒ यद्यु तद॑श्नाति॒ यस्य॒ हवि॑र्न॒ गृह्य॑न्ति॒ तेनो॑ दे॒वान्नात्य॑श्नाति ॥९॥ स वाऽआ॑रण्य॒मेवाश्नी॑यात् । या वा॑र॒ण्या ओष॑धयो॒ यद्वा॑ वृ॒क्ष्यं तदु॑ ह स्माहापि॒ बर्कु॑र्वार्ष्णो॒ माषा॒न्मे पच॑त॒ न वाऽए॒तेषा॑ꣳ॒ हवि॑र्गृह्य॒न्तीति॒ तदु॒ तथा॒ न कु॑र्याद्व्रीहि॒यव॒योर्वाऽए॒तदुप॑ज॒नं यद्ध॒वीꣳषि॒ तद्व्रीहि॒यवा॑वे॒वैतेन॑ भूया॑ꣳसौ करोति॒ तस्मादा॑रण्य॒मेवाश्नी॑यात् ॥१०॥ स आह॑वनीया॒गारे॒ वैताꣳ॑ रात्रि॑ꣳ शयीत । गार्ह॑पत्या॒गारे॒ वा दे॒वान्वाऽए॒ष उ॒पाव॑र्त्तते॒ यो व्र॒तमु॑पै॒ति स या॒निवो॒पाव॑र्त्तते॒ तेषा॑मे॒वैतन्म॑ध्ये शे॒तेऽधः॑ शयीताधस्ता॒दिव॒ हि श्रेय॑स उ॒पचा॑रः ॥११॥ स वै प्रा॑तरु॒प ए॑व । प्रथ॑मेन॒ कर्म॑णाभि॒पद्य॑तेऽपः॒ प्रणा॑यति॒ यज्ञो॒ वाऽआपो॒ यज्ञ॑मे॒वैतत्प्रथ॑मेन॒ कर्म॑णाभि॒पद्य॑ते॒ ताः प्रणा॑यति॒ यज्ञ॑मे॒ वैतद्वि॑तनोति ॥१२॥ स प्रणा॑यति । कस्त्वा॑ युनक्ति॒ स त्वा॑ युनक्ति॒ कस्मै॑ त्वा॒ युन॑क्ति॒ तस्मै॑ त्वा॒ युन॑क्तीत्ये॒ताभि॒र्निरु॑क्ताभि॒र्व्याकृ॑तिभि॒र्निरु॑क्तो॒ वै प्र॒जाप॑तिः प्र॒जाप॑ति॒र्यज्ञ॒स्तत्प्र॒जाप॑तिमे॒वैतद्य॒ज्ञं यु॑नक्ति ॥१३॥ यद्वै॒वापः॑ प्रणा॒यति॑ । अद्भि॒र्वाऽइ॒दꣳ सर्व॑माप्तं॒ तत्प्रथ॑मे॒नैवैतत्कर्म॑णा॒ सर्व॑माप्नोति ॥१४॥ यद्वै॒वास्यात्र॑ । होता॑ वाध्व॒र्युर्वा॒ ब्रह्मा॑ वाग्नी॒ध्रो वा॒ स्वयं॑ वा॒ यज॑मानो॒ नाभ्या॑पयति॒ तदे॒वास्यै॒तेन॒ सर्व॑माप्तं॒ भव॑ति ॥१५॥ यद्वै॒वापः॑ प्रणा॒यति॑ । दे॒वान्ह॒ वै यज्ञे॑न॒ यज्ञ॑मानांस्ता॒नसु॑ररक्ष॒सानि॑ ररक्षुर्न॒ यद्व्यध॒ इति॒ तद्व्र॑क्षꣳ॒स्तस्माद्व्र॒क्षाꣳसि॑ ॥१६॥ ततो॑ दे॒वा एतं॑ व॒ज्रं द॑दृशुः । यद॒पो व॒ज्रो वाऽआपो॑ व॒ज्रो हि वाऽआप॒स्तस्मा॒द्येनै॒ता यन्ति॑ नि॒म्नं कु॒र्वन्ति॒ यत्रो॑प॒तिष्ठ॑न्ते॒ निर्द॑ꣳहन्ति॒ तत॒ एतं॑ व॒ज्रमुद्य॑ꣳस्तस्याभ॑ये

ऽनाष्ट्रे निवाते यज्ञमतन्वत तथो एवैष एतं वज्रमुद्यच्छति तस्याभये ऽनाष्ट्रे निवाति यज्ञं तनुते तस्मादपः प्रणयति ॥ १७ ॥ ता उत्सिच्योत्तरेण गार्हपत्यꣳ सादयति । योषा वाऽआपो वृषाग्निर्गृहा वै गार्हपत्यस्तद्गृहेष्वेवैतन्मिथुनं प्रजननं क्रियते वज्रं वाऽएष उद्यच्छति यो ऽपः प्रणयति यो वाऽअप्रतिष्ठितो वज्रमुद्यच्छति नैनꣳ शक्नोत्युद्यन्तुꣳ सꣳ हैनꣳ शृणाति ॥ १८ ॥ स यद्गार्हपत्ये सादयति । गृहा वै गार्हपत्यो गृहा वै प्रतिष्ठा तद्गृहेष्वेवैतत्प्रतिष्ठायां प्रतितिष्ठति तथो हैनमेष वज्रो न हिनस्ति तस्माद्गार्हपत्ये सादयति ॥ १९ ॥ ता उत्तरेणाहवनीयं प्रणयति । योषा वाऽआपो वृषाग्निर्मिथुनमेवैतत्प्रजननं क्रियतऽएवमिव हि मिथुनं ह्लाप्तमुत्तरतो हि स्त्री पुमाꣳसमुपशेते ॥ २० ॥ ता नान्तरेण संचरेयुः । नेन्मिथुनं चर्यमाणमन्तरेण संचरानिति ता नातिकृत्य सादयेन्नोऽअनाप्ताः सादयेत्स यदतिकृत्य सादयेदस्ति वाऽअग्नेश्चापां च विभ्रातृव्यमिव स यथैव ह तद्भ्रेर्भवति यत्रास्याप उपस्पृशत्यग्नौ ह्याधि भ्रातृव्यं वर्धयेद्यदतिकृत्य सादयेद्यद्यऽअनाप्ताः सादयेन्नो हाभिस्तं काममभ्यापयेद्यस्मै कामाय प्रणीयन्ते तस्माद्उ सम्प्रत्येवोत्तरेणाहवनीयं प्रणयति ॥ २१ ॥ अथ तूष्णीः परिस्तृणाति । द्वन्द्वं पात्राण्युदाहरति शूर्पं चाग्निहोत्रहवणीं च स्फ्यं च कपालानिच शम्यां च कृष्णाजिनं चोलूखलमुसले दृषदुपल तद्यद्दशदशाक्षरा वै विराड्विराड्वै यज्ञस्तद्विराजमेवैतद्यज्ञमभिसम्पादयत्यथ यद्द्वन्द्वं द्वन्द्वं वै वीर्यं यदा वै द्वौ सꣳहेतेऽथ तद्वीर्यं भवति द्वन्द्वं वै मिथुनं प्रजननं मिथुनमेवैतत्प्रजननं क्रियते ॥ २२ ॥ ब्राह्मणम् ॥ १ ॥

अथ शूर्पं चाग्निहोत्रहवणीं चादत्ते । कर्मणे वां वेषाय वामिति यज्ञो वै कर्म यज्ञाय हि तस्मादाह कर्मणे वामिति वेषाय वामिति वेवेष्टीव हि यज्ञम् ॥ १ ॥ अथ वाचं यच्छति । वाग्वै यज्ञोऽविक्षुब्धो यज्ञं तनवाऽइत्यथ प्रतपति प्रत्युष्टꣳ रक्षः प्रत्युष्टा अरातयो निष्टप्तꣳ रक्षो निष्टप्ता अरातय इति वा ॥ २ ॥ देवा ह वै

यज्ञं तन्वानाः । ते ऽसुररक्षसेभ्य आसंगाद्भिभयांचक्रुस्तद्यज्ञमुखादेवैतन्नाष्ट्रा रक्षाꣳस्यतो ऽपक्रान्ति ॥३॥ अथ प्रैति । उर्वन्तरिक्षमन्वेमीत्यन्तरिक्षं वाऽअनु रक्षस्यन्त्यमूलमुभयतः परिक्षिप्तं यथायं पुरुषोऽमूल उभयतः परिक्षिप्तोऽन्तरिक्षमनुचरति तद्रक्षणैवैतदन्तरिक्षमभयमनाष्ट्रं कुरुते ॥४॥ स वाऽअनस एव गृह्णीयात् । अनो ह वाऽअग्रे पश्चेव वाऽइदं यद्धालꣳ स यदेवाग्रे तत्करवाणीति तस्मादनस एव गृह्णीयात् ॥५॥ भूमा वाऽअनः । भूमा हि वाऽअनस्तस्माद्यदा बह्वभवत्यनोवाक्यमभूदित्याहुस्तद्भूमानमेवैतदुपैति तस्मादनस एव गृह्णीयात् ॥६॥ यज्ञो वाऽअनः । यज्ञो हि वाऽअनस्तस्मादनस एव यज्ञर्षि सन्ति न कौष्ठस्य न कुम्भ्यै भस्त्रायै ह स्मर्षयो गृह्णन्ति तद्ऋषीन्प्रति भस्त्रायै यज्ञर्ष्यासुस्तान्येतर्हि प्राकृतानि यज्ञाय्यꣳ निर्मिमाऽइति तस्मादनस एवगृह्णीयात् ॥७॥ उतो पात्र्यै गृह्णन्ति । अनन्तरायमु तर्हि यज्ञर्षि जपेत्स्फ्यमु तर्ह्यवस्तदुपोह्य गृह्णीयाद्यतो युनज्मि ततो विमुञ्चामीति यतो ह्येव युञ्जन्ति ततो विमुञ्चन्ति ॥८॥ तस्य वा ऽएतस्यानसः । अग्निरेव धूरग्निर्हि वै धूरथ य एनद्वहत्यग्निद्ग्धमिवैषां वक्रं भवत्यथ यज्जघनेन कस्तम्भीं प्रऽउगं वेदिरेवास्य सा नीड एव ह्यविर्धानम् ॥९॥ स धुरमभिमृशति । धूरसि धूर्व धूर्वन्तं धूर्व तं योऽस्मान्धूर्वति तं धूर्व यं वयं धूर्वाम इत्यग्निर्वाऽएष धुर्यस्तमेतदत्येष्यन्भवति ह्यविर्ग्रहीष्यंस्तस्माऽएवैतान्निक्रुते तथो ह्येतमेषोऽतियन्तमग्निर्धुर्यो न हिनस्ति ॥१०॥ तद्ध स्मैतदारुणिराह । अर्धमासशो वाऽअक्रꣳ सपत्नान्धूर्वामीत्येतद्ध स्म स तदभ्याह ॥११॥ अथ जघनेन कस्तम्भीमीषामभिमृश्य जपति । देवानामसि वह्नितमꣳ सस्नितमं पप्रितमं जुष्टतमं देवहूतमम् । अह्नुतमसि ह्यविर्धानं दृꣳह्स्व मा ह्वारित्यन एवैतदुपस्तौत्युपस्तुताद्गातमनसो ह्यविर्गृह्णानीति मा ते यज्ञपतिर्ह्वार्षीदिति यजमानो वै यज्ञपतिस्तद्यजमानायैवैतद्ह्वलामाशास्ते ॥१२॥ अथाक्रमते । विष्णुस्त्वा क्रमतामिति

यज्ञो वै विष्णुः स देवेभ्य इमां विक्रान्तिं विचक्रमे यैषामियं विक्रान्तिरिदमेव प्रथमेन पदेन पस्पाराथेदमन्तरिक्षं द्वितीयेन दिवमुत्तमेनैनाम्वेवैष एतस्मै विष्णुर्यज्ञो विक्रान्तिं विक्रमते ॥ १३ ॥ अथ प्रेक्षते । ऊरू वातायेति प्राणो वै वातस्तद्ब्रह्मणैवैतत्प्राणाय वातायोरुगायं कुरुते ॥ १४ ॥ अथापास्यति । अपहतꣳ रक्ष इति यत्र किञ्चिदापन्नं भवति यद्यु नाभ्येव मृशेत्तन्नाष्ट्रा एवैतद्ब्रह्माऽस्यतोऽपहन्ति ॥ १५ ॥ अथाभिपद्यते । यहूत्यां पञ्चेति पञ्च वाऽइमा अङ्गुलयः पाङ्क्तो वै यज्ञस्तद्यज्ञमेवैतदत्र दधाति ॥ १६ ॥ अथ गृह्णाति । देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामग्नये जुष्टं गृह्णामीति सविता वै देवानां प्रसविता तत्सवितृप्रसूत एवैतद्गृह्णात्यश्विनोर्बाहुभ्यामित्यश्विनावधर्यू पूष्णो हस्ताभ्यामिति पूषा भागदुघोऽशनं पाणिभ्यामुपनिधाता सत्यं देवा अनृतं मनुष्यास्तत्सत्येनैवैतद्गृह्णाति ॥ १७ ॥ अथ देवतायाऽआदिशति । सर्वा ह वै देवता अधर्युꣳ हविर्ग्रहीष्यन्तमुपतिष्ठन्ते मम नाम ग्रहीष्यति मम नाम ग्रहीष्यतीति ताभ्य एवैतत्सहसतीभ्योऽसमदं करोति ॥ १८ ॥ यद्वेव देवतायाऽआदिशति । यावतीभ्यो ह वै देवताभ्यो हवीꣳषि गृह्यन्तऽऋणमु हैव तास्तेन मन्यन्ते यदस्मै तं कामꣳ समर्धयेयुर्यत्काम्या गृह्णाति तस्माद्वै देवतायाऽआदिशत्येवमेव यथापूर्वꣳ हवीꣳषि गृहीत्वा ॥ ११ ॥ अथाभिमृशति । भूताय त्वा नारातयऽइति तद्यत एव गृह्णाति तदेवैतत्पुनराप्याययति ॥ २० ॥ अथ प्राङ्प्रेक्षते । स्वरभिविख्येषमिति परिवृतमिव वाऽएतदनो भवति तदस्यैतच्चक्षुः पाप्मगृहीतमिव भवति यज्ञो वै स्वरुर्देवाः सूर्यस्तत्स्वरेवैतदतोऽभिविपश्यति ॥ २१ ॥ अथावरोहति । दृꣳहन्तां दुर्याः पृथिव्यामिति गृहा वै दुर्यास्ते हेत ईश्वरो गृहा यजमानस्य योऽस्यैषोऽधर्युर्यज्ञेन चरति तं प्रयन्तमनु प्रच्योतोस्तस्येश्वरः कुलं विद्रोब्योस्तानेवैतदस्यां पृथिव्यां दृꣳहति तथा नानुप्रच्यवन्ते तथा न विद्रोभन्ते तस्मादाह दृꣳहन्तां दुर्याः पृथिव्या-

मित्यथ प्रैत्युर्वन्तरिक्षमन्वेमीति सोऽसावेव बन्धुः ॥२२॥ स यस्य गार्हपत्ये हवीꣳषि श्रपयन्ति । गार्हपत्ये तस्य पात्राणि सꣳसादयन्ति ज्ञघनेनो तर्हि गार्हपत्यꣳ सादयेय्यस्याहवनीये हवीꣳषि श्रपयन्त्याहवनीये तस्य पात्राणि सꣳसादयन्ति ज्ञघनेनो तर्ह्याहवनीयꣳ सादयेत्पृथिव्यास्त्वा नाभौ सादयामीति मध्यं वै नाभिर्मध्यमभयं तस्मादाह पृथिव्यास्त्वा नाभौ सादयामीत्यदित्याऽउपस्थऽइत्युपस्थऽइवैनदभार्षुरिति वाऽआहुर्यत्सुगुप्तं गोपायन्ति तस्मादाहादित्याऽउपस्थऽइत्यग्ने हव्यꣳ रक्षेति तदग्नये चैवैतद्धविः परिददाति गुप्त्याऽअस्यै च पृथिव्यै तस्मादाहाग्ने हव्यꣳ रक्षेति ॥२३॥ ब्राह्मणम् ॥२॥

पवित्रे करोति । पवित्रे स्थो वैष्णव्याविति यज्ञो वै विष्णुर्यज्ञिये स्थ इत्येवैतदाह ॥१॥ ते वै द्वे भवतः । अयं वै पवित्रं योऽयं पवते सोऽयमेक-इवैव पवते सोऽयं पुरुषेऽन्तः प्रविष्टः प्राङ् प्रत्यङ् ताविमौ प्राणोदानौ तदेतस्यैवानुमात्रां तस्माद्वे भवतः ॥२॥ अथोऽअपि त्रीणि स्युः । व्यानो हि तृतीयो द्वे न्वेव भवतस्ताभ्यामेताः प्रोक्षणीरुत्पूय ताभिः प्रोक्षति तथ्यदेताभ्यामुत्पुनाति ॥३॥ वृत्रो ह वाऽइदꣳ सर्वं वृत्वा शिश्ये । यदिदमन्तरेण द्यावापृथिवी स यदिदꣳ सर्वं वृत्वा शिश्ये तस्माद्वृत्रो नाम ॥४॥ तमिन्द्रो ज्ञघान । स हतः पूतिः सर्वत एवापो ऽभिप्र सुस्राव सर्वतइव ह्ययꣳ समुद्रस्तस्माद्धैका आपो बीभत्साञ्चक्रिरे ता ऽउपर्युपर्यतिपुप्लुविरेऽत इमे दर्भास्ता हैता अनापूयिता आपोऽस्ति वाऽइतरासु सꣳसृष्टमिव यदेना वृत्रः पूतिरभिप्रास्रवत्तद्वासाभिताभ्यां पवित्राभ्यामपहत्यथ मेध्याभिरेवाद्भिः प्रोक्षति तस्माद्वाऽएताभ्यामुत्पुनाति ॥५॥ स उत्पुनाति । सवितुर्वः प्रसवऽउत्पुनाम्यच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिरिति सविता वै देवानां प्रसविता तत्सवितुप्रसूत एवैतदुत्पुनात्यच्छिद्रेण पवित्रेणेति यो वाऽअयं पवतऽएषोऽच्छिद्रं पवित्रमेतेनैतदाह सूर्यस्य रश्मिभिरित्येते वाऽउत्पवितारो

यत्सूर्यस्य रश्मयस्तस्मादाह सूर्यस्य रश्मिभिरिति ॥ ६ ॥ ताः सव्ये पाणौ कृत्वा । दक्षिणेनोदिङ्गयत्युपस्तौत्येवैना एतन्मकृयत्येव देवीरापोऽग्रेगुवोऽग्रेपुव इति देव्यो ह्यापस्तस्मादाह देवीराप इत्यग्रेगुव इति ता यत्समुद्रं गच्छन्ति तेनाग्रेगुवोऽग्रेपुव इति ता यत्प्रथमाः सोमस्य राज्ञो भक्षयन्ति तेनाग्रेपुवोऽग्रऽइममग्न यज्ञं नयताग्रे यज्ञपतिꣳ सुधातुं यज्ञपतिं देवयुवमिति साधु यज्ञꣳ साधु यजमानमित्येवैतदाह ॥ ७ ॥ युष्मा इन्द्रोऽवृणीत वृत्रतूर्यऽइति । एता उ ह्येन्द्रोऽवृणीत वृत्रेण स्पर्धमान एताभिर्ह्येनमकृंस्तस्मादाह युष्मा इन्द्रोऽवृणीत वृत्रतूर्यऽइति ॥ ८ ॥ यूयमिन्द्रमवृणीध्वं वृत्रतूर्यऽइति । एता उ ह्येन्द्रमवृणत वृत्रेण स्पर्धमानमेताभिर्ह्येनमकृंस्तस्मादाह यूयमिन्द्रमवृणीध्वं वृत्रतूर्यऽइति ॥ ९ ॥ प्रोक्षिता स्थेति । तदेताभ्यो निक्रुत्यꣳ ह्यविः प्रोक्षत्येको वै प्रोक्षणस्य बन्धुर्मेध्यमेवैतत्करोति ॥ १० ॥ स प्रोक्षति अग्नये त्वा जुष्टं प्रोक्षामीति तद्यस्यै देवतायै ह्यविर्भवति तस्यै मेध्यं करोत्येवमेव यथापूर्वꣳ ह्यवीꣳषि प्रोक्ष्य ॥ ११ ॥ अथ यज्ञपात्राणि प्रोक्षति । दैव्याय कर्मणे शुन्धध्वं देवयज्यायाऽइति दैव्याय हि कर्मणे शुन्धति देवयज्यायै यद्वोऽशुद्धाः पराजघ्नुरिदं वस्तुकुन्धामीति तद्यदेवैषामत्राशुद्धस्तद्धा वान्यो वामेध्यः कश्चित्पराकृन्ति तदेवैषामेतदद्भिर्मेध्यं करोति तस्मादाह यद्वोऽशुद्धाः पराजघ्नुरिदं वस्तुकुन्धामीति ॥ १२ ॥ ब्राह्मणम् ॥ ३ ॥

अथ कृष्णाजिनमादत्ते । यज्ञस्यैव सर्वत्वाय यज्ञो ह देवेभ्योऽपचक्राम स कृष्णो भूत्वा चचार तस्य देवा अनुविद्य त्वचमेवावहायाजक्रुः ॥ १ ॥ तस्य यानि शुक्लानि च कृष्णानि च लोमानि । तान्यृचां च साम्नां च रूपं यानि शुक्लानि तानि साम्नाꣳ रूपं यानि कृष्णानि तान्यृचां यदि वेतरथा यान्येव कृष्णानि तानि साम्नाꣳ रूपं यानि शुक्लानि तान्यृचां यान्येव बभ्रूणीव ह्यरीणि तानि यजुषाꣳ रूपम् ॥ २ ॥ सैषा त्रयी विद्या यज्ञः । तस्या एतद्धिल्पमेष वर्णस्तद्यत्कृष्णाजिनं भवति यज्ञस्यैव

सर्वत्वाय तस्मात्कृष्णाजिनमधि दीक्षन्ते यज्ञस्यैव सर्वत्वाय तस्माद्ध्यवकृननमधिपेषणं भवत्यस्कन्नꣳ हविरसदिति तद्यदेवात्र तण्डुलो वा पिष्टं वा स्कन्दात्तद्यज्ञे यज्ञः प्रतितिष्ठादिति तस्माद्ध्यवकृननमधिपेषणं भवति ॥ ३ ॥ अथ कृष्णाजिनमादत्ते । शर्मासीति चर्म वाऽएतत्कृष्णस्य तदस्य तन्मानुषꣳ शर्म देवत्रा तस्मादाह शर्मासीति तद्वधूनोत्यवधूतꣳ रक्षोऽवधूता अरातय इति तन्नाष्ट्रा एवैतद्रक्षाꣳस्यतोऽपहत्यतिनत्येव पात्राण्यवधूनोति यद्यस्यामेध्यमभूत्तद्यस्यैतद्वधूनोति ॥ ४ ॥ तत्प्रतीचीनग्रीवमुपस्तृणाति । अदित्यास्त्वगसि प्रति त्वादितिर्वेत्त्वितीयं वै पृथिव्यदितिस्तस्या अस्यै त्वग्यदिदमस्यामधि किंच तस्मादाहादित्यास्त्वगसीति प्रति त्वादितिर्वेत्त्विति प्रति हि स्वः सं जानीते तत्संज्ञामेवैतत्कृष्णाजिनाय च वदति नेदन्योऽन्यꣳ हिनसातऽइत्यभिनिहितमेव सव्येन पाणिना भवति ॥ ५ ॥ अथ दक्षिणेनोलूखलमाहरति । नेदिह पुरा नाष्ट्रा रक्षाꣳस्याविशानिति ब्राह्मणो हि रक्षसामपहन्ता तस्मादभिनिहितमेव सव्येन पाणिना भवति ॥ ६ ॥ अथोलूखलं निदधाति । अद्रिरसि वानस्पत्यो ग्रावासि पृथुबुध्न इति वा तद्यथैवादः सोमꣳ राजानं ग्रावभिरभिषुण्वन्त्येवमेवैतदुलूखलमुसलाभ्यां दृषदुपलाभ्याꣳ हविर्यज्ञमभिषुणोत्यद्रय इति वै तेषामेकं नाम तस्मादाहाद्रिरसीति वानस्पत्य इति वानस्पत्यो ह्येष ग्रावासि पृथुबुध्न इति ग्रावा ह्येष पृथुबुध्नो ह्येष प्रति त्वादित्यास्त्वग्वेत्त्विति तत्संज्ञामेवैतत्कृष्णाजिनाय च वदति नेदन्योऽन्यꣳ हिनसात ऽइति ॥ ७ ॥ अथ हविरावपति । अग्नेस्तनूरसि वाचो विसर्जनमिति यज्ञो हि तेनाग्नेस्तनूर्वाचो विसर्जनमिति यां वाऽअमूꣳ हविर्यक्षीष्यन्वाचं यक्ष्यत्र वै तां विसृजते तद्यदेतामत्र वाचं विसृजतऽएष हि यज्ञ उलूखले प्रत्यष्ठादेष हि प्रासारि तस्मादाह वाचो विसर्जनमिति ॥ ८ ॥ स यदिदं पुरा मानुषीं वाचं व्याहरेत् । तत्रो वैष्णावीमृचं वा यजुर्वा जपेद्यज्ञो वै विष्णुस्तद्यज्ञं पुनरारभते तस्यो

ह्येषा प्रायश्चित्तिर्देववीतये त्वा गृह्णामीति देवानवदित्यु हि हविर्गृह्यते ॥ ९ ॥ अथ मुसलमादत्ते । बृहद्भावासि वानस्पत्य इति बृहद्भावा ह्येष वानस्पत्यो ह्येष तद्वदधाति स इदं देवेभ्यो हविः शमीष्व सुशमि शमीष्वेति स इदं देवेभ्यो हविः सꣳस्कुरु साधुसꣳस्कृतꣳ सꣳस्कुर्वित्येवैतदाह ॥ १० ॥ अथ हविष्कृतमुद्वादयति । हविष्कृदेहि हविष्कृदेहीति वाग्वै हविष्कृद्वाचमेवैतद्विसृजते वागु वै यज्ञस्तद्यज्ञमेवैतत्पुनरुपह्वयते ॥ ११ ॥ तानि वाऽएतानि । चत्वारि वाच एहीति ब्राह्मणस्यागच्छाद्रवेति वैश्यस्य च राजन्यबन्धोश्चाधावेति शूद्रस्य स यदेव ब्राह्मणस्य तदाह्वैतद्वि यज्ञियतममेतद्धु ह वै वाचः शान्ततमं यदेहीति तस्मादेहीत्येव ब्रूयात् ॥ १२ ॥ तद्ध स्मैतत्पुरा । ज्ञायैव हविष्कृदुपोत्तिष्ठति तदिदमप्येतर्हि य एव कश्चोपोत्तिष्ठति स यत्रैष हविष्कृतमुद्वादयति तदेको दृषदुपले समाहन्ति तद्यदेतामत्र वाचं प्रत्युद्वादयन्ति ॥ १३ ॥ मनोर्ह वाऽऋषभ आस । तस्मिन्नसुरघ्नी सपत्नघ्नी वाक्प्रविष्टास तस्य ह स्म श्वसथाद्रवथादसुररक्षसानि मृघ्यमानानि यन्ति ते ह्यसुराः समूदिरे पापं वत नोऽयमृषभः सचते कथं न्विमं दभ्नुयामेति किलाताकुलीऽइति ह्यसुरब्रह्मावासतुः ॥ १४ ॥ तौ होचतुः । श्रद्धादेवी वै मनुरावं नु वेदावेति तौ ह्यागत्योचतुर्मनो यावयाव वेति केनेत्यनेनर्षभेणेति तथेति तस्यालब्धस्य सा वागपचक्राम ॥ १५ ॥ सा मनोरेव ज्ञायां मनावीं प्रविवेश । तस्यै ह स्म यत्र वदन्त्यै शृण्वन्ति ततो ह स्मैवासुररक्षसानि मृघ्यमानानि यन्ति ते ह्यसुराः समूदिरेऽयतो वै नः पापीयः सचते भूयो हि मानुषी वाग्वदतीति किलाताकुली ह्येवोचतुः श्रद्धादेवो वै मनुरावं न्वेव वेदावेति तौ ह्यागत्योचतुर्मनो यावयाव वेति केनेत्यनयैव ज्ञायेयेति तथेति तस्याऽआलब्धायै सा वागपचक्राम ॥ १६ ॥ सा यज्ञमेव यज्ञपात्राणि प्रविवेश । ततो हैनां न शेकतुर्निर्हर्तुꣳ सैषासुरघ्नी वागुद्वदति स यस्य हैवं विदुष एतामत्र वाचं प्रत्युद्वादयन्ति पापीयाꣳसो हैवास्य सपत्ना भव-

न्ति ॥ १७ ॥ स समाक्रान्ति । कुक्कुटोऽसि मधुजिह्व इति मधुजिह्वो वै स देवेभ्य आसीद्विषजिह्वोऽसुरेभ्यः स यो देवेभ्य आसीः स न एधीत्येवैतदाहैषमूर्जमावद त्वया वयꣳ संघातꣳसंघातं जेष्मेति नात्र तिरोहितमिवास्ति ॥ १८ ॥ अथ शूर्पमादत्ते । वर्षवृद्धमसीति वर्षवृद्धꣳ ह्येतद्यदि नडानां यदि वेणूनां यदीषीकाणां वर्षमुह्येवैता वर्धयति ॥ १९ ॥ अथ हविर्निर्वपति । प्रति त्वा वर्षवृद्धं वेत्विति वर्षवृद्धा ऽ ह्येवैते यदि व्रीहयो यदि यवा वर्षमुह्येवैतान्वर्धयति तत्संज्ञामेवैतद्रूपाय च वदति नेदन्योऽन्यꣳ हिनसातऽइति ॥ २० ॥ अथ निष्पुनाति । परापूतꣳ रक्षः परापूता अरातय इत्यथ तुषान्प्रहृत्यपहतꣳ रक्ष इति तन्नाष्ट्रा एवैतद्रक्षाꣳस्यतोऽपहन्ति ॥ २१ ॥ अथापविनक्ति । वायुर्वो विविनक्त्वित्ययं वै वायुर्योऽयं पवतऽएष वाऽइदꣳ सर्वं विविनक्ति यदिदं किंच विविच्यते तदेनानिष एवैतद्विविनक्ति स यदैतऽएतत्प्राप्नुवन्ति यत्रैनानध्यपविनक्ति ॥ २२ ॥ अथानुमन्त्रयते । देवो वः सविता हिरण्यपाणिः प्रतिगृभ्णात्वच्छिद्रेण पाणिना सुप्रतिगृहीता असन्नित्यथ त्रिः फलीकरोति त्रिवृद्धि यज्ञः ॥ २३ ॥ तद्धैके देवेभ्यः शुन्धध्वं देवेभ्यः शुन्धध्वमिति फलीकुर्वन्ति तदु तथा न कुर्यादादिष्टं वाऽएतद्देवतायै हविर्भवत्यथैतद्वैश्वदेवं करोति यदाह देवेभ्यः शुन्धध्वमिति तत्समदं करोति तस्मादु तूष्णीमेव फलीकुर्यात् ॥ २४ ॥ ब्राह्मणम् ॥ ४ ॥ अध्यायः ॥ १ ॥

स वै कपालान्येवान्यतर उपदधाति । दृषदुपलेऽन्यतरस्तद्वाऽएतदुभयꣳ सꣳ क्रियते तद्यदेतदुभयꣳ सꣳ क्रियते ॥ १ ॥ शिरो ह वाऽएतद्यज्ञस्य यत्पुरोडाशः स यान्येवेमानि शीर्ष्णः कपालान्येतान्येवास्य कपालानि मस्तिष्कऽएव पिष्टानि तद्वाऽएतदेकमङ्गमेकꣳ सꣳ करवाव समानं करवावेति तस्माद्वाऽएतदुभयꣳ सꣳ क्रियते ॥ २ ॥ स यः कपालान्युपदधाति । स उपवेषमादत्ते धृष्टिरसीति स यदेनेनाग्निं धृष्णुवोपचरति तेन धृष्टिरथ यदेनेन यज्ञ उपालभत उपैव वाऽएनेनैतद्वेवेष्टि

तस्माद्उपवेषो नाम ॥३॥ तेन प्राचोऽङ्गारानुद्वृहति । अपाग्ने अग्निमामादं जहि निष्क्रव्याद्ꣳ सेधेत्ययं वाऽआमाद्येनेदं मनुष्याः पक्वाशन्त्यथ येन पुरुषं दहन्ति स क्रव्यादितावेवैतद्भावतोऽपहन्ति ॥४॥ अथाङ्गारमास्कौति । आ देवयज्ञं वहेति यो देवयाट्तस्मिन्हवीꣳषि अपयाम तस्मिन्यज्ञं तनवामहाऽइति तस्माद्वाऽआस्कौति ॥५॥ तं मध्यमेन कपालेनाभ्युपदधाति । देवा ह वै यज्ञं तन्वानास्तेऽसुररक्षोभ्य आसङ्गाद्बिभयांचक्रुर्नोऽधस्तान्नाष्ट्रा रक्षाꣳस्युपोत्तिष्ठानित्यग्निर्हि रक्षसामपहन्ता तस्मादेवमुपदधाति तथ्यदेष एव भवति नान्य एष हि यज्ञमुष्कृतो मेध्यस्तस्मान्मध्यमेन कपालेनाभ्युपदधाति ॥६॥ स उपदधाति । ध्रुवमसि पृथिवीं दृꣳहेति पृथिव्या एव त्वेवैतद्देव दृꣳहत्येतेनैव द्विषन्तं भ्रातृव्यमवबाधते ब्रह्मवनि त्वा क्षत्रवनि सजातवन्युपदधामि भ्रातृव्यस्य वधायेति ब्रह्मा वै यज्ञमाशीस्तद्ब्रह्म च क्षत्रं चाशास्तेऽउभे वीर्ये सजातवनीति भूमा वै सजातास्तद्भूमानमाशास्तेऽउपदधामि भ्रातृव्यस्य बधायेति यदि नाभिचरेद्यद्यु अभिचरेदमुष्य बधायेति ब्रूयादभिनिहितमेव सव्यस्य पाणेरङ्गुल्या भवति ॥७॥ अथाङ्गारमास्कौति । नेदिहु पुरा नाष्ट्रा रक्षाꣳस्याविशानिति ब्राह्मणो हि रक्षसामपहन्ता तस्मादभिनिहितमेव सव्यस्य पाणेरङ्गुल्या भवति ॥८॥ अथाङ्गारमधूहति । अग्ने ब्रह्म गृभ्णीष्वेति नेदिहु पुरा नाष्ट्रा रक्षाꣳस्याविशानित्यग्निर्हि रक्षसामपहन्ता तस्मादेनमधूहति ॥९॥ अथ यत्पश्चात्तदुपदधाति । धरुणमस्यन्तरिक्षं दृꣳहेत्यन्तरिक्षस्यैव त्वेवैतद्देव दृꣳहत्येतेनैव द्विषन्तं भ्रातृव्यमवबाधते ब्रह्मवनि त्वा क्षत्रवनि सजातवन्युपदधामि भ्रातृव्यस्य बधायेति ॥१०॥ अथ यत्पुरस्तात्तदुपदधाति । धर्त्रमसि दिवं दृꣳहेति दिव एव त्वेवैतद्देव दृꣳहत्येतेनैव - - बधायेति ॥११॥ अथ यद्दक्षिणतस्तदुपधाति । विश्वाभ्यस्त्वाशाभ्य उपदधामीति स यदिमांल्लोकानति चतुर्थमस्ति वा न वा तेनैवैतद्द्विषन्तं भ्रातृव्यमवबाधतेऽनड्वा वै तथ्यदिमांल्लोकानति चतुर्थमस्ति वा

न वानड्वो तद्यद्विश्वा आशास्तस्मादाह विश्वाभ्यस्त्वाशाभ्य उपदधामीति तूष्णीं वै-
वेतराणि कपालान्युपदधाति चित स्थोर्ध्वचित इति वा ॥ १२ ॥ अथाङ्गारैरभ्यूह-
ति । भृगूणामङ्गिरसां तपसा तप्यधमित्येतद्वै तेजिष्ठं तेजो यद्भृग्वङ्गिरसाꣳ सुतप्ता-
न्यसन्निति तस्मादेनमभ्यूहति ॥ १३ ॥ अथ यो दृषदुपले उपदधाति । स कृष्णाजि-
नमादत्ते शर्मासीति तदवधूनोत्यवधूताꣳ रक्षोऽवधूता अरातय इति सोऽसावेव
बन्धुस्तत्प्रतीचीनग्रीवमुपस्तृणात्यदित्यास्त्वगसि प्रति त्वादितिर्वेत्विति सोऽसावेव
बन्धुः ॥ १४ ॥ अथ दृषदमुपदधाति । धिषणासि पर्वती प्रति त्वादित्यास्त्वग्वेत्विति
धिषणा हि पर्वती हि प्रति त्वादित्यास्त्वग्वेत्विति तत्संज्ञामेवैतत्कृष्णाजिनाय च
वदति नेदन्योऽन्यꣳ हिनसाव इतीयमेवैषा पृथिवी रूपेण ॥ १५ ॥ अथ शम्यामु-
दीचीनाग्रामुपदधाति । दिव स्कम्भनीरसीत्यन्तरिक्षमेव रूपेणान्तरिक्षेण हीमे द्या-
वापृथिवी विष्टब्धे तस्मादाह दिव स्कम्भनीरसीति ॥ १६ ॥ अथोपलामुपदधाति ।
धिषणासि पार्वतेयी प्रति त्वा पर्वती वेत्विति कनीयसी ह्येषा डुह्यतेव भवति
तस्मादाह पार्वतेयीति प्रति त्वा पर्वती वेत्विति प्रति हि स्वः संजानीते तत्संज्ञा-
मेवैतद्रूपदृषदुपलाभ्यां वदति नेदन्योऽन्यꣳ हिनसातऽइति द्यौरेवैषा रूपेण कनू-
ऽएव दृषदुपले स्निह्येव शम्या तस्माद्दृष्यया समाहन्ति स्निह्यया हि वदति ॥ १७ ॥
अथ हविरधिवपति । धान्यमसि धिनुहि देवानिति धान्यꣳ हि देवान्धिनवदित्यु
हि हविर्गृह्यते ॥ १८ ॥ अथ पिनष्टि । प्राणाय त्वोदानाय त्वा व्यानाय त्वा दीर्घा-
मनु प्रसितिमायुषे धामिति प्रोहति देवो वः सविता हिरण्यपाणिः प्रतिगृभ्णात्व-
च्छिद्रेण पाणिना चक्षुषे त्वेति ॥ १९ ॥ ॥ शतम् १०० ॥ ॥ तद्यदेवं पिनष्टि । जीवं
वै देवानाꣳ हविरमृतममृतानामथैतदुलूखलमुसलाभ्यां दृषदुपलाभ्याꣳ हविर्यज्ञं
प्रति ॥ २० ॥ स यदाह । प्राणाय त्वोदानाय त्वेति तत्प्राणोदानौ दधाति व्यानाय
त्वेति तद्व्यानं दधाति दीर्घामनु प्रसितिमायुषे धामिति तदायुर्दधाति देवो वः स-

विता क्रिरण्यपाणिः प्रतिगृभ्णात्वच्छिद्रेण पाणिना सुप्रतिगृहीतान्यसन्निति चनुषे वेति तच्चनुर्दधात्येतानि वै जीवतो भवत्येवमु क्रैतज्जीवमेव देवानाꣳ हविर्भवत्यमृतममृतानां तस्मादेवं पिनष्टि पिꣳषन्ति पिष्टान्यभीन्धते कपालानि ॥ २१ ॥ अथैक आज्यं निर्वपति । यद्वाऽआदिष्टं देवतायै हविर्गृह्यते यावद्देवत्यं तद्भवति तदितरेण यजुषा गृह्णाति न वाऽएतत्कस्यै चन देवतायै हविर्गृह्णन्नादिशति यदाज्यं तस्मादनिरुक्तेन यजुषा गृह्णाति मरुतां पयोऽसीति मरुत्वꣳ इति ह वाऽएतासामेके नाम यद्धवां तासां वाऽएतत्पयो भवति तस्मादाह मरुतां पयोऽसीत्येवमु ह्यस्यैतत्खलु यजुषैव गृहीतं भवति तस्माद्वैवाह मरुतां पयोऽसीति ॥ २२ ॥ ब्राह्मणम् ॥ ५ [२. १.] ॥

पवित्रवति संवपति । पात्र्यां पवित्रेऽअवधाय देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याꣳ संवपामीति सोऽसावेवैतस्य यजुषो बन्धुः ॥ १ ॥ अथान्तर्वेद्युपविशति । अथैक उपसर्जनीभिरिति ता आनयति ताः पवित्राभ्यां प्रतिगृह्णाति समाप ओषधीभिरिति सꣳ ह्येतदाप ओषधिभिरिताभिः पिष्टाभिः संगच्छन्ते समोषधयो रसेनेति सꣳ ह्येतदोषधयो रसेनैताः पिष्टा अद्भिः संगच्छन्तऽआपो ह्येतासाꣳ रसः सꣳ रेवतीर्जगतीभिः पृच्यन्तामिति रेवत्य आपो जगत्य ओषधयस्ता ꣳ ह्येतद्भिः संपृच्यन्ते सं मधुमतीर्मधुमतीभिः पृच्यन्तामिति सꣳ रसवत्यो रसवतीभिः पृच्यन्तामित्येवैतदाह ॥ २ ॥ अथ संयौति । जनयत्यै त्वा संयौमीति यथा श्रियेऽन्नाद्यायेमाः प्रजा यजमानाय यꣳहेदेवं वै तत्संयौत्यधिवर्द्धयन्नु वै संयौति यथा वाऽअधिवृक्तोऽग्नेरधि जायतेवं वै तत्संयौति ॥ ३ ॥ अथ द्वेधा करोति । यदि द्वे हविषी भवतः पौर्णमास्यां वै द्वे हविषी भवतः स यत्र पुनर्न सꣳहरिष्यंत्स्यात्तदभिमृशतीदमग्नेरिदमग्नीषोमयोरिति नाना वाऽएतद्ये हविर्गृह्णन्ति तत्सꣳहवघ्नन्ति तत्सꣳ पिꣳषन्ति तत्पुनर्नाना करोति तस्मादेवमभिमृशत्यधिवृणक्त्येवैष पु-

रोडाशमधिश्रयत्यसावाज्यम् ॥ ४ ॥ तद्वाऽएतत्। उभयꣳ सꣳ क्रियते तद्यदेतदुभयꣳ सꣳ क्रियतेऽर्धो ꣳ वाऽएष आत्मनो यज्ञस्य यदाज्यमर्धो यदिꣳ हविर्भवति स यश्चासावर्धो य ऽ चायमर्धस्ता ऽभावग्निं गमयावेति तस्माद्वाऽएतदुभयꣳ सꣳ क्रियतऽएवमु ꣳ हैष आत्मा यज्ञस्य संधीयते ॥ ५ ॥ सोऽसावाज्यमधिश्रयति। इषे वेति वृष्ट्यै तदाꣳह यदाꣳहैषे वेति तत्पुनरुद्वासयत्यूर्ज्जे वेति यो वृष्टादूर्य्यसो ज्ञायते तस्मै तदाꣳह ॥ ६ ॥ अथ पुरोडाशमधिवृणक्ति। घर्मोऽसीति यज्ञमेवैतत्करोति यथा घर्मं प्रवृंज्यादेवं प्रवृणक्ति विश्वायुरिति तदायुर्दधाति ॥ ७ ॥ तं प्रथयति। उरुप्रथा उरु प्रथस्वेति प्रथयत्येवैनमेतदुरु ते यज्ञपतिः प्रथतामिति यजमानो वै यज्ञपतिस्तस्य यजमानायैवैतदाशिषमाशास्ते ॥ ८ ॥ तं न सत्रा पृथुं कुर्यात्। मानुषꣳ ꣳ हि कुर्याद्यत्पृथुं कुर्याद्बृहꣳ वै तद्यज्ञस्य यन्मानुषं नेद्बृहꣳ यज्ञे करवाणीति तस्मान्न सत्रा पृथुं कर्यात् ॥ ९ ॥ अश्वशफमात्रं कुर्यादित्यु ꣳहैकऽआहुः। कस्तद्वेद यावानश्वशफो यावत्तमेव स्वयं मनसा न सत्रा पृथुं मन्यैतेवं कुर्यात् ॥ १० ॥ तमद्भिरभिमृशति। सकृद्वा त्रिर्वा तद्यदेवास्यात्रावघ्नन्तो वा पिꣳषन्तो वा क्षिण्वन्ति वा वि वा वृꣳहन्ति शान्तिरापस्तद्भिः शान्त्या शमयति तद्भिः संदधाति तस्मादद्भिरभिमृशति ॥ ११ ॥ सोऽभिमृशति। अग्निष्टे त्वचं मा क्षिꣳसीदित्यग्निना वाऽएनमेतदभितप्स्यन्भवत्येष ते त्वचं मा क्षिꣳसीदित्येवैतदाꣳह ॥ १२ ॥ तं पर्यग्निं करोति। अक्षिद्रमेवैनमेतदग्निना परिगृह्णाति नेदेनं नाष्ट्रा रक्षाꣳसि प्रमृशानित्यग्निर्हि रक्षसामपहन्ता तस्मात्पर्यग्निं करोति ॥ १३ ॥ तꣳ अपयति। देवस्त्वा सविता अपयत्विति न वाऽएतस्य मनुष्यः अपयिता देवो ꣳहैष तदेनं देव एव सविता अपयति वर्षिष्ठेऽधि नाकऽइति देवत्रो एतदाꣳह यदाꣳह वर्षिष्ठेऽधि नाकऽइति तमभिमृशति सृतं वेदानीति तस्माद्वाऽअभिमृशति ॥ १४ ॥ सोऽभिमृशति। मा भेर्मा संविक्था इति मा त्वं भेषीर्मा संविक्था यद्वाꣳहमानुषꣳ सन्तं मानुषोऽभिमृशामीत्येवैत-

दारु ॥ १५ ॥ यदा मृतोऽथाभिवासयति । नेदेनमुपरिष्टान्नाष्ट्रा रक्षाꣳस्यवपश्यानिति नेद्वेव नग्न-इव मुषित-इव शयाताऽइत्यु चैव तस्माद्वाऽअभिवासयति ॥ १६ ॥ सोऽभिवासयति । अतमेरुर्यज्ञोऽतमेरुर्यजमानस्य प्रजा भूयादिति नेदेतदनु यज्ञो वा यजमानो वा ताम्याय्यदिदमभिवासयामीति तस्मादेवमभिवासयति ॥ १७ ॥ अथ पात्रीनिर्णेजनम् । अङ्गुलिप्रणेजनमात्येभ्यो निनयति तथ्यदात्येभ्यो निनयति ॥ १८ ॥ ब्राह्मणम् ॥ ६ [२. २.] ॥ प्रथमः प्रपाठकः ॥ कण्डिकासंख्या १२१ ॥

चतुर्धाविहितो ह वाऽअग्नेऽग्निरास । स यमग्नेऽग्निꣳ होत्राय प्रावृणात स प्राधन्वꣳ द्वितीयं प्रावृणात स प्रैवाधन्वꣳ तृतीयं प्रावृणात स प्रैवाधन्वद्य योऽयमेतर्ह्यग्निः स भीषा निलिल्ये सोऽपः प्रविवेश तं देवा अनुविद्य सहसैवाद्य आनिन्युः सोऽपोऽभितिष्ठेवावधूता स्थ या अप्रपदनꣳ स्थ याभ्यो वो मामकामं नयन्तीति तत आत्याः सम्बभूवुस्त्रितो द्वित एकतः ॥ १ ॥ तऽइन्द्रेण सह चेरुः । यथेदं ब्राह्मणो राज्ञानमनुचरति स यत्र त्रिशीर्षाणं त्वाष्ट्रं विश्वरूपं जघान तस्य हैतेऽपि बध्यस्य विदाञ्चक्रुः शश्वद्वैनं त्रित एव जघानात्यह तदिन्द्रोऽमुच्यत देवो हि सः ॥ २ ॥ त उ हैतऽऊचुः । उपैवेमऽएनो गछतु योऽस्य बध्यस्यावेदिषुरिति किमिति यज्ञ एवैषु मृष्टामिति तदेषितयज्ञो मृष्टे यदेभ्यः पात्रीनिर्णेजनमङ्गुलिप्रणेजनं निनयन्ति ॥ ३ ॥ तऽउ ह्यात्या ऊचुः । अत्येव वयमिदमस्मत्परो नयामेति कमभीति य एवादक्षिणेन हविषा यजाताऽइति तस्मान्नादक्षिणेन हविषा यजेतात्येषु ह यज्ञो मृष्ट आत्या उ ह तस्मिन्मृजते योऽदक्षिणेन हविषा यजते ॥ ४ ॥ ततो देवाः । एतां दर्शपूर्णमासयोर्दक्षिणामकल्पन्यदन्वाहार्यं नेददक्षिणꣳ हविरसदिति तन्नाना निनयति तथैभ्योऽसमदं करोति तदभितपति तथैषाꣳ मृतं भवति स निनयति त्रिताय वा द्विताय वैकताय वेति पशुर्ह वाऽएष आलभ्यते यत्पुरोडाशः ॥ ५ ॥ पुरुषꣳ ह वै देवाः । अग्रे पशुमालेभिरे तस्यालब्धस्य मेधो

ऽपचक्राम सोऽश्वं प्राविशत्तेऽश्वमालभन्त तस्यालब्धस्य मेधोऽपक्रामत स गां प्राविशत्ते गामा° सोऽविं प्राविशत्तेऽविमा°--°म सोऽजं प्राविशत्तेऽजमालभन्त तस्यालब्धस्य मेधोऽपचक्राम ॥ ६॥ स इमां पृथिवीं प्राविशत्। तं खनन्त इवान्वीषुस्तमन्वविन्दंस्तावेमौ व्रीहियवौ तस्माद्येतावेतर्हि खनन्त इवैवानुविन्दन्ति स यावद्वीर्यवद्ध वाऽअस्यैते सर्वे पशव आलब्धाः स्युस्तावद्वीर्यवद्धास्य हविरेव भवति य एवमेतद्वेदात्रो सा सम्पद्यदाक्तः पाङ्क्तः पशुरिति ॥ ७॥ यदा पिष्टान्यथ लोमानि भवन्ति। यदाप आनयत्यथ त्वग्भवति यदा संयौत्यथ माꣳसं भवति संतत इव हि स तर्हि भवति संततमिव हि माꣳसं यदा शृतोऽथास्थि भवति दारुण इव हि स तर्हि भवति दारुणमित्यस्थ्यथ यदुद्वासयिष्यन्नभिघारयति तं मज्जानं दधात्येषो सा सम्पद्यदाक्तः पाङ्क्तः पशुरिति ॥ ८॥ स यं पुरुषमालभत। स किम्पुरुषोऽभवद्यावश्वं च गां च तौ गौरश्च गवयश्चाभवतां यमविमालभत स उष्ट्रोऽभवद्यमजमालभत स शरभोऽभवत्तस्मादेतेषां पशूनां नाशितव्यमपक्रान्तमेधा ह्येते पशवः ॥ १॥ ब्राह्मणम् ॥ १ [२. ३.]॥

इन्द्रो ह यत्र वृत्राय वज्रं प्रजहार। स प्रहृतश्चतुर्धाऽभवत्तस्य स्फ्यस्तृतीयं वा यावद्वा यूपस्तृतीयं वा यावद्वा रथस्तृतीयं वा यावद्वाथ यत्र प्राहरत्तद्वज्रकलोऽशीर्यत स पतित्वा शरोऽभवत्तस्माच्छरो नाम यदशीर्यतैवमु स चतुर्धा वज्रोऽभवत् ॥ १॥ ततो द्वाभ्यां ब्राह्मणा यज्ञे चरन्ति द्वाभ्याꣳ राजन्यबन्धवः संव्यधे यूपेन च स्फ्येन च ब्राह्मणा रथेन च शरेण च राजन्यबन्धवः ॥ २॥ स यत्स्फ्यमादत्ते। यथैव तदिन्द्रो वृत्राय वज्रमुदयच्छदेवमेवैष एतं पाप्मने द्विषते भ्रातृव्याय वज्रमुद्यच्छति तस्माद्वै स्फ्यमादत्ते ॥ ३॥ तमादत्ते। देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामाददेऽधरकृतं देवेभ्य इति सविता वै देवानां प्रसविता तत्सवितृप्रसूत एवैनमेतदादत्तेऽश्विनोर्बाहुभ्यामित्यश्विनावध्वर्यू तत्तयोरेव बाहुभ्या-

मादत्ते न स्वाभ्यां वज्रो वाऽएष तस्य न मनुष्ये भर्ता तमेताभिर्देवताभिरादत्ते ॥४॥ आददेऽधरकृतं देवेभ्य इति । अधरो वै यज्ञो यज्ञकृतं देवेभ्य इत्येवैतदाह तꣳ सव्ये पाणौ कृत्वा दक्षिणेनाभिमृश्य जपति सꣳश्यत्येवैनमेतन्मज्जपति ॥५॥ स जपति । इन्द्रस्य बाहुरसि दक्षिण इत्येष वै वीर्यवत्तमो य इन्द्रस्य बाहुर्दक्षिणास्तस्मादाहेन्द्रस्य बाहुरसि दक्षिण इति सकृत्सभृष्टिः शततेजा इति सकृत्सभृष्टिर्वै स वज्र आसीच्छततेजा यं तं वृत्राय प्राहरत्तमेवैतत्करोति ॥६॥ वायुरसि तिग्मतेजा इति । एतद्वै तेजिष्ठं तेजो यदयं योऽयं पवतऽएष क्षीमांल्लोकांस्तिर्यङ्नुपवते सꣳश्यत्येवैनमेतद्विषतो बध इति यदि नाभिचरेन्मन्युऽअभिचरेदमुष्य बध इति ब्रूयात्तेन सꣳशितेन नात्मानमुपस्पृशति न पृथिवीं नेदनेन वज्रेण सꣳशितेनात्मानं वा पृथिवीं वा हिꣳसानीति तस्मान्नात्मानमुपस्पृशति न पृथिवीम् ॥७॥ देवाश्च वाऽअसुराश्च । उभये प्राजापत्याः पस्पृधिरे ते ह स्म यद्देवा असुरान्जयन्ति ततो ह स्मैवैनान्पुनरुपोत्तिष्ठन्ति ॥८॥ ते ह देवा ऊचुः । जयामो वाऽअसुरांस्ततस्त्वेव नः पुनरुपोत्तिष्ठन्ति कथं न्वेवाननपजय्यं जयेमेति ॥९॥ स हाग्निरुवाच । उदश्वो वै नः पलाय्य मुच्यन्तऽइत्युदश्वो ह स्मैवैषां पलाय्य मुच्यन्ते ॥१०॥ स हाग्निरुवाच । अहमुत्तरतः पर्येष्याम्यथ यूयमित उपसꣳरोत्स्यथ ताꣳस्तꣳरुध्यैभिश्च लोकैरभिनिधास्यामो यदु चेमांल्लोकानति चतुर्थं ततः पुनर्न सꣳहास्यन्तऽइति ॥११॥ सोऽग्निरुत्तरतः पर्येत् । अथेमऽइत उपसमरुन्धंस्ताꣳस्तꣳरुध्यैभिश्च लोकैरभिन्यदधुर्यदु चेमांल्लोकानति चतुर्थं ततः पुनर्न समजिक्षत तदेतन्निदानेन यत्स्तम्बयजुः ॥१२॥ स योऽसावग्नीदुत्तरतः पर्येति । अग्निरेवैष निदानेन तानधर्युरेवैत उपसꣳरुणद्धि ताꣳस्तꣳरुध्यैभिश्च लोकैरभिनिदधाति यदु चेमांल्लोकानति चतुर्थं ततः पुनर्न संजिक्षते तस्मादप्येतर्ह्यसुरा न संजिक्षते येन क्षेत्रैवैनान्देवा अवाबाधन्त तेनैवैनानप्येतर्हि ब्राह्मणा यज्ञेऽवबाधन्ते ॥१३॥ य ऽएव

यजमानायारातीयति । यश्चैनं द्वेष्टि तमेवैतद्भिश्च लोकैरभिनिदधाति यदु चेमां-
ल्लोकानति चतुर्थमस्या एव सर्वꣳ हरत्यस्याꣳ ह्रीमे सर्वे लोकाः प्रतिष्ठिताः
किꣳ हि हरस्यदन्तरिक्षꣳ हरामि दिवꣳ हरामीति हरेत्तस्मादस्या एव सर्वꣳ हर-
ति ॥१४॥ अथ तृणमन्तर्धाय प्रहरति । नेदनेन वज्रेण सꣳशितेन पृथिवीꣳ हि-
नसानीति तस्मात्तृणमन्तर्धाय प्रहरति ॥१५॥ स प्रहरति । पृथिवि देवयजन्यो-
षध्यास्ते मूलं मा हिꣳसिषमित्युत्तरमूलामिव वाऽएनामेतत्करोत्यादद्दानस्तामेत-
दाहौषधीनां ते मूलानि मा हिꣳसिषमिति व्रजं गच्छ गोष्ठानमित्यभिनिधास्यन्ने-
वैतदनपक्रमि कुरुते तद्यनपक्रमि यद्व्रजेऽन्तस्तस्मादाह व्रजं गच्छ गोष्ठानमिति
वर्षतु ते द्यौरिति यत्र वाऽअस्यै खनन्तः क्रूरीकुर्वन्त्यपघ्नन्ति शान्तिरापस्तद्भिः
शान्त्या शमयति तद्भिः संदधाति तस्मादाह वर्षतु ते द्यौरिति बधान देव सवि-
तः परमस्यां पृथिव्यामिति देवमेवैतत्सवितारमाहान्धे तमसि बधानेति यदाह
परमस्यां पृथिव्यामिति शतेन पाशैरित्यमुचे तदाह योऽस्मान्द्वेष्टि यं च वयं द्वि-
ष्मस्तमतो मा मौगिति यदि नाभिचरेद्यद्युऽभिचरेदमुतो मा मौगिति ब्रू-
यात् ॥१६॥ अथ द्वितीयं प्रहरति । अपाररुं पृथिव्यै देवयजनाद्वध्यासमित्यररुर्ह
वै नामासुररक्षसमास तं देवा अस्या अपाघ्नत तथोऽएवैनमेतद्वेषोऽस्या अपहते
व्रजं गच्छ गोष्ठानं वर्षतु ते द्यौर्बधान देव सवितः परमस्यां पृथिव्याꣳ शतेन पा-
शैर्योऽस्मान्द्वेष्टि यं च वयं द्विष्मस्तमतो मा मौगिति ॥१७॥ तमग्नीदभिनिदधा-
ति । अररो दिवं मा पप्त इति यत्र वै देवा अररुमसुररक्षसमपाघ्नत स दिवम-
पिपतिषत्तमग्निरभिन्यदधाद्अररो दिवं मा पप्त इति स न दिवमपत्तथोऽएवैनमेत-
दधर्युरेवास्माल्लोकादन्तरेति दिवोऽध्यग्नीत्तस्मादिवं करोति ॥१८॥ अथ तृतीयं प्र-
हरति । द्रप्सस्ते द्यां मा स्कन्नित्ययं वाऽअस्यै द्रप्सो यमस्या इमꣳ रस प्रजा उप-
जीवन्त्येष ते दिवं मा पप्तदित्येवैतदाह व्रजं गच्छ गो°--मौगिति ॥१९॥ स वै त्रिर्यजुषा
हरति । त्रयो वाऽइमे लोका एभिरेवैनमेतल्लोकैरभिनिदधात्यद्धा वै तद्यदिमे

लोका अङ्गो तद्यद्यजुस्तस्मात्तूष्णीं यजुषा हरति ॥२०॥ तूष्णीं चतुर्थम् । स यदिमांल्लोकानति चतुर्थमस्ति वा न वा तेनैवैतद्विषक्तं भ्रातृव्यमवबाधतेऽनङ्वा वै तद्यदिमांल्लोकानति चतुथमस्ति वा न वानङ्वो तद्यत्तूष्णीं तस्मात्तूष्णीं चतुर्थम् ॥२१॥ ब्राह्मणम् ॥२[४]॥

देवाश्च वाऽअसुराश्च । उभये प्राजापत्याः पस्पृधिरे ततो देवा अनुव्यमिवासुरय हासुरा मेनिरेऽस्माकमेवेदं खलु भुवनमिति ॥१॥ ते होचुः । हन्तेमां पृथिवीं विभजामहै तां विभज्योपजीवामेति तामौदुम्बरीश्चर्मभिः पश्चात्प्राञ्चो विभजमाना अभीयुः ॥२॥ तद्वै देवाः शुश्रुवुः । विभजन्ते ह वाऽइमामसुराः पृथिवीं प्रेत तदेष्यामो यत्रेमामसुरा विभजन्ते के ततः स्याम यदस्यै न भजेमहीति ते यज्ञमेव विष्णुं पुरस्कृत्येयुः ॥३॥ ते होचुः । अनु नोऽस्यां पृथिव्यामाभजतास्त्वेव नोऽप्यस्यां भाग इति ते हासुरा असूयन्त-इवोचुर्यावदेवैष विष्णुरभिशेते तावद्वो दद्म इति ॥४॥ वामनो ह विष्णुरास । तद्देवा न जिहीडिरे महद्वै नोऽदुर्यं नो यज्ञसंमितमडुरिति ॥५॥ ते प्राञ्चं विष्णुं निपाद्य । छन्दोभिरभितः पर्यगृह्णन्गायत्रेण त्वा छन्दसा परिगृह्णामीति दक्षिणतस्त्रैष्टुभेन त्वा छन्दसा परिगृह्णामीति पश्चाज्जागतेन त्वा छन्दसा परिगृह्णामीत्युत्तरतः ॥६॥ तं छन्दोभिरभितः परिगृह्य । अग्निं पुरस्तात्समाधाय तेनार्चन्तः श्राम्यन्तश्चेरुस्तेनेमाꣳ सर्वां पृथिवीꣳ समविन्दन्त तद्यदेनेनेमाꣳ सर्वाꣳ समविन्दन्त तस्माद्वेदिर्नाम तस्मादाहुर्यावती वेदिस्तावती पृथिवीत्येतया होमाꣳ सर्वाꣳ समविन्दन्तेवꣳ ह वाऽइमाꣳ सर्वाꣳ सपत्नानाꣳ संवृङ्क्ते निर्भजत्यस्यै सपत्नान्य एवमेतद्वेद ॥७॥ सोऽयं विष्णुर्ग्लानः । छन्दोभिरभितः परिगृहीतोऽग्निः पुरस्तान्नापक्रमणमास स तत एवौषधीनां मूलान्युपमुम्लोच ॥८॥ ते ह देवा ऊचुः । क्व नु विष्णुरभूत्क्व नु यज्ञोऽभूदिति ते होचुश्छन्दोभिरभितः परिगृहीतोऽग्निः पुरस्तान्नापक्रमणमस्त्यत्रैवान्विहेतेति तं खनन्त-इवान्वीषुस्तं

त्यङ्गुलेऽन्वविन्दंस्तस्मात्त्र्यङ्गुला वेदिः स्यात्तदु ह्यापि पाञ्चस्त्र्यङ्गुलामेव सौम्यस्याध्वरस्य वेदिं चक्रे ॥९॥ तदु तथा न कुर्यात् । ओषधीनां वै स मूलान्युपाह्वोचत्तस्मादोषधीनामिव मूलान्युद्धर्त्तवै ब्रूयाच्चन्वेवात्र विष्णुमन्वविन्दंस्तस्माद्वेदिर्नाम ॥१०॥ तमनुविद्योत्तरेण परिग्रहेण पर्यगृह्णन् । सुम्ना चासि शिवा चासीति दक्षिणत इमामेवैतत्पृथिवीꣳ संविद्य सुम्नाꣳ शिवामकुर्वत स्योना चासि सुषदा चासीति पश्चादिमामेवैतत्पृथिवीꣳ संविद्य स्योनाꣳ सुषदामकुर्वतोर्ज्जस्वती चासि पयस्वती चेत्युत्तरत इमामेवैतत्पृथिवीꣳ संविद्य रसवतीमुपजीवनीयामकुर्वत ॥११॥ स वै त्रिः पूर्वं परिग्रहं परिगृह्णाति । त्रिरुत्तरं तत्षट् कृत्वः षड्वा ऋतवः संवत्सरस्य सवत्सरो यज्ञः प्रजापतिः स यावानेव यज्ञो यावत्यस्य मात्रा तावतमेवैतत्परिगृह्णाति ॥१२॥ षड्भिर्व्याकृतिभिः । पूर्वं परिग्रहं परिगृह्णाति षड्भिरुत्तरं तद्द्वादश कृत्वो द्वादश वै मासाः संवत्सरस्य संवत्सरो यज्ञः प्रजापतिः स यावानेव यज्ञो यावत्यस्य मात्रा तावतमेवैतत्परिगृह्णाति ॥१३॥ व्याममात्री पश्चात्स्यादित्याङ्गः । एतावान्वै पुरुषः पुरुषसंमिता हि त्र्यरत्निः प्राची त्रिवृद्धि यज्ञो नात्र मात्रास्ति यावतीमेव स्वयं मनसा मन्येत तावतीं कुर्यात् ॥१४॥ अभितोऽग्निमꣳसाऽउन्नयति । योषा वै वेदिर्वृषाग्निः परिगृह्य वै योषा वृषाणꣳ शेते मिथुनमेवैतत्प्रजननं क्रियते तस्मादभितोऽग्निमꣳसाऽउन्नयति ॥१५॥ सा वै पश्चाद्वरीयसी स्यात् । मध्ये सꣳहारिता पुनः पुरस्ताद्वुर्व्येवमिव हि योषां प्रशꣳसन्ति पृथुश्रोणिर्विमृष्टान्तराꣳसा मध्ये संग्राह्येति जुष्टामेवैनामेतद्देवेभ्यः करोति ॥१६॥ सा वै प्राक्प्रवणा स्यात् । प्राची हि देवानां दिगथोऽउदक्प्रवणोदीची हि मनुष्याणां दिग्दक्षिणतः पुरीषं प्रत्युद्वृह्त्येषा वै दिक्प्रियतृणाꣳ सा यद्दक्षिणाप्रवणा स्यात् क्षिप्रे ह यजमानोऽमुं लोकमियात्तथो ह यजमानो ज्योग्जीवति तस्माद्दक्षिणतः पुरीषं प्रत्युद्वृहति पुरीषवतीं कुर्वीत पशवो वै पुरीषं पशुमतीमेवैना-

मेतत्कुरुते ॥१७॥ तां प्रतिमार्ष्टि । देवा ह वै संग्राम्ँ संनिधास्यन्तस्ते होचुर्हन्त यदस्यै पृथिव्याऽअनामृतं देवयजनं तच्चन्द्रमसि निदधामहै स यदि नऽइतोऽसुरा जयेयुस्तत एवार्चन्तः श्राम्यन्तः पुनरभिभवेमेति स यदस्यै पृथिव्याऽअनामृतं देवयजनमासीत्तच्चन्द्रमसि न्यदधत तदेतच्चन्द्रमसि कृष्णं तस्मादाहुश्चन्द्रमस्यस्यै पृथिव्यै देवयजनमित्यपि ह वाऽअस्यैतस्मिन्देवयजनऽइष्टं भवति तस्माद्वै प्रतिमार्ष्टि ॥१८॥ स प्रतिमार्ष्टि । पुरा क्रूरस्य विसृपो विरप्शिन्निति संग्रामो वै क्रूरꣳ संग्रामे हि क्रूरं क्रियते हतः पुरुषो हतोऽश्वः शेते पुरा क्रौंतत्संग्रामान्यदधत तस्मादाह पुरा क्रूरस्य विसृपो विरप्शिन्नित्युदादाय पृथिवीं जीवदानुमित्युदादाय हि यदस्यै पृथिव्यै जीवमासीत्तच्चन्द्रमसि न्यदधत तस्मादाहोदादाय पृथिवीं जीवदानुमिति यामैरयꣳश्चन्द्रमसि स्वधाभिरिति यां चन्द्रमसि ब्रह्मणाददुरित्येवैतदाह तामु धीरासोऽअनुदिश्य यजन्तऽइत्येतेनो ह तामनुदिश्य यजन्तेऽपि ह वाऽअस्यैतस्मिन्देवयजनऽइष्टं भवति य एवमेतद्वेद ॥१९॥ अथाह प्रोक्षणीरासादयेति । वज्रो वै स्फ्यो ब्राह्मणश्चेमं पुरा यज्ञमभ्यजूगुपतां वज्रो वाऽआपस्तद्वज्रमेवैतदभिगुप्याऽआसादयति स वाऽउपर्युपर्येव प्रोक्षणीषु धार्यमाणास्वथ स्फ्यमुद्यच्छत्यथ यन्निक्षितऽएव स्फ्ये प्रोक्षणीरासादयेद्वज्रौ ह समृच्छेयातां तथो ह वज्रौ न समृच्छेते तस्मादुपर्युपर्येव प्रोक्षणीषु धार्यमाणास्वथ स्फ्यमुद्यच्छति ॥२०॥ अथैतां वाचं वदति । प्रोक्षणीरासादयेध्मं बर्हिरुपसादय स्रुचः संमृड्ढि पत्नीꣳ संनह्याज्येनोदेहीति संप्रैष एवैष स यदि कामयेत ब्रूयादेतद्यद्यु कामयेतापि नाद्रियेत स्वयमु ह्येवैतद्वेदेदमतः कर्म कर्तव्यमिति ॥२१॥ अथोदञ्चꣳ स्फ्यं प्रहरति । अमुष्मै त्वा वज्रं प्रहरामीति यद्यभिचरेद्वज्रो वै स्फ्य स्तृणुते ह्येवैनेन ॥२२॥ अथ पाणीऽअवनेनिक्ते । यद्यस्यै क्रूरमभूत्तद्यस्याऽएतदहार्षीत्तस्मात्पाणीऽअवनेनिक्ते ॥२३॥ स ये हायऽईजिरे । ते ह स्मावमर्शं यजन्ते ते पापीयाꣳस आसुरथ ये ने-

न्तिरे ते श्रेयाꣳस आसुस्ततोऽश्रद्धा मनुष्यान्विविद् ये यज्ञन्ते पापीयꣳसस्ते भवन्ति यऽउ न यज्ञन्ते श्रेयाꣳसस्ते भवन्तीति तत इतो देवान्हविर्न ज्ञगमितः प्रदानाद्धि देवा उपजीवन्ति ॥२४॥ ते ह देवा ऊचुः । बृहस्पत्विमाङ्गिरसमश्रद्धा वै मनुष्यानविदन्तेभ्यो विधेहि यज्ञमिति स होत्योवाच बृहस्पतिराङ्गिरसः कथा न यज्ञधऽइति ते होचुः किंकाम्या यज्ञेमहि ये यज्ञन्ते पापीयाꣳसस्ते भवन्ति यऽउ न यज्ञन्ते श्रेयाꣳसस्ते भवन्तीति ॥२५॥ स होवाच । बृहस्पतिराङ्गिरसो यद्वै प्रुष्णुम् देवानां परिषूतं तदेष यज्ञो भवति यद्भूतानि हवीꣳषि क्लृप्ता वेदिस्तेनावमर्शमचारिष्ट तस्मात्पापीयाꣳसोऽभूत तेनानवमर्शं यज्ञधं तथा श्रेयाꣳसो भविष्यथेत्या कियत इत्या बर्हिष स्तरणादिति बर्हिषा ह वै खल्वेषा शाम्यति स यदि पुरा बर्हिष स्तरणात्किंचिदापद्येत बर्हिरेव तत्स्तृणान्नपास्येदथ यदा बर्हिं स्तृणात्यपि पदाभितिष्ठन्ति स यो हैवं विद्वाननवमर्शं यज्ञते श्रेयान्हैव भवति तस्मादनवमर्शमिव यजेत ॥२६॥ ब्राह्मणम् ॥३ [५.]॥ अध्यायः ॥२॥

स वै स्रुचः संमार्ष्टि । तद्यत्स्रुचः संमार्ष्टि यथा वै देवानां चरणं तद्वाऽअनु मनुष्याणां तस्माद्यदा मनुष्याणां परिवेषणमुपक्लृप्तं भवति ॥१॥ अथ पात्राणि निर्णेनिज्ञति । तैर्निर्णिज्य परिविविषत्येवं वाऽएष देवानां यज्ञो भवति यद्भूतानि हवीꣳषि क्लृप्ता वेदिस्तेषामेतान्येव पात्राणि यत्स्रुचः ॥२॥ स यत्संमार्ष्टि । निर्णेनिक्त्येवैना एतन्निर्णिक्ताभिः प्रचराणीति तद्वै द्व्येनैव देवेभ्यो निर्णेनिज्ञत्येकेन मनुष्येभ्योऽद्भिश्च ब्रह्मणा च देवेभ्यऽआपो हि कुशा ब्रह्म यज्ञुरेकेनैव मनुष्येभ्योऽद्भिरेवैवम्वेतन्नाना भवति ॥३॥ अथ स्रुवमादत्ते । तं प्रतपति प्रत्युष्टꣳ रक्षः प्रत्युष्टाऽअरातयो निष्टप्तꣳ रक्षो निष्टप्ता अरातय इति वा ॥४॥ देवा ह वै यज्ञं तन्वानाः । तेऽसुररक्षसेभ्य आसंगाद्भिभयांचक्रुस्तद्यज्ञमुखादेवैतन्नाष्ट्रा रक्षाꣳस्यतोऽपक्रान्ति ॥५॥ स वाऽइत्यग्नेरन्तरतः संमार्ष्टि । अनिशितोऽसि सपत्नक्षिदिति य-

थानुपरतो यजमानस्य सपत्नान्निर्णुयादेवमेतदाह वाजिनं वा वाजिध्यायै संमार्ष्मीति यज्ञियं वा यज्ञाय संमार्ष्मीत्येवैतदाहैतेनैव सर्वाः स्रुचः संमार्ष्टि वाजिनीं वेति स्रुचं तूष्णीं प्राशित्रहरणꣳ ॥ ६ ॥ स वाऽइत्यग्रेरुत्तरतः संमार्ष्टीति । मूलेर्बाह्यतऽइतीव वाऽअयं प्राण इतीवोदानः प्राणोदानावेवैतद्दधाति तस्मादितीवेमानि लोमानीतीवेमानि ॥ ७ ॥ स वै संमृज्य-संमृज्य प्रतप्य-प्रतप्य प्रयच्छति । यथावमर्श निर्णिज्यानवमर्शमुत्तमं परिचालयेदेवं तत्तस्मात्प्रतप्य-प्रतप्य प्रयच्छति ॥ ८ ॥ स वै स्रुवमेवाग्रे संमार्ष्टि । अथेतराः स्रुचो योषा वै स्रुग्वृषा स्रुवस्तस्माद्यद्यपि बहव्य-इव स्त्रियः सार्धं यन्ति य एव तास्वपि कुमारक-इव पुमान्भवति स एव तत्र प्रथम एत्यनूच्य इतरास्तस्मात्स्रुवमेवाग्रे संमार्ष्ट्यथेतराः स्रुचः ॥ ९ ॥ स वै तथैव संमृज्यात् । यथाग्निं नाभिव्युन्नेष्यथा यस्माऽअशनमाहरिष्यन्स्यात्तं पात्रनिर्णेजनेनाभिव्युन्नेदेवं तत्तस्माद्धु तथैव संमृज्याद्यथाग्निं नाभिव्युन्नेत्प्राङिवैवोत्क्रम्य ॥ १० ॥ तद्धैके । स्रुक्संमार्जनान्यग्नावभ्यादधति वेदस्याहाभूवन्स्रुच एभिः सममार्ज्मिषुरिदं वै किंचिद्यज्ञस्य नेदिदं बर्हिर्धा यज्ञाद्भवदिति तद्धु तथा न कुर्याद्यथा यस्माऽअशनमाहरेत्तं पात्रनिर्णेजनं पाययेदेवं तत्तस्माद्धु परास्येद्वैतानि ॥ ११ ॥ अथ पत्नीꣳ संनह्यति । ऋघनार्धो वाऽएष यज्ञस्य यत्पत्नी प्राङ्मे यज्ञस्तायमानो यादिति युनक्त्येवैनामेतद्युक्ता मे यज्ञमन्वासाताऽइति ॥ १२ ॥ योक्त्रेण संनह्यति । योक्त्रेण हि योग्यं युञ्जन्त्यस्ति वै पत्न्या अमेध्यं यदवाचीनं नाभेरथैतदाज्यमवेक्षिष्यमाणा भवति तदेवास्या एतद्योक्त्रेणान्तर्दधात्यथ मेध्येनैवोत्तरार्धेनाज्यमवेक्षते तस्मात्पत्नीꣳ संनह्यति ॥ १३ ॥ स वाऽअभिवासः संनह्यति । ओषधयो वै वासो वरुणा रज्जुस्तदोषधीरेवैतदन्तर्दधाति तथो हैनामेषा वरुणा रज्जुर्न हिनस्ति तस्मादभिवासः संनह्यति ॥ १४ ॥ स संनह्यति । अदित्यै रास्नासीतीयं वै पृथिव्यदितिः सेयं देवानां पत्न्येषा वाऽएतस्य पत्नी भवति तदस्या

एतद्रास्नामिव करोति न रज्जुꣳ हि रो वै रास्ना तामिवास्या एतत्करोति ॥१५॥ स वै न ग्रन्थिं कुर्यात्। वरुणो वै ग्रन्थिर्वरुणो ह पत्नीं गृह्णीयाद्यद्ग्रन्थिं कुर्यात्तस्मान्न ग्रन्थिं करोति ॥१६॥ ऊर्ध्वमवोद्गूहति। विष्णोर्वेष्योऽसीति सा वै न पश्चात्प्राची देवानां यज्ञमन्वासीतेयं वै पृथिव्यदितिः सेयं देवानां पत्नी सा पश्चात्प्राची देवानां यज्ञमन्वास्ते तद्वेमामभ्यारोहेत्सा पत्नी क्षिप्रेऽमुं लोकमियात्तथो ह पत्नी ज्योग्जीवति तदस्याऽएवैतन्निह्नुते तथो हैनामियं न क्षिनस्ति तस्माद्दक्षिणात-श्चैवान्वासीत ॥१७॥ अथाज्यमवेक्षते। योषा वै पत्नी रेत आज्यं मिथुनमेवैतत्प्रजननं क्रियते तस्मादाज्यमवेक्षते ॥१८॥ सावेक्षते। ऽदब्धेन त्वा चक्षुषावपश्यामीत्यनार्त्तेन त्वा चक्षुषावपश्यामीत्येवैतदाहाग्नेर्जिह्वासीति यदा वाऽएतदग्नौ जुह्वत्यथाग्नेर्जिह्वा-श्चोत्तिष्ठन्ति तस्मादाहाग्नेर्जिह्वासीति सुदूर्देवेभ्य इति साधु देवेभ्य इत्येवैतदाह धाम्ने-धाम्ने मे भव यजुषे-यजुषऽइति सर्वस्मै मे यज्ञायैधीत्येवैतदाह ॥१९॥ अथाज्यमादाय प्राङुदाहरति। तदाहवनीयेऽधिश्रयति यस्याहवनीये हवीꣳषि श्रपयन्ति सर्वो मे यज्ञ आहवनीये श्रृतोऽसदित्यथ यदमुत्राग्नेऽधिश्रयति पत्नीꣳ ह्यवकाशयिष्यन्भवति न हि तदवकल्पते यत्सामि प्रत्यग्घरेत्पत्नीमवकाशयिष्यामीत्यथ यत्पत्नीं नावकाशयेदन्तरियाद्वा यज्ञात्पत्नीं तथो ह यज्ञात्पत्नीं नान्तरेति तस्माद्ध सार्धमिव विलाप्य प्रागुदाहरत्यवकाश्य पत्नीं यस्यो पत्नी न भवत्यग्र ऽएव तस्याहवनीयेऽधिश्रयति तत्त आदत्ते तदन्तर्वेद्यासादयति ॥२०॥ तदाहुः। नान्तर्वेद्यासादयेदतो वै देवानां पत्नीः संयाजयत्यवसभा अह देवानां पत्नीः करोति परःपुꣳसो ह्यस्य पत्नी भवतीति तꣳ होवाच याज्ञवल्क्यो यथादिष्टं पत्न्या अस्तु कस्तदाद्रियेत यत्परःपुꣳसा वा पत्नी स्याद्यथा वा यज्ञो वेदिर्यज्ञ आज्यं यज्ञाद्यज्ञं निर्मिमाऽइति तस्मादन्तर्वेद्येवासादयेत् ॥२१॥ प्रोक्षणीषु पवित्रे भवतः। ते तत आदत्ते ताभ्यामाज्यमुत्पुनात्येको वाऽउत्पवनस्य बन्धुर्मेध्यमेवैतत्करोति ॥२२॥ स उत्पुनाति। सवितुस्त्वा प्रसवऽउत्पुनाम्यच्छिद्रेण पवित्रेण सूर्यस्य रश्मि-

भिरिति सोऽसावेव बन्धुः ॥ २३ ॥ ॥ शतम् २०० ॥ ॥ अथाऽग्यलिप्साभ्यां पवित्राभ्याम् । प्रोक्षणीरुत्पुनाति सवितुर्वः प्रसवऽउत्पु° -- बन्धुः ॥ २४ ॥ तद्यदाऽग्यलिप्साभ्यां पवित्राभ्याम् । प्रोक्षणीरुत्पुनाति तदप्सु पयो दधाति तदिदमप्सु पयो हितमिदꣳ हि यदा वर्षत्यथौषधयो जायन्तऽओषधीर्जग्धाप पीत्वा तत एष रसः संभवति तस्माद्व रसस्यो चैव सर्वत्वाय ॥ २५ ॥ अथाऽग्यमवेक्षते । तद्वैके यज्ञमानमवख्यापयन्ति तद्व होवाच याज्ञवल्क्यः कथं नु न स्वयमध्वर्यवो भवन्ति कथꣳ स्वयं नान्वाकुर्यत्र भूयस्य-इवाशिषः क्रियन्ते कथं न्वेषामत्रैव श्रद्धा भवतीति यां वै कां च यज्ञऽऋत्विज आशिषमाशासते यज्ञमानस्यैव सा तस्माद्ध्वर्यु रेवावेक्षेत ॥ २६ ॥ सोऽवेक्षते । सत्यं वै चक्षुः सत्यꣳ हि वै चक्षुस्तस्माद्यदिदानीं द्वौ विवदमानावियातामकृमदर्शमकृमश्रौषमिति य एव ब्रूयादकृमदर्शमिति तस्माऽएव श्रद्दध्याम तत्सत्येनैवैतत्समर्धयति ॥ २७ ॥ सोऽवेक्षते । तेजोऽसि शुक्रमस्यमृतमसीति स एष सत्य एव मन्त्रस्तेजो ह्येतत्कुक्रꣳ ह्येतदमृतꣳ ह्येतत्तत्सत्येनैवैतत्समर्धयति ॥ २८ ॥ ब्राह्मणम् ॥ ४. [३. १.] ॥

पुरुषो वै यज्ञः । पुरुषस्तेन यज्ञो यदेनं पुरुषस्तनुतऽएष वै तायमानो यावानेव पुरुषस्तावान्विधीयते तस्मात्पुरुषो यज्ञः ॥ १ ॥ तस्येयमेव जुहूः । रियमुपभृदात्मैव ध्रुवा तद्वाऽआत्मन एवेमानि सर्वाण्यङ्गानि प्रभवन्ति तस्माद्ध ध्रुवाया एव सर्वो यज्ञः प्रभवति ॥ २ ॥ प्राण एव स्रुवः । सोऽयं प्राणः सर्वाण्यङ्गान्यनुसंचरति तस्माद्ध स्रुवः सर्वा अनु स्रुचः संचरति ॥ ३ ॥ तस्यासावेव द्यौर्जुहूः । अथेदमन्तरिक्षमुपभृदियमेव ध्रुवा तद्वाऽअस्या एवेमे सर्वे लोकाः प्रभवन्ति तस्माद्ध ध्रुवाया एव सर्वो यज्ञः प्रभवति ॥ ४ ॥ अयमेव स्रुवो योऽयं पवते । सोऽयमिमांत्सर्वाल्लोकाननुपवते तस्माद्ध स्रुवः सर्वा अनु स्रुचः संचरति ॥ ५ ॥ स एष यज्ञस्तायमानो । देवेभ्यस्तायतऽऋतुभ्यश्छन्दोभ्यो यद्धविस्तद्देवानां यत्सोमो राजा यत्पुरोडाशस्तत्तदादिश्य गृह्णात्यमुष्मै त्वा जुष्टं गृह्णामी-

त्येवमु हैतेषाम् ॥ ६ ॥ अथ यान्याज्यानि गृह्यन्ते । ऋतुभ्यश्चैव तानि छन्दोभ्यश्च गृह्यन्ते तत्तदनादिश्याज्यस्यैव रूपेण गृह्णाति स वै चतुर्गृहीं गृह्णात्यष्टौ कृत्व उपभृति ॥ ७ ॥ स यच्चतुर्गृहीं गृह्णाति । ऋतुभ्यस्तद्गृह्णाति प्रयाजेभ्यो हि तद्गृह्णात्यृतवो हि प्रयाजास्तत्तदनादिश्याज्यस्यैव रूपेण गृह्णात्यजामितायै जामि ह कुर्याच्छन्दसन्ताय वा ग्रीष्माय वेति गृह्णीयात्तस्मादनादिश्याज्यस्यैव रूपेण गृह्णाति ॥ ८ ॥ अथ यदष्टौ कृत्व उपभृति गृह्णाति । छन्दोभ्यस्तद्गृह्णात्यनुयाजेभ्यो हि तद्गृह्णाति छन्दाꣳसि ह्यनुयाजास्तत्तदनादिश्याज्यस्यैव रूपेण गृह्णात्यजामितायै जामि ह कुर्याच्छायत्र्यै वा त्रिष्टुभे वेति गृह्णीयात्तस्मादनादिश्याज्यस्यैव रूपेण गृह्णाति ॥ ९ ॥ अथ यच्चतुर्ध्रुवायां गृह्णाति । सर्वस्मै तच्छन्दसे गृह्णाति तत्तदनादिश्याज्यस्यैव रूपेण गृह्णाति कस्माऽउ ह्यादिशेयुतः सर्वाभ्य एव देवताभ्योऽवद्यति तस्मादनादिश्याज्यस्यैव रूपेण गृह्णाति ॥ १० ॥ यजमान एव स्रुक्मनु । योऽस्माऽअरातीयति स उपभृतमन्वत्तेव स्रुक्मन्वाच्य उपभृतमन्वत्तेव स्रुक्राच्य उपभृत्स वै चतुर्गृहीं गृह्णात्यष्टौ कृत्व उपभृति ॥ ११ ॥ स यच्चतुर्गृहीं गृह्णाति । अत्तारमेवैतत्परिमिततरं कनीयाꣳसं करोत्यथ यदष्टौ कृत्व उपभृति गृह्णात्याच्यमेवैतद्परिमिततरं भूयाꣳसं करोति तद्धि समृद्धं यत्रात्ता कनीयानाच्यो भूयान् ॥ १२ ॥ स वै चतुर्गृहीं गृह्णन् । भूय आज्यं गृह्णात्वष्टौ कृत्व उपभृति गृह्णन्कनीय आज्यं गृह्णाति ॥ १३ ॥ स यच्चतुर्गृहीं गृह्णन् । भूय आज्यं गृह्णात्यत्तारमेवैतत्परिमिततरं कनीयाꣳसं कुर्वंस्तस्मिन्वीर्यं बलं दधात्यथ यदष्टौ कृत्व उपभृति गृह्णन्कनीय आज्यं गृह्णात्याच्यमेवैतद्परिमिततरं भूयाꣳसं कुर्वंस्तमवीर्यमबलीयाꣳसं करोति तस्माद्यत राजापारां विशं प्रावसायाप्येकवेश्मनैव जिनाति यद्यथा यत्कामयते तथा सचतऽएतेनो ह तद्वीर्येण यज्जुहूं भूय आज्यं गृह्णाति स यज्जुहूं गृह्णाति स्रुचैव तज्जुहोति यदुपभृति गृह्णाति स्रुचैव तज्जुहोति ॥ १४ ॥ तदाहुः । कस्माऽउ तर्ह्युपभृति गृह्णीयाद्यदुप-

भृता न जुहोतीति स यद्धोपभृता जुहुयात्पृथग्घैवेमाः प्रजाः स्युर्नैवात्ता स्यान्नाद्यः स्यादथ यत्तज्जुहोत्येव समानीय जुहोति तस्मादिमा विशः क्षत्रियाय बलिं हरन्त्यथ यदुपभृति गृह्णाति तस्माद्धु क्षत्रियस्यैव वशे सति वैश्यं पशव उपतिष्ठन्तेऽथ यत्तज्जुहोत्येव समानीय जुहोति तस्माद्यदेनं क्षत्रियः कामयतेऽथाह वैश्य मयि यत्ते परो निहितं तदाहरेति तं जिनाति यद्यथा यत्कामयते तथा सचतऽएतेनो हु तद्वीर्येण ॥ १५ ॥ तानि वाऽएतानि । हुन्दोभ्य आज्यानि गृह्यन्ते स यच्चतुर्जुहूं गृह्णाति गायत्र्यै तद्गृह्णात्यथ यदष्टौ कृत्व उपभृतं गृह्णाति त्रिष्टुब्जगतीभ्यां तद्गृह्णात्यथ यच्चतुर्ध्रुवायां गृह्णात्यनुष्टुभे तद्गृह्णाति वाग्वाऽअनुष्टुब्वाचो वाऽइदꣳ सर्वं प्रभवति तस्माद्धु ध्रुवाया एव सर्वो यज्ञः प्रभवतीयं वाऽअनुष्टुबस्यै वाऽइदꣳ सर्वं प्रभवति तस्माद्धु ध्रुवाया एव सर्वो यज्ञः प्रभवति ॥ १६ ॥ स गृह्णाति । धाम नामासि प्रियं देवानामित्येतद्वै देवानां प्रियतमं धाम यदाज्यं तस्मादाह धाम नामासि प्रियं देवानामित्यनाधृष्टं देवयजनमसीति वज्रो वाऽआज्यं तस्मादाहानाधृष्टं देवयजनमसीति ॥ १७ ॥ स एतेन यजुषा । सकृज्जुहूं गृह्णाति त्रिस्तूष्णीमेतेनैव यजुषा सकृदुपभृति गृह्णाति सप्त कृत्वस्तूष्णीमेतेनैव यजुषा सकृद्ध्रुवायां गृह्णाति त्रिस्तूष्णीं तदाहुस्त्रिस्त्रिरेव यजुषा गृह्णीयात्त्रिवृद्वै यज्ञ इति तद्धु नु सकृत्सकृदेवात्रो क्तेव त्रिर्गृहीतꣳ संपद्यते ॥ १८ ॥ ब्राह्मणम् ॥ ५ [३. २] ॥

प्रोक्षणीरध्वर्युरादत्ते । स इध्ममेवाग्ने प्रोक्षति कृष्णोऽस्याखरेष्ठोऽग्नये त्वा जुष्टं प्रोक्षामीति तन्मेध्यमेवैतदग्नये करोति ॥ १ ॥ अथ बर्हिः प्रोक्षति । बर्हिरसि बर्हिषे त्वा जुष्टं प्रोक्षामि तन्मेध्यमेवैतद्बर्हिषे करोति ॥ २ ॥ अथास्मै बर्हिः प्रयच्छति । तत्पुरस्ताद्व्यन्त्यासादयति तत्प्रोक्षति बर्हिरसि स्रुग्भ्यस्त्वा जुष्टं प्रोक्षामि तन्मेध्यमेवैतत्स्रुग्भ्यः करोति ॥ ३ ॥ अथ याः प्रोक्षणयः परिशिष्यन्ते । ताभिरोषधीनां मूलान्युपनिनयत्यदित्यै व्युन्दनमसीतीयं वै पृथिव्यदितिस्तदस्या एवैतदोषधीनां

मूलान्युपोनत्ति ता इमा आर्द्रमूला ओषधयस्तस्माद्यद्यपि शुष्काण्यग्राणि भवन्त्यार्द्राण्येव मूलानि भवन्ति ॥४॥ अथ विस्रꣳस्य ग्रन्थिम् । पुरस्तात्प्रस्तरं गृह्णाति विष्णो स्तुपोऽसीति यज्ञो वै विष्णुस्तस्येयमेव शिखा स्तुप एतामेवास्मिन्नेतद्दधाति पुरस्ताद्गृह्णाति पुरस्ताद्धयꣳ स्तुपस्तस्मात्पुरस्ताद्गृह्णाति ॥५॥ अथ संनह्नं विस्रꣳसयति । प्रक्लृप्तꣳ ह्येवास्य स्त्री विज्ञायतऽइति तस्मात्संनह्नं विस्रꣳसयति तद्दक्षिणायाꣳ श्रोणौ निदधाति नीविर्ह्येवास्येषा दक्षिणत इव ह्रीयं नीविस्तस्माद्दक्षिणायाꣳ श्रोणौ निदधाति तत्पुनरभिहादयत्यभिह्रन्नेव ह्रीयं नीविस्तस्मात्पुनरभिहादयति ॥६॥ अथ बर्हिः स्तृणाति । अयं वै स्तुपः प्रस्तरोऽथ यान्यवाञ्चि लोमानि तान्येवास्य यदितरं बर्हिस्तान्येवास्मिन्नेतद्दधाति तस्माद्बर्हिः स्तृणाति ॥७॥ योषा वै वेदिः । तामेतद्वाश्च पर्यासते ये चेमे ब्राह्मणाः शुश्रुवाꣳसोऽनूचानास्तेषैवैनामेतत्पर्यासीनेषन्नग्नां करोत्यनग्नतायाऽएव तस्माद्बर्हिः स्तृणाति ॥८॥ यावती वै वेदिः । तावती पृथिव्योषधयो बर्हिस्तदस्यामेवैतत्पृथिव्यामोषधीर्दधाति ता इमा अस्यां पृथिव्यामोषधयः प्रतिष्ठितास्तस्माद्बर्हिः स्तृणाति ॥९॥ तद्वै बऽकुलꣳ स्तृणीयादित्याहुः । यत्र वाऽअस्यै बऽकुलतमा ओषधयस्तदस्या उपजीवनीयतमं तस्माद्बऽकुलꣳ स्तृणीयादिति तद्वै तदार्त्तर्यैवाधि त्रिवृत्स्तृणाति त्रिवृद्धि यज्ञोऽथोऽअपि प्रवर्हꣳ स्तृणीयात्स्तृणन्ति बर्हिरानुषगिति वृषिणाभ्यनूक्तमधरमूलꣳ स्तृणात्यधरमूला इव ह्रीमा अस्यां पृथिव्यामोषधयः प्रतिष्ठितास्तस्मादधरमूलꣳ स्तृणाति ॥१०॥ स स्तृणाति । ऊर्णाम्रदसं त्वा स्तृणामि स्वासस्थां देवेभ्यऽइति साधीं देवेभ्य इत्येवैतदाह यदाहोर्णाम्रदसं त्वेति स्वासस्थां देवेभ्य इति स्वासदां देवेभ्य इत्येवैतदाह ॥११॥ अथाग्निं कल्पयति । शिरो वै यज्ञस्याहवनीयः पूर्वोऽर्धो वै शिरः पूर्वार्धमेवैतद्यज्ञस्य कल्पयत्युपर्युपरि प्रस्तरं धारयन्कल्पयत्ययं वै स्तुपः प्रस्तर एतमेवास्मिन्नेतत्प्रतिदधाति तस्मादुपर्युपरि प्रस्तरं धारय-

न्कल्पयति ॥ १२ ॥ अथ परिधीन्परिदधाति । तद्यत्परिधीन्परिदधाति यत्र वै देवा अग्रेऽग्निꣳ होत्राय प्रावृणत तद्बोवाच न वाऽअहमिदमुत्सहे यद्धो होता स्यां यद्धो हव्यं वक्ष्यं त्रीन्पूर्वान्प्रावृहं ते प्राधन्विषुस्तान्नु मेऽवकल्पयताथ वाऽअहमेतदुत्साह्ये यद्धो होता स्यां यद्धो हव्यं वक्ष्यमिति तथेति तानस्माऽएतानवाकल्पयंस्तऽएते परिधयः ॥ १३ ॥ स होवाच । वज्रो वै तान्वषट्कारः प्रावृणग्वज्रद्वि वषट्कारादिभेमि यन्मा वज्रो वषट्कारो न प्रवृञ्च्यादितरेव मा परिधत्त तथा मा वज्रो वषट्कारो न प्रवर्ज्यतीति तथेति तमेतैः पर्यदधुस्तं न वज्रो वषट्कारः प्रावृणक्तद्धर्मैवैतदग्नये नक्ष्यति यदेतैः परिदधाति ॥ १४ ॥ तऽउ हैतऽऊचुः । इदमु चेदस्मान्यज्ञे युङ्क्थास्त्वेवास्माकमपि यज्ञे भागऽइति ॥ १५ ॥ तथेति देवा अब्रुवन् । यद्वक्ष्यरिधि स्कन्त्स्यति तद्युष्मासु कृतमथ यद्व उपर्युपरि होष्यन्ति तद्वोऽविष्यतीति स यदग्नौ जुह्वति तदेनानवत्यथ यदेनानुपर्युपरि जुह्वति तदेनानवत्यथ यद्वक्ष्यरिधि स्कन्दति तदेतेषु कृतं तस्माद्व ह नाग-इव स्कन्नꣳ स्यादिमां वै ते प्राविशन्यद्वाऽइदं किंच स्कन्दत्यस्यामेव तत्सर्वं प्रतितिष्ठति ॥ १६ ॥ स स्कन्नमभिमृशति । भुवपतये स्वाहा भुवनपतये स्वाहा भूतानां पतये स्वाहेत्येतानि वै तेषामग्नीनां नामानि यद्भुवपतिर्भुवनपतिर्भूतानां पतिस्तद्यथा वषट्कृतꣳ हुतमेवमस्यैतेष्वग्निषु भवति ॥ १७ ॥ तद्वैके । इध्मस्यैवैतान्परिधीन्परिदधति तद्व तथा न कुर्यादनवक्लृप्ता ह तस्यैते भवन्ति यानिध्मस्य परिदधात्यभ्याधानाय क्षेत्रेवेध्मः क्रियते तस्यो हैवैतेऽवक्लृप्ता भवन्ति यस्यैतानन्यानाहरन्ति परिधयऽइति तस्मादन्यानेवाहरेयुः ॥ १८ ॥ ते वै पालाशाः स्युः । ब्रह्म वै पलाशो ब्रह्माग्निरग्नयो हि तस्मात्पालाशाः स्युः ॥ १९ ॥ यदि पालाशान्न विन्देत् । अथोऽअपि वैकङ्कता स्युर्यदि वैकङ्कतान्न विन्देदथोऽअपि कार्ष्मर्यमयाः स्युर्यदि कार्ष्मर्यमयान्न विन्देदथोऽअपि वैल्वाः स्युरथो खादिरा अथोऽऔदुम्बरा एते हि वृक्षा यज्ञिया-

स्तस्मादेतेषां वृक्षाणां भवन्ति ॥ २० ॥ ब्राह्मणम् ॥ ६ [३. ३.] ॥ ॥ द्वितीयः प्रपाठकः ॥ ॥ कण्डिकासंख्या १२२ ॥ ॥

ते वाऽआर्द्राः स्युः । एतद्वेषां जीवमेतेन सतेजस एतेन वीर्यवत्तस्तस्मादार्द्राः स्युः ॥ १ ॥ स मध्यमेवाग्ने । परिधिं परिदधाति गन्धर्वस्त्वा विश्वावसुः परिदधातु विश्वस्यारिष्ट्यै यजमानस्य परिधिरस्यग्निरिड ईडित इति ॥ २ ॥ अथ दक्षिणं परिदधाति । इन्द्रस्य बाहुरसि दक्षिणो विश्वस्यारिष्ट्यै यजमानस्य परिधिरस्यग्निरिड ईडित इति ॥ ३ ॥ अथोत्तरं परिदधाति । मित्रावरुणौ त्वोत्तरतः परिधत्तां ध्रुवेण धर्मणा विश्वस्यारिष्ट्यै यजमानस्य परिधिरस्यग्निरिड ईडित इत्यग्नयो हि तस्मादाहाग्निरिड ईडित इति ॥ ४ ॥ अथ समिधमभ्यादधाति । स मध्यमेवाग्ने परिधिमुपस्पृशति तेनैतानग्ने समिन्धेऽथाग्नावभ्यादधाति तेनोऽग्निं प्रत्यक्षꣳ समिन्धे ॥ ५ ॥ सोऽभ्यादधाति । वीतिहोत्रं त्वा कवे द्युमन्तꣳ समिधीमहि । अग्ने बृहन्तमध्वरꣳ इत्येतया गायत्र्या गायत्रीमेवैतत्समिन्धे सा गायत्री समिद्वान्यानि छन्दाꣳसि समिन्धे छन्दाꣳसि समिद्वानि देवेभ्यो यज्ञं वहन्ति ॥ ६ ॥ अथ यां द्वितीयाꣳ समिधमभ्यादधाति । वसन्तमेव तया समिन्धे स वसन्तः समिद्धोऽन्यानृतूत्समिन्धऽऋतवः समिद्धाः प्रजाश्च प्रजनयत्योषधीश्च पचति सोऽभ्यादधाति समिदसीति समिद्धि वसन्तः ॥ ७ ॥ अथाभ्याधाय जपति । सूर्यस्त्वा पुरस्तात्पातु कस्याश्चिदभिशस्त्याऽइति गुप्त्यै वा ऽअभितः परिधयो भवन्त्येतत्सूर्यमेव पुरस्ताद्गोपारं करोति नेत्पुरस्तान्नाद्या रक्षाꣳस्यभ्यवचरानिति सूर्यो हि नाष्ट्राणाꣳ रक्षसामपहन्ता ॥ ८ ॥ अथ यामित्वामूं तृतीयाꣳ समिधमभ्यादधाति । अनुयाजेषु ब्राह्मणमेव तया समिन्धे स ब्राह्मणः समिद्धो देवेभ्यो यज्ञं वहति ॥ ९ ॥ अथ स्तीर्णा वेदिमुपावर्तते । स द्वे तृणेऽआदाय तिरश्ची निदधाति सवितुर्बाहू स्थ इत्ययं वै स्तुपः प्रस्तरोऽथास्येते भ्रुवाविव तिरश्ची निदधाति तस्मादिमे तिरश्ची भ्रुवौ क्षत्रं वै प्रस्तरो विशऽइतरं बर्हिः क्ष-

त्रस्य चैव विशश्च विधृत्यै तस्मात्तिरश्ची निदधाति तस्माद्धैव विधृती नाम ॥१०॥ तत्प्रस्तरꣳ स्तृणाति । ऊर्णाम्रदसं त्वा स्तृणामि स्वासस्थं देवेभ्य इति साधु देवेभ्य इत्येवैतदाह यदाहोर्णाम्रदसं त्वेति स्वासस्थं देवेभ्य इति स्वासदं देवेभ्य इत्येवैतदाह ॥११॥ तमभिनिदधाति । आ त्वा वसवो रुद्रा आदित्याः सदन्त्वित्येते वै त्रया देवा यद्वसवो रुद्रा आदित्या एते ह्यासीदन्त्वित्येवैतदाहाभिनिहित एव सव्येन पाणिना भवति ॥१२॥ अथ दक्षिणेन स्रुचं प्रतिगृह्णाति । नेदिह पुरा नाष्ट्रा रक्षाꣳस्याविशानिति ब्राह्मणो हि रक्षसामपहन्ता तस्मादभिनिहित एव सव्येन पाणिना भवति ॥१३॥ अथ स्रुचं प्रतिगृह्णाति । घृताच्यसि स्रुक्नामेति घृताची हि स्रुक्तर्हि नाम्ना सेदं प्रियेण धाम्ना प्रियꣳ सद आसीदेति घृताच्यस्युपभृन्नामेत्युपभृतं घृताची ह्युपभृद्धि नाम्ना सेदं प्रियेण धाम्ना प्रियꣳ सद आसीदेति घृताच्यसि ध्रुवा नामेति ध्रुवां घृताची हि ध्रुवा हि नाम्ना सेदं प्रियेण धाम्ना प्रियꣳ सद आसीदेति प्रियेण धाम्ना प्रियꣳ सद आसीदेति यदन्यद्ध विः ॥१४॥ स वाऽउपरि स्रुचꣳ सादयति । अथ इतराः स्रुचः क्षत्रं वै स्रुक्तर्विश इतराः स्रुचः क्षत्रमेवैतद्विश उत्तरं करोति तस्मादुपर्यासीनं क्षत्रियमधस्तादिमाः प्रजा उपासते तस्मादुपरि स्रुचꣳ सादयत्यध इतराः स्रुचः ॥१५॥ सोऽभिमृशति । ध्रुवा असदन्निति ध्रुवा ह्यसदन्नृतस्य योनाविति यज्ञो वाऽऋतस्य योनिर्यज्ञे ह्यसदंस्ता विष्णो पाहि पाहि यज्ञं पाहि यज्ञपतिमिति तद्यजमानमाह पाहि मां यज्ञन्यमिति तदप्यात्मानं यज्ञान्नान्तरेति यज्ञो वै विष्णुस्तद्यज्ञायैवैतत्सर्वं परिददाति गुप्त्यै तस्मादाह ता विष्णो पाहीति ॥१६॥ ब्राह्मणम् ॥१ [४.]॥

इन्धे ह वा एतदध्वर्युः । इध्मेनाग्निं तस्मादिध्मो नाम समिन्धे सामिधेनीभिर्होता तस्मात्सामिधेन्यो नाम ॥१॥ स आह । अग्नये समिध्यमानायानुब्रूहीत्यग्नये ह्येतत्समिध्यमानायान्वाह ॥२॥ तदु हैकऽआहुः । अग्नये समिध्यमानाय होतरि

नुब्रूहीति तदु तथा न ब्रूयादहोता वाऽएष पुरा भवति यदैवैनं प्रवृणीतेऽथ होता तस्मादु ब्रूयादग्नये समिध्यमानायानुब्रूहीत्येव ॥३॥ आग्नेयीरन्वाह । स्वयै-वैनमेतद्देवतया समिन्धे गायत्रीरन्वाह गायत्रं वाऽअग्नेश्छन्दः स्वेनैवैनमेतच्छन्दसा समिन्धे वीर्यं गायत्री ब्रह्म गायत्री वीर्येणैवैनमेतत्समिन्धे ॥४॥ एकादशान्वाह । एकादशाक्षरा वै त्रिष्टुब्ब्रह्म गायत्री क्षत्रं त्रिष्टुबेताभ्यामेवैनमेतदुभाभ्यां वीर्याभ्याꣳ समिन्धे तस्मादेकादशान्वाह ॥५॥ स वै त्रिः प्रथमामन्वाह । त्रिरुत्तमां त्रिवृत्प्रा-यणा हि यज्ञास्त्रिवृदुदयनास्तस्मात्त्रिः प्रथमामन्वाह त्रिरुत्तमाम् ॥६॥ ताः पञ्च-दश सामिधेन्यः संपद्यन्ते । पञ्चदशो वै वज्रो वीर्यं वज्रो वीर्यमेवैतत्सामिधेनीर्-भिसंपादयति तस्मादितास्वनूच्यमानासु यं द्विष्यात्तमङ्गुष्ठाभ्यामवबाधेतेदमहममुम-वबाधऽइति तदेनमेतेन वज्रेणावबाधते ॥७॥ पञ्चदश वा अर्धमासस्य रात्रयः । अर्धमासशो वै संवत्सरो भवतीति तद्रात्रीराप्नोति ॥८॥ पञ्चदशानामु वै गायत्री-णाम् । त्रीणि च शतानि षष्टिश्चाक्षराणि त्रीणि च वै शतानि षष्टिश्च संवत्सर-स्याहानि तदहान्याप्नोति तद्देव संवत्सरमाप्नोति ॥९॥ सप्तदश सामिधेनीः । इ-ष्ट्वाऽअनुब्रूयादुपाꣳशु तस्यै देवतायै यजति यस्याऽइष्टिं निर्वपति द्वादश वै मा-साः संवत्सरस्य पञ्चर्तव एष एव प्रजापतिः सप्तदशः सर्वे वै प्रजापतिस्तत्सर्वे-णैव तं काममनयराधꣳ राध्नोति यस्मै कामायेष्टिं निर्वपत्युपाꣳशु देवतां यजत्यनि-रुक्तं वाऽउपाꣳशु सर्वं वाऽअनिरुक्तं तत्सर्वेणैव तं काममनयराधꣳ राधाति यस्मै कामायेष्टिं निर्वपत्यष इष्टिरुपचारः ॥१०॥ एकविꣳशतिꣳ सामिधेनीः अपि दर्श-पूर्णमासयोरनुब्रूयादित्याहुर्द्वादश वै मासाः संवत्सरस्य पञ्चर्तवस्त्रयो लोकास्त-द्विꣳशतिरेषऽएवैकविꣳशो य एष तपति सैषा गतिरेषा प्रतिष्ठा तदेतां गतिमे-तां प्रतिष्ठां गच्छति तस्मादेकविꣳशतिमनुब्रूयात् ॥११॥ ता होता गतश्रेरेवानुब्रू-यात् । य इहेत्र श्रेयांस्यां न पापीयानिति यादृशाय हैव सुतेऽन्वाहुस्तादृङ्

हैव भवति पापीयान्वा यस्यैवं विदुष एता अन्वाकुः सोऽएषा मीमाꣳसैव न वेवैता अनूच्यन्ते ॥ १२ ॥ त्रिरेव प्रथमां त्रिरुत्तमामनवानन्ननुब्रूयात् । त्रयो वाऽइमे लोकास्तदिमानेवैतल्लोकांत्संतनोतीमांल्लोकांत्स्पृणुते त्रय इमे पुरुषे प्राणा एतमेवास्मिन्नेतत्संततमव्यवच्छिन्नं दधात्येतदनुवचनꣳ ॥ १३ ॥ स यावदस्य वचः स्यात् । एवमेवानुविवक्षेत्तस्यैतस्य परिचक्षीत साम्यवान्यादनवानन्ननुविवक्षंस्तत्कर्म विवृक्षेत सा परिचक्षा ॥ १४ ॥ स यद्येतन्नोदाशꣳसेत । अप्येकैकामेवानवानन्ननुब्रूयात्तदेकैकयैवेमांल्लोकांत्संतनोत्येकैकयेमांल्लोकांत्स्पृणुतेऽथ यत्प्राणं दधाति गायत्री वै प्राणः स यत्कृत्स्नां गायत्रीमन्वाह तत्कृत्स्नं प्राणं दधाति तस्मादेकैकामेवानवानन्ननुब्रूयात् ॥ १५ ॥ ता वै संतता अव्यवच्छिन्ना अन्वाह । संवत्सरस्यैवैतदहोरात्राणि संतनोति तानीमानि संवत्सरस्याहोरात्राणि संततान्यव्यवच्छिन्नानि परिप्लवन्ते द्विषतऽउ चैवैतद्भ्रातृव्याय नोपस्थानं करोत्युपस्थानꣳ ह कुर्याद्यदसंतता अनुब्रूयात्तस्माद्वै संतता अव्यवच्छिन्ना अन्वाह ॥ १६ ॥ ब्राह्मणम् ॥ २ [५.] ॥ अध्यायः ॥ ३ ॥ ॥

हिंकृत्यान्वाह । नासामा यज्ञोऽस्तीति वाऽआहुर्न वाऽअहिंकृत्य साम गीयते म यद्धिंकरोति तद्धिंकारस्य रूपं क्रियते प्रणवेनैव साम्नो रूपमुपगह्यत्योऽम् ओऽमित्येतेनो ह्यस्यैष सर्व एव ससामा यज्ञो भवति ॥ १ ॥ यद्वै हिंकरोति । प्राणो वै हिंकारः प्राणो हि वै हिंकारस्तस्मादपिगृह्य नासिके न हिंकर्तुꣳ शक्नोति वाचा वाऽऋचमन्वाह वाङ्क वै प्राणश्च मिथुनं तदेतत्पुरस्तान्मिथुनं प्रजननं क्रियते सामिधेनीनां तस्माद्वै हिंकृत्यान्वाह ॥ २ ॥ स वाऽउपाꣳशु हिंकरोति । अथ यदुच्चैर्हिंकुर्यादन्यतरदेव कुर्याद्वाचमेव तस्मादुपाꣳशु हिंकरोति ॥ ३ ॥ स वाऽएति च प्रेति चान्वाह । गायत्रीमेवैतद्वाचीं च पराचीं च युनक्ति पराच्यह देवेभ्यो यज्ञं वहत्यर्वाची मनुष्यानवति तस्माद्वाऽएति च प्रेति चान्वाह

॥ ४ ॥ यद्वेवेति च प्रेति चान्वाह । प्रेति वै प्राण एत्युदानः प्राणोदानावेवैतद्-धाति तस्माद्वाऽएति च प्रेति चान्वाह ॥ ५ ॥ यद्वेवेति च प्रेति चान्वाह । प्रेति वै रेतः सिच्यतऽएति प्रजायते प्रेति पशवो वितिष्ठन्तऽएति समावर्तन्ते सर्व वा ऽइदमेति च प्रेति च तस्माद्वाऽएति च प्रेति चान्वाह ॥ ६ ॥ सोऽन्वाह । प्र वो वाजा अभिद्यव इति तनु प्रेति भवत्यग्नऽआयाहि वीतयऽइति तद्वेति भवति ॥ ७ ॥ तदु हैकऽआहुः । उभयं वाऽएतत्प्रेति संपद्यतऽइति तदु तदातिविज्ञान्य-मिव प्र वो वाजा अभिद्यवऽइति तनु प्रेत्यग्नऽआयाहि वीतयऽइति तद्वेति ॥ ८ ॥ सोऽन्वाह । प्र वो वाजा अभिद्यव इति तनु प्रेति भवति वाजा इत्यन्नं वै वा-जा अन्नमेवैतदभ्यनूक्तमभिद्यव इत्यर्धमासा वाऽअभिद्यवोऽर्धमासानेवैतदभ्यनूक्तꣳ हविष्मन्त इति पशवो वै हविष्मन्तः पशूनेवैतदभ्यनूक्तम् ॥ १ ॥ घृताच्येति । वि-देघो ह माथवोऽग्निं वैश्वानरं मुखे बभार तस्य गोतमो राहूगण ऋषिः पुरो-हित आस तस्मै ह स्तामल्यमाणो न प्रतिशृणोति नेन्मेऽग्निर्वैश्वानरो मुखान्नि-ष्प्यातादऽइति ॥ १० ॥ तमृग्भिर्ह्वयितुं दध्रे । वीतिहोत्रं त्वा कवे द्युमन्तꣳ समिधी-महि । अग्ने बृहन्तमध्वरे विदेघेति ॥ ११ ॥ स न प्रतिशुश्राव । उद्अग्ने शुचयस्तव शुक्रा भ्राजन्त ईरते । तव ज्योतीꣳष्यर्चयो विदेघाऽइति ॥ १२ ॥ स ह नैव प्रति-शुश्राव । तं त्वा घृतस्नवीमहऽइत्येवाभिव्याहरदथास्य घृतकीर्तावेवाग्निर्वैश्वानरो मुखाडुज्जज्वाल तं न शशाक धारयितुꣳ सोऽस्य मुखान्निष्पेदे स इमां पृथिवीं प्रापादः ॥ १३ ॥ तर्हि विदेघो माथव आस । सरस्वत्याꣳ स तत एव प्राङ्दहन्-भीययेमां पृथिवीं तं गोतमश्च राहूगणो विदेघश्च माथवः पश्चाद्दहन्तमन्वीयतुः स इमाः सर्वा नदीरतिददाह सदानीरित्युत्तराद्गिरेर्निर्धावति ताꣳ हैव नातिददाह ताꣳ ह स्म तां पुरा ब्राह्मणा न तरन्त्यनतिदग्धाग्निना वैश्वानरेणेति ॥ १४ ॥ तत एतर्हि । प्राचीनं बर्हिषो ब्राह्मणास्तद्धानेत्रतरमिवास स्रावितरमिवास्वदितमग्नि-

ना वैश्वानरेणेति ॥ १५ ॥ तदु हैतर्हि । क्षेत्रतरमिव ब्राह्मणा उ हि नूनमनग्न-
ज्ञैरसिषदंत्सापि जघन्ये नैदाघे समिवैव कोपयति तावद्दीतानतिदग्धा ह्यग्निना
वैश्वानरेण ॥ १६ ॥ स होवाच । विदेघो माथवः क्वाहं भवानीत्यत एव ते प्रा-
चीनं भुवनमिति होवाच सैषाप्येतर्हि कोसलविदेहानां मर्यादा ते हि माथवाः
॥ १७ ॥ अथ होवाच । गोतमो राहूगणः कथं नु नऽआमन्त्र्यमाणो न प्रत्यश्रौ-
षीरिति स होवाचाग्निर्मे वैश्वानरो मुखेऽभूत्स नेन्मे मुखान्निष्पद्यते तस्मात्ते न
प्रत्यश्रौषमिति ॥ १८ ॥ तदु कथमभूदिति । यत्रैव त्वं घृतस्रवीमहऽइत्यभिव्याहा-
र्षीस्तदेव मे घृतकीर्तावग्निर्वैश्वानरो मुखाडुदज्वालीत्तं नाशकं धारयितुꣳ स मे
मुखान्निरपादीति ॥ १९ ॥ स यत्सामिधेनीषु घृतवत् । सामिधेनमेव तत्समैवैनं
तेनेन्धे वीर्यमेवास्मिन्दधाति ॥ २० ॥ तदु घृताच्येति । देवान्भिगाति सुम्नयुरिति
यजमानो वै सुम्नयुः स हि देवान्भिगीषति स हि देवान्भिषाꣳसति तस्मादाह
देवान्भिगाति सुम्नयुरिति सैषाग्नेयी सत्यनिरुक्ता सर्वं वाऽअनिरुक्तꣳ सर्वेणैवैत-
त्प्रतिपद्यते ॥ २१ ॥ अग्नऽआयाहि वीतयऽइति । तद्वेति भवति वीतयऽइति स-
मन्तिकमिव ह वाऽइमेऽग्रे लोका आसुरित्युन्मृश्या कैव ग्यौरास ॥ २२ ॥ ते देवा
अकामयन्त । कथं नु न इमे लोका वितराꣳ स्युः कथं न इदं वरीय-इव स्या-
दिति तानेतैरेव त्रिभिरक्षरैर्व्यनयन्वीतयऽइति तऽइमे विदूरं लोकास्ततो देवे-
भ्यो वरीयोऽभवद्वरीयो ह वाऽअस्य भवति यस्यैवं विदुष एतामन्वाङ्वीतय
ऽइति ॥ २३ ॥ गृणानो हव्यदातयऽइति । यजमानो वै हव्यदातिर्गृणानो यजमा-
नायेत्येवैतदाह नि होता सत्सि बर्हिषीत्यग्निर्वै होतायं लोको बर्हिरस्मिन्नेवै-
तल्लोकेऽग्निं दधाति सोऽयमस्मिंल्लोकेऽग्निर्हितः सैषैमेमेव लोकमभ्यनूक्तेममेवैत-
या लोकं जयति यस्यैवं विदुष एतामन्वाङ्कः ॥ २४ ॥ तं त्वा समिद्भिरङ्गिर इति ।
समिद्भिर्ह्येतमङ्गिरस ऐन्धताङ्गिर इत्यङ्गिरा उ ह्यग्निर्घृतेन वर्धयामसीति तत्सामि-

धेनं पद्ध समेवैनं तेनेन्धे वीर्यमेवास्मिन्दधाति ॥२५॥ ॥ शतम ३०० ॥ ॥ बृहु-
ह्रोचा यविष्ठेति । बृहुद्ध ह्येष शोचति समिद्धो यविष्ठेति यविष्ठो ह्यग्निस्तस्मा-
दाह यविष्ठेति सैषैतमेव लोकमभ्यनूक्तान्तरिक्षलोकमेव तस्मादाग्नेयी सत्यनिरु-
क्तानिरुक्तो ह्येष लोक एतमेवैतया लोकं जयति यस्यैवं विदुष एतामन्वाहुः
॥२६॥ स नः पृथु श्रवाय्यमिति । अदो वै पृथु यस्मिन्देवा एतच्छ्रवाय्यं यस्मिन्देवा
अह्ना देव विवाससीत्यह देव विवासस्येतन्नो गमयेत्येवैतदाह ॥२७॥ बृहदग्ने सु-
वीर्यमिति । अदो वै बृहत्यस्मिन्देवा एतत्सुवीर्यं यस्मिन्देवाः सैषैतमेव लोकम-
भ्यनूक्ता दिवमेवैतमेवैतया लोकं जयति यस्यैवं विदुष एतामन्वाहुः ॥२८॥ सो
ऽन्वाह । इडेन्यो नमस्य इतीडेन्यो ह्येष नमस्यो ह्येष तिरस्तमाꣳसि दर्शत
इति तिर इव ह्येष तमाꣳसि समिद्धो ददृशे समग्निरिध्यते वृषेति सꣳ ह्रीध्यते वृ-
षा वृषोऽग्निः समिध्यतऽइति सꣳ ह्रीध्यते ॥२९॥ अश्वो न देववाहन इति ।
अश्वो ह वाऽएष भूत्वा देवेभ्यो यज्ञं वहति यद्वै नेत्यृच्योमिति तत्तस्मादाहाश्वो
न देववाहन इति ॥३०॥ तꣳ हविष्मन्त ईडतऽइति । हविष्मन्तो ह्येतं मनुष्या
ईडते तस्मादाह तꣳ हविष्मन्त ईडतऽइति ॥३१॥ वृषणं त्वा वयं वृषन्वृषणः
समिधीमहीति । सꣳ ह्येनमिन्धतेऽग्ने दीद्यतं बृहदिति दीद्येव ह्येष बृहत्समिद्धः
॥३२॥ तं वाऽएतम् । वृषण्वन्तं त्रिचमन्वाहाग्नेय्यो वाऽएताः सर्वाः सामिधेन्यो
भवन्तीन्द्रो वै यज्ञस्य देवतेन्द्रो वृषैतेनो ह्यस्यैताः सेन्द्राः सामिधेन्यो भवन्ति
तस्माद्वृषण्वन्तं त्रिचमन्वाह ॥३३॥ सोऽन्वाह । अग्निं दूतं वृणीमहेऽइति दे-
वाश्च वाऽअसुराश्चोभये प्राजापत्याः पस्पृधिरे तांस्पर्धमानान्गायत्र्यन्तरा तस्थौ या
वै सा गायत्र्यासीदियं वै सा पृथिवीयꣳ ह्येव तदन्तरा तस्थौ तेऽउभयेऽएव वि-
दां चक्रुर्यतरान्वै न इयमुपावर्त्स्यति ते भविष्यन्ति परेतरे भविष्यन्तीति तामुभय
ेऽएवोपमन्त्रयां चक्रिरेऽग्निरेव देवानां दूत आस सहरक्षा इत्यसुररक्षसमसुराणाꣳ

साग्निमेवानुप्रेयाय तस्मादन्वाहाग्निं दूतं वृणीमहऽइति स हि देवानां दूत आसीद्धोतारं विश्ववेदसमिति ॥ ३४ ॥ तदु हैकेऽन्वाहुः । होता यो विश्ववेदस इति नेदरमित्यात्मान ब्रवाणीति नदु तथा न ब्रूयान्मानुषꣳ ह ते यज्ञे कुर्वन्ति व्यृद्धं वै तद्यज्ञस्य यन्मानुषं नेद्यृद्धं यज्ञे करवाणीति तस्माद्यथैवर्चानूक्तमेवानुब्रूयाद्धोतारं विश्ववेदसमित्येवास्य यज्ञस्य सुक्रतुमित्येष हि यज्ञस्य सुक्रतुर्यदग्निस्तस्मादाहास्य यज्ञस्य सुक्रतुमिति सेयं देवानुपावर्वर्त ततो देवा अभवन्परासुरा भवति ह वाऽआत्मना परास्य सपत्ना भवन्ति यस्यैवं विदुष एतामन्वाहु ॥ ३५ ॥ तां वाऽअष्टमीमनुब्रूयात् । गायत्री वाऽएषा निदानिनाष्टाक्षरा वै गायत्री तस्मादष्टमीमनुब्रूयात् ॥ ३६ ॥ तद्वैके । पुरस्ताद्धाय्ये दधत्यन्नं धाय्ये मुखतऽइदमन्नाद्यं दध्म इति वदन्तस्तदु तथा न कुर्यादनवक्लृप्ता तस्यैषा भवति यः पुरस्ताद्धाय्ये दधाति दशमी वा हि तर्ह्येकादशी वा संपद्यते तस्यो हैवैषावकल्पा भवति यस्यैतामष्टमीमन्वाहुस्तस्मादुपरिष्टादेव धाय्ये दध्यात् ॥ ३७ ॥ समिध्यमानोऽअधरऽइति । अधरो वै यज्ञः समिध्यमानो यज्ञऽइत्येवैतदाहाग्निः पावक ईड्य इति पावको ह्येष ईड्यो ह्येष शोचिष्केशस्तमीमहऽइति शोचतीव ह्येतस्य केशाः समिद्धस्य समिद्धोऽग्रऽआहुतेत्यतः प्राचीनꣳ सर्वमिध्ममभ्यादध्याद्यदन्यत्समिधोऽपवृङ्क्तऽइव ह्येतद्धोता यद्वाऽअन्यत्समिध इध्मस्यातिरिच्यतेऽतिरिक्तं तद्यद्वै यज्ञस्यातिरिक्तं द्विषन्तꣳ हास्य तद्भ्रातृव्यमभ्यतिरिच्यते तस्मादतः प्राचीनꣳ सर्वमिध्ममभ्यादध्याद्यदन्यत्समिधः ॥ ३८ ॥ देवान्यक्षि स्वधेरिति । अधरो वै यज्ञो देवान्यक्षि सुयज्ञियेत्येवैतदाह त्वꣳ हि हव्यवाडसीत्येष हि हव्यवाड्यदग्निस्तस्मादाह त्वꣳ हि हव्यवाडसीत्या जुहोता ध्रुवस्यताग्निं प्रयत्यधरे । वृणीध्वꣳ हव्यवाहनमिति संप्रेष्यत्येवैतयाजुहुत च यजत च यस्मै कामाय समेन्धिष्वं तत्कुरुतेत्येवैतदाहाग्निं प्रयत्यधरऽइत्यधरो वै यज्ञोऽग्निं प्रयति यज्ञऽइत्येवैतदाह वृणीध्वꣳ हव्यवाहनमित्येष हि

क्व्यवाहनो यदग्निस्तस्मादाह वृणीध्वꣳ क्व्यवाहनमिति ॥३१॥ तं वाऽएतम्। अधरवत्तं त्रिचमन्वाह देवान्ह वै यज्ञेन यजमानांत्सपत्ना असुरा दुर्धूर्षां चक्रुस्ते दुर्धूर्षन्त एव न शेकुर्धूर्वितुं ते पराबभूवुस्तस्माद्यज्ञोऽधरो नाम दुर्धूर्षन्ह वाऽएनꣳ सपत्नः पराभवति यस्यैवं विदुषोऽधरवत्तं त्रिचमन्वाह्वर्यावद्वेव सौम्येनाधरेणेष्ट्वा ऽयति तावद्यजयति ॥४०॥ ब्राह्मणम् ॥३ [४. १.]॥

एतद्ध वै देवा अग्निं गरिष्ठेऽयुञ्जन्। यद्धोतृवऽइदं नो क्व्यं वक्षदिति तमेतद्गरिष्ठे युक्तोपामदन्वीर्यवान्वै त्वमस्यलं वै त्वमेतस्माऽअसीति वीर्ये समादधतो यथेदमप्येतर्हि ज्ञातीनां यं गरिष्ठे युञ्जन्ति तमुपमदन्ति वीर्यवान्वै त्वमस्यलं वै त्वमेतस्माऽअसीति वीर्ये समादधतः स यदत ऊर्ध्वमन्वाहोपस्तौत्येवैनमेतद्वीर्यमवास्मिन्दधाति ॥१॥ अग्ने महाँ२ऽअसि ब्राह्मण भारतेति। ब्रह्म क्व्यमग्निस्तस्मादाह ब्राह्मणेति भारतेत्येष हि देवेभ्यो क्व्यं भरति तस्माद्भरतोऽग्निरित्याङ्गिरेष उ वाऽइमाः प्रजाः प्राणो भूत्वा बिभर्ति तस्माद्वेवाह भारतेति ॥२॥ अथार्षेयं प्रवृणीते। ऋषिभ्यश्चैवैनमेतद्देवेभ्यश्च निवेदयत्ययं महावीर्यो यो यज्ञं प्रापदिति तस्मादार्षेयं प्रवृणीते ॥३॥ परस्तादर्वाक्प्रवृणीते। परस्ताद्धार्वाच्यः प्रजाः प्रजायन्ते ज्यायसस्पतयऽउ चैवैतं निष्कृतऽइदꣳ हि पितेवाग्रेऽथ पुत्रोऽथ पौत्रस्तस्मात्परस्तादर्वाक्प्रवृणीते ॥४॥ स आर्षेयमुक्त्वाह। देवेद्धो मन्विद्ध इति देवा क्षेतमग्नयऽऐन्धत तस्मादाह देवेद्ध इति मन्विद्ध इति मनुर्क्षेतमग्नयऽऐन्द्ध तस्मादाह मन्विद्ध इति ॥५॥ ऋषिष्टुत इति। ऋषयो क्षेतमग्नेऽस्तुवंस्तस्मादाहर्षिष्टुत इति ॥६॥ विप्रानुमदित इति। एते वै विप्रा यदृषय एते क्षेतमन्वमदंस्तस्मादाह विप्रानुमदित इति ॥७॥ कविशस्त इति। एते वै कवयो यदृषय एते क्षेतमशꣳसंस्तस्मादाह कविशस्त इति ॥८॥ ब्रह्मसꣳशित इति। ब्रह्मसꣳशितो क्षेष घृताहवन इति घृताहवनो क्षेषः ॥९॥ प्रणीर्यज्ञानाꣳ रथीरध्वराणामिति। एतेन

वै सर्वान्यज्ञान्प्रणयन्ति ये च पाकयज्ञा ये चेतरे तस्मादाह प्रणीर्यज्ञानामिति ॥ १० ॥ रथीरधराणामिति । रथो ह वाऽएष भूत्वा देवेभ्यो यज्ञं वहति तस्मादाह रथीरधराणामिति ॥ ११ ॥ अतूर्तो होता तूर्णिर्हव्यवाडिति । न ह्येतꣳ रक्षाꣳसि तरन्ति तस्मादाहातूर्तो होतेति तूर्णिर्हव्यवाडिति सर्वꣳ ह्येष पाप्मानं तरति तस्मादाह तूर्णिर्हव्यवाडिति ॥ १२ ॥ आस्पात्रं स्रुक्रुर्देवानामिति । देवपात्रं वाऽएष यदग्निस्तस्मादग्नौ सर्वेभ्यो देवेभ्यो स्रुक्वति देवपात्रꣳ ह्येष प्राप्नोति ह वै तस्य पात्रं यस्य पात्रं प्रेप्स्यति य एवमेतद्वेद ॥ १३ ॥ चमसो देवपान इति । चमसेन ह वाऽएतेन भूतेन देवा भक्षयन्ति तस्मादाह चमसो देवपान इति ॥ १४ ॥ अरा२॥ऽइवाग्ने नेमिर्देवांस्त्वं परिभूरसीति । यथारान्नेमिः सर्वतः परिभूरेवं त्वं देवांस्सर्वतः परिभूरसीत्येवैतदाह ॥ १५ ॥ आवह देवान्यज्ञमानायेति । तदस्मै यज्ञाय देवानावोढवाऽआहाग्निमग्नऽआवहेति तदग्नेयायाज्यभागायाग्निमावोढवाऽआह सोममावहेति तत्सौम्यायाज्यभागाय सोममावोढवाऽआहाग्निमावहेति तद्य एष उभयत्राच्युत आग्नेयः पुरोडाशो भवति तस्माऽअग्निमावोढवाऽआह ॥ १६ ॥ अथ यथादेवतम् । देवा२॥ऽआज्यपा२॥ऽआवहेति तत्प्रयाजानुयाजानावोढवाऽआह प्रयाजानुयाजा वै देवा आज्यपा अग्निꣳ होत्रायावहेति तदग्निꣳ होत्रायावोढवाऽआह स्वं महिमानमावहेति तत्स्वं महिमानमावोढवाऽआह वाग्वाऽअस्य स्वो महिमा तद्वाचमावोढवाऽआहा च वह ज्ञातवेदः सुयज्ञा च यजेति तद्या एवैतद्देवता आवोढवाऽआह ता एवैतदाहा चैना वहानुष्या च यजेति यदाह सुयज्ञा च यजेति ॥ १७ ॥ स वै तिष्ठन्वाह । अन्वाह ह्येतदसौ ह्यनुवाक्या तदसावेवैतद्वूत्वान्वाह तस्मात्तिष्ठन्वाह ॥ १८ ॥ आसीनो याज्यां यजति । इयꣳ हि याज्या तस्मान्न कश्चन तिष्ठन्याज्यां यजतीयꣳ हि याज्या तदियमेवैतद्वूत्वा यजति तस्मादासीना याज्यां यजति ॥ ११ ॥ ॥ ब्राह्मणम् ॥ ४ [४. २.] ॥ ॥

यो ह वाऽअग्निः सामिधेनीभिः समिद्धः । अतितराꣳ ह वै स इतरस्मादग्नेस्तत्पत्यनवधृष्यो हि भवत्यनवमृश्यः ॥१॥ स यथा ह्येवाग्निः । सामिधेनीभिः समिद्धस्तत्पत्येवꣳ ह्येव ब्राह्मणः सामिधेनीर्विद्वाननुब्रुवंस्तत्पत्यनवधृष्यो हि भवत्यनवमृश्यः ॥२॥ सोऽन्वाह । प्रव इति प्राणो वै प्रवान्प्राणमेवैतया समिन्द्धेऽग्न ऽआयाहि वीतयऽइत्यपानो वाऽएतवानपानमेवैतया समिन्द्धे बृहद्वोचा यविष्ठेत्युदानो वै बृहद्वोचा उदानमेवैतया समिन्द्धे ॥३॥ स नः पृथु श्रवाय्यमिति । श्रोत्रं वै पृथु श्रवाय्यꣳ श्रोत्रेण ह्येदमुरु पृथु शृणोति श्रोत्रमेवैतया समिन्द्धे ॥४॥ ईडेन्यो नमस्य इति । वाग्वाऽईडेन्या वाग्घीदꣳ सर्वमीट्टे वाचेदꣳ सर्वमीडितं वाचमेवैतया समिन्द्धे ॥५॥ अश्वो न देववाहन इति । मनो वै देववाहनं मनो ह्येदं मनस्विनं भूयिष्ठं वनीवाह्यते मन एवैतया समिन्द्धे ॥६॥ अग्ने दीद्यतं बृहदिति । चक्षुर्वै दीद्येव चक्षुरेवैतया समिन्द्धे ॥७॥ अग्निं दूतं वृणीमहऽइति । य एवायं मध्यमः प्राण एतमेवैतया समिन्द्धे सा ह्येषात्तस्या प्राणानामतो ह्यन्य ऽऊर्ध्वाः प्राणा अतोऽन्येऽवाञ्चोऽत्तस्या ह भवत्यत्तस्यमिनं मन्यते यऽएवमेतामत्तस्यां प्राणानां वेद ॥८॥ शोचिष्केशस्तमीमहऽइति । शिश्न वै शोचिष्केशꣳ शिश्नꣳ ह्येदꣳ शिश्निनं भूयिष्ठꣳ शोचयति शिश्नमेवैतया समिन्द्धे ॥९॥ समिद्धो ऽअग्नऽआहुतेति । य एवायमवाङ्प्राण एतमेवैतया समिन्द्धऽआ जुहोता हुवस्येतेति सर्वमात्मानꣳ समिन्द्धऽआ नखेभ्योऽथो लोमभ्यः ॥१०॥ स यद्येनं प्रथमायाꣳ सामिधेन्यामनुव्याहरेत् । तं प्रति ब्रूयात्प्राणं वाऽएतदात्मनोऽग्नावाधाः प्राणेनात्मन आर्त्तिमार्च्छिष्यसीति तथा ह्येव स्यात् ॥११॥ यदि द्वितीयस्यामनुव्याहरेत् । तं प्रति ब्रूयादपानं वाऽएतदात्मनोऽग्नावाधा अपानेनात्मन आर्त्तिमार्च्छिष्यसीति तथा ह्येव स्यात् ॥१२॥ यदि तृतीयस्यामनुव्याहरेत् । तं प्रति ब्रूयादुदानं वाऽ - - उदानेना° - - स्यात् ॥१३॥ यदि चतुर्थ्यामनुव्याहरेत् । तं प्रतिब्रूयाच्छ्रोत्रं

वाऽएतदात्मनोऽग्रावाधाः श्रोत्रेणात्मन आर्त्तिमार्च्छिष्यसि बधिरो भविष्यसीति तथा हैव स्यात् ॥ १४ ॥ यदि पञ्चम्यामनुव्याकुरेत् । तं प्रति ब्रूयाद्वाचं वाऽएतदात्मनोऽग्रावाधा वाचात्मन आर्त्तिमार्च्छिष्यसि मूको भवि° - - स्यात् ॥ १५ ॥ यदि षष्ठ्यामनुव्याकुरेत् । तं प्रति ब्रूयान्मनो वाऽएतदात्मनोऽग्रावाधा मनसात्मन आर्त्तिमार्च्छिष्यसि मनोमुषिगृहीतो मोमुघश्चरिष्यसीति तथा हैव स्यात् ॥ १६ ॥ यदि सप्तम्याम° - । - °याच्चनुर्वाऽएतदात्मनोऽग्रावाधाश्चनुषात्मन आर्त्तिमार्च्छिष्यस्यन्धो भवि° - - स्यात् ॥ १७ ॥ यद्यष्टम्याम° - । - °यान्मध्यं वाऽएतत्प्राणमात्मनोऽग्रावाधा मध्येन प्राणेनात्मन आर्त्तिमार्च्छिष्यस्युदूध्माय मरिष्यसीति तथा हैव स्यात् ॥ १८ ॥ यदि नवम्याम° - । - °याद्धिग्नं वाऽएतदात्मनोऽग्रावाधाः शिश्नेनात्मन आर्त्तिमार्च्छिष्यसि क्लीबो भवि° - - स्यात् ॥ १९ ॥ यदि दशम्यामनु° - । - °याद्वाचं वाऽएतत्प्राणमात्मनोऽग्रावाधा अवाचा प्राणेनात्मन आर्त्तिमार्च्छिष्यस्यपिनद्धो मरिष्यसीति तथा हैव स्यात् ॥ २० ॥ यद्येकादश्याम° - । - °यात्सर्वं वाऽएतदात्मानमग्रावाधाः सर्वेणात्मनार्त्तिमार्च्छिष्यसि द्विप्रेऽमुं लोकमेष्यसीति तथा हैव स्यात् ॥ २१ ॥ स यथा हैवाग्निꣳ । सामिधनीभिः समिद्धमापद्यार्त्तिं न्येत्येवꣳ हैव ब्राह्मणꣳ सामिधनीर्विद्धाꣳसꣳ समनुब्रुवन्तमनुव्याकृत्यार्त्तिं न्येति ॥ २२ ॥ ब्राह्मणम् ॥ ५ [४. ३.] ॥

तं वाऽएतमग्निꣳ समैन्धिषत । समिद्धे देवेभ्यो जुहवामेति तस्मिन्नेतेऽएव प्रथमेऽआहुती जुहोति मनसे चैव वाचे च मनश्च हैव वाक्च युज्ञौ देवेभ्यो यज्ञं वहतः ॥ १ ॥ स यदुपाꣳशु क्रियते । तन्मनो देवेभ्यो यज्ञं वहत्यथ यद्वाचा निरुक्तं क्रियते तद्वाग्देवेभ्यो यज्ञं वहत्येतद्वाऽइदं द्वयं क्रियते तदेतेऽएवैतत्संतर्पयति तृप्ते प्रीते देवेभ्यो यज्ञं वहात इति ॥ २ ॥ स्रुवेण तमाधारयति । यं मनसऽआधारयति वृषा हि मनो वृषा हि स्रुवः ॥ ३ ॥ स्रुचा तमाधारयति । यं वाचऽआधारयति योषा हि वाग्योषा हि स्रुक् ॥ ४ ॥ तूष्णीं तमाधारयति । यं मनसऽआधा-

र्यति न स्वाहेति चनानिरुक्तꣳ हि मनोऽनिरुक्तꣳ ह्येतद्यत्तूष्णीम् ॥५॥ मन्त्रेण तमाघार्यति । यं वाचऽआघार्यति निरुक्ता हि वाङ्निरुक्तो हि मन्त्रः ॥६॥ आसीनस्तमाघार्यति । यं मनसऽआघार्यति तिष्ठंस्तं यं वाचि मनश्च ह वै वाक्च युज्ञौ देवेभ्यो यज्ञं वहतो यतरो वै युज्ञोर्ह्रसीयान्भवत्युपवहं वै तस्मै कुर्वन्ति वाग्वै मनसो ह्रसीयस्यपरिमिततरमिव हि मनः परिमिततरेव हि वाक्तद्वाचऽएवैतदुपवहं करोति ते सयुज्ञौ देवेभ्यो यज्ञं वहतस्तस्मात्तिष्ठन्वाचऽआघार्यति ॥७॥ देवा ह वै यज्ञं तन्वानाः । तेऽसुररक्षसेभ्य आसङ्गाद्बिभयां चक्रुस्तऽएतद्दक्षिणतः प्रत्युदश्रयन्नुङ्खितमिव हि वीर्यं तस्माद्दक्षिणतस्तिष्ठन्नाघार्यति स यदुभयत आघार्यति तस्मादिदं मनश्च वाक्च समानमेव सन्नानिव शिरो ह वै यज्ञस्यैतयोरन्यतर आघार्योर्मूलमन्यतरः ॥८॥ स्रुवेण तमाघार्यति । यो मूलं यज्ञस्य स्रुचा तमाघार्यति यः शिरो यज्ञस्य ॥९॥ तूष्णीं तमाघार्यति । यो मूलं यज्ञस्य तूष्णीमिव ह्येदं मूलं नो ह्यत्र वाग्वदति ॥१०॥ मन्त्रेण तमाघार्यति । यः शिरो यज्ञस्य वाग्घि मन्त्रः शीर्ष्णो ह्येयमधि वाग्वदति ॥११॥ आसीनस्तमाघार्यति । यो मूलं यज्ञस्य निषत्तमिव ह्येदं मूलं तिष्ठंस्तमाघार्यति यः शिरो यज्ञस्य तिष्ठतीव ह्येदꣳ शिरः ॥१२॥ स स्रुवेण पूर्वमाघारमाघार्याह । अग्निमग्नीत्सम्मृक्षीति यथा धुरमध्यूहेदेवं तद्यत्पूर्वमाघारमाघार्यत्यध्युह्य हि धुरं युञ्जन्ति ॥१३॥ अथ सम्मार्ष्टि । युनक्त्येवैनमेतद्युक्तो देवेभ्यो यज्ञं वहादिति तस्मात्सम्मार्ष्टि परिक्रामꣳ सम्मार्ष्टि परिक्रामꣳ हि योग्यं युञ्जन्ति त्रिस्त्रिः सम्मार्ष्टि त्रिवृद्धि यज्ञः ॥१४॥ स सम्मार्ष्टि । अग्ने वाजजिद्वाजं त्वा सरिष्यन्तं त्वा वाजजितꣳ सम्मार्ज्मीति यज्ञं त्वा वक्ष्यन्तं यज्ञियꣳ सम्मार्ज्मीत्येवैतदाहाथोपरिष्टात्तूष्णीं त्रिस्तद्यथा युक्ता प्राञ्चेत्प्रेहि वहेत्येवमेवैतत्कशयोपचिन्वति प्रेहि देवेभ्यो यज्ञं वहेति तस्मादुपरिष्टात्तूष्णीं त्रिस्तद्येतदुत्तरेण कर्म क्रियते तस्मादिदं मनश्च वाक्च समानमेव सन्ना-

नेव ॥ १५ ॥ ब्राह्मणम् ॥ ६ [४. ४.] ॥ ॥ तृतीयः प्रपाठकः ॥ ॥ कण्डिकासंख्या १२० ॥ ॥

स स्रुचोत्तरमाधारमाधारयिष्यन् । पूर्वेण स्रुचावञ्जलिं निदधाति नमो देवेभ्यः स्वधा पितृभ्य इति तद्देवेभ्यश्चैवैतत्पितृभ्यश्चार्विड्यं करिष्यन्निक्रुते सुयमे मे भूयास्तमिति स्रुचावादत्ते सुभरे मे भूयास्तं भर्तुं वाꣳ शकेयमित्येवैतदाहास्कन्नमस्य देवेभ्य आज्यꣳ सम्भ्रियासमित्यविच्युब्धमस्य देवेभ्यो यज्ञं तनवाऽइत्येवैतदाह ॥ १ ॥ अङ्घ्रिणा विष्णो मा त्वावक्रमिषमिति । यज्ञो वै विष्णुस्तस्माऽएवैतन्निक्रुते मा त्वावक्रमिषमिति वसुमतीमग्ने ते छायामुपस्थेषमिति साधीमग्ने ते छायामुपस्थेषमित्येवैतदाह ॥ २ ॥ विष्णो स्थानमसीति । यज्ञो वै विष्णुस्तस्येव क्षेतदन्तिक तिष्ठति तस्मादाह विष्णो स्थानमसीतीत इन्द्रो वीर्यमकृणोदित्यतो क्षीन्द्रस्तिष्ठन्दक्षिणातो नाष्ट्रा रक्षाꣳस्यपाहंस्तस्मादाहेत इन्द्रो वीर्यमकृणोदित्यूर्धोऽधर आस्थादित्यधरो वै यज्ञ ऊर्धो यज्ञ आस्थादित्येवैतदाह ॥ ३ ॥ अग्ने वेर्होत्रं वेर्दूत्यमिति । उभयं वाऽएतदग्निर्देवानाꣳ होता च दूतश्च तदुभयं विद्धि यद्देवानामसीत्येवैतदाहावतां त्वां द्यावापृथिवीऽअव त्वं द्यावापृथिवीऽइति नात्र तिरोहितमिवास्ति स्विष्टकृद्देवेभ्य इन्द्र आज्येन हविषाभूत्स्वाहेतीन्द्रो वै यज्ञस्य देवता तस्मादाहेन्द्र आज्येनेति वाचे वाऽएतमाधारमाधारयतीन्द्रो वागित्यु वाऽआहुस्तस्माद्वावाहेन्द्र आज्येनेति ॥ ४ ॥ अथासꣳस्पर्शयत्स्रुचौ पर्येत्य । ध्रुवया समनक्ति शिरो वै यज्ञस्योत्तर आधार आत्मा वै ध्रुवा तदात्मन्येवैतच्छिरः प्रतिदधाति शिरो वै यज्ञस्योत्तर आधारः श्रीर्वै शिरः श्रीर्हि वै शिरस्तस्माच्योऽर्धस्य श्रेष्ठो भवत्यसावमुष्यार्धस्य शिर इत्याहुः ॥ ५ ॥ यजमान एव ध्रुवामनु । योऽस्माऽअरातीयति स उपभृतमनु स यद्धोपभृता समञ्ज्याद्यो यजमानायारातीयति तस्मिंश्चियं दध्यात्तद्यजमानऽएवैतच्चियं दधाति तस्माद्ध्रुवया समनक्ति ॥ ६ ॥ स समनक्ति । सं ज्योतिषा

ज्योतिरिति ज्योतिर्वाऽइतरस्यामाज्यं भवति ज्योतिरितरस्यां ते ह्येतदुभे ज्योतिषी संगृह्येते तस्मादिवꣳ समनक्ति ॥७॥ अथातो मनसश्चैव वाचश्च । अरुम्भद्ऽउदितं मनश्च ह वै वाङ्कारुम्भद्ऽऊदाते ॥८॥ तद्ध मन ऽवाच । अरुमेव त्वक्रियोऽस्मि न वै मया त्वं किं चनानभिगतं वदसि सा यन्मम त्वं कृतानुकरानुवर्त्मास्यरुमेव त्वक्रियोऽस्मीति ॥९॥ अथ ह वागुवाच । अरुमेव त्वक्रियस्यस्मि यद्वै त्वं वेत्थाहं तद्विज्ञपयाम्यरुꣳ सज्ञपयामीति ॥१०॥ ते प्रजापतिं प्रतिप्रश्नमियतुः । स प्रजापतिर्मनसऽएवानूवाच मन एव त्वक्रियो मनसो वै त्वं कृतानुकरानुवर्त्मासि श्रेयसो वै पापीयान्कृतानुकरोऽनुवर्त्मा भवतीति ॥११॥ सा ह वाक्परोक्ता विसिष्मिये । तस्यै गर्भः पपात सा ह वाक्प्रजापतिमुवाचारुव्यवाड्वाहं तुभ्यं भूयासं यां मा परावोच इति तस्माद्यत्किं च प्राजापत्यं यज्ञे क्रियतऽउपाꣳश्चैव तत्क्रियतेऽरुव्यवाड्हि वाक्प्रजापतयऽआसीत् ॥१२॥ तद्धैतद्देवाः । रेतश्चर्मन्वा यस्मिन्वा बभ्रुस्तद्ध स्म पृच्छत्यत्रैव त्याꣳदिति ततोऽत्रिः सम्बभूव तस्माद्ध्यात्रेय्या योषितिनस्व्येतस्यै हि योषायै वाचो देवताया एते सम्भूताः ॥१३॥ ब्राह्मणम् ॥१ [४.५.]॥ अध्यायः ॥४॥ ॥

स वै प्रवरायाश्रावयति । तद्यत्प्रवरायाश्रावयति यज्ञो वाऽआश्रावणं यज्ञमभिव्याहृत्याथ होतारं प्रवृणाऽइति तस्मात्प्रवरायाश्रावयति ॥१॥ स इध्मसंनहनान्येवाभिपद्याश्रावयति । स यद्वानारभ्य यज्ञमध्वर्युराश्रावयेद्वैपनो वा ह स्यादन्यां वार्त्तिमार्च्छेत् ॥२॥ तद्वैके । वेदे स्तीर्णायै बर्हिरभिपद्याश्रावयन्तीध्मस्य वा शकलमपह्नियाभिपद्याश्रावयन्तीदं वै किंचिद्यज्ञस्येदं यज्ञमभिपद्याश्रावयाम इति वदन्तस्तद्ध तथा न कुर्यादेतद्वै किंचिद्यज्ञस्य यदिध्मः संनद्धो भवत्यग्निꣳ सम्मृज्ञन्ति तद्वेव खलु यज्ञमभिपद्याश्रावयति तस्मादिध्मसंनहनान्येवाभिपद्याश्रावयेत् ॥३॥ स आश्राव्य । य एव देवानाꣳ होता तमेवाग्ने प्रवृणीतेऽग्निमेव तदग्नये चैवैतद्देवेभ्यश्च

निक्रुते यदह्वाग्नेऽग्निं प्रवृणीते तदग्नये निक्रुतेऽथ यो देवानाꣳ होता तमये प्रवृणीते तदु देवेभ्यो निक्रुते ॥४॥ स आह । अग्निर्देवो दैव्यो होतेत्यग्निर्हि देवानाꣳ होता तस्मादाहाग्निर्देवो दैव्यो होतेति तदग्नये चैव देवेभ्यश्च निक्रुते यदह्वाग्नेऽग्निमाह तदग्नये निक्रुतेऽथ यो देवानाꣳ होता तमयऽआह तदु देवेभ्यो निक्रुते ॥५॥ देवान्यक्षद्विद्वांश्चिकित्वानिति । एष वै देवाननुविद्वान्यदग्निः स एनाननुविद्याननुष्या यक्षदित्येवैतदाह ॥६॥ मनुष्वद्भरतवदिति । मनुर्ह वाऽग्रे यज्ञेनेजे तदनुकृत्येमाः प्रजा यजन्ते तस्मादाह मनुष्वदिति मनोर्यज्ञऽइत्यु वाऽआकुस्तस्माद्वाह मनुष्वदिति ॥७॥ भरतवदिति । एष हि देवेभ्यो हव्यं भरति तस्माद्भरतोऽग्निरित्याकुरेष उ वाऽइमाः प्रजाः प्राणो भूत्वा बिभर्ति तस्माद्वाह भरतवदिति ॥८॥ अथार्षेयं प्रवृणीते । ऋषिभ्यश्चैवैनमेतद्देवेभ्यश्च निवेदयत्ययं महावीर्यो यो यज्ञं प्रापदिति तस्मादार्षेयं प्रवृणीते ॥९॥ परस्तादर्वाक्प्रवृणीते । परस्ताद्ध्यर्वाचः प्रजाः प्रजायन्ते ज्यायसस्पतयऽउ चैवैतन्निक्रुतऽइदꣳ हि पितैवाग्रेऽथ पुत्रोऽथ पौत्रस्तस्मात्परस्तादर्वाक्प्रवृणीते ॥१०॥ स आर्षेयमुक्त्वाह । ब्रह्मणवदिति ब्रह्म ह्यग्निस्तस्मादाह ब्रह्मणवदित्या च वक्षदिति तथा एवैतद्देवता आवोढवाऽआह ता एवैतदाहा च वक्षदिति ॥११॥ ब्राह्मणा अस्य यज्ञस्य प्रावितार इति । एते वै ब्राह्मणा यज्ञस्य प्रावितारो येऽनूचाना एते ह्येनं तन्वतऽएतऽएनं जनयन्ति तदु तेभ्यो निक्रुते तस्मादाह ब्राह्मणा अस्य यज्ञस्य प्रावितार इति ॥१२॥ असौ मानुष इति । तदिमं मानुषꣳ होतारं प्रवृणीतेऽहोता वै ष पुराथैतर्हि होता ॥१३॥ स प्रवृतो होता जपति । देवता उपधावति यथानुष्या देवेभ्यो वषट्कुर्याद्यथानुष्या देवेभ्यो हव्यं वक्ष्यथा न ह्वलेदेवं देवता उपधावति ॥१४॥ तत्र जपति । एतत्त्वा देव सवितर्वृणतऽइति तत्सवितारं प्रसवायोपधावति स हि देवानां प्रसविताग्निꣳ होत्रायेति तदग्नये चैवैतद्देवेभ्यश्च निक्रुते

यदग्नेऽग्निमाह तदग्नये निर्ऋतेऽथ यो देवानाꣳ होता तमग्रऽआह तद्वै देवेभ्यो निर्ऋते ॥१५॥ सꣳ हि पित्रा वैश्वानरेणेति । संवत्सरो वै पिता वैश्वानरः प्रजापतिस्तत्संवत्सरायैवैतत्प्रजापतये निर्ऋतेऽग्ने पूषन्बृहस्पते प्र च वद प्र च यजेत्यनुवद्यन्वाऽएतद्यद्यन्भवति तदेताभ्य एवैतद्देवताभ्यो निर्ऋते यूयमनुब्रूत यूयं यजतेति ॥१६॥ ॥ शतम् ॥४००॥ ॥ वसूनाꣳ रातौ स्याम । रुद्राणामुर्व्यायाꣳ स्वादित्या अदितये स्यामानेहस इत्येते वै त्रया देवा यद्वसवो रुद्रा आदित्या एतेषामभिगुप्तौ स्यामेत्येवैतदाह ॥१७॥ ज्रुष्टामद्य देवेभ्यो वाचमुद्यासमिति । ज्रुष्टमद्य देवेभ्योऽनूद्यासमित्येवैतदाह तद्धि समृद्धं यो ज्रुष्टं देवेभ्योऽनुब्रवत् ॥१८॥ ज्रुष्टां ब्रह्मभ्य इति । ज्रुष्टमद्य ब्राह्मणेभ्योऽनूद्यासमित्येवैतदाह तद्धि समृद्धं यो ज्रुष्टं ब्राह्मणेभ्योऽनुब्रवत् ॥१९॥ ज्रुष्टां नराशाꣳसायेति । प्रजा वै नरस्तत्सर्वाभ्यः प्रजाभ्य आह तद्धि समृद्धं यश्च वेद यश्च न साधन्ववोचत्साधन्ववोचदित्येव विसृज्यन्ते यदद्य होतृवर्ये ऽक्ष्णः चक्षुः परापतत् अग्निष्टत्पुनराभ्रियाज्जातवेदा विचर्षणिरिति यथा यानग्रेऽग्नीन्होत्राय प्रावृणात ते प्राधन्वन्नेवं यन्मेऽत्र प्रवरेणामायि तन्मे पुनराप्याययेत्येवैतदाह तथो हास्यैतत्पुनराप्यायते ॥२०॥ अथाधर्युं चाग्नीधं च सम्मृशति । मनो वाऽअधर्युर्वाग्घोता तन्मनश्चैवैतद्वाचं च संदधाति ॥२१॥ तत्र जपति । षण्मोर्वीरुꣳहसस्पान्वग्निश्च पृथिवी चापश्च वाजश्चाहश्च रात्रिश्चेत्येता मा देवता आर्त्तेर्गोपायन्त्वित्येवैतदाह तस्यो हि न हृलास्ति यमेता देवता आर्त्तेर्गोपायेयुः ॥२२॥ अथ होतृषदनमुपावर्तते । स होतृषदनादेकं तृणं निरस्यति निरस्तः परावसुरिति पुरावसुर्हे वै नामासुराणाꣳ होता स तमेवैतद्धोतृषदनान्निरस्यति ॥२३॥ अथ होतृषदनऽउपविशति । इदमहमर्वावसोः सदने सीदामीत्यर्वावसुर्वै नाम देवानाꣳ होता तस्यैवैतत्सदने सीदति ॥२४॥ तत्र जपति । विश्वकर्मंस्तनूपा असि मा मो दोषिष्टं मा मा हिꣳसिष्टमेष वां लोक इत्यु-

दक्षिणत्यन्तरा वाऽएतदाहवनीयं च गार्हपत्यं चास्ति तदु ताभ्यां निष्कृते मा मो दोषिष्टं मा मा क्षिप्तमिति तथा कैनमेतौ न क्षिप्तः ॥२५॥ अथाग्नीध्रमाणो ज्ञपति । विश्वे देवाः शास्तन मा यथेह होता वृतो मनवै यन्निषद्य । प्र मे ब्रूत भागधेयं यथा वो येन पथा हव्यमा वो वहानीति यथा येभ्यः पक्षꣳ स्यात्तान्ब्रूयादनु मा शास्त यथा व आहरिष्यामि यथा वः परिविष्यामीत्येवमेवैतद्देवेषु प्रशासनमिहतेऽनु मा शास्त यथा वोऽनुष्वा वषट्कुर्यामनुष्वा हव्यं वक्षेयमिति तस्मादेवं ज्ञपति ॥२६॥ ब्राह्मणम् ॥२[५.१.]॥ ॥

अग्निर्होता वेत्वग्नेर्होत्रमिति । अग्निरिदꣳ होता वेत्वित्येवैतदाहाग्नेर्होत्रमिति तस्यो हि होत्रं वेत्तु प्रावित्रमिति यज्ञो वै प्रावित्रं वेत्तु यज्ञमित्येवैतदाह साधु ते यजमान देवतेति साधु ते यजमान देवता यस्य तेऽग्निर्होतेत्येवैतदाह घृतवतीमधर्यो स्रुचमास्यस्वेति तदध्वयु प्रसौति स यदेकामिवाह ॥१॥ यजमान एव जुहूमनु । योऽस्माऽअरातीयति स उपभृतमनु स यद्वैऽएव ब्रूयाद्यजमानाय द्विषन्तं भ्रातृव्यं प्रत्युद्यामिनं कुर्यादुत्तैव जुहूमन्वाद्य उपभृतमनु स यद्वैऽएव ब्रूयादुत्तरऽआद्यं प्रत्युद्यामिनं कुर्यात्तस्मादेकामिवैवाह ॥२॥ देवयुवं विश्ववारामिति । उपस्तौत्येवैनामेतन्मनुष्यत्येव यदाह देवयुवं विश्ववारामितीडामहे देवांऽ॥ऽईडेन्यान्नमस्याम नमस्यान्यज्ञाम यज्ञियानितीडामहे तान्देवान्यऽईडेन्या नमस्याम तान्ये नमस्या यजाम यज्ञियानिति मनुष्या वाऽईडेन्याः पितरो नमस्या देवा यज्ञियाः ॥३॥ या वै प्रजा यज्ञेऽनन्वाभक्ताः । पराभूता वै ता एवमेवैतद्या इमाः प्रजा अपराभूतास्ता यज्ञऽआभजति मनुष्याननु पशवो देवाननु वयाꣳस्योषधयो वनस्पतयो यदिदं किञ्चैवमु तत्सर्वं यज्ञऽआभक्तम् ॥४॥ ता वाऽएताः । नव व्याकृतयो भवन्ति नवैमे पुरुषे प्राणा एतानेवास्मिन्नेतद्दधाति तस्मान्नव व्याकृतयो भवन्ति ॥५॥ यज्ञो ह देवेभ्योऽपचक्राम । तं देवा अन्वमन्त्रयन्ता नः शृणोप न

आवर्तस्वेति सोऽस्तु तथेत्येव देवानुपावर्तेनोपावृत्तेन देवा अयजन्त तेनेष्ट्वै-तदभवन्यदिदं देवाः ॥ ६ ॥ स यदाश्रावयति । यज्ञमेवैतदनुमन्त्रयतऽआ नः शृणोप न आवर्तस्वेत्यथ यत्प्रत्याश्रावयति यज्ञ एवैतदुपावर्ततेऽस्तु तथेति तेनोपावृत्ते-न रेतसा भूतेनऽर्त्विजः संप्रदायं चरन्ति यजमानेन परोऽक्षं यथा पूर्णपात्रेण संप्र-दायं चरेयुरेवमनेनऽर्त्विजः संप्रदायं चरन्ति तद्वाचैवैतत्संप्रदायं चरन्ति वाग्घि यज्ञो वागु हि रेतस्तदेतेनैवैतत्संप्रदायं चरन्ति ॥ ७ ॥ सोऽनुब्रूहीत्येवोक्ताधर्युः । नाप-व्याहरेन्नोऽएव होतापव्याहरेदाश्रावयत्यधर्युस्तदग्नीधं यज्ञ उपावर्तते ॥ ८ ॥ सो ऽग्नीन्नापव्याहरेत् । आ प्रत्याश्रावणात्प्रत्याश्रावयत्यग्नीत्तत्पुनरधर्युं यज्ञ उपावर्त-ते ॥ १ ॥ ॥ काण्डस्यार्द्धम् ॥ ४११ ॥ ॥ सोऽधर्युर्नापव्याहरेत् । आ यजेति वक्तोर्य-जेत्येवाधर्युर्होत्रे यज्ञꣳ संप्रयच्छति ॥ १० ॥ स होता नापव्याहरेत् । आ वषट्कारात्तं वषट्कारेणाग्नावेव योनौ रेतो भूतꣳ सिञ्चत्यग्निर्वै योनिर्यज्ञस्य स ततः प्रजायत ऽइति नु हविर्यज्ञेऽथ सौम्येऽधरे ॥ ११ ॥ स वै यर्हं गृहीत्वाधर्युः । नापव्याहरे-दोपाकरणादुपावर्तधमित्येवाधर्युरुद्गातृभ्यो यज्ञꣳ संप्रयच्छति ॥ १२ ॥ तऽउद्गातारो नापव्याहरेयुः । ओत्तमाया एषोत्तमेत्येवोद्गातारो होत्रे यज्ञꣳ संप्रयच्छन्ति ॥ १३ ॥ स होता नापव्याहरेत् । आ वषट्कारात्तं वषट्कारेणाग्नावेव योनौ रेतो भूतꣳ सिञ्चत्यग्निर्वै योनिर्यज्ञस्य स ततः प्रजायते ॥ १४ ॥ स यद्ध सोऽपव्याहरेत् । यं यज्ञ उपावर्तते यथा पूर्णपात्रं परासिञ्चेद्देवꣳ ह स यजमानं परासिञ्चेत्स यत्र हैव-मृत्विजः संविदाना यज्ञेन चरन्ति सर्वमेव तत्र कल्पते न मुह्यति तस्मादेवमेव यज्ञो भर्तव्यः ॥ १५ ॥ ता वाऽएताः । पञ्च व्याकृतयो भवन्त्यो श्रावयास्तु श्रौष-ड्यज्ञ ये यजामहे वौषडिति पाङ्क्तो यज्ञः पाङ्क्तः पशुः पञ्चर्तवः संवत्सरस्यैषैका यज्ञस्य मात्रेषा सम्पत् ॥ १६ ॥ तासाꣳ सप्तदशान्नराणि । सप्तदशो वै प्रजापतिः प्रजापतिर्यज्ञ एषैका यज्ञस्य मात्रेषा सम्पत् ॥ १७ ॥ ओ श्रावयेति वै देवाः । पु-

रोवातꣳ ससृज्रिरꣳस्तु श्रौषडित्यभ्राणि समप्लावयन्यज्ञेति विद्युतं ये यज्ञामहꣳइति स्तनयित्नुं वषट्कारेणैव प्रावर्षयन् ॥ १८ ॥ स यदि वृष्टिकामः स्यात् । यदीष्या वा यजेत दर्शपूर्णमासयोर्वैव ब्रूयाद्वृष्टिकामो वाऽअस्मीति तत्रोऽअध्वर्यु ब्रूयात्पुरोवातं च विद्युतं च मनसा ध्यायेत्यभ्राणि मनसा ध्यायेत्यग्नीधꣳ स्तनयित्नुं च वर्ष च मनसा ध्यायेति होतारꣳ सर्वाण्येतानि मनसा ध्यायेति ब्रह्माणं वर्षतीव तत्र यत्रैवमृत्विजः संविदाना यज्ञेन चरन्ति ॥ १९ ॥ ओ श्रावयेति वै देवाः । विराजमभ्याजुह्वुरस्तु श्रौषडिति वत्समुपावासृजन्यजेत्युदजयन्ये यज्ञामहꣳइत्युपासीदन्वषट्कारेणैव विराजमदुहतेयं वै विराडस्यै वाऽएष दोहꣳ एवꣳ हु वाऽअस्माऽइयं विराट्सर्वान्कामान्दुहे य एवमेतं विराजो दोहं वेद ॥ २० ॥ ब्राह्मणम् ॥ ३ [५. २.] ॥ ॥

ऋतवो ह वै प्रयाजाः । तस्मात्पञ्च भवन्ति पञ्च ह्यृतवः ॥ १ ॥ देवाश्च वाऽअसुराश्च । उभये प्राजापत्याः पस्पृधिरꣳ एतस्मिन्यज्ञे प्रजापतौ पितरि संवत्सरेऽस्माकमयं भविष्यत्यस्माकमयं भविष्यतीति ॥ २ ॥ ततो देवाः । अर्चन्तः श्राम्यन्तश्चेरुस्तꣳ एतान्प्रयाजान्ददृशुस्तैरयजन्त तैर्ऋतूत्संवत्सरं प्राजयन्नृतुभ्यः संवत्सरात्सपत्नानन्तरायंस्तस्मात्प्रजायाः प्रजया ह वै नामैतद्यत्प्रयाजा इति तथोऽएवैष एतैर्ऋतूत्संवत्सरं प्रजयत्यृतुभ्यः संवत्सरात्सपत्नानन्तरेति तस्मात्प्रयाजैर्यजते ॥ ३ ॥ ते वाऽआज्यहविषो भवन्ति । वज्रो वाऽआज्यमेतेन वै देवा वज्रेणाज्येनꣳ ऋतूत्संवत्सरं प्राजयन्नृतुभ्यः संवत्सरात्सपत्नानन्तरायंस्तथोऽएवैष एतेन वज्रेणाज्येनꣳ ऋतूत्संवत्सरं प्रजयत्यृतुभ्यः संवत्सरात्सपत्नानन्तरेति तस्मादाज्यहविषो भवन्ति ॥ ४ ॥ एतद्वै संवत्सरस्य स्वं पयः । यदाज्यं तत्स्वेनैवैनमेतत्पयसा देवाः स्व्यकुर्वत तथोऽएवैनमेष एतत्स्वेनैव पयसा स्वीकुरुते तस्मादाज्यहविषो भवन्ति ॥ ५ ॥ स यत्रैव तिष्ठन्प्रयाजेभ्य आश्रावयेत् । तत एव नापक्रामेत्संग्रामो वाऽएष संनिधीयते यः प्रयाजैर्यजते यतरो वै संयत्तयोः पराजयतेऽप वै संक्रामत्यभितरामु वै जयन्क्रामति

तस्माद्भितरामभितरामेव क्रामेद्भितरामभितरामाकृतीर्जुहुयात् ॥ ६॥ तद्ध तथा न कुर्यात् ॥ यत्रैव तिष्ठन्प्रयाजेभ्य आश्रावयेत्तत एव नापक्रामेद्यत्रोऽएव समिद्धतमं मन्येत तदाकृतीर्जुहुयात्समिद्धहोमेन क्वेव समृद्धा आकृतयः ॥ ७॥ स आश्रावयाहं । समिधो यजेति तद्वसन्तꣳ समिन्द्धे स वसन्तः समिद्धोऽन्यानृतून्त्समिन्द्धेऽऋतवः समिद्धाः प्रजाश्च प्रजनयत्योषधीश्च पचन्ति तद्वेव खलु सर्वानृतून्निराह्याथ यजयजेत्येवोत्तरानाह्याजामितायै ज्ञामि ह कुर्याद्यत्तनूनपातं यजेडो यजेति ब्रूयात्तस्माद्यजयजेत्येवोत्तरानाह ॥ ८॥ स वै समिधो यजति । वसन्तो वै समिद्धसन्तमेव तद्देवा अवृञ्जत वसन्तात्सपत्नानन्तरायन्वसन्तमेवैष एतद्धृङ्क्ते वसन्तात्सपत्नानन्तरेति तस्मात्समिधो यजति ॥ १॥ अथ तनूनपातं यजति । ग्रीष्मो वै तनूनपाद्ग्रीष्मो ह्यासां प्रजानां तनूस्तपति ग्रीष्ममेव तद्देवा अवृञ्जत ग्रीष्मात्सपत्नानन्तरायन्ग्रीष्ममेवैष एतद्धृङ्क्ते ग्रीष्मात्सपत्नानन्तरेति तस्मात्तनूनपातं यजति ॥ १०॥ अथेडो यजति । वर्षा वाऽइड इति हि वर्षा इडो यदिदं नुदꣳ सरीसृपं ग्रीष्महेमन्ताभ्यां नित्यक्तं भवति तद्वर्षा ईडितमिवान्नमिहमानं चरति तस्माद्वर्षा इडो वर्षा एव तद्देवा अवृञ्जत वर्षाभ्यः सपत्नानन्तरायन्वर्षा ऽएवैष एतद्धृङ्क्ते वर्षाभ्यः सपत्नानन्तरेति तस्मादिडो यजति ॥ ११॥ अथ बर्हिर्यजति । शरद्वै बर्हिरिति हि शरद्बर्हिर्या इमा ओषधयो ग्रीष्महेमन्ताभ्यां नित्यक्ता भवन्ति ता वर्षा वर्धन्ते ताः शरदि बर्हिषो रूपं प्रस्तीर्णाः शेरे तस्माच्छरद्बर्हिः शरदमेव तद्देवा अवृञ्जत शरदः सपत्नान्तरायꣳछरदमेवैष एतद्धृङ्क्ते शरदः सपत्नानन्तरेति तस्माद्बर्हिर्यजति ॥ १२॥ अथ स्वाहास्वाहेति यजति । अन्तो वै यज्ञस्य स्वाहाकारोऽन्त ऋतूनाꣳ हेमन्तो वसन्ताद्धि पराञ्चोऽन्तेनैव तदन्तं देवा अवृञ्जतान्तेनान्तात्सपत्नानन्तरायन्नन्तेनोऽएवैष एतदन्तं वृङ्क्तेऽन्तेनान्तात्सपत्नानन्तरेति तस्मात्स्वाहास्वाहेति यजति ॥ १३॥ तद्धाऽएतत् । वसन्त एव हेमन्तात्पुनरसुरेतस्माद्धैष पुनर्भवति पुनर्ह वाऽअस्मिं-

लोके भवति य एवमेतद्वेद ॥ १४ ॥ स वै व्यतु वेवितीति यजति । अजामितायै जामिं कृ कुर्याद्यद्व्यतुव्यत्वितीति वैव यजेद्वेतुवेवितीति वा व्यत्वितीति वै योषा वेवितीति वृषा मिथुनमेवैतत्प्रजननं क्रियते तस्माद्व्यतु वेवितीति यजति ॥ १५ ॥ अथ चतुर्थे प्रयाजे समानयति बर्हिषि । प्रजा वै बर्ही रेत आज्यं तत्प्रजास्वेवैतद्रेतः सिच्यते तेन रेतसा सिक्तेनेमाः प्रजाः पुनरभ्यावर्तं प्रजायन्ते तस्माच्चतुर्थे प्रयाजे समानयति बर्हिषि ॥ १६ ॥ संग्रामो वाऽएष संनिधीयते । यः प्रयाजैर्यजते यतरं वै संयत्तयोर्मित्रमागच्छति स जयति तदेतदुपभृतोऽधि जुहूं मित्रमागच्छति तेन प्रजयति तस्माच्चतुर्थे प्रयाजे समानयति बर्हिषि ॥ १७ ॥ यजमान एव जुहूमनु । योऽस्माऽअरातीयति स उपभृतमनु यजमानायैवैतद्द्विषन्तं भ्रातृव्यं बलिꣳ हारयत्यत्तैव जुहूमन्वाह्य उपभृतमन्वत्ताऽएवैतदाह्यं बलिꣳ हारयति तस्माच्चतुर्थे प्रयाजे समानयति ॥ १८ ॥ स वाऽअनवमृशत्समानयति । स यद्धावमृशेद्यजमानं द्विषता भ्रातृव्येणावमृशेदत्तारमाग्नेनावमृशेत्तस्मादनवमृशत्समानयति ॥ १९ ॥ अथोत्तरां जुहूमध्यूहति । यजमानमेवैतद्विपति भ्रातृव्येऽध्यूहत्यत्तारमाग्नेऽध्यूहति तस्मादुत्तरां जुहूमध्यूहति ॥ २० ॥ देवा ह वाऽऊचुः । हन्त विजितमेवानु सर्वं यज्ञꣳ सꣳस्थापयाम यदि नोऽसुरा रक्षसान्यासञ्जेयुः सꣳस्थित एव नो यज्ञः स्यादिति ॥ २१ ॥ त ऽउत्तमे प्रयाजे । स्वाहाकारेणैव सर्वं यज्ञꣳ समस्थापयन्त्स्वाहाग्निमिति तदाग्नेयमाज्यभागꣳ समस्थापयन्त्स्वाहा सोममिति तत्सौम्यमाज्यभागꣳ समस्थापयन्त्स्वाहाग्निमिति तस्य एष उभयत्राच्युत आग्नेयः पुरोडाशो भवति तꣳ समस्थापयन् ॥ २२ ॥ अथ यथादेवतꣳ । स्वाहा देवा आज्यपा इति तत्प्रयाजानुयाजान्त्समस्थापयन्प्रयाजानुयाजा वै देवा आज्यपा जुषाणोऽअग्निराज्यस्य वेवितीति तदग्निꣳ स्विष्टकृतꣳ समस्थापयन्नग्निर्हि स्विष्टकृत्स एषोऽप्येतर्हि तथैव यज्ञः संतिष्ठते यथैवैनं देवाः समस्थापयंस्तस्मादुत्तमे प्रयाजे स्वाहास्वाहेति यजति यावन्ति ह्वीꣳषि भवन्ति

विज्ञितमेवैतदनु सर्वं यज्ञꣳ सꣳस्थापयति तस्माद्यदत ऊर्ध्वं विलोम यज्ञे क्रियेत न तदाद्रियेत सꣳस्थितो मे यज्ञ इति ह विद्यात्स ह्येष यज्ञो यातयामिवास यथा वषट्कृतꣳ हुतꣳ स्वाहाकृतम् ॥२३॥ ते देवा अकामयन्त । कथं न्विमं यज्ञं पुनराप्याययेमायातयामानं कुर्याम तेनायातयाम्ना प्रचरेमेति ॥२४॥ स यज्जुह्वामाज्यं परिशिष्टमासीत् । येन यज्ञꣳ समस्थापयंस्तेनैव यथापूर्वꣳ हवीꣳष्यभ्यघारयन्पुनरेवैनानि तदाप्याययन्नयातयामान्यकुर्वन्नयातयाम ह्याज्यं तस्माद्धुत्तमं प्रयाजमिष्ट्वा यथापूर्वꣳ हवीꣳष्यभिघारयति पुनरेवैनानि तदाप्याययत्ययातयामानि करोत्ययातयाम ह्याज्यं तस्माद्यस्य कस्य च हविषोऽवद्यति पुनरेव तदभिघारयति स्विष्टकृतऽएव तत्पुनराप्यायत्ययातयाम करोत्यथ यदा स्विष्टकृतेऽवद्यति न ततः पुनरभिघारयति नो हि ततः कां चन हविषोऽग्नावाहुतिꣳ होष्यन्भवति ॥२५॥ ब्राह्मणम् ॥४[५.३.]॥ ॥

स वै समिधो यजति । प्राणा वै समिधः प्राणानेवैतत्समिन्द्धे प्राणैर्ह्ययं पुरुषः समिद्धस्तस्माद्भिमृशेति ब्रूयाद्यद्युपतापी स्यात्स यद्युष्णः स्यादेव तावद्धꣳसेत समिद्धो हि स तावद्भवति यद्यु शीतः स्यान्नाशꣳसेत तत्प्राणानेवास्मिन्नेतद्दधाति तस्मात्समिधो यजति ॥१॥ अथ तनूनपातं यजति । रेतो वै तनूनपाद्रेत एवैतत्सिञ्चति तस्मात्तनूनपातं यजति ॥२॥ अथेडो यजति । प्रजा वाऽइडो यदा वै रेतः सिक्तं प्रजायतेऽथ तदीडितमिवान्नमिहमानं चरति तत्प्रैवैतज्जनयति तस्मादिडो यजति ॥३॥ अथ बर्हिर्यजति । भूमा वै बर्हिर्भूमानमेवैतत्प्रजनयति तस्माद्बर्हिर्यजति ॥४॥ अथ स्वाहास्वाहेति यजति । हेमन्तो वाऽऋतूनाꣳ स्वाहाकारो हेमन्तो ह्येमाः प्रजाः स्वं वशमुपनयते तस्माद्धेमन्त्सायत्योषधयः प्र वनस्पतीनां पलाशानि मुच्यन्ते प्रतितरामिव वयाꣳसि भवन्त्यधस्तरामिव वयाꣳसि पतन्ति विपतितलोमेव पापः पुरुषो भवति हेमन्तो ह्येमाः प्रजाः स्वं वशमुपनयते स्वी

ह वै तमर्धं कुरुते श्रियेऽन्नाद्याय यस्मिन्नर्धे भवति य एवमेतद्वेद ॥५॥ देवाश्च वाऽअसुराश्च । उभये प्राजापत्याः पस्पृधिरे ते दण्डैर्धनुर्भिर्न व्यजयन्त ते ह्याविज्ञयमाना ऊचुर्हन्त वाच्येव ब्रह्मन्विजिगीषामहै स यो नो वाचं व्याकृतां मिथुनेन नानुनिक्रामात्स सर्वं पराजयाताऽअथ सर्वमितरे जयानिति तथेति देवा अब्रुवंस्ते देवा इन्द्रमब्रुवन्व्याकरेति ॥६॥ स इन्द्रोऽब्रवीत् । एको ममेत्यथास्माकमेकेतीतरेऽब्रुवंस्तदु तन्मिथुनमेवाविन्दन्मिथुनꣳ ह्येकश्चैका च ॥७॥ द्वौ ममेतीन्द्रोऽब्रवीत् । अथास्माकं द्वेऽइतीतरेऽब्रुवंस्तदु तन्मिथुनमेवाविन्दन्मिथुनꣳहि द्वौ च द्वे च ॥८॥ त्रयो ममेतीन्द्रोऽब्रवीत् । अथास्माकं तिस्र इतीतरेऽब्रुवंस्तदु तन्मिथुनमेवाविन्दन्मिथुनꣳ हि त्रयश्च तिस्रश्च ॥९॥ चत्वारो ममेतीन्द्रोऽब्रवीत् । अथास्माकं चतस्र इतीतरेऽब्रुवंस्तदु तन्मिथुनमेवाविन्दन्मिथुनꣳ हि चत्वारश्च चतस्रश्च ॥१०॥ पञ्च ममेतीन्द्रोऽब्रवीत् । तत इतरे मिथुनं नाविन्दन्नो ह्यत ऊर्ध्वं मिथुनमस्ति पञ्च पञ्चेति ह्येवैतदुभयं भवति ततोऽसुराः सर्वं पराजयन्त सर्वस्माद्देवाऽअसुरानजयत्सर्वस्मात्सपत्नानसुरान्निरभजन् ॥११॥ तस्मात्प्रथमे प्रयाजेऽइष्टे ब्रूयात् । एको ममेत्येका तस्य यमकं द्वेष्मीति यद्यु न द्विष्याद्योऽस्मान्द्वेष्टि यं च वयं द्विष्म इति ब्रूयात् ॥१२॥ द्वौ ममेति द्वितीये प्रयाजे । द्वे तस्य योऽस्मान्द्वेष्टि यं च वयं द्विष्म इति ॥१३॥ त्रयो ममेति तृतीये प्रयाजे । तिस्रस्तस्य योऽस्मान्द्वेष्टि यं च वयं द्विष्म इति ॥१४॥ चत्वारो ममेति चतुर्थे प्रयाजे । चतस्रस्तस्य योऽस्मान्द्वेष्टि यं च वयं द्विष्म इति ॥१५॥ पञ्च ममेति पञ्चमे प्रयाजे । न तस्य किं चन योऽस्मान्द्वेष्टि यं च वयं द्विष्म इति स पञ्च पञ्चेत्येव भवन्पराभवति तथास्य सर्वꣳ संवृङ्क्ते सर्वस्मात्सपत्नान्निर्भजति य एवमेतद्वेद ॥१६॥ ब्राह्मणम् ॥५[५.४.]॥ ॥ अध्यायः ॥५॥ ॥

ऋतवो ह वै देवेषु यज्ञे भागमीषिरे । आ नो यज्ञे भजत मा नो यज्ञादृत्तर्ग-

तास्त्वेव नोऽपि यज्ञे भाग इति ॥ १ ॥ तद्वै देवा न ज्ञुः । तऽऋतवो देवेषुज्ञानत्सुसुरानुपावर्तन्ताप्रियान्देवान्यं द्विषतो भ्रातृव्यान् ॥ २ ॥ ते कैतामिधतुमेधां चक्रिरे । यामिषामितामनुभृण्वन्ति कृषन्तो ह स्मैव पूर्वे वपन्तो यन्ति लुनन्तोऽपरे मृणन्तः शश्वद्भ्योऽकृष्टपच्या ओषधयः पेचिरे ॥ ३ ॥ तद्वै देवानामाग आस । कनीय इन्नुतो द्विषन्द्विषतेऽरातीयति किमेतावन्मात्रमुपज्ञानीत यद्येदमितोऽन्यथासदिति ॥ ४ ॥ ते होचुः । ऋतूनेवानुमन्त्रयामहाऽइति केनेति प्रथमानिवैनान्यज्ञे यज्ञामेति ॥ ५ ॥ स होग्निरुवाच । अथ यन्मां पुरा प्रथमं यजाथ ब्राह्मं भवानीति न त्वामायतनाच्याचयाम इति ते यदृतूनभिकूयमाना अथाग्निमायतनान्नाच्याचयंस्तस्मादग्निरच्युतो न ह वाऽआयतनाच्यवते यस्मिन्नायतने भवति य एवमेतमग्निमच्युतं वेद ॥ ६ ॥ ते देवा अग्निमब्रुवन् । परेह्येनांस्त्वमेवानुमन्त्रयस्वेति स होत्याग्निरुवाचऽर्तवोऽविदं वै वो देवेषु यज्ञे भागमिति कथं नोऽविद इति प्रथमानिव वो यज्ञे यद्यन्तीति ॥ ७ ॥ तऽऋतवोऽग्निमब्रुवन् । आ वयं त्वामस्मासु भजामो यो नो देवेषु यज्ञे भागमविद इति स एषोऽग्निर्ऋतुधाभक्तः समिधोऽग्ने तनूनपादग्यऽइडोऽग्ने बर्हिरग्ने स्वाहाग्निमित्याभक्तो ह वै तस्यां पुण्यकृत्यायां भवति यामस्य समानो ब्रुवाणः करोत्यग्निमते ह वाऽअस्माऽअग्निमत ऋतव ओषधीः पचन्तीदꣳ सर्वं य एवमेतमग्निमृतुधाभक्तं वेद ॥ ८ ॥ तदाहुः । यदुत्तमान्प्रयाज्ञानात्राकुर्यन्त्यथ कस्मादिनान्प्रथमान्यज्ञन्तीत्युत्तमान्क्वेनान्यज्ञेऽवाकल्पयन्प्रथमान्वो यज्ञामित्यब्रुवंस्तस्मादुत्तमानावाकुर्यन्ति प्रथमान्यज्ञन्ति ॥ ९ ॥ चतुर्थेन वै प्रयाजेन देवाः । यज्ञमाप्नुवंस्तं पञ्चमेन समस्थापयन्नथ यदत ऊर्ध्वमसꣳस्थितं यज्ञस्य स्वर्गमिव तेन लोकꣳ समाप्नुवत ॥ १० ॥ ते स्वर्गं लोकं यन्तः । असुररक्षसेभ्य आसङ्गाद्भियां चक्रुस्तेऽग्निं पुरस्तादकुर्वत रक्षोकृणꣳ रक्षसामपकृन्तारमग्निं मध्यतोऽकुर्वत रक्षोकृणꣳ रक्षसामपकृन्तारमग्निं पश्चादकुर्वत रक्षोकृणꣳ रक्षसामपकृन्तारꣳ ॥ ११ ॥

स यद्येनान्पुरस्तात् । असुररक्षसान्यासिसंदग्धन्नग्निरिव तान्यपाक्रन्रक्षोहा रक्षसाम-
पक्रन्ता यदि मध्यत आसिसंदग्धन्नग्निरिव तान्यपाक्रन्रक्षोहा रक्षसामपक्रन्ता यदि प-
श्चादासिसंदग्धन्नग्निरिव तान्यपाक्रन्रक्षोहा रक्षसामपक्रन्तात एवꣳ सर्वतोऽग्निभिर्गु-
प्यमानाः स्वर्गं लोकꣳ समाश्नुवत ॥ १२ ॥ तथोऽएवैष एतत् । चतुर्थेनैव प्रया-
जेन यज्ञमाप्नोति तं पञ्चमेन सꣳस्थापयत्यथ यदत ऊर्ध्वमसꣳस्थितं यज्ञस्य स्वर्गमि-
व तेन लोकꣳ समश्नुते ॥ १३ ॥ स यदाग्नेयमाज्यभागं यजति । अग्निमेवैतत्पुरस्ता-
त्कुरुते रक्षोक्षणꣳ रक्षसामपक्रन्तारमथ यदाग्नेयः पुरोडाशो भवत्यग्निमेवैतन्मध्यतः
कुरुते रक्षोक्षणꣳ रक्षसामपक्रन्तारमथ यदग्निꣳ स्विष्टकृतं यजत्यग्निमेवैतत्पश्चात्कु-
रुते रक्षोक्षणꣳ रक्षसामपक्रन्तारꣳ ॥ १४ ॥ स यद्येनं पुरस्तात् । असुररक्षसान्या-
सिसंदग्धत्यग्निरिव तान्यपक्रन्ति रक्षोहा रक्षसामपक्रन्ता यदि मध्यत असुररक्षसा-
न्यासिसंदग्धत्यग्निरिव तान्यपक्रन्ति रक्षोहा रक्षसामपक्रन्ता यदि पश्चादसुररक्षसा-
न्यासिसंदग्धत्यग्निरिव तान्यपक्रन्ति रक्षोहा रक्षसामपक्रन्ता स एवꣳ सर्वतोऽग्निभि-
र्गुप्यमानः स्वर्गं लोकꣳ समश्नुते ॥ १५ ॥ स यद्येनं पुरस्तात् । यज्ञस्यानुव्याहरेत्तं
प्रति ब्रूयान्मुख्यामार्त्तिमार्ष्यस्यन्धो वा बधिरो वा भविष्यसीत्येता वै मुख्या आ-
र्त्तयस्तथा कैव स्यात् ॥ १६ ॥ यदि मध्यतो यज्ञस्यानुव्याहरेत् । तं प्रति ब्रूयादप्र-
जा अपशुर्भविष्यसीति प्रजा वै पशवो मध्यं तथा कैव स्यात् ॥ १७ ॥ यद्यन्ततो
यज्ञस्यानुव्याहरेत् । तं प्रति ब्रूयादप्रतिष्ठितो दरिद्रः क्षिप्रेऽमुं लोकमेष्यसीति त-
था कैव स्यात्तस्माद्धꣳ नानुव्याहारीव स्याद्धꣳ त्वेवंवित्परो भवति ॥ १८ ॥ संव-
त्सरꣳ ह वै प्रयाजैर्यजयन्त्ययति । स ह न्वेवैनं ज्ञयति योऽस्य द्वाराणि वेद किꣳ
हि स तैर्गृहैः कुर्याद्यानन्तरतो न व्यवविद्याद्यथास्य ते भवन्ति तस्य वसन्त एव
द्वारꣳ हेमन्तो द्वारं तं वाऽएतꣳ संवत्सरꣳ स्वर्गं लोकं प्रपद्यते सर्वं वै संवत्स-
रः सर्वं वाऽअन्नाद्यमेतेन ह्यस्यान्नाद्यꣳ सुकृतं भवत्यन्नाद्यो लोकः ॥ १९ ॥ तदा-

क्रुः । किंदेवत्यान्याज्यानीति प्राजापत्यानीति ह ब्रूयादनिरुक्तो वै प्रजापतिरनिरुक्तान्याज्यानि तानि कैतानि यज्ञमानदेवत्यान्येव यज्ञमानो ह्येव स्वे यज्ञे प्रजापतिरेतेन ह्युक्ता ऋत्विजस्तन्वते तं ज्ञनयन्ति ॥ २० ॥ स आज्यस्योपस्तीर्य । द्विर्हविषोऽवदायाथोपरिष्टादाज्यस्याभिघारयति सैषाज्येन मिश्राकृतिर्ह्रूयते यज्ञमानेन कैवैषैतन्मिश्रा ह्रूयते यदि ह वाऽप्यपि दूरे सन्यज्ञते यद्यन्तिकं यथा कैवान्ते सत इष्टꣳ स्यादिवꣳ कैवैवं विदुष इष्टं भवति यद्यु ह्यपि बह्विव पापं करोति नो कैव बहिर्धा यज्ञाद्भवति य एवमेतद्वेद ॥ २१ ॥ ब्राह्मणम् ॥ ६ [६. १.] ॥ ॥ चतुर्थः प्रपाठकः ॥ कण्डिकासंख्या १२१ ॥ ॥

यज्ञेन वै देवाः । इमां ज्रितिं जिग्युर्यैषामियं ज्रितिस्ते ह्रोचुः कथं न इदं मनुष्यैरनभ्यारोह्यꣳ स्यादिति ते यज्ञस्य रसं धीत्वा यथा मधु मधुकृतो निर्धयेयुर्विदुह्य यज्ञं यूपेन योपयित्वा तिरोऽभवन्नथ यदेनेनायोपयंस्तस्माद्यूपो नाम तद्वाऽऋषीणामनुश्रुतमास ॥ १ ॥ यज्ञेन ह वै देवाः । इमां ज्रितिं जिग्युर्यैषामियं ज्रितिस्ते ह्रोचुः कथं न इदं मनुष्यैरनभ्यारोह्यꣳ स्यादिति ते यज्ञस्य रसं धीत्वा यथा मधु मधुकृतो निर्धयेयुर्विदुह्य यज्ञं यूपेन योपयित्वा तिरोऽभवन्निति तमन्वेष्टुं दध्रिरे ॥ २ ॥ तेऽर्चन्तः श्राम्यन्तश्चेरुः । श्रमेण ह स्म वै तद्देवा ज्रयन्ति यदेषां ज्रय्यमासऽर्षयश्च तेभ्यो देवा वैव प्ररोचयां चक्रुः स्वयं वैव दध्रिरे प्रेत तदेष्यामो यतो देवाः स्वर्गं लोकꣳ समाश्नुवतेति ते किं प्ररोचते किं प्ररोचतऽइति चेरुरित्युरोडाशमिव कूर्मं भूत्वा सर्पन्तं ते ह सर्वऽएव मेनिरेऽयं वै यज्ञ इति ॥ ३ ॥ ते ह्रोचुः । अश्विभ्यां तिष्ठ सरस्वत्यै तिष्ठेन्द्राय तिष्ठेति स ससर्पैवाग्नये तिष्ठेति ततस्तस्थावग्नये वाऽअस्थादिति तमग्नाविव परिगृह्य सर्वकुतमनुह्वुराकृतिर्हि देवानां तत एभ्यो यज्ञः प्ररोचत तमसृज्यत तमतन्वत सोऽयं परोऽवरं यज्ञोऽनूच्यते पितेव पुत्राय ब्रह्मचारिणे ॥ ४ ॥ स वाऽएभ्यस्तत्पुरोऽदाशयत् । य एभ्यो यज्ञं प्ररोचयत्तस्मा-

त्पुरोदाशः पुरोदाशो ह वै नामैतद्यत्पुरोडाश इति स एष उभयत्राच्युत आग्नेयो ऽष्टाकपालः पुरोडाशो भवति ॥५॥ स न पौर्णमासꣳ ह्विः । नामावास्यमग्नीषोमीय एव पौर्णमासꣳ ह्विः सांनाय्यमामावास्यं यज्ञ एवैष उभयत्रावक्लृप्तो नेद्यज्ञाद्यानीति न्वेव पुरस्तात्पौर्णमासस्य क्रियतऽएवम्वामावास्यस्यैतन्नु तद्यस्मादत्र क्रियते ॥६॥ यद्युऽएनमुपधावेत् । इष्ट्वा मा याजयेत्येतयैव याजयेद्यत्कामा वाऽएतमृषयोऽजुह्वुः स एभ्यः कामः समर्ध्यत यत्कामो ह वाऽएतेन यज्ञेन यजते सोऽस्मै कामः समृध्यते यस्यै वै कस्यै च देवतायै ह्विर्गृह्यतेऽग्नौ वै तस्यै जुह्वत्यग्नाऽउ चेद्धोष्यत्स्यात्किमन्यस्यै देवतायाऽआदिशेत्तस्मादग्नयऽएव ॥७॥ अग्निर्वै सर्वा देवताः । अग्नौ हि सर्वाभ्यो देवताभ्यो जुह्वति तद्यथा सर्वा देवता उपधावेदेवं तत्तस्मादग्नयऽएव ॥८॥ ॥ शतम् ५०० ॥ ॥ अग्निर्वै देवानामड्घातमाम् । यं वाऽअड्घातमां मन्येत तमुपधावेत्तस्मादग्नयऽएव ॥९॥ अग्निर्वै देवानां मृडुह्रदयतमः । यं वै मृडुह्रदयतमं मन्येत तमुपधावेत्तस्मादग्नयऽएव ॥१०॥ अग्निर्वै देवानां नेदिष्ठम् । यं वै नेदिष्ठमुपसर्तव्यानां मन्येत तमुपधावेत्तस्मादग्नयऽएव ॥११॥ स यदीष्टिं कुर्वीत । सप्तदश सामिधेनीरनुब्रूयादुपाꣳशु देवतां यजति तद्वीष्टिरूपं मूर्धन्वत्यौ याज्यानुवाक्ये स्यातां वार्त्रघ्नावाज्यभागौ विराजौ संयाज्ये ॥१२॥ ब्राह्मणम् ॥१[६.२.]॥ ॥

त्वष्टुर्ह वै पुत्रः । त्रिशीर्षा षडक्ष आस तस्य त्रीण्येव मुखान्यासुस्तद्यदेवꣳरूप आस तस्माद्विश्वरूपो नाम ॥१॥ तस्य सोमपानमेवैकं मुखमास । सुरापाणमेकमन्यस्माऽअशनायैकं तमिन्द्रो द्विषेष तस्य तानि शीर्षाणि प्रचिच्छेद ॥२॥ स यत्सोमपानमास । ततः कपिञ्जलः समभवत्तस्मात्स बभ्रुक-इव बभ्रुरिव हि सोमो राजा ॥३॥ अथ यत्सुरापाणमास । ततः कलविङ्कः समभवत्तस्मात्सोऽभिमाद्यत्क-इव वदत्यभिमाद्यन्निव हि सुरां पीत्वा वदति ॥४॥ अथ यदन्यस्माऽअश-

नायास । ततस्तित्तिरिः समभवत्तस्मात्स विश्वरूपतम-इव सत्येव घृतस्तोका-इव वन्मधुस्तोका-इव वत्पर्णेषाश्रुतिता एवꣳरूपꣳ हि स तेनाशनमावयत् ॥५॥ स त्वष्टा चुक्रोध । कुविन्मे पुत्रमबधीदिति सोऽपेन्द्रमेव सोममाजह्रे स यथायꣳ सोमः प्रसुत एवमपेन्द्र एवास ॥६॥ इन्द्रो ह वाऽईक्षां चक्रे । इदं वै मा सोमादर्त्स्यन्तीति स यथा बलीयानबलीयस एवमनुपक्रुत एव यो द्रोणाकलशे शुक्र आस तं भक्षयां चकार स हैनं जिह्मिꣳस सोऽस्य विघꣳइव प्राणेभ्यो डुद्राव मुखाद्वैवास्य न डुद्रावाथ सर्वेभ्योऽन्येभ्यः प्राणेभ्योऽद्रवत्तद्दः सौत्रामणीतीष्टिस्तस्यां तद्व्याख्यायते यथैनं देवा अभिषज्यन् ॥७॥ स त्वष्टा चुक्रोध । कुविन्मेऽनुपक्रुतः सोममबभक्षदिति स स्वयमेव यज्ञवेशस चक्रे स यो द्रोणाकलशे शुक्रः परिशिष्ट आस त प्रवर्तयां चकारेन्द्रशत्रुर्वर्धस्वेति सोऽग्निमेव प्राप्य सम्बभूवान्तरेव सम्बभूवेत्यु हैकऽआहुः सोऽग्नीषोमावेवाभिसम्बभूव सर्वा विद्याः सर्वं यशः सर्वमन्नाद्यꣳ सर्वाꣳ श्रीꣳ ॥८॥ स यद्वर्तमानः समभवत् । तस्माद्वृत्रोऽथ यद्पात्समभवत्तस्माद्रिक्तं दनुश्च दनायूश्च मातेव च पितेव च परिजगृक्षतुस्तस्माद्दानव इत्याहुः ॥९॥ अथ यदब्रवीदिन्द्रशत्रुर्वर्धस्वेति । तस्माद्ध हैनमिन्द्र एव जघानाथ यद्ध शश्वद्वद्यदिन्द्रस्य शत्रुर्वर्धस्वेति शश्वद्ध ह स एवेन्द्रमकृनिष्यत् ॥१०॥ अथ यदब्रवीद्वर्धस्वेति । तस्माद्ध स्मेषुमात्रमेव तिर्यङ्वर्धतऽइषुमात्रं प्राङ्क्सोऽवैवावरꣳ समुद्रं दधावव पूर्वꣳ स यावत्स आस सहैव तावदन्नाद आस ॥११॥ तस्मै ह स्म पूर्वाह्णे देवाः । अशनमभिहरन्ति मध्यन्दिने मनुष्या अपराह्णे पितरः ॥१२॥ स वाऽइन्द्रस्तथैव नुत्तश्चरन् । अग्नीषोमाऽउपमन्त्रयां चक्रेऽग्नीषोमौ युवं वै मम स्थो युवयोरहमस्मि न युवयोरिष किं चन कं मऽइमं दस्युं वर्धयथ उप मावर्तेथामिति ॥१३॥ तौ होचतुः । किमावयोस्ततः स्यादिति ताभ्यामेतमग्नीषोमीयमेकादशकपालं पुरोडाशं निरवपत्तस्मादग्नीषोमीय एकादशकपालः पुरोडाशो भ-

वति ॥ १४ ॥ तावेनमुपाववृततुः । तावनु सर्वे देवाः प्रेयुः सर्वा विद्याः सर्वे यशः सर्वमन्नाद्यꣳ सर्वा श्रीस्तेनेष्ट्वेन्द्र एतद्भवत्यदिदमिन्द्र एष उ पौर्णमासस्य बन्धुः स यो हैवं विद्वान्पौर्णमासेन यजतऽएताꣳ हैव श्रियं गच्छत्येवं यशो भवत्येवमन्नादो भवति ॥ १५ ॥ तद्वेव खलु हतो वृत्रः । स यथा दृतिर्निष्पीत एवꣳ संलीनः शिश्ये यथा निर्धूतसक्तुर्भस्त्रेवꣳ संलीनः शिश्ये तमिन्द्रोऽभ्याद्रुद्राव हनिष्यन् ॥ १६ ॥ स होवाच । मा नु मे प्रहार्षीस्त्वं वै तदेतर्ह्यसि यदहं वेव मा कुरु मामुषा भूवमिति स वै मेऽन्नमेधीति तथेति तं द्वेधान्वभिनत्तस्य यत्सौम्यं न्यक्तमास तं चन्द्रमसं चकाराथ यदस्यासुर्यमास तेनेमाः प्रजा उदरेणाविध्यत्तस्मादाङुर्वृत्र एव तर्ह्यन्नाद आसीद्वृत्र एतर्हीतीदꣳ हि यदसावापूर्यतेऽस्मादेवैतल्लोकादाप्यायतेऽथ यदिमाः प्रजा अशनमिच्छन्तेऽस्माऽएवैतद्वृत्रायोदराय बलिꣳ हरन्ति स यो हैवमेतं वृत्रमन्नादं वेदान्नादो हैव भवति ॥ १७ ॥ ता उ हैता देवता ऊचुः । या इमा अग्नीषोमावन्वाजग्मुरग्नीषोमौ युवं वै नो भूयिष्ठभाजौ स्थो ययोर्वामिदं युवयोरस्मानन्वाभजतमिति ॥ १८ ॥ तौ होचतुः । किमावयोस्ततः स्यादिति यस्यै कस्यै च देवतायै हविर्निर्वपांस्तद्वां पुरस्ताद्धाज्यस्य यजानिति तस्माद्यस्यै कस्यै च देवतायै हविर्निर्वपन्ति तत्पुरस्ताद्धाज्यभागावग्नीषोमाभ्यां यजन्ति तन्न सौम्येऽध्वरे न पशौ यस्यै कस्यै च देवतायै निर्वपानिति व्यब्रुवन् ॥ १९ ॥ स होग्निरुवाच । मय्येव वः सर्वेभ्यो जुह्वतु तद्वोऽहं मय्याभजामीति तस्मादग्नौ सर्वेभ्यो देवेभ्यो जुह्वति तस्मादाङुरग्निः सर्वा देवता इति ॥ २० ॥ अथ ह सोम उवाच । मय्येव वः सर्वेभ्यो जुह्वतु तद्वोऽहं मय्याभजामीति तस्मात्सोमꣳ सर्वेभ्यो देवेभ्यो जुह्वति तस्मादाङुः सोमः सर्वा देवता इति ॥ २१ ॥ अथ यदिन्द्रे सर्वे देवास्तस्थानाः । तस्मादाङुरिन्द्रः सर्वा देवता इन्द्रश्रेष्ठा देवा इत्येतद्ध वै देवास्त्रैधिकदेवत्या अभवन्त यो हैवमेतद्वेदैकधा हैव स्वानाꣳ श्रेष्ठो भवति ॥ २२ ॥ द्वयं वाऽइदं न तृ-

तीयमस्ति । आर्द्रं चैव शुष्कं च यक्कुष्कं तदाग्नेयं यदार्द्रं तत्सौम्यमथ यदिदं द्वयमेवाप्य किमेतावत्क्रियतऽइत्यग्नीषोमयोरेवाज्यभागावग्नीषोमयोरुपाꣳशुयाजोऽग्नीषोमयोः पुरोडाशो यदत एकतमेनैवेदꣳ सर्वमाप्नोत्यथ किमेतावत्क्रियतऽइत्यग्नीषोमयोर्ह्यैतावती विभूतिः प्रज्ञातिः ॥२३॥ सूर्य एवाग्नेयः । चन्द्रमाः सौम्योऽहरेवाग्नेयꣳ रात्रिः सौम्या य एवापूर्यतेऽर्धमासः स आग्नेयो योऽपक्षीयते स सौम्यः ॥२४॥ आज्यभागाभ्यामेव । सूर्याचन्द्रमसावाप्नोत्युपाꣳशुयाजेनैवाहोरात्रेऽआप्नोति पुरोडाशेनैवार्धमासावाप्नोतीत्यु हैकऽआहुः ॥२५॥ तदु होवाचासुरिः । आज्यभागाभ्यामेवातो यतमे वा यतमे वा द्वेऽआप्नोत्युपाꣳशुयाजेनैवातोऽहोरात्रेऽआप्नोति पुरोडाशेनैवातोऽर्धमासावाप्नोति सर्वं मऽआप्तमसत्सर्वं जितꣳ सर्वेण वृत्रꣳ हनानि सर्वेण द्विषन्तं भ्रातृव्यꣳ हनानीति तस्माद्वाऽएतावत्क्रियतऽइति ॥२६॥ तदाहुः । किमिदं जामि क्रियतेऽग्नीषोमयोरेवाज्यस्याग्नीषोमयोः पुरोडाशस्य यदनन्तर्हितं तेन जामीत्यनेन हु वेवाज्याभ्याज्यस्येतरं पुरोडाशस्येतरं तदन्यदिवेतरमन्यदिवेतरं भवत्यृचमनूच्य जुषाणेन यजत्यृचमनूच्यर्चा यजति तदन्यदिवेतरमन्यदिवेतरं भवत्यनेन हु वेवाज्याभ्युपाꣳशोराज्यस्य यजत्युचैः पुरोडाशस्य स यदुपाꣳशु तत्प्राजापत्यꣳ रूपं तस्मात्तस्यानुष्टुभमनुवाक्यामन्वाह वाग्घ्यनुष्टुब्वाग्धि प्रजापतिः ॥२७॥ एतेन वै देवाः । उपाꣳशुयाजेन यज्ञमसुराणामकामयन्त तमुपत्सर्य वज्रेण वषट्कारेणाघ्नंस्ततोऽएवैष एतेनोपाꣳशुयाजेन पाप्मानं द्विषन्तं भ्रातृव्यमुपत्सर्य वज्रेण वषट्कारेण हन्ति तस्मादुपाꣳशुयाजं यजति ॥२८॥ स वाऽऋचमनूच्य जुषाणेन यजति तदन्विमा अन्यतरतोदत्ताः प्रजाः प्रजायन्तेऽस्थि क्यृगस्थि हि दत्तोऽन्यतरतो ह्येतदस्थि करोति ॥२९॥ अथर्चमनूच्यर्चा यजति । तदन्विमा उभयतोदत्ताः प्रजाः प्रजायन्तेऽस्थि क्यृगस्थि हि दत्त उभयतो ह्येतदस्थि करोत्येता वाऽइमा द्व्यः प्रजा अन्यतरतोदत्ताश्चैवोभयतोदत्ताश्च स यो हैवं विद्वानग्नी-

षोमयोः प्रजातिं यजति बर्हिरेव प्रजया पशुभिर्भवति ॥ ३० ॥ स वै पौर्णमासिनोपवत्स्यन् । न सत्रा सुक्षित इव स्यात्तेनेदमुदरमसुर्यं विनात्याकृतिभिः प्रातर्दर्वमिष्ट्वा पौर्णमासस्योपचारः ॥ ३१ ॥ स वै संप्रत्येवोपवसेत् । संप्रति वृत्रꣳ हनानि संप्रति द्विषन्तं भ्रातृव्यꣳ हनानीति ॥ ३२ ॥ स वाऽउत्तरामेवोपवसेत् । समिव वाऽएष क्रमते यः संप्रत्युपवसत्यनड्वा वै संक्रान्तयोर्यदीतरो वेतरमभिभवतीतरो वेतरमथ य उत्तरामुपवसति यथा पराञ्चमावृत्तꣳ संपिꣳष्यादप्रत्यालभमानꣳ सोऽन्यतोघात्येव स्यादेवं तद्य उत्तरामुपवसति ॥ ३३ ॥ स वै संप्रत्येवोपवसेत् । यथा वाऽअन्यस्य कृतꣳ संपिꣳष्यादेवं तद्य उत्तरामुपवसति सोऽन्यस्येव कृतानुकरोऽन्यस्योपावसायी भवति तस्मादु संप्रत्येवोपवसेत् ॥ ३४ ॥ प्रजापतेर्ह वै प्रजाः ससृज्ञानस्य । पर्वाणि विस्रस्रꣳसुः स वै संवत्सर एव प्रजापतिस्तस्यैतानि पर्वाण्यहोरात्रयोः संधी पौर्णमासी चामावास्या चर्तुमुखानि ॥ ३५ ॥ स विस्रस्तैः पर्वभिः । न शशाक सꣳहातुं तमेतैर्हविर्यज्ञैर्देवा अभिषज्यन्नग्निहोत्रेणैवाहोरात्रयोः संधी तत्पर्वाभिषज्यंस्तत्समदधुः पौर्णमासेन चैवामावास्येन च पौर्णमासीं चामावास्यां च तत्पर्वाभिषज्यंस्तत्समदधुश्चातुर्मास्यैरेवर्तुमुखानि तत्पर्वाभिषज्यंस्तत्समदधुः ॥ ३६ ॥ स सꣳहितैः पर्वभिः । इदमन्नाद्यमभ्युत्तस्थौ यदिदं प्रजापतेरन्नाद्यꣳ स यो हैवं विद्वान्संप्रत्युपवसति संप्रति हैव प्रजापतेः पर्व भिषज्यत्यवति हैनं प्रजापतिः स एवमेवान्नादो भवति य एवं विद्वान्संप्रत्युपवसति तस्मादु संप्रत्येवोपवसेत् ॥ ३७ ॥ चत्वारि ह वाऽएते यज्ञस्य यदाज्यभागौ । तस्मात्पुरस्ताज्जुहोति पुरस्ताद्धीमे चत्वारि तत्पुरस्तादेवैतच्चत्वारि दधाति तस्मादिमे पुरस्ताच्चत्वारि ॥ ३८ ॥ उत्तरार्धपूर्वार्धे हैके । आग्नेयमाज्यभागं जुह्वति दक्षिणार्धपूर्वार्धे सौम्यमाज्यभागमितत्पुरस्ताच्चत्वारि दध्म इति वदन्तस्तदु तदाविज्ञान्यमिव ह्वीꣳषि ह वाऽआत्मा यज्ञस्य स यदेव पुरस्ताद्धविषां जुहोति तत्पुरस्ताच्चत्वारि दधाति यत्रो

ऽएव समिद्धतमं मन्येत तदाकृतीर्जुहुयात्समिद्धऽएवैन सन्तृद्धा आकृतयः ॥३१॥ स वाऽऋचमनूच्य जुषाणेन यजति । तस्मादिमेऽअस्थत्सत्यनस्थिके चनुषीऽआश्लिष्टेऽअथ यदृचमनूच्यर्चा यज्ञेदस्थि ह्येव कुर्यान्न चनुः ॥४०॥ ते वाऽएते । अग्नीषोमयोरेव रूपमन्वायत्ते यद्धुक्लं तदाग्नेयं यत्कृष्णं तत्सौम्यं यदि वेतरथा यदेव कृष्णं तदाग्नेयं यद्धुक्लं तत्सौम्यं यदेव वीक्षते तदाग्नेयꣳ रूपꣳ शुष्के-ऽइव हि वीक्षमाणस्याक्षिणी भवतः शुष्कमिव ह्याग्नेयं यदेव स्वपिति तत्सौम्यꣳ रूपमार्द्रे-ऽइव हि सुषुपुषोऽक्षिणी भवत आर्द्र-इव हि सोम आज्ञरसꣳ ह वाऽअस्मिंलोके चनुष्मान्भवति सचनुरमुष्मिंल्लोके संभवति य एवमेतौ चनुषीऽआज्यभागौ वेद ॥४१॥ ॥ ब्राह्मणम् ॥२[६.३.]॥ ॥

इन्द्रो ह यत्र वृत्राय वज्रं प्रजहार । सोऽबलीयान्मन्यमानो नास्तृषीतीव बिभ्यन्निलयां चक्रे स पराः परावतो जगाम देवा ह वै विदां चक्रुर्हतो वै वृत्रो ऽथेन्द्रो न्यलेष्टेति ॥१॥ तमन्वेष्टुं दधिरे । अग्निर्देवतानाꣳ हिरण्यस्तूप ऋषीणां बृहती छन्दसां तमग्निरनुविवेद तेनेताꣳ रात्रिꣳ सहाजगाम स वै देवानां वसुवीरो ह्येषाम् ॥२॥ ते देवा अब्रुवन् । अमा वै नोऽद्य वसुर्वसति यो नः प्रावात्सीदिति ताभ्यामेतद्यथा ज्ञातिभ्यां वा सखिभ्यां वा सहागताभ्याꣳ समानमोदनं पचेदेवं वा तद्ह मानुषꣳ हविर्देवानामेवमाभ्यामेतत्समानꣳ हविर्निरवपन्नैन्द्राग्नं द्वादशकपालं पुरोडाशं तस्मादैन्द्राग्नो द्वादशकपालः पुरोडाशो भवति ॥३॥ स इन्द्रोऽब्रवीत् । यत्र वै वृत्राय वज्रं प्राहरं तद्यस्मये स कृश-इवास्मि न वै मेदं धिनोति यन्मा धिनवत्तन्मे कुरुतेति तथेति देवा अब्रुवन् ॥४॥ ते देवा अब्रुवन् । न वाऽइममन्यत्सोमाद्धिनुयात्सोममेवास्मै संभरामेति तस्मै सोमꣳ समभरन्नेष वै सोमो राजा देवानामन्नं यच्चन्द्रमाः स यत्रैष एताꣳ रात्रिं न पुरस्तान्न पश्चाद्दृशे तदिमं लोकमागच्छति स इहैवापश्चौषधीश्च प्रविशति स वै देवानां

वस्वन्नꣳ क्षेषां तद्यदेष एताꣳ रात्रिमिहामा वसति तस्मादमावास्या नाम ॥५॥ तं गोभिरनुविष्टाप्य समभरन् । यदोषधीराश्नंस्तदोषधिभ्यो यदपोऽपिबंस्तदद्भ्यस्तमेवꣳ संभृत्यातच्य तीव्रीकृत्य तमस्मै प्रायछन् ॥६॥ सोऽब्रवीत् । धिनोत्येव मेदं नेव तु मयि श्रयते यथेद मयि श्रयति तथोपजानीतेति तꣳ श्रुतिनैवाश्रयन् ॥७॥ तद्वाऽएतत् । समानमेव सत्पय एव सदिन्द्रस्यैव सत्तत्पुनर्नानेवाचक्षते यदब्रवीद्धिनोति मेति तस्माद्धथ यदेनꣳ श्रुतिनैवाश्रयंस्तस्माद्धृतꣳ ॥८॥ स यथाꣳश्रुराप्यायेत । एवमाप्यायतापं पाप्मानꣳ हरिमाणमहतेष उऽआमावास्यस्य बन्धुः स यो हैवं विद्वान्त्संनयत्येवꣳ हैव प्रजया पशुभिराप्यायतेऽप पाप्मानꣳ हते तस्माद्वै संनयेत् ॥९॥ तदाहुः । नासोमयाजी संनयेत्सोमाहुतिर्वाऽएषा सानवरुद्धासोमयाजिनस्तस्मान्नासोमयाजी संनयेदिति ॥१०॥ तदु समेव नयेत् । नन्वत्रान्तरेण शुश्रुम सोमेन नु मा याजयताथ मऽएतदाप्यायनꣳ संभरिष्यथेत्यब्रवीदिति न वै मेदं धिनोति यन्मा धिनवत्तन्मे कुरुतेति तस्माऽएतदाप्यायनꣳ समभरंस्तस्मादप्यसोमयाजी समेव नयेत् ॥११॥ वार्त्रघ्नं वै पौर्णमासम् । इन्द्रो क्षेतेन वृत्रमहन्नथैतदेव वृत्रहत्यं यदामावास्यं वृत्रꣳ ह्यस्माऽएतज्जघ्नुषऽआप्यायनमकुर्वन् ॥१२॥ तद्वाऽएतदेव वार्त्रघ्नम् । यत्पौर्णमासमथैष एव वृत्रो यच्चन्द्रमाः स यत्रैष एताꣳ रात्रिं न पुरस्तान्न पश्चाद्दृशे तदेनमेतेन सर्वꣳ हन्ति नास्य किं चन परिशिनष्टि सर्वꣳ ह वै पाप्मानꣳ हन्ति न पाप्मनः किं चन परिशिनष्टि य एवमेतद्वेद ॥१३॥ तद्वैके । दृष्ट्वोपवसन्ति श्वो नोदेतित्यदो हैव देवानामविक्षीणमन्नं भवत्यथेभ्यो वयमित उपप्रदास्याम इति तद्धि समृद्धं यदक्षीणऽएव पूर्वस्मिन्नह्नेऽथापरमन्नमागछति स ह बह्वन्न एव भवत्यसोमयाजी तु क्षीयाज्यदो हैव सोमो राजा भवति ॥१४॥ अथ यथैव पुरा । केवलीरोषधीरश्नन्ति केवलीरपः पिबन्ति ताः केवलमेव पयो डुह्रऽएव तदेष वै सोमो राजा देवानामन्नं यच्चन्द्र-

माः स यत्रैष एताꣳ रात्रिं न पुरस्तान्न पश्चाद्दृशे तदिमं लोकमागच्छति स इङ्गा-
यश्चौषधीश्च प्रविशति तदिनमद्य ओषधिभ्यः संभृत्याकृतिभ्योऽधि जनयति स एष
आकृतिभ्यो जातः पश्चाद्दृशे ॥ १५ ॥ तद्वाऽएतत् । अविद्वीणमेव देवानामन्नाद्यं
परिप्लवतेऽविद्वीणꣳ ह वाऽअस्यास्मिंल्लोकेऽन्नं भवत्यद्धाऽममुष्मिंल्लोके सुकृतं य
एवमेतद्वेद ॥ १६ ॥ तद्वाऽएताꣳ रात्रिम् । देवेभ्योऽन्नाद्यं प्रच्यवते तदिमं लोकमा-
गच्छति ते देवा अकामयन्त कथं नु न इदं पुनरागच्छेत्कथं नऽइदं परागेव न प्र-
णश्येदिति तद्यऽएव संनयन्ति तेषाशꣳसन्तऽएतऽएव नः संभृत्य प्रदास्यन्तीत्या ह
वाऽअस्मिन्त्स्वाश्च निष्याश्च शꣳसन्ते य एवमेतद्वेद यो वै परमतां गच्छति तस्मि-
न्नाशꣳसन्ते ॥ १७ ॥ तद्वाऽएष एवेन्द्रः । य एष तपत्येष एव वृत्रो यच्चन्द्रमाः
मोऽस्येष भ्रातृव्यजन्मेव तस्माद्यद्यपि पुरा विदूरमिवोदितोऽथैनमेताꣳ रात्रिमुपैव
न्याप्लवते सोऽस्य व्यात्तमापद्यते ॥ १८ ॥ तं ग्रसित्वोदेति । स न पुरस्तान्न पश्चा-
द्दृशे ग्रसते ह वै द्विषन्तं भ्रातृव्यमयमेवास्ति नास्य सपत्नाः सन्तीत्याङ्कर्य एवमे-
तद्वेद ॥ १९ ॥ तं निर्धीयि निरस्यति । स एष धीतः पश्चाद्दृशे स पुनराप्यायते स
एतस्यैवान्नाद्याय पुनराप्यायते यदि ह वाऽअस्य द्विषन्भ्रातृव्यो वणिज्यया वा
केनचिद्वा संभवत्येतस्य ह्यैवान्नाद्याय पुनः संभवति य एवमेतद्वेद ॥ २० ॥ तद्वैके ।
मरुन्द्रायेति कुर्वन्तीन्द्रो वाऽएष पुरा वृत्रस्य बधाद्यथ वृत्रꣳ हत्वा यथा महाराजो
विजिग्यान एवं मरुन्द्रोऽभवत्तस्मान्मरुन्द्रायेति तद्विन्द्रायेत्येव कुर्यादिन्द्रो वा
ऽएष पुरा वृत्रस्य बधादिन्द्रो वृत्रं जघ्निवांस्तस्माद्विन्द्रायेत्येव कुर्यात् ॥ २१ ॥ ब्रा-
ह्मणम् ॥ ३. [६. ४.] ॥ अध्यायः ॥ ६ ॥ ॥

स वै पर्णशाखया वत्सानपाकरोति । तद्यत्पर्णशाखया वत्सानपाकरोति यत्र
वै गायत्री सोममहरपतत्तदस्याऽआहरत्याऽअपादस्ताभ्यायत्य पर्णं प्रविवेश गायत्र्यै
वा सोमस्य वा राज्ञस्तत्पतित्वा पर्णोऽभवत्तस्मात्पर्णो नाम तद्यदेवात्र सोमस्य

न्यक्तं तदिह्याप्यसदिति तस्मात्पर्णशाखया वत्सानपाकरोति ॥ १ ॥ तमाहिनत्ति । इष ऊर्जे वेति वृष्ट्यै तदाह यदाहेषे वेत्यूर्जे वेति यो वृष्टादूर्यसो जायते तस्मै तदाह ॥ २ ॥ अथ मातृभिर्वत्सान्त्समवाजन्ति । स वत्सꣳ शाखयोपस्पृशति वायव स्थेत्ययं वै वायुर्योऽयं पवतऽएष वाऽइदꣳ सर्वं प्रप्याययति यदिदं किं च वर्षत्येष वाऽएतासां प्रप्याययिता तस्मादाह वायव स्थेत्युपायव स्थेत्यु हैकऽआहुरुप हि द्वितीयोऽयतीति तदु तथा न ब्रूयात् ॥ ३ ॥ अथ मातृणामिकाꣳ शाखयोपस्पृशति । वत्सेन व्याकृत्य देवो वः सविता प्रार्पयत्विति सविता वै देवानां प्रसविता सवितृप्रसूता यज्ञꣳ संभरानिति तस्मादाह देवो वः सविता प्रार्पयत्विति ॥ ४ ॥ श्रेष्ठतमाय कर्मणऽइति । यज्ञो वै श्रेष्ठतमं कर्म यज्ञाय हि तस्मादाह श्रेष्ठतमाय कर्मणऽइति ॥ ५ ॥ आप्यायध्वमघ्या इन्द्राय भागमिति । तद्यथैवादो देवतायै हविर्गृह्णन्नादिशत्येवमेवैतद्देवतायाऽआदिशति यदाहाप्यायध्वमघ्या इन्द्राय भागमिति ॥ ६ ॥ प्रजावतीरनमीवा अयक्ष्मा इति । नात्र तिरोहितमिवास्ति मा व स्तेन ईशत माघशꣳस इति मा वो नाष्ट्रा रक्षाꣳसीशतित्येवैतदाह ध्रुवा अस्मिन्गोपतौ स्यात बह्वीरित्यनपक्रमिणयोऽस्मिन्यजमाने बह्व्यः स्यातित्येवैतदाह ॥ ७ ॥ अथाहवनीयागारस्य वा पुरस्तात् । गार्हपत्यागारस्य वा शाखामुपगूहति यजमानस्य पशून्पाहीति तद्ब्रह्मणैवैतद्यजमानस्य पशून्परिददाति गुप्त्यै ॥ ८ ॥ तस्यां पवित्रं करोति । वसोः पवित्रमसीति यज्ञो वै वसुस्तस्मादाह वसोः पवित्रमसीति ॥ ९ ॥ अथ यवाग्वैताꣳ रात्रिमग्निहोत्रं जुहोति । आदिष्टं वाऽएतद्देवतायै हविर्भवति यत्पयः स यत्पयसा जुहुयाद्यथान्यस्यै देवतायै हविर्गृहीतं तदन्यस्यै जुहुयादेवं तत्तस्माद्यवाग्वैताꣳ रात्रिमग्निहोत्रं जुहोति जुहूत्यग्निहोत्रमुपकॢप्तोखा भवत्यथाहोपसृष्टां प्रब्रूतादिति यदा प्राहोपसृष्टेति ॥ १० ॥ अथोखामादत्ते । द्यौरसि पृथिव्यसीत्युपस्तौत्येवैनामेतन्न्हयत्येव यदाह द्यौरसि पृथिव्यसी-

ति मातरिश्वनो घर्मोऽसीति यज्ञमेवैतत्करोति यथा घर्मं प्रवृञ्ज्यादेवं प्रवृणक्ति विश्वधा असि परमेण धाम्ना दृꣳहस्व मा क्ष्वारिति दृꣳहत्येवैनामेतदशिथिलां करोति मा ते यज्ञपतिर्क्षार्षीदिति यजमानो वै यज्ञपतिस्तद्यजमानायैवैतद्क्षत्रमाशास्ते ॥ ११ ॥ अथ पवित्रं निदधाति । तद्वै प्राङ्निदध्यात्प्राची हि देवानां दिगथो ऽउदगुदीची हि मनुष्याणां दिगयं वै पवित्रं योऽयं पवते सोऽयमिमांल्लोकांस्तिर्यङ्नुपवते तस्मादुदङ्निदध्यात् ॥ १२ ॥ तद्यथैवादः । सोमꣳ राजानं पवित्रेण संपावयत्येवमेवैतत्संपावयत्युदीचीनदशं वै तत्पवित्रं भवति येन तत्सोमꣳ राजानꣳ संपावयन्ति तस्मादुदङ्निदध्यात् ॥ १३ ॥ तन्निदधाति । वसोः पवित्रमसीति यज्ञो वै वसुस्तस्मादाह वसोः पवित्रमसीति शतधारꣳ सहस्रधारमित्युपस्तौत्येवैनदेतन्मक्रयत्येव यदाह शतधारꣳ सहस्रधारमिति ॥ १४ ॥ अथ वाचंयमो भवति । आतिसृणां रोग्धोर्वाग्वै यज्ञोऽविच्छुष्यो यज्ञं तनवाऽइति ॥ १५ ॥ तदानीयमानमभिमन्त्रयते । देवस्त्वा सविता पुनातु वसोः पवित्रेण शतधारेण सुप्वेति तद्यथैवादः सोमꣳ राजानं पवित्रेण संपावयत्येवमेवैतत्संपावयति ॥ १६ ॥ अथाह कामधुक्ष इति । अमूमिति सा विश्वायुरित्यथ द्वितीयां पृच्छति कामधुक्ष इत्यमूमिति सा विश्वकर्मेत्यथ तृतीयां पृच्छति कामधुक्ष इत्यमूमिति सा विश्वधाया इति तद्यत्पृच्छति वीर्याण्येवास्वेतद्दधाति तिस्रो दोग्धि त्रयो वाऽइमे लोका एभ्य एवैनदेतल्लोकेभ्यः संभरत्यथ कामं वदति ॥ १७ ॥ अथोत्तमां दोक्ष्यित्वा । येन दोक्ष्यति पात्रेण तस्मिन्नुदस्तोकमानीय पल्यङ्क प्रत्यानयति यदत्र पयसोऽक्षायि तदिक्ष्यसदिति रसस्यो चैव सर्वत्वायेदꣳ हि यदा वर्षत्यथौषधयो जायन्तऽओषधीर्जग्धायः पीत्वा तत एष रसः संभवति तस्माद्रसस्यो चैव सर्वत्वाय तदुद्वास्यातनक्ति तीव्रीकरोत्येवैनदेतत्तस्मादुद्वास्यातनक्ति ॥ १८ ॥ स आतनक्ति । इन्द्रस्य त्वा भागꣳ सोमेनातनच्मीति तद्यथैवादो देवतायै हविर्गृह्णन्नादिशत्येवमेवैतद्देवतायाऽआदिश-

ति यदाहेन्द्रस्य त्वा भागमिति सोमेनातनच्मीति स्वदयत्येवैनदेतद्देवेभ्यः ॥ ११ ॥ अथोदकवतोत्तानेन पात्रेणापिदधाति । नेदेनदुपरिष्टान्नाष्ट्रा रक्षाꣳस्यवमृशानिति वज्रो वाऽआपस्तद्वज्रेणैवैतन्नाष्ट्रा रक्षाꣳस्यतोऽपहन्ति तस्मादुदकवतोत्तानेन पात्रेणापिदधाति ॥ २० ॥ सोऽपिदधाति । विष्णो हव्यꣳ रक्षेति यज्ञो वै विष्णुस्तस्यैवैतद्धविः परिददाति गुप्त्यै तस्मादाह विष्णो हव्यꣳ रक्षेति ॥ २१ ॥ ब्राह्मणम् ॥ ४ [७. १.] ॥ ॥

ऋणꣳ ह वै जायते योऽस्ति । स जायमान एव देवेभ्य ऋषिभ्यः पितृभ्यो मनुष्येभ्यः ॥ १ ॥ स यदेव यजेत । तेन देवेभ्य ऋणं जायते तद्भ्य एतत्करोति यदेनान्यजते यदेभ्यो जुहोति ॥ २ ॥ अथ यदेवानुब्रुवीत । तेनऽर्षिभ्य ऋणं जायते तद्भ्य एतत्करोत्यृषीणां निधिगोप इति ह्यनूचानमाहुः ॥ ३ ॥ अथ यदेव प्रजामिच्छेत । तेन पितृभ्य ऋणं जायते तद्भ्य एतत्करोति यदेषाꣳ संततात्यवच्छिन्ना प्रजा भवति ॥ ४ ॥ अथ यदेव वासयेत । तेन मनुष्येभ्य ऋणं जायते तद्भ्य एतत्करोति यदेनान्वासयते यदेभ्योऽशनं ददाति स य एतानि सर्वाणि करोति स कृतकर्मा तस्य सर्वमाप्तꣳ सर्वं जितꣳ ॥ ५ ॥ स येन देवेभ्य ऋणं जायते । तदेनांस्तदवदयते यद्यजतेऽथ यदग्नौ जुहोति तदेनांस्तदवदयते तस्माद्यत्किं चाग्नौ जुह्वति तदवदानं नाम ॥ ६ ॥ तद्वै चतुरवत्तं भवति । इदं वाऽअनुवाक्याथ याज्याथ वषट्कारोऽथ सा देवता चतुर्थी यस्यै देवतायै हविर्भवत्येवꣳ हि देवता अवदानान्यन्वायत्ता अवदानानि वा देवता अन्वायत्तान्यतिरिक्तꣳ ह तदवदानं यत्यश्वमं कस्माऽऽ हि तदवद्येत्तस्माच्चतुरवत्तं भवति ॥ ७ ॥ उतो पञ्चावत्तमेव भवति । पाङ्क्तो यज्ञः पाङ्क्तः पशुः पञ्चर्तवः संवत्सरस्यैषो पञ्चावत्तस्य संपद्भवत्येव प्रजया पशुभिर्भवति यस्यैवं विदुषः पञ्चावत्तं क्रियतऽएतद्ध स्वेव प्रज्ञातं कौरुपाञ्चालं यच्चतुरवत्तं तस्माच्चतुरवत्तं भवति ॥ ८ ॥ स वै यावन्मात्रमिवावद्येत् ।

मानुषꣳ ह्रु कुर्याद्यन्मक्रुद्वय्येद्बृहꣳ वै तद्यज्ञस्य यन्मानुषं नेद्बृहꣳ यज्ञे करवाणीति तस्माद्यावन्मात्रमिवैवावद्येत् ॥ १ ॥ स आज्यस्योपस्तीर्य । द्विर्ह्विषोऽवदायाधो-परिष्टादाज्यस्याभिघारयति द्वे वाऽआकुती सोमाकुतिरेवान्याज्याकुतिरन्या तत एषा केवली यत्सोमाकुतिरथैषाज्याकुतिर्यद्ध्विर्यज्ञो यत्पशुस्तदाज्यमेवैतत्करोति तस्माद्उभयत आज्यं भवत्येतद्वै जुष्टं देवानां यदाज्यं तज्जुष्टमेवैतद्देवेभ्यः करोति तस्माद्उभयत आज्यं भवति ॥ १० ॥ असौ वाऽअनुवाक्येयं याज्या । तेऽउभे योषे तयोर्मिथुनमस्ति वषट्कार एव तद्वाऽएष एव वषट्कारो य एष तपति स उद्यन्नेवामूमधेद्रवत्यस्तं यन्नेमामधिद्रवति तदेतेन वृष्णेमां प्रजातिं प्रजायते यैनयोरियं प्रजातिः ॥ ११ ॥ सोऽनुवाक्यामनूच्य । याज्यामनुद्रुत्य पश्चाद्वषट्करोति पश्चाद्धि परीत्य वृषा योषामधिद्रवति तदेनेऽउभे पुरस्तात्कृत्वा वृष्णा वषट्कारेणाधिद्रावयति तस्माद्उ सकृ वैव वषट्कारेण जुह्वुयाद्वषट्कृते वा ॥ १२ ॥ देवपात्रं वाऽएष यद्वषट्कारः । तद्यथा पात्रेऽउद्धृत्य प्रयच्छेदेवं तदथ यत्पुरा वषट्काराज्जुह्वुयाद्यथाधो भूमौ निदिग्धं तदमुया स्यादेवं तत्तस्माद्उ सकृ वैव वषट्कारेण जुह्वुयाद्वषट्कृते वा ॥ १३ ॥ ॥ शतम् ६०० ॥ ॥ तद्यथा योनौ रेतः सिञ्चेत् । एवं तदथ यत्पुरा वषट्काराज्जुह्वुयाद्यथा योनौ रेतः सिक्तं तदमुया स्यादेवं तत्तस्माद्उ सकृ वैव वषट्कारेण जुह्वुयाद्वषट्कृते वा ॥ १४ ॥ असौ वाऽअनुवाक्येयं याज्या । सा वै गायत्रीयं त्रिष्टुबसौ स वै गायत्रीमन्वाह तदमूमनुब्रुवन्नसौ ह्यनुवाक्येमामन्वाहेयꣳ हि गायत्री ॥ १५ ॥ अथ त्रिष्टुभा यजति । तदनया यजन्नियꣳ हि याज्यामुष्या अधि वषट्करोत्यसाऽउ हि त्रिष्टुप्तदेने सयुजौ करोति तस्मादिमे संभुञ्जातेऽअनयोरनु संभोगमिमाः सर्वाः प्रजा अनु संभुञ्जते ॥ १६ ॥ स वाऽअङ्ग्यन्नेवानुवाक्यामनुब्रूयात् । असौ ह्यनुवाक्या बृहद्यसौ बार्हतꣳ हि तद्रूपं क्षिप्रऽएव याज्यया वरेतियꣳ हि याज्या रथन्तरꣳ हीयꣳ रायन्तरꣳ हि तद्रूपꣳ ह्रूयति वाऽअनुवाक्यया

प्रयङ्क्ति याज्यया तस्मादनुवाक्यायै रूपꣳ कुरुते कृवामकृꣳआगन्हिꣳ बर्हिः सीदेति यद्ब्रुयति हि तया प्रयङ्क्ति याज्यया तस्माद्याज्यायै रूपं वीहि कृविर्नुषस्व कृविरावृषाय स्वाङ्कि पिब प्रेति यत्प्र हि तया यङ्क्ति ॥ १७॥ सा या पुरस्ताल्लक्ष्मणा । सानुवाक्या स्यादसौ क्यनुवाक्या तस्या अमुष्या अवस्ताल्लक्ष्म चन्द्रमा नक्षत्राणि सूर्यः ॥ १८॥ अथ योपरिष्टाल्लक्ष्मणा । सा याज्या स्यादियꣳ हि याज्या तस्या अस्या उपरिष्टाल्लक्ष्मौषधयो वनस्पतय आपोऽग्निरिमाः प्रजाः ॥ १९॥ सा कृ न्वेव समृद्धानुवाक्या । यस्यै प्रथमात्पदाद्देवतामभिव्याकरोति सोऽएव समृद्धा याज्या यस्या ऽउत्तमात्पदाद्देवताया अधि वषट्करोति वीर्यं वै देवतऽर्चस्तदुभयत एवैतद्वीर्येण परिगृह्य यस्यै देवतायै कृविर्भवति तस्यै प्रयङ्क्ति ॥ २०॥ स वै वौगिति करोति । वाग्वै वषट्कारो वाग्रेतो रेत एवैतत्सिञ्चति षडित्यृतवो वै षट्कृतुष्वेवैतद्रेतः सिच्यते तदृतवो रेतः सिक्तमिमाः प्रजाः प्रजनयन्ति तस्मादेवं वषट्करोति ॥ २१॥ देवाश्च वाऽअसुराश्च । उभये प्राजापत्याः प्रजापतेः पितुर्दायमुपेयुरेतावेवार्धमासौ य एवापूर्यते तं देवा उपायन्योऽपक्षीयते तमसुराः ॥ २२॥ ते देवा अकामयन्त । कथं न्विममपि संवृञ्जीमहि योऽयमसुराणामिति तेऽर्चन्तः श्राम्यन्तश्चेरुस्तऽएतꣳ कृविर्यज्ञं ददृशुर्यदर्शपूर्णमासौ ताभ्यामयजन्त ताभ्यामिष्ट्वेतमपि समवृञ्जत ॥ २३॥ य एषोऽसुराणामासीत् । यदा वाऽएताऽउभौ परिप्लवेतेऽअथ मासो भवति मासशः संवत्सरः सर्वं वै संवत्सरः सर्वमेव तद्देवा असुराणाꣳ समवृञ्जत सर्वस्मात्सपत्नानसुरान्निरभजन्त्सर्वम्वेवैष एतत्सपत्नानाꣳ संवृङ्क्ते सर्वस्मात्सपत्नान्निर्भजति य एवमेतद्वेद ॥ २४॥ स यो देवानामासीत् । स यवायुवत हि तेन देवा योऽसुराणाꣳ सोऽयवा न हि तेनासुरा अयुवत ॥ २५॥ अथोऽइतरथाङ्कुः । य एव देवानामासीत्सोऽयवा न हि तमसुरा अयुवत योऽसुराणाꣳ स यवायुवत हि तं देवाः सब्दमकुः सगरा रात्रिर्यव्या मासाः सुमिकः संवत्सरः स्वेको कृ वै

नामैतद्यत्सुमिक इति यवा च हि वाऽग्रयवा यवैतीवाथ यैनैतेषाꣳ होता भवति तद्याविहोत्रमित्याचक्षते ॥२६॥ ब्राह्मणम् ॥५[७.२.]॥ ॥ पञ्चमः प्रपाठकः ॥ ॥ कण्डिकासंख्या १२१ ॥ ॥

यज्ञेन वै देवाः । दिवमुपोदक्रामन्नथ योऽयं देवः पशूनामीष्टे स इडाकीयत तस्माद्वास्तव्य इत्याकुर्वास्तौ हि तदकीयत ॥१॥ स यैनैव देवा दिवमुपोदक्रामन् । तेनोऽएवार्चन्तः श्राम्यन्तश्चेरुरथ योऽयं देवः पशूनामीष्टे य इडाकीयत ॥२॥ स ऐक्षत । अद्दास्य दार्त्स्यल्यु मा यज्ञादिति सोऽनूचक्राम स आयंतयोत्तरत ऽपोत्येद्वै स एष स्विष्टकृतः कालः ॥३॥ ते देवा अब्रुवन् । मा विस्रक्षीरिति ते वै मा यज्ञान्मात्मगताकृतिं मे कल्पयतेति तथेति स समबृहत्स नास्यत्स न कं चनाहिनत् ॥४॥ ते देवा अब्रुवन् । यावन्ति नो हवीꣳषि गृहीतान्यभूवन्सर्वेषां तेषाꣳ हुतमुपजानीत यथास्माऽआकृतिं कल्पयामेति ॥५॥ तेऽध्वर्युमब्रुवन् । यथापूर्वꣳ हवीꣳष्यभिघारयैकस्माऽअवदानाय पुनराप्याययायातयामानि कुरु तत एकैकमवदानमवद्येति ॥६॥ सोऽध्वर्युः । यथापूर्वꣳ हवीꣳष्यभ्यघारयदेकस्माऽअवदानाय पुनराप्याययदयातयामान्यकरोत्तत एकैकमवदानमवाद्यत्तस्माद्वास्तव्य इत्याकुर्वास्तु हि तद्यज्ञस्य यद्धुतेषु हविःषु तस्माद्यस्यै कस्यै च देवतायै हविर्गृह्यते सर्वत्रैव स्विष्टकृदन्वाभक्तः सर्वत्र ह्येवैनं देवा अन्वाभजन् ॥७॥ तद्वाऽअग्नयऽइति क्रियते । अग्निर्वै स देवस्तस्यैतानि नामानि शर्व इति यथा प्राच्या आचक्षते भव इति यथा बाह्लीकाः पशूनां पती रुद्रोऽग्निरिति तान्यस्याशान्तान्येवेतराणि नामान्यग्निरित्येव शान्ततमं तस्मादग्नयऽइति क्रियते स्विष्टकृतऽइति ॥८॥ ते होचुः । यद्वव्यमुत्र सत्ययद्मह्यि तन्नः स्विष्टं कुर्विति तदेभ्यः स्विष्टमकरोत्तस्मात्स्विष्टकृतऽइति ॥९॥ सोऽनुवाक्यामनूच्य संपश्यति । ये तथाग्निꣳ स्विष्टकृतमयाडग्निरग्नेः प्रिया धामानीति तदाग्नेयमाज्यभागमाकायाꣳसोमस्य

प्रिया धामानीति तत्सौम्यमाज्यभागमाक्रायाऽग्नेः प्रिया धामानीति तच्च एष उभयत्राच्युत आग्नेयः पुरोडाशो भवति तमाह ॥ १० ॥ अथ यथादेवतम् । अयाड्देवानामाज्यपानां प्रिया धामानीति तत्प्रयाजानुयाजानाह प्रयाजानुयाजा वै देवा आज्यपा यद्वदग्नेर्होतुः प्रिया धामानीति तदग्निꣳ होतारमाह तदस्माऽएतां देवा आकृतिं कल्पयित्वाथैनेनैतद्वयः समशाम्यन्प्रियऽएनं धामन्नुपाक्रियत तस्मादिवꣳ संपश्यति ॥ ११ ॥ तद्वैके । देवतां पूर्वां कुर्वन्त्ययाट्कारादग्नेरयाट्सोमस्यायाडिति तद्व तथा न कुर्याद्विलोम ह्य ते यज्ञं कुर्वन्ति ये देवतां पूर्वां कुर्वन्त्ययाट्कारादिदꣳ हि प्रथममभिव्याहरन्नयाट्कारमेवाभिव्याहरति तस्मादयाट्कारमेव पूर्वं कुर्यात् ॥ १२ ॥ यद्यत्स्वं महिमानमिति । यत्र वाऽअदो देवता आवाक्रयति तदपि स्वं महिमानमावाक्रयति तदतः प्राङ्किंच न स्वाय महिम्नऽइति क्रियते तद्यत्र तं प्रीणाति तथो ह्यस्यैषोऽमोघायावाक्रितो भवति तस्मादाह यद्यत्स्वं महिमानमिति ॥ १३ ॥ आ यजतामेड्या इष इति । प्रजा वाऽइषस्ता एवैतच्चायजूꣳषि करोति ता इमाः प्रजा यजमाना अर्चन्त्यः आभ्यन्त्यश्चरन्ति ॥ १४ ॥ सोऽअधरा ज्ञातविदा जुष्टाꣳ हविरिति । तच्चज्ञस्यैवैतत्समृद्धिमाशास्ते यद्धि देवा हविर्जुषन्ते तेन हि मरुज्जयति तस्मादाह जुष्टाꣳ हविरिति ॥ १५ ॥ तच्चदेतेऽअत्र । याज्यानुवाक्ये ऽअवक्लप्ततमे भवतस्तृतीयसवनं वै स्विष्टकृद्वैश्वदेवं वै तृतीयसवनं पिप्रीहि देवांऽ२॥ऽउशतो यविष्ठेति तदनुवाक्यायै वैश्वदेवमग्ने यच्च विशोऽअधरस्य होतरिति तच्चाज्यायै वैश्वदेवं तच्चदेतेऽएवꣳरूपे भवतस्तेनोऽएते तृतीयसवनस्य रूपं तस्माद्वाऽएतेऽअत्र याज्यानुवाक्येऽअवक्लप्ततमे भवतः ॥ १६ ॥ ते वै त्रिष्टुभौ भवतः । वास्तु वाऽएतच्चज्ञस्य यत्स्विष्टकृद्वीर्यं वै वास्त्विन्द्रियं वीर्यं त्रिष्टुबिन्द्रियमेवैतद्वीर्यं वास्तौ स्विष्टकृति दधाति तस्मात्त्रिष्टुभौ भवतः ॥ १७ ॥ उतोऽअनुष्टुभाविव भवतः । वास्त्वनुष्टुब्वास्तु स्विष्टकृद्वास्ताविवैतद्वास्तु दधाति पेसुकं वै

वास्तु पिस्यति ह प्रज्ञया पशुभिर्यस्यैवं विदुषोऽनुष्टुभौ भवतः ॥१८॥ तदु ह भाल्लविनः । अनुष्टुभमनुवाक्यां चक्रे त्रिष्टुभं याज्यामितदुभयं परिगृह्णामीति स रथात्पपात स पतित्वा बाहुमपि शश्रे स परिममृशे यत्किमकरं तस्मादिदमापदिति स होतदेव मेने यद्विलोम यज्ञेऽकरमिति तस्मान्न विलोम कुर्यात्सछन्दसावेव स्यातामुभे वैवानुष्टुभाऽउभे वा त्रिष्टुभौ ॥१९॥ स वाऽउत्तरार्धादेवश्यति । उत्तरार्धे जुहोत्येषा वै होतस्य देवस्य दिक्तस्मादुत्तरार्धादेवश्यत्युत्तरार्धे जुहोत्येतस्यै वै दिश उदपश्यत तं तत एवाशमयंस्तस्मादुत्तरार्धादेवश्यत्युत्तरार्धे जुहोति ॥२०॥ स वाऽअभ्यर्धऽइवेतराभ्य आकृतिभ्यो जुहोति । इतरा आकृतीः पशवोऽनुप्रजायन्ते रुद्रियः स्विष्टकृद्रुद्रियेण पशून्प्रसजेत्यदितराभिराकृतिभिः सऽसृजत्तेऽस्य गृहाः पशव उपमूर्यमाणा ईयुस्तस्मादभ्यर्धऽइवेतराभ्य आकृतिभ्यो जुहोति ॥२१॥ एष वै सयज्ञः । येन तदेवा दिवमुपोदक्रामन्नेष आहवनीयोऽथ य इडाहीयत स गार्हपत्यस्तस्मादितं गार्हपत्यात्प्राञ्चमुद्धरन्ति ॥२२॥ तं वाऽअष्टासु विक्रमेष्वादधीत । अष्टाक्षरा वै गायत्री गायत्र्यैवैतद्दिवमुपोत्क्रामति ॥२३॥ एकादशस्वादधीत । एकादशाक्षरा वै त्रिष्टुप्त्रिष्टुभैवैतद्दिवमुपोत्क्रामति ॥२४॥ द्वादशस्वादधीत । द्वादशाक्षरा वै जगती जगत्यैवैतद्दिवमुपोत्क्रामति नात्र मात्रास्ति यत्रैव स्वयं मनसा मन्येत तदादधीत स यद्वाऽअप्यल्पकमिव प्राञ्चमुद्धरति तेनैव दिवमुपोत्क्रामति ॥२५॥ तदाहुः । आहवनीये हवींष्यपयेयुरतो वै देवा दिवमुपोदक्रामंस्तेनोऽएवार्चन्तः आम्यन्तश्चेरुस्तस्मिन्हवींष्यपयाम तस्मिन्यज्ञं तनवामहाऽइत्यपस्खल-इव ह स हविषां यद्गार्हपत्ये अपयेयुर्यज्ञ आहवनीयो यज्ञे यज्ञं तनवामहाऽइति ॥२६॥ उतो गार्हपत्यऽएव अपयन्ति । आहवनीयो वाऽएष न वाऽएष तस्मै यदस्मिन्नभृतꣳ अप्येयुस्तस्मै वाऽएष यदस्मिंकृतं जुह्वयुरित्यतो यतरथा कामयेत तथा कुर्यात् ॥२७॥ स होष यज्ञ उवाच । नग्नताया वै बिभेमीति

का ते ऽनग्नतेत्यभित एव मा परिस्तृणीयुरिति तस्मादेतदग्निमभितः परिस्तृणन्ति तृष्णाया वै बिभेमीति का ते तृप्तिरिति ब्राह्मणस्यैव तृप्तिमनुतृप्येयमिति तस्मात्स्ऽस्थिते यज्ञे ब्राह्मणं तर्पयितवै ब्रूयाद्यज्ञमेवैतत्तर्पयति ॥ २८ ॥ ॥ ब्राह्मणम् ॥ १ [७. ३.] ॥ ॥

प्रजापतिर्ह वै स्वां दुहितरमभिदध्यौ । दिवं वोषसं वा मिथुन्येनया स्यामिति ताꣳ संबभूव ॥ १ ॥ तद्धै देवानामाग आस । य इत्थꣳ स्वां दुहितरमस्माकꣳ स्वसारं करोतीति ॥ २ ॥ ते ह देवा ऊचुः । योऽयं देवः पशूनामीष्टेऽतिसंधं वाऽअय चरति य इत्थꣳ स्वां दुहितरमस्माकꣳ स्वसारं करोति विध्येममिति तꣳ रुद्रोऽभ्यायत्य विव्याध तस्य सामि रेतः प्रचस्कन्द तथेन्नूनं तदास ॥ ३ ॥ तस्मादेतदृषिणाभ्यनूक्तम् । पिता यत्स्वां दुहितरमधिष्कन् द्मया रेतः संजग्मानो निषिञ्चदिति तदाग्निमारुतमित्युक्थं तस्मिंस्तद्व्याख्यायते यथा तद्देवा रेतः प्राजनयंस्तेषां यदा देवानां क्रोधो व्यैदथ प्रजापतिमभिषज्यंस्तस्य तꣳ शल्यं निरकृन्तत्स वै यज्ञ एव प्रजापतिः ॥ ४ ॥ ते ह्रोचुः । उपजानीत यथेदं नामुयासत्कनीयो ह्राङ्कुर्तेयथेदꣳ स्यादिति ॥ ५ ॥ ते ह्रोचुः । भगायैनद्दक्षिणत आसीनाय परिहरत तद्भगः प्राशिष्यति तथ्यथाङ्कृतमेवं भविष्यतीति तद्भगाय दक्षिणत आसीनाय पर्याजह्रुस्तद्भगोऽवेक्षां चक्रे तस्याक्षिणी निर्ददाह तथेन्नूनं तदास तस्मादाङ्करन्धो भग इति ॥ ६ ॥ ते ह्रोचुः । नो न्वेवात्राशमत्पूष्णऽएनत्परिहरतेति तत्पूष्णे पर्याजह्रुस्तत्पूषा प्राश तस्य दतो निर्जघान तथेन्नूनं तदास तस्मादाङ्करदन्तकः पूषेति तस्माद्यं पूष्णे चरुं कुर्वन्ति प्रपिष्टानामिव कुर्वन्ति यथादन्तकायैवम् ॥ ७ ॥ ते ह्रोचुः । नो न्वेवात्राशमद्बृहस्पतयऽएनत्परिहरतेति तद्बृहस्पतये पर्याजह्रुः स बृहस्पतिः सवितारमेव प्रसवायोपाधावत्सविता वै देवानां प्रसवितेदं मे प्रसुवेति तदस्मै सविता प्रसविता प्रासुवत्तदेनꣳ सवितृप्रसूतं नाक्निनत्ततोऽर्वाचीनꣳ शान्तं तदेतन्निदानेन

यत्प्राशित्रꣳ ॥ ८॥ स यत्प्राशित्रमवद्यति । यदेवात्राविद्धं यज्ञस्य यद्रुद्रियं तद्वैतन्निर्मिमीतेऽथाप उपस्पृशति शान्तिरापस्तद्द्विः शमयत्यथेडां पशूल्समवद्यति ॥ ९॥ स वै यावन्मात्रमिवैवावद्येत् । तथा शल्यः प्रच्यवते तस्माद्यावन्मात्रमिवैवावद्येदन्यतरतऽआज्यं कुर्यादधस्ताद्वोपरिष्टाद्वा तथा खदन्निःसरणवद्भवति तथा निस्रवति तस्मादन्यतरत आज्यं कुर्यादधस्ताद्वोपरिष्टाद्वा ॥ १०॥ स आज्यस्योपस्तीर्य । द्विर्हविषोऽवदायाथोपरिष्टादाज्यस्याभिघारयति तद्यथैव यज्ञस्यावदानमेवमेतत्॥ ११॥ तन्न पूर्वेण परिहरेत् । पूर्वेण ह्येके परिहरन्ति पुरस्ताद्वै प्रत्यञ्चो यजमानं पशव उपतिष्ठन्ते रुद्रियेण ह पशून्प्रसजेद्यत्पूर्वेण परिहरेत्तेऽस्य गृहाः पशव उपमूर्यमाणा ईयुस्तस्मादित्येव तिर्यक्प्रजिहीत तथा ह रुद्रियेण पशून्न प्रसजति तिर्यगेवैनं निर्मिमीते ॥ १२॥ तत्प्रतिगृह्णाति । देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां प्रतिगृह्णामीति ॥ १३॥ तद्यथैवादो बृहस्पतिः । सवितारं प्रसवायोपाधावत्सविता वै देवाना प्रसवितेदं मे प्रसुवेति तदस्मै सविता प्रसविता प्रासुवत्तदेनꣳ सवितृप्रसूतं नाहिनदेवमेवैष एतत्सवितारमेव प्रसवायोपधावति सविता वै देवानां प्रसवितेदं मे प्रसुवेति तदस्मै सविता प्रसविता प्रसौति तदेनꣳ सवितृप्रसूतं न हिनस्ति ॥ १४॥ तत्प्राश्नाति । अग्नेष्ट्वास्येन प्राश्नामीति न वाऽअग्निं किं चन हिनस्ति तथो हैनमेतन्न हिनस्ति ॥ १५॥ तन्न दद्भिः खादेत् । नेन्मऽइदꣳ रुद्रियं दतो हिनसदिति तस्मान्न दद्भिः खादेत् ॥ १६॥ अथाप आचामति । शान्तिरापस्तद्द्विः शान्त्या शमयतेऽथ परिहालत्य पात्रम् ॥ १७॥ अथास्मै ब्रह्मभागं पर्याहरन्ति । ब्रह्मा वै यज्ञस्य दक्षिणत आस्तेऽभिगोप्ता स एतं भागं प्रतिविदान आस्ते यत्प्राशित्रं तदस्मै पर्याहार्षुस्तत्प्राशीदथ यमस्मै ब्रह्मभागं पर्याहरन्ति तेन भागी स यदत ऊर्धमसꣳस्थितं यज्ञस्य तदभिगोपायति तस्माद्वाऽअस्मै ब्रह्मभागं पर्याहरन्ति ॥ १८॥ स वै वाचंयम एव स्यात् । ब्रह्मन्प्रस्थास्या-

मीत्येतस्माद्वचसो विवृह्यन्ति वाऽएते यज्ञं क्षणवन्ति ये मध्ये यज्ञस्य पाकयज्ञियये-डया चरन्ति ब्रह्मा वाऽऋत्विजां भिषक्तमस्तद्ब्रह्मा संदधाति न ह संदध्याद्यद्यवद्य-मान आसीत तस्माद्वाचंयम एव स्यात् ॥ ११ ॥ स यदि पुरा मानुषीं वाचं व्या-हरेत् । तत्रो वैष्णवीमृचं वा यजुर्वा जपेद्यज्ञो वै विष्णुस्तद्यज्ञं पुनरारभते तस्यो हैषा प्रायश्चित्तिः ॥ २० ॥ स यत्राह ब्रह्मन्प्रस्थास्यामीति तद्ब्रह्मा जपत्येतं ते देव सवितर्यज्ञं प्राहुरिति तत्सवितारं प्रसवायोपधावति स हि देवानां प्रसविता बृ-हस्पतये ब्रह्मणाऽइति बृहस्पतिर्वै देवानां ब्रह्मा तद्य एव देवानां ब्रह्मा तस्मा ऽएवैतत्प्राह तस्मादाह बृहस्पतये ब्रह्मणाऽइति तेन यज्ञमव तेन यज्ञपतिं तेन मामवेति नात्र तिरोहितमिवास्ति ॥ २१ ॥ मनो जूतिर्जुषतामाज्यस्येति । मनसा वाऽइदꣳ सर्वमाप्तं तन्मनसैवैतत्सर्वमाप्नोति बृहस्पतिर्यज्ञमिमं तनोत्वरिष्टं यज्ञꣳ समिमं दधात्विति यद्विवृहं तत्संदधाति विश्वे देवास इह मादयन्तामिति सर्वे वै विश्वे देवाः सर्वेणैवैतत्संदधाति स यदि कामयेत ब्रूयात्प्रतिष्ठेति यद्यु कामयेतापि नाद्रियेत ॥ २२ ॥ ब्राह्मणम् ॥ २. [७. ४.] ॥ अध्यायः ॥ ७ ॥ ॥

मनवे ह वै प्रातः । अवनेग्यमुदकमाजह्रुर्यथेदं पाणिभ्यामवनेजनायाहरन्त्येवं तस्यावनेनिज्ञानस्य मत्स्यः पाणीऽआपेदे ॥ १ ॥ स ह तस्मै वाचमुवाद । बिभृहि मा पारयिष्यामि वेति कस्मान्मा पारयिष्यसीत्यौघ इमाः सर्वाः प्रजा निर्वोढा त-तस्त्वा पारयितास्मीति कथं ते भृतिरिति ॥ २ ॥ स होवाच । यावद्वै क्षुल्लका भ-वामो बह्वो वै नस्तावन्नाष्ट्रा भवत्युत मत्स्य एव मत्स्यं गिलति कुम्भ्यां मायं बिभरासि स यदा तामतिवर्धाऽअथ कर्षूं खात्वा तस्यां मा बिभरासि स यदा ता-मतिवर्धाऽअथ मा समुद्रमभ्यवहरासि तर्हि वाऽअतिनाष्ट्रो भवितास्मीति ॥ ३ ॥ शश्वद्ध कृष आस । स हि ज्येष्ठं वर्धतेऽथेतियीꣳ समां तदौघ आगन्ता तन्मा ना-वमुपकल्प्योपासासै स ओघऽउत्थिते नावमाप्यासै ततस्त्वा पारयितास्मीति ॥ ४ ॥

तमेवं भूत्वा समुद्रमभ्यवजहार । स यतिथीं तत्समां परिदिदेश तितिथीꣳ समां नावमुपकल्प्योपासां चक्रे स औघऽउत्थिते नावमापेदे तꣳ स मत्स्य उपन्यापुप्लुवे तस्य शृङ्गे नावः पाशं प्रतिमुमोच तेनैतमुत्तरं गिरिमतिदुद्राव ॥५॥ म होवाच । अपीपरं वै त्वा वृत्ते नावं प्रतिबध्नीष्व तं तु त्वा मा गिरौ सन्तमुदकमन्तश्चैत्सीत्यावदुदकꣳ समवायात्तावत्तावदन्ववसर्पासीति स ह तावत्तावदेवान्ववससर्प तदेतदुत्तरस्य गिरेर्मनोरवसर्पणमित्याचक्षते ह ताः सर्वाः प्रजा निरुवाकाथेह मनुरेवैकः परिशिशिषे ॥६॥ सोऽर्चंश्चाम्यंश्चचार प्रजाकामः । तत्रापि पाकयज्ञेनेजे स घृतं दधि मस्त्वामिक्षामित्यप्सु जुहवां चकार ततः संवत्सरे योषित्सम्बभूव सा ह पिब्दमानेवोदियाय तस्यै ह स्म घृतं पदे संतिष्ठते तया मित्रावरुणौ संजग्माने ॥७॥ ताꣳ होचतुः कासीति । मनोर्डुहितेत्यावयोर्ब्रूषेति नेति होवाच य एव मामजीजनत तस्यैवाहमस्मीति तस्यामपित्वमीषाते तद्वा जज्ञौ तद्वा न जज्ञावति त्वेवेयाय सा मनुमाजगाम ॥८॥ ताꣳ ह मनुरुवाच कासीति । तव डुहितेति कथं भगवति मम डुहितेति या अमूरप्स्वाहुतीरहौषीर्घृतं दधि मस्त्वामिक्षां ततो मामजीजनथाः साशीरस्मि तां मा यज्ञेऽवकल्पय यज्ञे चैद्दे मावकल्पयिष्यसि बहुः प्रजया पशुभिर्भविष्यसि यामसुया कां चाशिषमाशासिष्यसे सा ते सर्वा समर्धिष्यतऽइति तामेतन्मध्ये यज्ञस्यावाकल्पयन्मध्यꣳ होतव्यज्ञस्य यदुत्तरा प्रयाजानुयाजान् ॥९॥ तयार्चंश्चाम्यंश्चचार प्रजाकामः । तयेमां प्रजातिं प्रजज्ञे येयं मनोः प्रजातिर्यामेनया कां चाशिषमाशास्त सास्मै सर्वा समार्धत ॥१०॥ सैषा निदानेन यदिडा । स यो हैवं विद्वानिडया चरत्येताꣳ हैव प्रजातिं प्रजायते यां मनुः प्राजायत यामेनया कां चाशिषमाशास्ते सास्मै सर्वा समृध्यते ॥११॥ सा वै पशावत्ता भवति । पशवो वाऽइडा पाङ्क्ता वै पशवस्तस्मात्पशावत्ता भवति ॥१२॥ स समवदायेडाम् । पूर्वार्धं पुरोडाशस्य प्रशीर्य पुरस्ताद्ध्रुवायै निदधाति ताꣳ होत्रे

प्रदाय दक्षिणात्येति ॥ १३ ॥ स क्रोतुरिक्ष निलिम्पति । तद्धोतौष्ठयोर्निलिम्पते मनसस्पतिना ते हुतस्याश्नामीषे प्राणायेति ॥ १४ ॥ अथ क्रोतुरिक्ष निलिम्पति । तद्धोतौष्ठयोर्निलिम्पते वाचस्पतिना ते हुतस्याश्नाम्यूर्ज्ज्ऽउदानायेति ॥ १५ ॥ एतद्ध वै मनुर्बिभयां चकार । इदं वै मे तनिष्ठं यज्ञस्य यदियमिडा पाकयज्ञिया यद्वै म ज्ऽइक्ष रक्षाꣳसि यज्ञं न क्षिꣳस्युरिति तामितत्पुरा रक्षोभ्यः पुरा रक्षोभ्य इत्येव प्रापयत तथोऽएवैनामिष एतत्पुरा रक्षोभ्यः पुरा रक्षोभ्य इत्येव प्रापयतेऽथ यत्प्रत्यक्षं न प्राश्नाति नेदनुपक्षृतां प्राश्नामीत्येतदेवैनां प्रापयते यदोष्ठयोर्निलिम्पते ॥ १६ ॥ अथ क्रोतुः पाणौ समवद्यति । समवत्तामिव सतीं तदेनां प्रत्यक्षꣳ क्रोतरि श्रयति तयात्मंक्रुतया क्रोता यजमानायाशिषमाशास्ते तस्माद्धोतुः पाणौ समवद्यति ॥ १७ ॥ अथोपाꣳशूपक्षयते । एतद्ध वै मनुर्बिभयां चकारेदं वै मे तनिष्ठं यज्ञस्य यदियमिडा पाकयज्ञिया यद्वै मऽइक्ष रक्षाꣳसि यज्ञं न क्रुन्युरिति तामितत्पुरा रक्षोभ्यः पुरा रक्षोभ्य इत्येवोपाꣳशूपाक्षयत तथोऽएवैनामिष एतत्पुरा रक्षोभ्यः पुरा रक्षोभ्य इत्येवोपाꣳशूपक्षयते ॥ १८ ॥ स उपक्षयते । उपक्षतꣳ रथन्तरꣳ सक्रु पृथिव्योप माꣳ रथन्तरꣳ सक्रु पृथिव्या क्षयतामुपक्षतं वामदेव्यꣳ सक्षान्तरिक्षेणोप मां वामदेव्यꣳ सक्षान्तरिक्षेण क्षयतामुपक्षतं बृक्रुत्सक्रु दिवोप मां बृक्रुत्सक्रु दिवा क्षयतामिति तदेतामेवैतदुपक्षयमान इमांश्च लोकानुपक्षयतऽएतानि च सामानि ॥ ११ ॥ उपक्षता गावः सक्रुऽर्षभा इति । पशवो वाऽइडा तदेनां परोऽक्षमुपक्षयते सक्रुऽर्षभा इति समिथुनामेवैनामेतदुपक्षयते ॥ २० ॥ उपक्षता सप्तक्रोत्रेति । तदेनाꣳ सप्तक्रोत्रा सौम्येनाध्वरेणोपक्षयते ॥ २१ ॥ उपक्षतेडा ततुरिरिति । तदेनां प्रत्यक्षमुपक्षयते ततुरिरिति सर्वꣳ क्षेषा पाप्मानं तरति तस्मादाह ततुरिरिति ॥ २२ ॥ उपक्षतः सखा भक्ष इति । प्राणो वै सखा भक्षस्तत्प्राणमुपक्षयतऽउपक्षतꣳ क्षेगिति तच्छरीरमुपक्षयते तत्सर्वामुपक्षयते ॥ २३ ॥ अथ प्र-

तिपद्यते । इडोपह्वतोपह्वतेडोपोऽअस्मां२॥ऽइडा ह्वयतामिडोपह्वतेति तदुपह्वता-मेवैनानेतत्सतीं प्रत्यक्षमुपह्वयते या वै सासीद्गौर्वै सासीच्चतुष्पदी वै गौस्तस्मा-च्चतुरुपह्वयते ॥२४॥ स वै चतुरुपह्वयमानः । अथ नानेवोपह्वयतेऽज्ञामिताये ज्ञा-मि ह कुर्याद्यदिडोपह्वतेडोपह्वतेत्येवोपह्वयेतोपह्वतेडेति वेडोपह्वतेति तदर्वाची-मुपह्वयतऽउपह्वतेडेति तत्पराचीमुपोऽअस्मां२॥ऽइडा ह्वयतामिति तदात्मानं चै-वैनन्नान्तरेत्यन्यथेव च भवतीडोपह्वतेति तत्पुनरर्वाचीमुपह्वयते तदर्वाचीं चैवै-नामितत्पराचीं चोपह्वयते ॥२५॥ मानवी घृतपदीति । मनुर्ह्येतामग्रेऽजनयत त-स्मादाह मानवीति घृतपदीति यद्वास्यै घृतं पदे समतिष्ठत तस्मादाह घृतपदी-ति ॥२६॥ उत मैत्रावरुणीति । यदेव मित्रावरुणाभ्यां समगछत स एव मैत्रा-वरुणो न्यङ्को ब्रह्मा देवकृतोपह्वतेति ब्रह्मा ह्येषां देवकृतोपह्वतोपह्वता दैव्या अध्वर्यव उपह्वता मनुष्या इति तद्दैवांश्चैवाध्वर्यूनुपह्वयते ये च मानुषा वत्सा वै दैव्या अध्वर्यवोऽथ यऽइतरे ते मानुषाः ॥२७॥ यऽइमं यज्ञमवान्ये च यज्ञपतिं वर्धानिति । एते वै यज्ञमवन्ति ये ब्राह्मणाः शुश्रुवाꣳसोऽनूचाना एते ह्येनं त-न्वतऽएतऽएनं जनयन्ति तदु तेभ्यो निह्नुते वत्सा उ वै यज्ञपतिं वर्धन्ति यस्य ह्येते भूयिष्ठा भवन्ति स हि यज्ञपतिर्वर्धते तस्मादाह ये च यज्ञपतिं वर्धानिति ॥२८॥ उपह्वते द्यावापृथिवी पूर्वेऽऋतावरी देवी देवपुत्रेऽइति । तदिमे द्या-वापृथिवीऽउपह्वयते ययोरिदꣳ सर्वमध्युपह्वतोऽयं यजमान इति तद्यजमानमुप-ह्वयते तद्यदत्र नाम न गृह्णाति परोऽक्षꣳ ह्यत्राशीर्यदिडायां मानुषꣳ ह कुर्याद्य-न्नाम गृह्णीयाद्यृद्धं वै तद्यज्ञस्य यन्मानुषं नेद्यृद्धं यज्ञे करवाणीति तस्मान्न नाम गृह्णाति ॥२९॥ उत्तरस्यां देवयज्यायामुपह्वत इति । तदस्माऽएतज्जीवातुमेव प-रोऽक्षमाशास्ते जीवन्हि पूर्वमिष्ट्वाथापरं यजते ॥३०॥ तदस्मा एतत्प्रजामेव परो-ऽक्षमाशास्ते । यस्य हि प्रजा भवत्यमुं लोकमात्मनेत्यथास्मिंल्लोके प्रजा यजते

तस्मात्प्रज्ञोत्तरा देवयज्या ॥३१॥ तदस्माऽएतत्पशूनेव परोऽक्षमाशास्ते । यस्य हि पशवो भवन्ति स पूर्वमिष्ट्वाथापरं यजते ॥३२॥ भूयसि हविष्करणाऽउपक्रुत इति । तदस्मा एतज्जीवातुमेव परोऽक्षमाशास्ते जीवन्हि पूर्वमिष्ट्वाथ भूयो-भूय एव हविष्करोति ॥३३॥ तदस्माऽएतत्प्रज्ञामेव परोऽक्षमाशास्ते । यस्य हि प्रज्ञा भवत्येक आत्मना भवत्यथोत दशधा प्रज्ञया हविष्क्रियते तस्मात्प्रज्ञा भूयो हविष्करणम् ॥३४॥ तदस्मा एतत्पशूनेव परोऽक्षमाशास्ते । यस्य हि पशवो भवन्ति स पूर्वमिष्ट्वाथ भूयो-भूय एव हविष्करोति ॥३५॥ एषा वा आशीः । जीवितं प्रज्ञा मे स्याद्भूयं गह्येयमिति तद्यत्पशूनाशास्ते तद्भूयमाशास्ते श्रीर्हि पशवस्तदेताभ्यामेवैतदाशीर्भ्याꣳ सर्वमाप्तं तस्माद्वाऽएतेऽग्र द्वेऽआशिषौ क्रियेते ॥३६॥ देवा मऽइदꣳ हविर्जुषन्तामिति । तस्मिन्नुपक्रुत इति तद्यज्ञस्यैवैतत्समृद्धिमाशास्ते यद्धि देवा हविर्जुषन्ते तेन हि मह्यज्जायति तस्मादाह जुषन्तामिति ॥३७॥ ॥ शतम् ७०० ॥ ॥ तां वै प्राश्नन्त्येव । नाग्नौ जुह्वति पशवो वाऽइडा नेत्यग्नौ प्रवृणाऽइमेति तस्मान्नाग्नौ जुह्वति ॥३८॥ प्राणेष्वेव हूयते । स्रोतरि वाव यज्ञमानि वदधर्यौ वदथ यत्पूर्वार्धं पुरोडाशस्य प्रशीर्य पुरस्ताद्ध्रुवायै निदधाति यज्ञमानो वै ध्रुवा तद्यज्ञमानस्य प्राशितं भवत्यथ यत्प्रत्यन्नं न प्राश्नाति नेदसꣳस्थिते यज्ञे प्राश्नानीत्येतद्वास्य प्राशितं भवति सर्वे प्राश्नन्ति सर्वेषु मे जुहुतासदिति पञ्च प्राश्नन्ति पशवो वाऽइडा पाङ्क्ता वै पशवस्तस्मात्पञ्च प्राश्नन्ति ॥३९॥ अथ यत्र प्रतिपद्यते । तच्चतुर्धा पुरोडाशं कृत्वा बर्हिषदं करोति तदत्र पितॄणां भाजनेन चतस्रो वाऽआवान्तरदिशोऽवान्तरदिशो वै पितरस्तस्माच्चतुर्धा पुरोडाशं कृत्वा बर्हिषदं करोति ॥४०॥ अथ यत्राह्वोपक्रुते द्यावापृथिवीऽइति । तदग्नीधऽआदधाति तदग्नीत्प्राश्नात्युपक्रुता पृथिवी मातोप मां पृथिवी माता ह्वयतामग्निराग्नीध्रात्स्वाह्वोपक्रुतो द्यौष्पितोप मां द्यौष्पिता ह्वयतामग्निराग्नीध्रात्स्वाहेति द्यावापृथिव्यो वा

ऽएष यदाग्नीध्रस्तस्मादिवं प्राश्नाति ॥ ४१ ॥ अथ यत्राशिषमाशास्ते । तद्ध्रपति मयीदमिन्द्र इन्द्रियं दधात्वस्मान्रायो मघवानः सचन्ताम् अस्माकꣳ सन्त्वाशिषः सत्या नः सन्त्वाशिष इत्याशिषामेवैष प्रतिग्रहस्तथा एवात्रऽर्त्विजो यजमानायाशिष आशासते ता एवैतत्प्रतिगृह्यात्मन्कुरुते ॥ ४२ ॥ अथ पवित्रयोर्मार्ष्टि । पाकयज्ञियायेव वाऽएतदिडयाचारिषुः पवित्रपूता यदत ऊर्ध्वमसꣳस्थितं यज्ञस्य तत्तनवामहाऽइति तस्मात्पवित्रयोर्मार्ष्टि ॥ ४३ ॥ अथ ते पवित्रे प्रस्तरेऽपिसृजति । यजमानो वै प्रस्तरः प्राणोदानौ पवित्रे यजमाने तत्प्राणोदानौ दधाति तस्मात्ते पवित्रे प्रस्तरेऽपिसृजति ॥ ४४ ॥ ब्राह्मणम् ॥ ३ [८. १.] ॥ ॥

ते वाऽएतेऽउल्मुकेऽउदूहन्ति । अनुयाजेभ्यो यातयामेव वाऽएतदग्निर्भवति देवेभ्यो हि यज्ञमूहिवान्भवत्यथातयाम्न्यनुयाजांस्तनवामहाऽइति तस्माद्वाऽएते ऽउल्मुकेऽउदूहन्ति ॥ १ ॥ ते पुनरनुसꣳस्पर्शयन्ति । पुनरेवैतदग्निमाप्याययत्यथातयामानं कुर्वन्त्यथातयाम्नि यदत ऊर्ध्वमसꣳस्थितं यज्ञस्य तत्तनवामहाऽइति तस्मात्पुनरनुसꣳस्पर्शयन्ति ॥ २ ॥ अथ समिधमभ्यादधाति । समिन्द्धऽएवैनमेतत्समिद्धे यदत ऊर्ध्वमसꣳस्थितं यज्ञस्य तत्तनवामहाऽइति तस्मात्समिधमभ्यादधाति ॥ ३ ॥ ताꣳ होतानुमन्त्रयते । एषा तेऽअग्ने समित्तया वर्धस्व चा च प्यायस्व वर्धिषीमहि च वयमा च प्यासिषीमहीति तथ्यैवादः समिध्यमानायान्वाहैवमेवैतदन्वाह तदेतद्धोतुः कर्म स यदि मन्येत न होता वेदित्यपि स्वयमेव यजमानोऽनुमन्त्रयेत ॥ ४ ॥ अथ संमार्ष्टि । युनक्त्येवैनमेतत्युक्तो यदत ऊर्ध्वमसꣳस्थितं यज्ञस्य तद्ब्रह्मादिति तस्मात्संमार्ष्टि सकृत्सकृत्संमार्ष्टि त्रिस्त्रिर्वाऽग्रे देवेभ्यः संमृज्जन्ति नेत्तथा करवाम यथा देवेभ्य इति तस्मात्सकृत्सकृत्संमार्ष्ट्यज्ञामितायै ज्ञामि ह कुर्याद्यत्तिः पूर्वं त्रिरपरं तस्मात्सकृत्सकृत्संमार्ष्टि ॥ ५ ॥ स संमार्ष्टि । अग्ने वाजजिद्वाजं त्वा ससृवाꣳसं वाजजितꣳ संमार्ज्मीति सरिष्यन्तमिति वाऽअग्रऽआह सरिष्यन्निव

हि तर्हि भूत्वत्यथात्र ससृवाꣳसमिति ससृविव ह्यत्र भवति तस्मादाह ससृवाꣳसमिति ॥ ६ ॥ अथानुयाज्यान्यजति । या वाऽएतेन यज्ञेन देवता ह्रियति याभ्य एष यज्ञस्तायते सर्वा वै तत्ता इष्टा भवन्ति तथ्यत्तासु सर्वास्विष्टास्वेतत्पशवेवानुयजति तस्मादनुयाज्या नाम ॥ ७ ॥ अथ यदनुयाज्यान्यजति । छन्दाꣳसि वाऽअनुयाज्याः पशवो वै देवानां छन्दाꣳसि तथ्यदेतं पशवो युक्ता मनुष्येभ्यो वहन्त्येवं छन्दाꣳसि युक्तानि देवेभ्यो यज्ञं वहन्ति तथ्यत्र छन्दाꣳसि देवान्त्समतर्पयन्नथ छन्दाꣳसि देवाः समतर्पयंस्तदेतस्तत्प्रागभूत्यच्छन्दाꣳसि युक्तानि देवेभ्यो यज्ञमवान्नुर्यदेनान्त्समतीतृपन् ॥ ८ ॥ अथ यदनुयाज्यान्यजति । छन्दाꣳसि वाऽअनुयाज्याश्छन्दाꣳस्येवैतत्संतर्पयति तस्मादनुयाज्यान्यजति तस्माद्येन वाहनेन धावयेत्तद्विमुच्य ब्रूयात्पाययतैनत्सुहितं कुरुतेत्येष उ वाहनस्यापक्रवः ॥ ९ ॥ स वै खलु बर्हिः प्रथमं यजति । तद्वै कनिष्ठं छन्दः सद्गायत्री प्रथमा छन्दसां युज्यते तदु तद्वीर्यवत्तमं यद्यविष्ठो भूत्वा दिवः सोममाहरत्तदयथायथं मन्यन्ते यत्कनिष्ठं छन्दः सद्गायत्री प्रथमा छन्दसां युज्यतेऽथात्र यथायथं देवाश्छन्दाꣳस्यकल्पयन्ननुयाजेषु नेत्पापवस्यसमसदिति ॥ १० ॥ स वै खलु बर्हिः प्रथमं यजति । अयं वै लोको बर्हिरोषधयो बर्हिरस्मिन्नेवैतल्लोकऽओषधीर्दधाति ता इमा अस्मिंल्लोकऽओषधयः प्रतिष्ठितास्तदिदꣳ सर्वं जगदस्यां तेनेयं जगती तज्जगतीं प्रथमामकुर्वन् ॥ ११ ॥ अथ नराशाꣳसं द्वितीयं यजति । अन्तरिक्षं वै नराशाꣳसः प्रजा वै नरस्ता इमा अन्तरिक्षमनु वावद्यमानाः प्रजाश्चरन्ति यद्वै वदति शाꣳसतीति वै तदाहुस्तस्मादन्तरिक्षं नराशाꣳसोऽन्तरिक्षमनु वै त्रिष्टुप्तत्त्रिष्टुभं द्वितीयामकुर्वन् ॥ १२ ॥ अथाग्निरुत्तमः । गायत्री वाऽअग्निस्तद्गायत्रीमुत्तमामकुर्वन्नेवं यथायथेन कृतेन छन्दाꣳसि प्रत्यतिष्ठंस्तस्मादिदमपापवस्यसम् ॥ १३ ॥ देवान्यजेत्येवाधर्युराह । देवं-देवमिति सर्वेषु होता देवानां वै देवाः सन्ति छन्दाꣳस्येव पशवो ह्येषां गृहा हि पशवः प्रतिष्ठो हि गृहाश्छन्दाꣳसि वाऽअनु-

याज्ञास्तस्माद्विवान्यज्ञेत्येवाधर्युराह देवं देवमिति सर्वेषु होता ॥ १४ ॥ वसुवने वसुधेयस्येति । देवतायाऽएव वषट्क्रियते देवतायै ह्रियते न वाऽअत्र देवतास्त्यनुयाजेषु देवं बर्हिरिति तत्र नाग्निर्नेन्द्रो न सोमो देवो नराशꣳस इति नात एकं चन यो वाऽअत्राग्निर्गायत्री स निदानेन ॥ १५ ॥ अथ यद्वसुवने वसुधेयस्येति यजति । अग्निर्वै वसुवनिरिन्द्रो वसुधेयोऽस्ति वै छन्दसां देवतेन्द्राग्नीऽएवैवमु कैतद्देवतायाऽएव वषट्क्रियते देवतायै ह्रियते ॥ १६ ॥ अथोत्तममनुयाजमिष्ट्वा समानीय जुहोति । प्रयाजानुयाजा वाऽएते तन्यथैवादः प्रयाजेषु यजमानाय द्विषन्तं भ्रातृव्यं बलिꣳ हारयत्यत्तऽआद्यं बलिꣳ हारयत्येवमेवैतदनुयाजेषु बलिꣳ हारयति ॥ १७ ॥ ब्राह्मणम् ॥ ४ [८. २.] ॥ षष्ठः प्रपाठकः ॥ कण्डिकासंख्या १११ ॥ ॥

स वै स्रुचौ व्यूहति । अग्नीषोमयोरुज्झितमनूज्झेषं वाजस्य मा प्रसवेन प्रोहामीति जुहूं प्राचीं दक्षिणेन पाणिनाग्नीषोमौ तमपनुदतां योऽस्मान्द्वेष्टि यं च वयं द्विष्मो वाजस्यैनं प्रसवेनापोहामीत्युपभृतं प्रतीचीꣳ सव्येन पाणिना यदि स्वयं यजमानः ॥ १ ॥ यद्युऽअध्वर्युः । अग्नीषोमयोरुज्झितमनूज्झयत्वयं यजमानो वाजस्यैनं प्रसवेन प्रोहाम्यग्नीषोमौ तमपनुदतां यमयं यजमानो द्वेष्टि यश्चैनं द्वेष्टि वाजस्यैनं प्रसवेनापोहामीति पौर्णमास्यामग्नीषोमीयꣳ हि पौर्णमासꣳ हविर्भवति ॥ २ ॥ अथामावास्यायाम् । इन्द्राग्न्योरुज्झितमनूज्झेषं वाजस्य मा प्रसवेन प्रोहामीन्द्राग्नी तमपनुदतां योऽस्मान्द्वेष्टि यं च वयं द्विष्मो वाजस्यैनं प्रसवेनापोहामीति यदि स्वयं यजमानः ॥ ३ ॥ यद्युऽअध्वर्युः । इन्द्राग्न्योरुज्झितमनूज्झयत्वयं यजमानो वाजस्यैनं प्रसवेन प्रोहामीन्द्राग्नी तमपनुदतां यमयं यजमानो द्वेष्टि यश्चैनं द्वेष्टि वाजस्यैनं प्रसवेनापोहामीत्यमावास्यायामैन्द्राग्नꣳ ह्यामावास्यꣳ हविर्भवत्येवं यथादिवतं व्यूहति तन्यदेवं व्यूहति ॥ ४ ॥ यजमान एव जुहूमनु । योऽस्माऽअरातीयति स उपभृतमनु प्राञ्चमेवैतद्यजमानमुदूहत्यपाञ्चं तमपोहति योऽस्मा

ऽअरातीयत्यृत्तेव जुहूमन्वाह्य ऽपभृतमनु प्राञ्चमेवैतदृत्तारमुद्वृत्यपाञ्चमाह्यमपोहति ॥५॥ तद्वाऽएतत् । समानऽएव कर्मन्व्याक्रियते तस्माद्व समानादिव पुरुषादृत्ता चाह्यश्च ज्ञायेतेऽइदꣳ हि चतुर्थे पुरुषे तृतीये संगह्यामहऽइति विदेवं दीव्यमाना ज्ञात्या आसतऽएतस्माद्व तत् ॥६॥ अथ जुहूा परिधीन्त्समनक्ति । यया देवेभ्योऽहौषीद्यया यज्ञꣳ समतिष्ठिपत्तयैवैतत्परिधीन्प्रीणाति तस्माज्जुहूा परिधीन्त्समनक्ति ॥७॥ स समनक्ति । वसुभ्यस्त्वा रुद्रेभ्यस्त्वादित्येभ्यस्त्वेत्येते वै त्रया देवा यद्वसवो रुद्रा आदित्या एतेभ्यस्त्वेत्येवैतदाह ॥८॥ अथ परिधिमभिपद्याश्रावयति । परिधिभ्यो ह्येतदाश्रावयति यज्ञो वाऽआश्रावणं यज्ञेनैवैतत्प्रत्यृचं परिधीन्प्रीणाति तस्मात्परिधिमभिपद्याश्रावयति ॥९॥ स आश्राव्याह । इषिता दैव्या होतार इति दैव्या वाऽएते होतारो यत्परिधयोऽग्नयो होष्टा दैव्या होतार इत्येवैतदाह यदाहेषिता दैव्या होतार इति भद्रवाच्यायेति स्वयं वाऽएतस्मै देवा युक्ता भवन्ति यत्साधु वदेयुर्यत्साधु कुर्युस्तस्मादाह भद्रवाच्यायेति प्रेषितो मानुषः सूक्तवाकायेति तदिमं मानुषꣳ होतारꣳ सूक्तवाकाय प्रसौतीति ॥१०॥ अथ प्रस्तरमादत्ते । यज्ञमानो वै प्रस्तरस्तद्यत्रास्य यज्ञोऽगंस्तदेवैतद्यज्ञमानꣳ स्वगाकरोति देवलोकं वाऽअस्य यज्ञोऽगन्देवलोकमेवैतद्यज्ञमानमपिनयति ॥११॥ स यदि वृष्टिकामः स्यात् । एतेनैवाददीत संज्ञानाथां द्यावापृथिवीऽइति यदा वै द्यावापृथिवी संज्ञानाथेऽअथ वर्षति तस्मादाह संज्ञानाथां द्यावापृथिवीऽइति मित्रावरुणौ त्वा वृष्ट्यावतामिति तद्यो वर्षस्येष्टे स त्वा वृष्ट्यावत्वित्येवैतदाहायं वै वर्षस्येष्टे योऽयं पवते सोऽयमेक-इवैव पवते सोऽयं पुरुषेऽन्तः प्रविष्टः प्राङ्ङ प्रत्यङ्ङ तावमौ प्राणोदानौ प्राणोदानौ वै मित्रावरुणौ तद्य एव वर्षस्येष्टे स त्वा वृष्ट्यावत्वित्येवैतदाह तमेतेनैवाददीत यदा क्वेव कदा च वृष्टिः समिव तमनक्त्याकृतिमेवैतत्करोत्याकृतिर्भूत्वा देवलोकं गच्छादिति ॥१२॥ स वाऽअग्रं जुहूामनक्ति । मध्य-

मुपभृति मूलं ध्रुवायामग्रमिव हि स्रुक्मध्यमिवोपभृन्मूलमिव ध्रुवा ॥ १३ ॥ सो ऽनक्ति । व्यन्तु वयोऽक्तꣳ रिहाणा इति वय एवैनमेतद्भूतमस्मान्मनुष्यलोकाद्दिवलोकमभ्युत्पातयति तन्नीचैरिव करति द्वयं तद्यस्मान्नीचैरिव करेद्यज्ञमानो वै प्रस्तरोऽस्याऽएवैनमेतत्प्रतिष्ठायै नोद्वतीकोऽएव वृष्टिं नियच्छति ॥ १४ ॥ स करति । मरुतां पृषतीर्गच्छेति देवलोकं गच्छेत्येवैतदाह यदाह मरुतां पृषतीर्गच्छेति वशा पृश्निर्भूत्वा दिवं गच्छ ततो नो वृष्टिमावकेतीयं वै वशा पृश्निर्यदिदमस्यां मूलि चामूलं चान्नाद्यं प्रतिष्ठितं तेनेयं वशा पृश्निरियं भूत्वा दिवं गच्छेत्येवैतदाह ततो नो वृष्टिमावकेति वृष्टाद्धाऽऊर्यसः सुभूतं जायते तस्मादाह ततो नो वृष्टिमावकेति ॥ १५ ॥ अथैकं तृणमपगृह्णाति । यज्ञमानो वै प्रस्तरः स यत्कृत्स्नं प्रस्तरमनुप्रकरेत्क्षिप्रे ह यज्ञमानोऽमुं लोकमियात्ततो ह यज्ञमानो ज्योग्जीवति यावद्देवास्येह मानुषमायुस्तस्माऽएवैतदपगृह्णाति ॥ १६ ॥ तन्मुहूर्तं धारयित्वानुप्रकरति । तद्यत्रास्येतर आत्मागंस्तद्देवास्यैतद्गमयत्यथ यन्नानुप्रकरेदन्तरियाद्ध यज्ञमानं लोकात्ततो ह यज्ञमानं लोकान्नान्तरेति ॥ १७ ॥ तं प्राञ्चमनुसमस्यति । प्राची हि देवानां दिगथोऽउदञ्चमुदीची हि मनुष्याणां दिक्तमङ्गुलिभिरिव योयुप्येरन्न काष्ठैर्दारुभिर्वाऽइतरꣳ शवं व्यूषन्ति नेत्तथा करवाम यथेतरꣳ शवमिति तस्मादङ्गुलिभिरिव योयुप्येरन्न काष्ठैर्यदा होता सूक्तवाकमाह ॥ १८ ॥ अथाग्नीदाहानुप्रकरेति । तद्यत्रास्येतर आत्मागंस्तद्देवास्यैतद्गमयत्येत्येवैतदाह तूष्णीमेवानुप्रकृत्य चक्षुष्या अग्नेऽसि चक्षुर्मे पाहीत्यात्मानमुपस्पृशति तेनोऽअस्यात्मानं नानुप्रवृणक्ति ॥ ११ ॥ अथाह संवदस्वेति । संवादयैनं देवैरित्येवैतदाहागानग्नीदित्यगन्खल्वित्येवैतदाहागन्नितीतरः प्रत्याह श्रावयेति तं वै देवैः श्रावय तमनुबोधयेत्येवैतदाह श्रौषडिति विदुर्वाऽएनमनु वाऽएनमभुत्सतेत्येवैतदाहैवमधर्युश्चाग्नीच्च देवलोकं यज्ञमानमपिनयतः ॥ २० ॥ अथाह स्वगा देव्या होतृभ्य इति दैव्या वाऽएते हो-

तारो यत्परिधयोऽग्नयो हि तानेवैतत्स्वगाकरोति तस्मादाह स्वगा देव्या होतृभ्य इति स्वस्तिर्मानुषेभ्य इति तदस्मै मानुषाय होत्रेऽह्वलामाशास्ते ॥२१॥ अथ परिधीननुप्रहरति स मध्यममेवाग्ने परिधिमनुप्रहरति यं परिधिं पर्यधत्था अग्ने देव पणिभिर्गुह्यमानः तं तऽएतमनु ज्रोषं भराम्येष नेत्त्वदपचेतयाताऽइत्यग्नेः प्रियं पाथोऽपीतमितीतरावनुसमस्यति ॥२२॥ अथ स्रुक्चं चोपभृतं च संप्रगृह्णाति। अदो वैवाकृतिं करोति यदनक्त्याकृतिर्भूत्वा देवलोकं गछादिति तस्माज्जुहूं चोपभृतं च संप्रगृह्णाति ॥२३॥ स वै विश्वेभ्यो देवेभ्यः संप्रगृह्णाति। यद्वाऽअनादिष्टं देवतायै हविर्गृह्णते सर्वा वै तस्मिन्देवता अपिविन्यो मन्यन्ते न वाऽएतत्कस्यै चन देवतायै हविर्गृह्णन्नादिशति यदाज्यं तस्माद्विश्वेभ्यो देवेभ्यः संप्रगृह्णात्येतद्ध वैश्वदेवꣳ हविर्यज्ञे ॥२४॥ स संप्रगृह्णाति ॥ सꣳस्रवभागा स्थेषा बृहन्त इति सꣳस्रवो वैव खलु परिशिष्टो भवति प्रस्तरेष्टाः परिधेयाश्च देवा इति प्रस्तरश्च हि परिधयश्चानुप्रहृता भवन्तीमां वाचमभि विश्वे गृणान्त इत्येतद्ध वैश्वदेवं करोत्यास्मास्मिन्बर्हिषि मादयधꣳ स्वाहा वाडिति तद्यथा वषट्कृतꣳ हुतमेवमस्यैतद्भवति ॥२५॥ स यस्यानसो हविर्गृह्णन्ति। अनसस्तस्य धुरि विमुञ्चन्ति यतो युनज्ञाम ततो विमुञ्चामिति यतो वैव युञ्जन्ति ततो विमुञ्चन्ति यस्यो पात्र्यै स्थ्यै तस्य यतो युनज्ञाम ततो विमुञ्चामिति यतो वैवं युञ्जन्ति ततो विमुञ्चन्ति ॥२६॥ युञ्जौ ह वाऽएते यज्ञस्य यत्स्रुचौ। तेऽएतद्युङ्क्ते यत्प्रचरति स यं निधायावद्येद्यथा वाकृनमवार्छेदेवं तत्तेऽएतत्स्विष्टकृति विमोचनमागछतस्ते तत्सादयति तद्विमुञ्चति तेऽएतत्पुनः प्रयुङ्क्तेऽनुयाज्येषु सोऽनुयाज्येश्वरिवैतद्विमोचनमागछति ते तत्सादयति तद्विमुञ्चति तेऽएतत्पुनः प्रयुङ्क्ते यत्संप्रगृह्णाति तद्यां गतिमभियुङ्क्ते तां गतिं गत्वा विमुञ्चते यज्ञं वाऽअनु प्रजास्तस्मादय पुरुषो युङ्क्तेऽथ विमुञ्चतेऽथ युङ्क्ते तद्यां गतिमभियुङ्क्ते तां गतिं गत्वात्ततो विमुञ्चते स सादयति घृताची स्थो धुर्यौ पातꣳ

सुम्ने स्थः सुम्ने मा धत्तमिति साध्यौ स्थः साधौ मा धत्तमित्येवैतदाह ॥२७॥ ब्राह्मणम् ॥१[८.३.]॥ ॥ अध्यायः ॥८॥ ॥

स यत्राह । इषिता दैव्या होतारो भद्रवाच्याय प्रेषितो मानुषः सूक्तवाकायेति यदतो होतान्वाह सूक्तऽइव तदाह यज्ञमानायैवैतदाशिषमाशास्ते तद्वाऽएतदुपरिष्टाद्यज्ञस्याशिषमाशास्ते द्वयं तद्यस्मादुपरिष्टाद्यज्ञस्याशिषमाशास्ते ॥१॥ यज्ञं वाऽएष ज्ञनयति । यो यजतऽएतेन क्युक्ता ऋत्विज्ञस्तन्वते तं ज्ञनयत्यथाशिषमाशास्ते तामस्मै यज्ञ आशिषꣳ संनमयति यामाशिषमाशास्ते यो माज्ञीज्ञनतेति तस्माद्वाऽउपरिष्टाद्यज्ञस्याशिषमाशास्ते ॥२॥ देवान्वाऽएष प्रीणाति । यो यजतऽएतेन यज्ञेनऽग्निरिव क्यज्ञुर्भिरिव क्यदाकृतिभिरिव क्यत्स देवान्प्रीत्वा तेषपित्वी भवति तेषपित्वी भूत्वाथाशिषमाशास्ते तामस्मै देवा आशिषꣳ संनमयन्ति यामाशिषमाशास्ते यो नोऽप्रैषीदिति तस्माद्वाऽउपरिष्टाद्यज्ञस्याशिषमाशास्ते ॥३॥ अथ प्रतिपद्यते । इदं द्यावापृथिवी भद्रमभूदिति भद्रꣳ क्यभूद्यो यज्ञस्य सꣳस्थामगन्नार्ध्म सूक्तवाकमुत नमोवाकमित्युभयं वाऽएतद्यज्ञ एव यत्सूक्तवाकश्च नमोवाकश्चाराात्स्म यज्ञमविदाम यज्ञमित्येवैतदाहाग्ने वꣳ सूक्तवागस्युपश्रुती दिवस्पृथिव्योरित्यग्निमेवैतदाह वꣳ सूक्तवागस्युपश्रृण्वत्योरनयोर्द्यावापृथिव्योरित्योमन्वती तेऽस्मिन्यज्ञे यजमान द्यावापृथिवी स्तामित्यन्नवत्यौ तेऽस्मिन्यज्ञे यजमान द्यावापृथिवी स्तामित्येवैतदाह ॥४॥ शंगवी ज्ञीवदानूऽइति । शंगवी ते ज्ञीवदानू स्तामित्येवैतदाहान्नस्नूऽअप्रवेदेऽइति माह कस्माच्चन प्रत्रासीर्मा तऽइदं पुष्टं कश्चन प्रविदतेत्येवैतदाह ॥५॥ उरुगव्यूतीऽअभयंकृताविति । उरुगव्यूती तेऽभये स्तामित्येवैतदाह वृष्टिद्यावा रीत्यापेति वृष्टिमत्यौ ते स्तामित्येवैतदाह ॥६॥ शम्भुवौ मयोभुवाविति । शम्भुवौ ते मयोभुवौ स्तामित्येवैतदाहोर्ज्जस्वती च पयस्वती चेति रसवत्यौ तऽउपज्ञीवनीये स्तामित्येवैतदाह ॥७॥ सूपचरणा च स्वधिचरणा

चेति । सूपचरणाद्ध तेऽसावस्तु यामधस्तादुपचरसि स्वधिचरणो तऽइयमस्तु यामुपरिष्टादधिचरसीत्येवैतदाह तयोराविदीति तयोरनुमन्यमानयोरित्येवैतदाह ॥८॥ अग्निरिद्ध हविः । अजुषतावीवृधत मह्नो ज्यायोऽकृतेति तदाग्नेयमाज्यभागमाह सोम इद्ध हविरजुषतावीवृधत मह्नो ज्यायोऽकृतेति तत्सौम्यमाज्यभागमाहाग्निरिद्ध हविरजुषतावीवृधत मह्नो ज्यायोऽकृतेति तस्य एष उभयत्राच्युत आग्नेयः पुरोडाशो भवति तमाह ॥९॥ अथ यथादेवतम् । देवा आज्यपा आज्यमजुषन्तावीवृधन्त मह्नो ज्यायोऽक्रतेति तत्प्रयाजानुयाजानाह प्रयाजानुयाजा वै देवा आज्यपा अग्निर्होत्रेणेद्ध हविरजुषतावीवृधत मह्नो ज्यायोऽकृतेति तदग्निꣳ होत्रेणाहाजुषतेत्येवं या इष्टा देवता भवन्ति ताः संपश्यत्यसौ हविरजुषतासौ हविरजुषतेति तस्यज्ञस्यैवैतत्समृद्धिमाशास्ते यद्धि देवा हविर्जुषन्ते तेन हि महज्जायति तस्मादाहाजुषतेत्यवीवृधतेति यद्वै देवा हविर्जोषयन्ते तदपि गिरिमात्रं कुर्वते तस्मादाहावीवृधतेति ॥१०॥ मह्नो ज्यायोऽक्रतेति । यज्ञो वै देवानां महस्तꣳ होतारज्यायाꣳसमिव कुर्वते तस्मादाह मह्नो ज्यायोऽक्रतेति ॥११॥ अस्यामृधद्धोत्रायां देवंगमायामिति । अस्याꣳ राध्नोतु होत्रायां देवंगमायामित्येवैतदाहाशास्तेऽयं यजमानोऽसाविति नाम गृह्णाति तदेनं प्रत्यक्षमाशिषा संपादयति ॥१२॥ दीर्घायुत्वमाशास्तऽइति । सा यामुत्रोत्तरा देवयज्या तदिह प्रत्यक्षं दीर्घायुत्वꣳ ॥१३॥ सुप्रजास्त्वमाशास्तऽइति । तद्यदमुत्र भूयो हविष्करणं तदिह प्रत्यक्षꣳ सुप्रजास्त्वं प्रशासनꣳ स कुर्याद्य एवं कुर्यादुत्तरां देवयज्यामाशास्तऽइति वेव ब्रूयात्तदेव जीवातुं तत्प्रजां तत्पशून् ॥१४॥ भूयो हविष्करणमाशास्तऽइति तद्वेव तत्सजातवनस्यामाशास्तऽइति प्राणा वै सजाताः प्राणैर्हि सह जायते तत्प्राणानाशास्ते ॥१५॥ दिव्यं धामाशास्तऽइति । देवलोके मेऽप्यसदिति वै यजते यो यजते तद्देवलोकऽएवैनमेतदपिन्वनं करोति यदेनेन हविषाशास्ते तदश्यात्तद्धयादिति यद-

नेन ह्विषाशास्ते तदस्मै सर्वꣳ समृध्यतामित्येवैतदाह ॥१६॥ ता वाऽएताः । पञ्चाशिषः करोति तिस्र इडायां ता अष्टावष्टाक्षरा वै गायत्री वीर्यं गायत्री वीर्यमेवैतदाशिषोऽभिसंपादयति ॥१७॥ नातो भूयसीः कुर्यात् । अतिरिक्तꣳ ह कुर्याद्यदतो भूयसीः कुर्याद्यद्वै यज्ञस्यातिरिक्तं द्विषन्तꣳ ह्यास्य तद्भ्रातृव्यमभ्यतिरिच्यते तस्मान्नातो भूयसीः कुर्यात् ॥१८॥ अपीद्वै कनीयसीः सन्न । तदस्मै देवा रासन्तामिति तदस्मै देवा अनुमन्यन्तामित्येवैतदाह तदग्निर्देवो देवेभ्यो वनुतां वयमग्नेः परि मानुषा इति तदग्निर्देवो देवेभ्यो वनुतां वयमग्नेरध्यस्माऽएतद्वनवामहाऽइत्येवैतदाह ॥१९॥ इष्टं च वित्तं चेति । ऐषिषुरिव वाऽएतद्यज्ञं तमविदंस्तस्मादाहेष्टं च वित्तं चेत्युभे चैनं द्यावापृथिवीऽअꣳहसस्पातामित्युभे चैनं द्यावापृथिवीऽआत्तिर्गोपायतामित्येवैतदाह ॥२०॥ तदु हैकऽआहुः । उभे च मेति तथा होताशिष आत्मानं नान्तरेतीति तदु तथा न ब्रूयाद्यज्ञमानस्य वै यज्ञऽआशीः किं नु तत्रऽर्त्विजां यां वै कां च यज्ञऽऋत्विज आशिषमाशासते यजमानस्यैव सा न ह स एतां क्व चनाशिषं प्रतिष्ठापयति य आहोभे च मेति तस्मादु ब्रूयादुभे चैनमित्येव ॥२१॥ इह गतिर्वामस्येति । तद्यदेव यज्ञस्य साधु तदेवास्मिन्नेतद्दधाति तस्मादाहेह गतिर्वामस्येति ॥२२॥ इदं च नमो देवेभ्य इति तद्यज्ञस्यैवैतत्सꣳस्थां गत्वा नमो देवेभ्यः करोति तस्मादाहेदं च नमो देवेभ्य इति ॥२३॥ अथ शम्योराह । शम्युर्ह वै बार्हस्पत्योऽज्ञसा यज्ञस्य सꣳस्थां विदां चकार स देवलोकमपीयाय तत्तदत्तर्हितमिव मनुष्येभ्य आस ॥२४॥ तद्ाऽऋषीणामनुश्रुतमास । शम्युर्ह वै बार्हस्पत्योऽज्ञसा यज्ञस्य सꣳस्थां विदां चकार स देवलोकमपीयायेति ते तामेव यज्ञस्य सꣳस्थामुपायन्याꣳ शम्युर्बार्हस्पत्योऽवेयहम्योरब्रुवंस्ताम्वेवैष एतद्यज्ञस्य सꣳस्थामुपैति याꣳ शम्युर्बार्हस्पत्योऽवेयहम्योराह तस्माद्वै शम्योराह ॥२५॥ स प्रतिपद्यते । तहम्योरावृणीमहऽइति तां यज्ञस्य सꣳस्थामावृ-

णीमह्रे याꣳ शम्युर्बार्हस्पत्योऽवेदित्येवैतदाह ॥ २६॥ गातुं यज्ञाय गातुं यज्ञपतय ऽइति । गातुꣳ ह्येष यज्ञायेहति गातुं यज्ञपतये यो यज्ञस्य सꣳस्थां देवी स्वस्तिरस्तु नः स्वस्तिर्मानुषेभ्य इति स्वस्ति नो देवत्रास्तु स्वस्ति मनुष्यत्रेत्येवैतदाहोर्ध्वं जिगातु भेषजमित्यूर्ध्वं नोऽयं यज्ञो देवलोकं जयत्वित्येवैतदाह ॥ २७॥ शं नोऽअस्तु द्विपदे शं चतुष्पदऽइति । एतावद्वाऽइदꣳ सर्वं यावद्द्विपाश्चैव चतुष्पाश्च तस्माऽएवैतद्यज्ञस्य सꣳस्थां गत्वा शं करोति तस्मादाह शं नोऽअस्तु द्विपदे शं चतुष्पदऽइति ॥ २८॥ अथानयेत्युपस्पृशति । अमानुष-इव वाऽएतद्भवति यदार्त्विज्ये प्रवृत इयं वै पृथिवी प्रतिष्ठा तदस्यामेवैतत्प्रतिष्ठायां प्रतितिष्ठति तदु खलु पुनर्मानुषो भवति तस्मादनयेत्युपस्पृशति ॥ २९॥ ब्राह्मणम् ॥ २ [१. १.] ॥ ॥

ते वै पत्नीः संयाजयिष्यन्तः प्रतिपरायन्ति । स्रुक्कं च स्रुवं चाधर्युरादत्ते वेदꣳ होताज्यविलापनीमग्नीत् ॥ १॥ तद्वैकेषामध्वर्युः । पूर्वेणाहवनीयं पर्येति तदु तथा न कुर्याद्बहिर्धा ह यज्ञात्स्याद्यत्तेनेयात् ॥ २॥ ऋघनेनो ह्येव पत्नीम् । एकेषामध्वर्युरेति नोऽएव तथा कुर्यात्पूर्वार्धो वै यज्ञस्याध्वर्युर्ऋघनार्धः पत्नी यथा भसत्तः शिरः प्रतिदध्यादेवं तद्बहिर्धा ह्येव यज्ञात्स्याद्यत्तेनेयात् ॥ ३॥ अन्तरेणो ह्येव पत्नीम् । एकेषामध्वर्युरेति नोऽएव तथा कुर्यादन्तरियाद्ध यज्ञात्पत्नीं यत्तेनेयात्तस्मादु पूर्वेणैव गार्हपत्यमन्तरेणाहवनीयं चैति तथा ह न बहिर्धा यज्ञाद्भवति यथोऽएवादः प्रचरन्नन्तरेण संचरति स उऽएवास्यैष संचरो भवति ॥ ४॥ अथ पत्नीः संयाजयन्ति । यज्ञाद्वै प्रजाः प्रजायन्ते यज्ञात्प्रजायमाना मिथुनात्प्रजायन्ते मिथुनात्प्रजायमाना अन्ततो यज्ञस्य प्रजायन्ते तदेना एतदन्ततो यज्ञस्य मिथुनात्प्रजननात्प्रजनयति तस्मान्मिथुनात्प्रजननादन्ततो यज्ञस्येमाः प्रजाः प्रजायन्ते तस्मात्पत्नीः संयाजयन्ति ॥ ५॥ चतस्रो देवता यजति । चतस्रो वै मिथुनं द्वन्द्वं वै मिथुनं द्वे-द्वे हि खलु भवतो मिथुनमेवैतत्प्रजननं क्रियते तस्माच्चतस्रो देवता यजति ॥ ६॥

ता वाऽआज्यहविषो भवन्ति । रेतो वाऽआज्यꣳ रेत एवैतत्सिञ्चति तस्मादाज्य-हविषो भवन्ति ॥७॥ तेनोपाꣳशु चरन्ति । तिर इव वै मिथुनेन चर्यते तिर इवैतद्यदुपाꣳशु तस्मादुपाꣳशु चरन्ति ॥८॥ अथ सोमं यजति । रेतो वै सोमो रेत एवैतत्सिञ्चति तस्मात्सोमं यजति ॥९॥ अथ त्वष्टारं यजति । त्वष्टा वै सिक्तꣳ रेतो विकरोति तस्मात्त्वष्टारं यजति ॥१०॥ अथ देवानां पत्नीर्यजति । पत्नीषु वै योनौ रेतः प्रतिष्ठितं तत्ततः प्रजायते तत्पत्नीष्वैवैतद्योनौ रेतः सिक्तं प्रतिष्ठापयति तत्ततः प्रजायते तस्माद्देवानां पत्नीर्यजति ॥११॥ स यत्र देवानां पत्नीर्यजति । तत्पुरस्तात्तिरः करोत्युप ह वै तावद्देवता आसते यावन्न समिष्टयजुर्जुहोतीदं नु नो जुहवदिति ताभ्य एवैतत्तिरः करोति तस्मादिमा मानुष्य स्त्रियस्तिर इवैव पुꣳसो जिघत्सन्ति या इव तु ता इवेति ह स्माह याज्ञवल्क्यः ॥१२॥ अथाग्निं गृहपतिं यजति । अयं वाऽअग्निर्लोक इममेवैतल्लोकमिमाः प्रजा अभिप्रजनयति ता इमं लोकमिमाः प्रजा अभिप्रजायन्ते तस्मादग्निं गृहपतिं यजति ॥१३॥ तदिडान्तं भवति । न ह्यत्र परिधयो भवन्ति न प्रस्तरो यत्र वाऽअदः प्रस्तरेण यजमानꣳ स्वगाकरोति पतिं वाऽअनु जाया तदेवास्यापि पत्नी स्वगाकृता भवतीयसि तꣳ ह कुर्याद्यत्प्रस्तरस्य रूपं कुर्यात्तस्मादिडान्तमेव स्यादुतो प्रस्तरस्यैव रूपं क्रियते ॥१४॥ स यदि प्रस्तरस्य रूपं कुर्यात् । यथैवादः प्रस्तरेण यजमानꣳ स्वगाकरोत्येवमेवैतत्पत्नीꣳ स्वगाकरोति ॥१५॥ स यदि प्रस्तरस्य रूपं कुर्यात् । वेदस्यैकं तृणमाङ्ख्याग्रं जुहूमनक्ति मध्यꣳ स्रुवे बुध्नꣳ स्थाल्याम् ॥१६॥ अथाग्नीदाहानुप्रहरेति । तूष्णीमेवानुप्रहृत्य चक्षुष्पा अग्नेऽसि चक्षुर्मे पाहीत्यात्मानमुपस्पृशति तेनोऽअस्यात्मानं नानुप्रवृणक्ति ॥१७॥ अथाह संवदस्वेति । अगानग्नीदगंस्त्रावय औषट् स्वगा देव्या होतृभ्यः स्वस्तिर्मानुषेभ्यः शम्योर्ब्रूहीति ॥१८॥ अथ जुहूं च स्रुवं च संप्रगृह्णाति । अदो वै वाङ्कृतिं करोति यदनक्त्याङ्कृतिर्भूत्वा देवलोकं गच्छा-

दिति तस्माज्जुहूं च स्रुवं च संप्रगृह्णाति ॥ १९ ॥ स वाऽअग्नये संप्रगृह्णाति । अग्नेऽदब्धायोऽशीतमेत्यमृतो ह्यग्निस्तस्मादाहादब्धायवित्यशीतमित्यशिष्टो ह्यग्निस्तस्मादाहाशीतमेति पाहि मा दिद्योः पाहि प्रसित्यै पाहि दुरिष्ट्यै पाहि दुरद्मन्याऽइति सर्वाभ्यो मार्त्तिभ्यो गोपायेत्येवैतदाहाविषं नः पितुं कृणिवत्यन्नं वै पितुरनमीवं न इदमकिल्विषमन्नं कुर्वित्येवैतदाह सुषदा योनावित्यात्मन्येतदाह स्वाहा वाडिति तद्यथा वषट्कृतꣳ हुतमेवमस्यैतद्भवति ॥ २० ॥ अथ वेदं पत्नी विस्रꣳसयति । योषा वै वेदिर्वृषा वेदो मिथुनाय वै वेदः क्रियतेऽथ यदेनेन यज्ञऽउपाल्लभते मिथुनमेवैतत्प्रजननं क्रियते ॥ २१ ॥ अथ यत्पत्नी विस्रꣳसयति । योषा वै पत्नी वृषा वेदो मिथुनमेवैतत्प्रजननं क्रियते तस्माद्विदं पत्नी विस्रꣳसयति ॥ २२ ॥ सा विस्रꣳसयति । वेदोऽसि येन त्वं देव वेद देवेभ्यो वेदोऽभवस्तेन मह्यं वेदो भूया इति यदि यजुषा चिकीर्षेदेतेनैव कुर्यात् ॥ २३ ॥ तमा वेदः सꣳस्तृणाति । योषा वै वेदिर्वृषा वेदः पश्चाद्धि परीत्य वृषा योषामधिद्रवति पश्चादेवैनामेतत्परीत्य वृत्ता वेदेनाधिद्रावयति तस्मादा वेदेः सꣳस्तृणाति ॥ २४ ॥ अथ समिष्टयजुर्जुहोति । प्राग्नये यज्ञोऽनुसंतिष्ठताऽइत्यथ यद्धुत्वा समिष्टयजुः पत्नीः संयाजयेत्प्रत्यङ्ङु हैवास्येष यज्ञः संतिष्ठेत तस्माद्धाऽएतर्हि समिष्टयजुर्जुहोति प्राग्नये यज्ञोऽनुसंतिष्ठताऽइति ॥ २५ ॥ अथ यस्मात्समिष्टयजुर्नाम । या वाऽएतेन यज्ञेन देवता ह्वयति याभ्य एष यज्ञस्तायते सर्वा वै तत्ताः समिष्टा भवन्ति तद्यत्तासु सर्वासु समिष्टास्वेतज्जुहोति तस्मात्समिष्टयजुर्नाम ॥ २६ ॥ अथ यस्मात्समिष्टयजुर्जुहोति । या वाऽएतेन यज्ञेन देवता ह्वयति याभ्य एष यज्ञस्तायतऽउप ह वै ता आसते यावन्न समिष्टयजुर्जुहुतीदं नु नो जुह्वविति ता एवैतद्यथायथं व्यवसृजति यत्र-यत्रासां चरणं तदनु यज्ञं वाऽएतदज्ञीजनत यदेनमतत तं जनयित्वा यत्रास्य प्रतिष्ठा तत्प्रतिष्ठापयति तस्मात्समिष्टयजुर्जुहोति ॥ २७ ॥ स जुहोति । देवा

गातुविद इति गातुविदो हि देवा गातुं विन्वेति यज्ञं विन्वेत्येवैतदाह गातुमिति-
ति तदेतेन यथायथं व्यवसृजति मनसस्पतऽइमं देव यज्ञꣳ स्वाहा वाते धाऽइत्य-
यं वै यज्ञो योऽयं पवते तदिमं यज्ञꣳ सम्भृत्यैतस्मिन्यज्ञे प्रतिष्ठापयति यज्ञेन यज्ञꣳ
संदधाति तस्मादाह स्वाहा वाते धा इति ॥२८॥ अथ बर्हिर्जुहोति । अयं वै
लोको बर्हिरोषधयो बर्हिरस्मिन्नेवैतल्लोकऽओषधीर्दधाति ता इमा अस्मिंल्लोक
ऽओषधयः प्रतिष्ठितास्तस्माद्बर्हिर्जुहोति ॥२९॥ तां वाऽअतिरिक्तां जुहोति । स-
मिष्टयजुर्वै वान्तो यज्ञस्य यद्यूर्ध्वꣳ समिष्टयजुषोऽतिरिक्तं तद्यदा हि समिष्टयजुर्जु-
होत्यथैताभ्यो जुहोति तस्मादिमा अतिरिक्ता असंमिता ओषधयः प्रजायन्ते ॥३०॥
स जुहोति । सं बर्हिरङ्क्ताꣳ हविषा घृतेन समादित्यैर्वसुभिः सं मरुद्भिः समिन्द्रो
विश्वदेवेभिरङ्क्तां दिव्यं नभो गच्छतु यत्स्वाहेति ॥३१॥ अथ प्रणीता दक्षिणतः प-
रीत्य निनयति । युङ्क्ते वाऽएतद्यज्ञं यदेनं तनुते स यन्न निनयेत्पराङु हाविमुक्त
एव यज्ञो यजमानं प्रक्षिणीयात्तथो ह यज्ञो यजमानं न प्रक्षिणाति तस्मात्प्रणी-
ता दक्षिणतः परीत्य निनयति ॥३२॥ स निनयति । कस्त्वा विमुञ्चति स त्वा
विमुञ्चति कस्मै त्वा विमुञ्चति तस्मै त्वा विमुञ्चति पोषायेति तत्पुष्टिमुत्तमां यज-
मानाय निराह स येनैव प्रणयति तेन निनयति येन क्षेव योग्यं युञ्जन्ति तेन
विमुञ्चन्ति योक्त्रेण हि योग्यं युञ्जन्ति योक्त्रेण विमुञ्चत्यथ फलीकरणान्कपालेना-
धोऽधः कृष्णाजिनमुपास्यति रक्षसां भागोऽसीति ॥३३॥ देवाश्च वाऽअसुराश्च ।
उभये प्राजापत्याः पस्पृधिरऽएतस्मिन्यज्ञे प्रजापतौ पितरि संवत्सरेऽस्माकमयं भ-
विष्यत्यस्माकमयं भविष्यतीति ॥३४॥ ततो देवाः । सर्वं यज्ञꣳ संवृज्याथ यत्पा-
पिष्ठं यज्ञस्य भागधेयमासीत्तेनैनान्निरभजन्नस्रा पशोः फलीकरणैर्हविर्यज्ञात्सुनिर्भ-
क्ता असन्नित्येष वै सुनिर्भक्तो यं भागिनं निर्भजन्त्यथ यमभागं निर्भजन्त्येव स ता-
वद्यꣳसतऽउत हि वशे लब्धाह किं मा बभक्थेति स यमेवेभ्यो देवा भागमक-

ल्पयंस्तमेवैभ्य एष एतद्भागं करोत्यथ यद्धोऽधः कृष्णाजिनमुपास्यत्यनग्नावेवैभ्य एतद्गन्धे तमसि प्रवेशयति तथोऽएवासृक्पशो रक्षसां भागोऽसीत्यनग्नावग्धे तमसि प्रवेशयति तस्मात्पशोस्तेदनीं न कुर्वन्ति रक्षसाꣳ हि स भागः ॥३५॥ ब्राह्मणम् ॥३ [१.२.]॥ ॥

सꣳस्थिते यज्ञे । दक्षिणातः परीत्य पूर्णपात्रं निनयति तथा क्षुद्रम्भवति तस्माद्दक्षिणातः परीत्य पूर्णपात्रं निनयति देवलोके मेऽप्यसदिति वै यजते यो यजते सोऽस्येष यज्ञो देवलोकमेवाभिप्रैति तदनूची दक्षिणा यां ददाति सैति दक्षिणामन्वारभ्य यजमानः ॥१॥ स एष देवयानो वा पितृयाणो वा पन्थाः । तदुभयतोऽग्निशिखे समोषत्यौ तिष्ठतः प्रति तमोषतो यः प्रत्युष्योऽत्यु तꣳ सृजते योऽतिसृज्यः शान्तिरापस्तदेतमेवैतत्यन्थानꣳ शमयति ॥२॥ पूर्णं निनयति । सर्वं वै पूर्णꣳ सर्वेणैवैनमेतद्यमयति संततमव्यवच्छिन्नं निनयति संततेनैवैनमेतद्व्यवच्छिन्नेन शमयति ॥३॥ यद्वेव पूर्णपात्रं निनयति । यद्वै यज्ञस्य मिथ्या क्रियते व्यस्य तद्वृक्ति क्षणवन्ति शान्तिरापस्तद्भिः शान्त्या शमयति तद्भिः संदधाति ॥४॥ पूर्णं निनयति । सर्वं वै पूर्णꣳ सर्वेणैवैतत्संदधाति संततमव्यवच्छिन्नं निनयति संततेनैवैतद्व्यवच्छिन्नेन संदधाति ॥५॥ तदञ्जलिना प्रतिगृह्णाति । सं वर्चसा पयसा सं तनूभिरगन्महि मनसा सꣳ शिवेन त्वष्टा सुदत्रो विदधातु रायोऽनुमार्ष्टु तन्नो यद्विलिष्टमिति यद्विवृꣳ तत्संदधाति ॥६॥ अथ मुखमुपस्पृशते । द्वयं तन्मुखस्मान्मुखमुपस्पृशतेऽमृतं वाऽआपोऽमृतेनैवैतत्सꣳस्पृशतऽएतद्ध चैवैतत्कर्मात्मन्कुरुते तस्मान्मुखमुपस्पृशते ॥७॥ अथ विष्णुक्रमान्क्रमते । देवान्वाऽएष प्रीणाति यो यजतऽएतेन यज्ञेनऽग्निरिव त्वग्नुभिरिव त्वदाकृतिभिरिव त्वत्स देवान्प्रीत्वा तेषपित्वी भवति तेषपित्वी भूत्वा तानेवाभिप्रक्रामति ॥८॥ यद्वेव विष्णुक्रमान्क्रमते । यज्ञो वै विष्णुः स देवेभ्य इमां विक्रान्तिं विचक्रमे यैषामियं विक्रान्तिरिदमेव प्र-

थमेन पदेन पस्यारायेदमन्तरिक्षं द्वितीयेन दिवमुत्तमेनैनान्त्वेवैष एतस्मै विष्णुर्यज्ञो विक्रान्तिं विक्रमते तस्माद्विष्णुक्रमान्क्रमते तद्वाऽइत एव पराचीनं भूयिष्ठा-इव क्रमन्ते ॥९॥ तदु तत्पृथिव्यां विष्णुर्व्यक्रमतोरु । गायत्रेण छन्दसा ततो निर्भक्तो योऽस्मान्द्वेष्टि यं च वयं द्विष्मोऽन्तरिक्षे विष्णुर्व्यक्रमतोरु त्रैष्टुभेन छन्दसा ततो निर्भक्तो योऽस्मान्द्वेष्टि यं च वयं द्विष्मो दिवि विष्णुर्व्यक्रमतोरु जागतेन छन्दसा ततो निर्भक्तो योऽस्मान्द्वेष्टि यं च वयं द्विष्म इत्येवमिमांल्लोकान्त्समारुक्ष्यायैषा गतिरेषा प्रतिष्ठा य एष तपति तस्य ये रश्मयस्ते सुकृतोऽथ यत्परं भाः प्रजापतिर्वा स स्वर्गो वा लोकस्तदेवमिमांल्लोकान्त्समारुक्ष्यायैतां गतिमेतां प्रतिष्ठां गच्छति परस्ताच्चैवावाङ् क्रमेत य इतोऽनुशासनं चिकीर्षेद्धुयं तद्यस्मात्परस्तादवाङ् क्रमते ॥१०॥ अपसरणतो ह वाऽअग्ने देवा जयन्तोऽजयन् । दिवमेवाग्रेऽयेदमन्तरिक्षमथेतोऽनपसरणात्सपत्नाननुदन्त तथोऽएवैष एतदपसरणत एवाग्ने जयन्जयति दिवमेवाग्रेऽयेदमन्तरिक्षमथेतोऽनपसरणात्सपत्नानुदतोऽयं वै पृथिवी प्रतिष्ठा तदस्यामेवैतत्प्रतिष्ठायां प्रतितिष्ठति ॥११॥ तदु तद्दिवि विष्णुर्व्यक्रमतोरु । जागतेन छन्दसा ततो निर्भक्तो योऽस्मान्द्वेष्टि यं च वयं द्विष्मोऽन्तरिक्षे विष्णुर्व्यक्रमतोरु त्रैष्टुभेन छन्दसा ततो निर्भक्तो योऽस्मान्द्वेष्टि यं च वयं द्विष्मः पृथिव्यां विष्णुर्व्यक्रमतोरु गायत्रेण छन्दसा ततो निर्भक्तो योऽस्मान्द्वेष्टि यं च वयं द्विष्मोऽस्मादन्नादस्यै प्रतिष्ठायाऽइत्यस्याꣳ ह्येदꣳ सर्वमन्नाद्यं प्रतिष्ठितं तस्मादाहास्मादन्नादस्यै प्रतिष्ठायाऽइति ॥१२॥ अथ प्राङ् प्रेक्षते । प्राची हि देवानां दिक्तस्मात्प्राङ् प्रेक्षते ॥१३॥ न प्रेक्षते । अगन्म स्वरिति देवा वै स्वरगन्म देवानित्येवैतदाह सं ज्योतिषाभूमिति सं देवैरभूमित्येवैतदाह ॥१४॥ अथ सूर्यमुदीक्षते । सैषा गतिरेषाप्रतिष्ठा तदेतां गतिमेतां प्रतिष्ठां गच्छति तस्मात्सूर्यमुदीक्षते ॥१५॥ स उदीक्षते । स्वयम्भूरसि श्रेष्ठो रश्मिरित्येष वै श्रेष्ठो रश्मिर्यत्सूर्यस्तस्मादाह स्वयम्भूरसि श्रेष्ठो र-

श्मिरिति वर्चोदा असि वर्चो मे देहीति वेवाकं ब्रवीमीति ह स्माह याज्ञवल्क्यस्तद्धैव ब्राह्मणेनिष्टव्यं यद्ब्रह्मवर्चसी स्यादित्युतो ह स्माहौपोदितेय एष वाव मक्षं गा दास्यति गोदा गा मे देहीत्येवं यं कामं कामयते सोऽस्मै कामः समृध्यते ॥ १६ ॥ अथावर्तते । सूर्यस्यावृतमन्वावर्तऽइति तदेतां गतिमेतां प्रतिष्ठां गत्वैतस्यैवावृतमन्वावर्तते ॥ १७ ॥ अथ गार्हपत्यमुपतिष्ठते । द्वयं तत्यस्माद्गार्हपत्यमुपतिष्ठते गृहा वै गार्हपत्यो गृहा वै प्रतिष्ठा तद्गृहेष्वेवैतत्प्रतिष्ठायां प्रतितिष्ठति यावद्धवास्येह मानुषमायुस्तस्माऽएवैतदुपतिष्ठते तस्माद्गार्हपत्यमुपतिष्ठते ॥ १८ ॥ स उपतिष्ठते । अग्ने गृहपते सुगृहपतिस्त्वयाग्नेऽहं गृहपतिना भूयासꣳ सुगृहपतिस्त्वं मयाग्ने गृहपतिना भूया इति नात्र तिरोहितमिवास्त्यस्थूरि णौ गार्हपत्यानि सन्त्वित्यनार्त्तानि नौ गार्हपत्यानि सन्त्वित्येवैतदाह शतꣳ हिमा इति शतं वर्षाणि जीव्यासमित्येवैतदाह तद्येतद्ध्रुवन्नाद्रियेतापि हि भूयाꣳसि शताद्वर्षेभ्यः पुरुषो जीवति तस्माद्येतद्ध्रुवन्नाद्रियेत ॥ १९ ॥ अथावर्तते । सूर्यस्यावृतमन्वावर्तऽइति तदेतां गतिमेतां प्रतिष्ठां गत्वैतस्यैवावृतमन्वावर्तते ॥ २० ॥ अथ पुत्रस्य नाम गृह्णाति । इदं मेऽयं वीर्यं पुत्रोऽनुसंतनवदिति यदि पुत्रो न स्याद्यात्मन एव नाम गृह्णीयात् ॥ २१ ॥ अथाहवनीयमुपतिष्ठते । प्राञ्चं यज्ञोऽनुसंतिष्ठताऽइति तूष्णीमुपतिष्ठते ॥ २२ ॥ अथ व्रतं विसृजते । इदमहं य एवास्मि सोऽस्मीत्यमानुष-इव वाऽएतद्भवति यद्व्रतमुपैति न हि तदवकल्पते यद्ब्रूयाद्दिदमहꣳ सत्यादनृतमुपैमीति तदु खलु पुनर्मानुषो भवति तस्मादिदमहं य एवास्मि सोऽस्मीत्येवं व्रतं विसृजेत ॥ २३ ॥ ॥ ब्राह्मणम् ॥ ४ [१. ३.] ॥ ॥ सप्तमः प्रपाठकः ॥ कण्डिकासंख्या ११४ ॥ ॥ नवमोऽध्यायः ॥ ॥ अस्मिन्काण्डे कण्डिकासंख्या ८३७ ॥ ॥

इति माध्यन्दिनीये शतपथब्राह्मणे श्रीहविर्यज्ञनाम प्रथमं काण्डं समाप्तम् ॥ ॥

EXTRACTS MADE FROM THE COMMENTARIES OF SÂYAṆÂCÂRYA AND HARISVÂMIN.

अग्न्याधानेऽग्नयः पवमानेष्टिभिर्निष्पाद्याः पवमानेष्टयश्च दर्शपूर्णमासविकृतितया तदधिगमसापेक्षज्ञाना इति प्रथमे काण्डे दर्शपूर्णमासौ प्रतिपद्येते । तदनुष्ठानारम्भश्च पूर्णमासपूर्वकः अतश्च तस्य पूर्णमासस्य प्रथमं यदङ्गं व्रतोपायनं तदङ्गत्वेनापामुपस्पर्शनं विधत्ते व्रतमुपैष्यन्निति । अग्निप्रणयनं तत्प्रबलीकरणरूपमन्वाधानं चार्थसिद्धत्वादनुक्तमित्युच्यमानाङ्गमध्ये व्रतोपायनस्य प्राथम्यमविरुद्धम् ॥१॥ इदानीमग्निदर्शनलक्षणेनाङ्गान्तरेण सहितं समन्त्रकं व्रतोपायनं विधत्ते स इति । स यजमानः अग्निमाहवनीयम् व्रतमनृतवदनत्यागादिरूपम् राध्यतां समृद्धं भवतु तिरोहितमविस्पष्टार्थं पदम् ॥२॥ स्वीकृतस्य व्रतस्य यागसमाप्तिपर्यन्ततामाहाथेति । संस्थिते यागे पर्यवसिते ॥ अत्र व्रतोपायने मन्त्रांतरं विधातुं पूर्वमन्त्रात्तस्यैव विशेषमाह यत एतेन वक्ष्यमाणेनेदमहमित्यादिना बह्वो व्रतमुपयन्त्यतस्तु हेतोरनेनैवोपेयात् एवकारेणैष मन्त्रः प्रशस्यते न तु पूर्वो निषिध्यते अत एव कात्यायनो [२. १. ११.] द्वयमप्याहाग्ने व्रतपतेऽदमहमिति वेति ॥३॥ यदिदं किञ्चान्तत्सर्वमनृतं सत्यं वेति कोटिद्वयमेव न तृतीया कोटिरस्ति ॥४॥ अनेन मन्त्रेण व्रतमुपेयुषो नियममाह स इति । स इत्थं कृतव्रतोपायनः सत्यमेवेत्येवकारकरणादनृतं न वदेदित्यर्थः । असत्येवकारे यत्सत्यं तत्तदवश्यं वक्तव्यं स्यात् अनृतवदनं चाप्रतिषिद्धं स्यात् इष्यते च तन्निषेधः ॥५॥ प्रसङ्गाद्विसर्जनमाह see १. ३. २३. । व्रतोपायनात्प्राग्य अहमेव मनुष्योऽस्मि व्रतमुक्ता स एव मनुष्यः इदमस्मिन्ननुव्रतसमये इदमिति क्रियाविशेषणत्वान्नपुंसकत्वम् नन्वसौ मनुष्यो व्रतसमयेऽपि मनुष्य एव तत्किमुच्यते य एव मनुष्योऽस्मि स एवेदमस्मीति । तत्राहामानुष-इवेति मनुष्योऽपि हि तदा [स]त्यात्मकत्वात्सत्यवदनाद्वा देव इत्युक्तम् व्रतत्यागे कृते व्रतारम्भात्प्रागिव स्वभावसिद्धं मनुष्यत्वमेवेति ॥ ननु यथा व्रतोपायने अनृतात्सत्यमुपैमीत्युक्तम् एवं तत्त्यागे सत्यादनृतमुपैमीति किं नोक्तमित्यत आह न हीति । महत उत्कृष्टादेवत्वात्प्रच्युतेनात्यन्तनिकृष्टमानुषत्वप्राप्तिकथनस्यानवकल्पनम् ॥६॥ व्रतप्रसङ्गादागतं तद्विसर्जनं समाप्य पूर्वेद्युर्यजमानेन व्रतानन्तरं यत्कर्तव्यं तदुक्तव्यं प्रतिज्ञानीते अथेति । यतो व्रतानन्तरमशनानशनापरनामकमारण्याद्यशनमेव यजमानेन कर्तव्यम् अतस्तदनन्तरमेव तस्य निरूपणं क्रियतऽइत्यर्थः ॥ प्रतिज्ञातस्याशनानशनपक्षस्य प्रशंसार्थं केवलानशनपक्षं निरसितुमुपन्यस्यति तदु हेति । तत्तस्मिन्नशनानशनविषये अनशनं सर्वात्मना अशनत्यागम् ॥ उपवसथनामनिर्वचनेन देवानामागमनं दृढयति तेऽस्येति उप समीपे यजमानस्य वसन्ति देवा अस्मिन्निति पर्वदिवस उपवसथनामक इत्यर्थः ॥७॥ गृहे मनुष्येष्वागतेष्वनश्नत्सु यः कश्चिद्यजमानः स्वयं पूर्वं भुञ्जीतेति यत्तदेवानुचितं तर्कयामः अथ यः कश्चिद्देवेष्वनश्नत्सु पूर्वोऽश्नीयादिति यत्तस्यानवक्लृप्तिः किमु वक्तव्या ऋषाऊन चेन्मुनिना निर्णीतोऽनशनपक्षः तर्हि स एव परमार्थः ॥८॥ कथमशनानशनपक्ष इति चेत् अस्यापि मुनिनैव याज्ञवल्क्येन सोपपत्तिना नीतत्वादित्याह तदिति । अशनानशनलक्षणस्वमतसमर्थनाय प्रत्येकपक्षौ दूषयति

यदीति । दैविके हि कर्मणि देवान्प्रत्युद्दिष्टस्यैव हविषः प्रथममनुपयोगः काममन्यस्य पित्र्ये पुनरतिनियमाद्यविषोऽन्यदपि अनुपयोज्यमिति पितृदेवत्यतामापादयति याज्ञवल्क्यस्याशयः । तत्किं दैविके कर्मणि प्रागपि भोक्तव्यमिति यस्तमाशयमाजानानः शङ्कते तमाह यद्यु इति यदि तु अश्नाति तदा अशिशिषतो देवानतिक्रम्य स्वयं भुक्तवान् स्यात् ॥ अशनानशनपक्षयोरुभयोरपि दोषश्चेत्का गतिरिति यद्द्रव्यमशितमप्यनशितवद्भवति तदश्नीयात् । यस्य द्रव्यस्य संबन्ध्यन्नं हविष्टेन देवा न गृह्णन्ति तदशितमपि सदनशितवद्भवति । तथाचे यथोदीरितदोषद्वयाभावमाह स यदिति ॥ १ ॥ आरण्यग्रहणं प्राकृतदर्शपूर्णमासहविर्व्यतिरिक्तोपलक्षणम् वृक्ष्यं वृक्षोद्भवं फलम् । वृषा नाम काश्चित्तस्य पुत्रो वार्षणस्तस्य मुनेर्मतमपवदति तदु तथेति । शमीधान्यं तिलमाषादि । उपचिनोतीत्युपचम् अल्पेनापि माषपिष्टेन मिश्रितं व्रीहिपिष्टं तृचतुरान्माखाबपितं (!खाङ्कपि A.C.!) उपचितं बङ्ग भवति इति प्रसिद्धं तदाह व्रीहियवाविति अतो माषोपयोगे व्रीहियवावेव यत उपयुक्तौ स्याताम् अतस्तथा न कुर्यात् अतो युक्तमारण्यमेवाश्नीयादिति ॥ १० ॥ स प्रसिद्धोऽध्वर्युः अप एवाभिमुख्येन प्राप्नोति । एतच्चापां प्रणयनमथ संयौतीति [२. २. ३.] वक्ष्यमाणसंयवनार्थम् अतः संयवनात्प्राक्प्रणीतानां नाशे पुनः प्रणयनं कार्यम् कृते तु संयवने तन्नाशेऽपि प्रयोजनस्य ज्ञातवान्न पुनः प्रणेतव्यम् ॥ उक्तं प्रणयनं प्रशंसति यज्ञो वाऽइति । अपां यज्ञसाधनतया यज्ञरूपत्वात्तद्विस्तारात्मकस्य प्रणयनस्य यज्ञविस्तारूपत्वात्प्राशस्त्यम् ॥ १२ ॥ व्याह्रियन्तऽइति व्याहृतयो मन्त्राः उर्ङ्नामत्वाभिधानाच्च [°त्वानि° A. B.] अनिश्चित्य वचनादनिरुक्ताः ॥ १३ ॥ अनियोग एवकारः । व्याप्नुवन्ति सकलं जगदित्यापः ॥ १४ ॥ अथवास्य कर्मणो यदेवाङ्गं प्रापयितव्यमध्वर्व्वादयः प्रमादान्न प्रापयन्ति तद्वैकल्यमुदकाचमनप्रोक्षणादिना परिहरन्त आपयन्ति ॥ १५ ॥ अपां वज्रत्वमेता आपो वज्रीभूतेत्यादिप्रसिद्धं श्रुत्यन्तरे वज्रो वाऽइति । न केवलं प्रसिद्धिबलाद्वज्रत्वम् उपपत्तिबलाच्चेत्याह वज्रो होति । उपपत्तेः प्रसिद्धिं वैशब्द्य आह । तां प्रसिद्धामुपपत्तिं दर्शयति तस्मादिति । यस्मादापो वज्रः तस्मात्येन पथा गच्छन्ति तं पन्थानं निम्नं गर्तं कुर्वन्ति गत्वा वा यत्र तृणं गुल्मं वा उपतिष्ठन्ते निर्दहन्ति निःसारं कुर्वन्ति ॥ देवा एतमुदकलक्षणं वज्रमुदयङ्क्तुक्तप्रकारप्रणयनात्मकमुद्यमनं तस्य कृतवन्त इत्यर्थः तस्य वज्रस्य सम्बन्धिन्यभये [ति]न वज्रेण परिहितभये अनाष्ट्रे नाशयन्तीति नाष्ट्राण्यसुरक्षसानि तद्रहिते निवाते तत्संस्पृष्टेन वातेनापि रहिते स्थाने यथा देवाः कृतवन्तः तथैवैषामध्वर्युः ॥ १७ ॥ प्रणयनप्रकारमाह ता इति । चमसादिपात्रस्योपरि सिक्ता पूरयित्वा न पुनः कृतश्चिदज्ञलाशयाद्गृहीत्वा गार्हपत्यस्योत्तरभागे स्थापयेत् आपस्तम्बस्तु स्थापितपात्रस्य समन्त्रकं पूरणमाह इह तु ब्राह्मणे पूरितस्य स्थापनम् ॥ उदपात्रस्थापनं प्रयोजनान्तरेण स्तौति वज्रं वाऽइति । संगृणाति हिनस्ति । अतो हिंसापरिहाराय स्वयं संनद्ध एवोद्यच्छेत ॥ १८ ॥ उद्यन्तुः प्रतिष्ठामुक्त्वा उद्यन्तव्यस्यापि प्रतिष्ठामाह स इति ॥ १९ ॥ सादितानामपां प्रणयनमाह ता इति । आहवनीयस्य संनिहितोत्तरभागे प्रणयति नीवासादयति ॥ २० ॥ अन्तरेणेति बलादग्निमिति लभ्यते । संचरान् संचरेयुः लिङर्थे लेट् ॥ साक्षादुत्तरभागे आहवनीयप्रणयनं विवक्षितमिति दर्शयितुं ततः प्राक्प्रत्यगासादनं निषेधति अतिक्रम्य उत्तरभागमतीत्य प्राग्भागे अनाप्ता उत्तरभागमप्राप्ताः प्रत्यगग्रे नासादयेत् । तत्र दोषं वक्तुमुपोद्घातमाह । व्यन् सपत्रऽइति [पा° ४. १. १४५] स्मृतेर्भ्रातृव्यः तस्य भावो भ्रा-

तृव्यं शात्रवम् युवादिबाह्वादे [पा° ५. १. १३०] अण् विशिष्टं भ्रातृव्यम् महद्वैरम् तद्भिः सह अग्नेर्यथा भवति तथा सोऽतिहरन्नध्वर्युः कुर्यादित्यर्थः । यत्र कर्मण्यस्य प्रणयनपात्रस्य सम्बन्धिनीरप उपस्पृशन्त्यृत्विग्यज्ञमानाः तत्रोपस्पर्शनमग्नौ भ्रातृव्यं शत्रुमुदकलक्षणं वर्धयेदुत्तेजयेत । अतिहरणस्य वैरकरणसंबन्धार्थः प्रथमोऽनुवादः चरमस्तु भ्रातृव्यवर्धनसमर्थनार्थ इत्यपौनरुक्त्यम् ॥ संप्रति सम्यक् ॥ २१ ॥ प्रणीताप्रणयनानन्तरं परिस्तरणं पात्रासादनं चाहायेति ॥ विराजश्छन्दसोऽक्षरेषु दशत्वमस्ति । प्रथमश्च यज्ञो ज्योतिष्टोमः एष वाव प्रथमो यज्ञो यज्ञानां यज्ज्योतिष्टोम इति श्रुतेः तत्र च नवत्युत्तरशतसंख्याकाः स्तोत्रियाः तास्वेकोनविंशतिसंख्यया विभज्यमानासु दश लभ्यन्तऽइत्यस्ति तत्रापि दशसंख्या अतो दशसंख्यायोगाद्विराड्यज्ञयोरैक्यादिह दशसंख्यासंपत्त्या विराडात्मको यज्ञ इह साकल्येन संपादितो भवति ॥ रभ राभस्ये राभस्यं कार्योपक्रमः किमपि कार्यं कर्तुमुपक्रमेते ॥ २२ ॥ १ ॥ १ ॥

आदानं हविर्निर्वापार्थम् यज्ञाय हि तदादानम् इज्यतेऽनेनेति यज्ञो हविः तदिह निर्वापकाले व्रीहिरूपम् तदग्निहोत्रहवण्या शूर्पे निर्वपन्वेवेष्टीव परिवेषणं करोतीव विष्णू व्याप्तौ निज्ञां त्रयाणां गुणः श्लाविति [पा° ७. ४. ७५.] अभ्यासस्य गुणः ॥ १ ॥ वाङ्नियमे हि चित्तविक्षिप्तहेतोर्वाग्व्यवहारस्याभावात्तदैकाग्र्ये सति अविकलो यज्ञो यतः संपद्यते । क्षुभेरुदात्तोपदेशत्वेऽप्यागमानुशासनस्यानित्यत्वादिडभावः क्षुब्धस्वान्तेति [पा° ७. २. १८.] ज्ञापकात्क्षुब्ध इति निपातितम् ॥ शूर्पे चाग्निहोत्रहवणीं च प्रतपति ॥ २ ॥ नाशयन्तीति नाष्ट्रा असुर्यः प्रज्ञाः । तत्तेन तपनेन यज्ञमुखाद्यज्ञप्रारम्भात् एतदिति क्रियाविशेषणम् ॥ ३ ॥ शूर्पप्रतपनानन्तरमुर्विति मन्त्रेण हविर्निर्वापार्थं शकटसमीपं प्रगच्छेत् ॥ यथा वृक्षो मूलैः पृथिवीमनुप्रविष्टस्तिष्ठत्येव न गच्छति यथा व्याघ्रादिभितः पाशाभ्यां बद्धा म्रियमाणः नैवं पुरुषो मूलवान्नाप्युभयतः केनचित्संसर्गिणा प्रतिबद्धः किं तु परिच्छिन्नः प्रतिबन्धकासंसृष्टः सन्नन्तरिक्षे विभ्रम्भं चरति तथैव निर्वप्स्यमानहविरादानार्थं रक्षोऽप्युक्तविशेषणविशिष्टं सर्वं निर्वप्स्यन्तं पुरुषमनुगच्छेत् अतस्तदेतत्पुरुषेण गम्यमानमन्तरिक्षं ब्रह्मणा उर्वित्येनैनेव मन्त्रेणानाष्ट्रं हिंसाकारहितमत एवाभयं कुरुते । उरु विस्तीर्णं प्रतिबन्धकरक्षोलक्षणमूर्तद्रव्यविरहादिति हि मन्त्रार्थः ॥ ४ ॥ अनस एव न शालायाः सकाशाद्ग्रहणे कारणमाह स इति । अन एव हि प्रथमं धान्यस्याधिकरणम् अनसः सकाशान्नीयमानं धान्यं पश्चादेव किं ततः पक्वालं (यक्वालं!) एतत (B. पतते A. C.!!) शालागतं भवति शालाशब्दाच्छन्दसवेन कस्य विकल्पितत्वादण् ॥ यदग्रे गृहप्रवेशात्प्रागनसि स्थितमत एव गृहिणामाशय अनुपहतं तदेव यज्ञसाधनं करवाणीति ॥ ५ ॥ बहोर्भावो भूमा । अनोवाह्यमनसा वोढुमर्हम् ॥ ६ ॥ वैशब्दस्तस्य विधिश्रुतिसिद्धं यज्ञसाधनत्वं स्तोतुं स्मारयति । न केवलं श्रुतिसिद्धं तस्य तत्साधनत्वम् प्रत्यक्षादिप्रमाणैरपि तस्य साधनत्वं सिद्धमित्याह यज्ञो होति (see १. १. १७.) । यस्मादनस एव ग्रहणं तस्मादग्रहणमन्त्रा धूरसीत्यादय अनोऽवयवलिङ्गा दृश्यन्ते न पुनः कोष्ठगतस्य कुम्भीगतस्य वा धान्यस्य कुम्भीशब्दस्तन्निष्ठं धान्यं लक्षयति ॥ ऋषिमतमाह भस्त्राया इति । षष्ठ्यर्थे चतुर्थी । तस्मिन्पक्षे भस्त्रायाः के मन्त्रा इत्याह तद्वृषीनिति । उक्तार्थं । तदा तु तान्येव यज्ञभस्त्रायाः प्रतिपादिकानि स्युरिति हे भस्त्रे या वं धूरसि इत्येव भस्त्रापक्षे विशेषः । यानि यजूंषि प्रकृतावनस्यासन् तान्येव भस्त्रायामपि स्युः । निर्ममे [°मे AC.] अनुतिष्ठानि ॥ ७ ॥

पात्रीतो ग्रहणे धर्मविशेषमाह । तस्मिन्पात्रीपक्वे तस्या अधस्तात्स्रुग्यमुपोह्य उपनिधाय see कात्या° २.३.२८.२१. । अनसो ग्रहणे स्रुग्योपहितपात्रीतो ग्रहणेऽतिशयितं प्रयोजनमाह यत इति । यतो यं स्रुग्यमाश्रित्य युनज्ञाम यज्ञेन योगं पाप्मवाम ततस्तस्मिन्नेव स्रुग्ये विमुञ्चाम वियोगमपि कारयाम । अनसो निर्वापपक्वे हि शुङ्कपभृतौ शकटस्य धुरोर्निदध्यात् पात्रीतः पुनर्निर्वापे तदाधारभूते स्रुग्ये तयोर्निधानं विमोकः see कात्या° ३.६.११.२०. ॥८॥ अथ धुरः समन्त्रकमभिमर्शनं विधास्यंस्तदुपोद्घातत्वेन देवतासूयतां तस्याः प्रतिपादयति तस्येति । एनदुक्तमनसो योगे खलु ये बलीवर्दा वहन्ति एषां वहं वहनसाधनं स्कन्धरूपमङ्गमग्निदग्धमिव दृश्यते अतो वोढव्या धूरग्न्यात्मिकेत्यवसीयते ॥ शकटनिर्वापस्य प्राशस्त्यातिशयं द्योतयितुं तस्मिन्वेदिहविर्धानयोः संपत्तिमाहाथ यदिति । शकटस्याधःपतनं वारयितुमीषादण्डाग्रोन्नम्भनार्था मेथी कस्तम्भी ईषाद्वयं यत्र संसृतं ततः प्रत्यग्भागः तयोरीषयोर्मध्यदेशः प्रउगम् तच्च पश्चाद्विस्तृतम् पुरस्ताद्ध्रसीयः वेदिरपि तथाविधा त्रिंशत्पदानि पश्चात्तिरश्ची भवति चतुर्विंशतिं पुरस्तात्तिरश्चीति श्रुतेः अतस्तत्सादृश्यात्प्रउगस्य वेदित्वव्यपदेशः । धान्यनिधानाय परिश्रितप्रदेशो नीडः हविर्धानमपि परिश्रितम् परिश्रयणसाम्यान्नीडस्य हविर्धानत्वम् ॥९॥ धुरि भवोऽग्निर्धुर्यः । हविर्ग्रहणाय शकटस्य परिश्रितप्रदेशं पश्चाद्भागं यास्यंस्तं धुर्यमग्निमतिक्रमिष्यन्भवति तदवगमे च स क्रुध्येत् तस्य प्रसादनायैतत् धूरसीति मन्त्रोच्चारणेन तस्मा एवाग्नये निह्नुतेऽपनयति अतिक्रमज्ञानितं स्वापराधं प्रशंस्य प्रसादयति स चाग्निरतिक्रामन्तमप्यधुर्युं न बाधते ॥१०॥ तन्मन्त्रोच्चारणेन शत्रुहिंसनं महर्षिव्यवहारेण संवादयति तदिति । अर्धमासशः पौर्णमास्यां दर्शे च ॥११॥ घ्रातं तृप्तं देवानां तृप्तिजनने पर्याप्तमित्यर्थः । घ्रै तृप्तावितिं [धा° २२.११.] भौवादिको धातुः । मा स्खार्षीत्कुटिलगतिर्मा भवतु । स्खरनिषेध एवास्खलाशब्दार्थः ॥१२॥ शकटस्योरोहणं विधत्तेऽथेति । पस्पार पालयामास स्पृ प्रीतिपालनयोः [धा° २७.१३.] See १.३.१. ॥१३॥ पुरोडाशीयानां व्रीहीणां समन्त्रकमवेक्षणं विधत्तेऽथेति । वायुः प्राणो भूत्वा नासिके प्राविशदिति श्रुतेः प्राणवातयोरेकत्वम् तथा सति मन्त्रेणैव प्राणात्मकाय वाताय तदुपभवनकीर्तनं कुरुते ॥१४॥ यदि तु तत्र तृणादिकं न भवेत्तदा पुरोडाशीयं व्रीहिसमूहमेवानेन मन्त्रेणाभिमृशेत् ॥१५॥ अभिपद्यते आलभते स्पृशति । यज्ञो धानाकरम्भादिपञ्चहविष्क इति पञ्चसंख्यायोगसाम्यात्पाङ्क्तः । तत्तथा सत्येतदेतेन पञ्चशब्दोपेतमन्त्रोच्चारणेनात्रास्मिंश्शकटे पाङ्क्तयज्ञमेव धारयति ॥१६॥ भागं दोग्धीति भागदुघो भागप्रदः दुहः कब्घश्चेति [पा° ३.२.७०.] । तादृशः पूषा पाणितलाभ्यां सर्वस्य जनस्याशनं भोज्यमन्नमुपनिधाता उपनिधातुमुपस्थापयितुं शीलवान् ताक्षीलिकस्तृन् न लोकेति [पा° २.३.६९.] कर्मणि षष्ठ्याः प्रतिषेधः ॥१७॥ असमदमकलहं परस्परमविरोधम् ॥१८॥ स्वस्वनामोद्देशेन गृहीतं हविः ऋणमेव ताः सर्वा देवता मन्यन्ते । यत्काम्या यस्य फलस्येक्या । काम्यच्चेति [पा° ३.१.१.] यक्तब्दादिकार्थे काम्यच् तस्मादेवतानामावश्यमादेष्टव्यम् । आग्नेयवय्यथाक्रममग्नीषोमीयादीनि हवींषि गृह्णीयात् ॥१९॥ निरुप्तशेषस्याभिमर्शनं विधत्तेऽथेति । तत्तत्र शकटे यस्मादेव स्थानाद्गृह्णाति तत्स्थानं वर्धयति ॥२०॥ परिवेष्टितमेव खल्वनो भवति धान्यनिधानार्थं तन्मध्येऽवस्थितस्याधुर्योश्चक्षुः पाप्मगृहीतमिव काचकामलादिदोषदूषितमिव द्रष्टुं न समर्थं भवति कथं तस्य दर्शनोपाय इति तदुच्यते ॥ तत्तथा

सति एतन्मन्त्रकरणकेन प्रेक्षणेन स्वःशब्दप्रतिपादितं यज्ञादिचतुष्टयमर्थजातं प्राच्यां दिशि प्रथमत उपलभ्यमानमतोऽस्माकृकटस्थानाद्वलोकयति ॥२१॥ तं शकटस्थानात्प्रागक्तमनुसृत्य इतोऽस्माल्लोकात्प्रच्यावयितुं तस्य च यजमानस्य कुलं विक्षोभयितुं समर्थाः ईश्वरोऽइति [पा° ३. ४. १३.] तोसुन्प्रत्ययः । दृंहति दृढीकरोति ॥ निरुप्तेन हविषा सहाग्निसमीपगमनं विधत्तेऽथेति । उर्विति मन्त्रस्य प्रागाम्नातं ब्राह्मणमतिदिशति सोऽसाविति । अक्तारित्वं वाऽअनु रक्तश्चरतीत्यादिको (see k.४.) यो वाक्यशेषः सोऽसावेवात्राम्नातस्यापि तस्य मन्त्रस्य बन्धुरनुकूलः ॥२२॥ गार्हपत्ये आहवनीये वा यस्मिन्नग्नौ अपणं तस्य पश्चात्पात्रासादनम् निरुप्तस्य हविषः सादनं च कर्तव्यम् ॥२३॥ २ ॥१॥

इडापिङ्गलादिनाडीद्वारा बहिर्निर्गच्छन्प्राणः प्राडित्युच्यते तयैव द्वारा पुनरक्तः प्रविशन्प्रत्यङ्डिति तावेतौ वृत्तिभेदौ प्राणोदानावित्युच्येते तत्र प्राङ् संचरन्प्राणः उत् ऊर्ध्वदेशादानयति अक्तः प्रवेश्यानुगुणं चेष्टतऽइत्युदानः तस्य च शब्देन प्रत्यङ्मुखोऽपानो विवक्षितः । एवं द्विधाभिन्नस्यैतस्य वायुवाख्यस्य पवित्रस्य परिमाणमनुसृत्य तत्पवित्रयोर्द्वित्वम् ॥२॥ द्विवपक्षमेव निगमयति द्वेऽइति अथ यः प्राणापानयोः संधिः स व्यान इति श्रुतेर्व्यानस्य संधिरूपतया तदुभयानतिरिक्तावादूद्विवपक्ष एव श्रेयान् ॥ प्रोक्षत्याभिरिति प्रोक्षण्य आपः ॥३॥ आवृत्य शयनं कृतवान् व्रणादूवृत्र इति नाम ॥४॥ पूतिर्दुर्गन्धः । बीभत्सां चक्रिरे जुगुप्सते स्म मान्बधेति [पा° ३. १. ६.] इति बधेर्वैरूप्ये सन्प्रत्ययः । तत्संस्पर्शं परिहर्तुमुपर्युपरिवर्तमाना अतिपप्लुविरे ह्रदाशयमतिक्रम्य तीरदेशं प्राप्ता आसन् प्लुङ्गताविति धातुः [धा° २२. ६२.] प्लुताश्च (प्लु° C.) ता आपो दर्भात्मना परिणताः । अनापूयिता इति आ समन्तात्पूर्वं दौर्गन्ध्यं प्राप्ताः आपूयिताः पूयी विशरणे दुर्गन्धे च [धा° १४. १३.] कर्तरि निष्ठा क्तान्दस इट् । इतरासु दर्भात्मना परिणतह्रदव्यतिरिक्तास्वमेध्यबापादकं किंचित्संसृष्टमिव भवति । एवमनापूयिताब्विकारदर्भमयाभ्यां पवित्राभ्यामासामपामुत्पवनं पूयसंसर्गकृतं तदमेध्यबमपहन्ति ततश्च विधास्यमानं प्रोक्षणं मेध्याभिर्मेधार्हाभिः शुद्धाभिरेवाद्भिः कृतं भविष्यतीत्यर्थः ॥५॥ अग्निहोत्रहवण्या पात्रेण साकं प्रोक्षणीरपः । उदिङ्गयति ऊर्ध्वं सेचनेन चालयति । अग्रे पुरतो वर्तमानं समुद्रं गच्छतीत्यग्रेगुवः । अग्रेपुवः आपः खल्वभिषवार्थमासिच्यमाना यष्टव्यदेवताभ्यः पूर्वं सोमरसमास्वादयन्ति तेन सोमपानेनाग्रे प्रथमं स्वात्मानं पुनन्तीति । अग्रे प्रशस्ते अह्यास्मिन्काले ॥७॥ प्रोक्षणपात्रगतेनैवोदकेन तत्पात्रगतमुदकं प्रोक्षयित्वा तत्तेन मन्त्रपाठेन प्रोक्षणजनितमपराधमेताभ्यो प्रोक्षणीभ्यो निह्नुतेऽपनयति । एवं संस्कृताभिरद्भिर्हविषः प्रोक्षणं विधत्तेऽथेति । बन्धुरनुकूलं स्तावकमर्थवादवाक्यं सर्वस्यापि प्रोक्षणस्यैकविधमेव अतस्तत्सर्वत्र योऽनीयमिति भावः ॥१०॥ तक्षा वर्धकिः ॥१२॥ ३ ॥१॥

अथ निरुप्तव्रीहियवावहननार्थं कृष्णाजिनादानं विधत्तेऽथेति । अवकायापक्रिय क्रो क्रेदने [धा° २६. ३७.] ॥१॥ कृष्णाजिनस्य यज्ञरूपवं वक्तुं त्रयीमयवं प्रतिपादयति तस्येति । बभ्रूणि पिङ्गलवर्णानि हरीणि हरितवर्णानि ॥२॥ शिल्पं चित्रं रूपम् see वाजस° ना° ४. १. । सोमाङ्गभूता दीक्षापि कृष्णाजिनस्योपरि क्रियते । यदि भूम्यामेवावहननादिकं कुर्यात्तदा तस्य हविषोऽवश्यं स्कन्नदोष इत्यभिप्रायः ॥३॥ कृष्णाजिनवत्प्रसक्तमवधूननं पात्राणां निषेधति अतिनत्येवेति । न केवलं रक्षांसि निरस्यति तत्संपर्कादयज्ञियमपि अपास्यति यद्वीति

॥४॥ The explanation of the conclusion of k.5., of k.6. and of the beginning of k.7. is wanting in ABC. तदिति कृष्णाजिनोलूखलयोरन्योऽन्यं हिंसा मा भूदिति पृथिवी-कृष्णाजिनयोरिवैकमत्यप्रार्थनं वदतीत्यर्थः ॥७॥ यज्ञो यज्ञसाधनं हविरुलूखले प्रत्यष्ठात्प्रति-ष्ठितमभूत् प्रासारि प्रसारितो विस्तारितोऽभूत् ॥८॥ अवदवतु तर्पयतु ॥९॥ निर्वापादौ मन्त्र-रूपाया वाचो हविःकरणसाधनत्वाद्भागेव हविःकृत् ॥११॥ हविःकृदाह्वानमन्त्रे विशेषमाह तानोति । राजन्यबन्धोः क्षत्रियज्ञातेः । आपस्तम्बस्तु राजन्यवैश्ययोर्विपरीत्येनासूत्रयत ॥१२॥ पुरा खल्वेतदाह्वानानन्तरं ज्ञाया हविष्कृदुपोत्तिष्ठति अतस्तदानीं ज्ञायैव हविःकृदभूत्तत्तस्मा-दिदानीमप्येतदाह्वानानन्तरं ज्ञाया वान्यः कोऽपि ऋत्विग्वा उपोत्तिष्ठति स एव हविःकृदित्य-र्थः ॥ हविःकृदाह्वानसमये दृषदुपले शम्यया समाहन्ति ॥१३॥ समाहननज्ञनिताया वाचो य-ज्ञविघातकासुरराक्षसादिनिवृत्तिहेतुतामुपपादयितुमितिहासमुदाहरति मनोरिति । पापं निकर्षं पराजयं सचते प्रापयति ॥१४॥ अद्यैव देवो यस्य स अद्यादेवः अद्यालुः । आवमिति ह्रस्वो-च्चारणम् ॥१५॥ मनोरौ वेति [पा° ४. १. ३८.] मनावौ । वदन्त्यै षष्ठ्यर्थे चतुर्थी यत्र यस्मि-न्देशे वदन्त्यास्तस्याः शब्दं शृण्वन्ति । इदानीं मनुष्यशरीरान्निर्गतवाचः श्रवणादस्माकं पा-पीयः अतिशयितं पापं पराजयः प्राप्नोति ॥१६॥ स खल्वृषभः देवानां मधुरवागासीत् ॥१८॥ नलादीनि द्रव्याणि शूर्पस्योपादानभूतानि ॥१९॥ उलूखलान्निःकृष्यावहतान्व्रीहीन् शूर्पे प्र-क्षिपति ॥ चशब्दाद्यविषे च संज्ञां संज्ञानं समानज्ञानत्वम् ॥२०॥ तुषाणां राक्षसभागत्वात्तैस्तन्नि-रसनं विधत्ते ॥२१॥ वितुषीकृतानां तण्डुलानां व्रीहाणां च पृथक्करणं विधत्तेऽथेति ॥ यदा यस्मिन्काले एते व्रीहितण्डुलाः एतद्विवेचनं प्राप्नुवन्ति तस्मिन्समये यत्र यस्यां पात्र्यामधि उपर्येनानपविनक्ति ॥२२॥ तत्पात्रीगतं हविरनुमन्त्रयते ॥२३॥ तस्मिन्फलीकरणे शाखान्तरोयं मन्त्रविधिमनुवदति तद्येति । तं निषेधति तदु तथेति ॥२४॥ ४ ॥१॥

कपालोपधानपेषणयोर्युगपदनुष्ठानं विधत्ते स इति । आग्नीध्रः कपालानामुपधाताध्वर्युः पे-षणार्थं दृषदुपले उपदध्यात् ॥१॥ शिरःकपालान्तर्गतं मांसं मस्तिष्कः ॥२॥ अङ्गारविभज्ञनार्थं काष्ठमुपवेषः । धृष्णोत्यनेनेति धृष्टिः । अथ यज्ञे एनेन काष्ठेन तदङ्गारादिकमुपालभते प्रा-प्नोति ॥३॥ अग्निगताशुङ्गांशस्य निरसनं विधत्ते तेनेति ॥४॥ शुङ्गादग्नेः पुरोडाशश्रपणार्थमङ्गा-राहरणं विधत्तेऽथेति । आस्कौति विभज्ञति स्कुञ् आप्रवरणे [A. °वणे B. C. see धा° ३१. ६.] । योऽग्निर्देवान्यज्ञति ॥५॥ नेत्रोऽस्माकं हविषो भागेनैव राक्षसादय उपोत्तिष्ठेयुरित्यने-नाभिप्रायेणाङ्गारस्योपरि कपालोपधानं कृतवत्तः ॥ यज्ञुषा आ देवयज्ञमिति मन्त्रेण संस्कृतत्वा-देष एव हि कपालोपधाने मुख्यो नान्य इत्यर्थः ॥६॥ समानं ज्ञायन्ऽइति सज्ञाता ज्ञातयः ॥७॥ दक्षिणहस्तेनान्यस्याङ्गारस्याहरणं विधत्तेऽथेति । नेदिहेत्यादि यदि सव्यपाण्यङ्गुल्या अभिनिधानं न कुर्यात्तदा इहास्मिन्कपाले उपर्यङ्गारनिधानात्पुरस्तादेव राक्षसाः प्रविशेयुः अत-तः कपालस्योपर्यङ्गाराध्यूहन्पर्याप्तमङ्गुल्याभिनिहितमेव भवेत् ॥८॥ पुरा पुरोडाशाधिश्रयणा-त्प्राक् ॥९॥ मध्यमकपालात्पूर्वदेशे स्थाप्यस्य कपालस्योपधानं विधत्ते ॥११॥ लोकत्रयाति-वर्तिनश्चतुर्थस्य सद्भावोऽसद्भावश्च अनद्या वै अस्माकमप्रत्यक्ष एव लोकत्रयवत्प्रसिद्धाभावात् ॥१२॥ कपालानि ॥१३॥ अवहननवत्पेषणम् see १. ४. ४. ॥१४॥ कृष्णाजिनस्योपरि । पे-षणीयतण्डुलानां धारणाद्विषणा पर्वतावयवत्वात्पर्वतीति एतदुभयं प्रसिद्धमिति हिशब्दयो-

र्थः । पार्थिवेन धारणाख्येन रूपेण योगादेषा दृषदियमेव पृथिवीति स्तुतिः ॥१५॥ दृषदः पश्चाद्भागे शम्यामु° । विष्टब्धे विविधमधस्तादुपरिष्टाच्च धारिते ॥१६॥ दृषद् उपरि । उपलातिशयेन दृषदः सकाशादल्पपरिमाणा । १.४.१३. इति यत्नयोः समाहननं विहितं तत्र दृषदुपलयोरुभयत्रावस्थानाद्ध्रुवम् तन्मध्येऽवस्थानाद्ध्रुवायाः स्त्रिक्त्वम् ॥१७॥ पेषणार्थं दृषद उपरि तण्डुलान्प्रक्षिपति । धिनवत्प्रीणयेत् धिवि प्रीणनार्थः [धा° १५.८४.] ॥१८॥ नासिकाभ्यां बहिर्निर्गच्छन् श्वासरूपो वायुः प्राणः ताभ्यां देहे पुनः प्रविशन्नुदानः अन्नपानादिरसं विविधं सर्वासु नाडीषु अनिति प्रेरयतीति मध्यवृत्तिर्वायुर्व्यानः ॥ प्रोहाते कृष्णाजिने प्रक्षिपति ॥१९॥ हविः देवानां जीवं प्राणधारणयुक्तमेव सदमरणसाधनं भवति अथैवं सत्येतद्यज्ञसाधनं हविरवहननपेषणाभ्यामृषिर्जो मारयति ॥२०॥ तथा सति निर्जीवत्वान्नस्यामृतत्वसाधनत्वं न युक्तमिति भावः मन्त्रप्रयोगेन तस्य निर्जीवत्वं परिहरन्प्राणादीनेव पुनरस्मिन्हविषि स्थापयति ॥ पिंषन्तीति एवं समन्त्रकमध्वर्युणा पेषणे कृते सति यजमानपरिचारका अवशिष्टं सर्वं चूर्णीकुर्युः तथा उपहितानि च कपालानि अङ्गारैः प्रदीप्तानि कुर्युः ॥२१॥ यदैवाध्वर्युः पिनष्टि अथ तस्मिन्नेव समये एकोऽन्य आग्नीध्रादिः आज्यं निर्वपति तच्च सर्वदेवतासाधारणमिति देवतादेशेन रहितेनैव यजुषा गृह्णीयात् । देवतानाम निःशेषोक्तं यस्मिन् तन्निरुक्तं तद्विलक्षणमनिरुक्तं तादृशं च महीनामित्यादि यजुः तत्रप्रसिद्धदेवतावाचिपदस्यानुपलम्भात् । मथ्यन्ते पूज्यन्ते मथ्यः ॥२२॥ १ ॥२॥

पिष्टानां पिण्डकरणार्थं पात्र्यां संवापं विधत्ते । पवित्रयुक्तो पात्रे । see १.२.१७. ॥१॥ वेदिमध्ये । उपसृजत्याभिरिति पिष्टसंसर्जनार्था आप उपसर्जन्यः ताभिः सहाग्नेत् ताश्चानीताः पिष्टानामुपरि पवित्राभ्यां प्रतिगृह्णीयात् ॥२॥ संयौति सम्यगभिश्रीकरोति । जनयत्यै जननाय अधिवर्जनं पुरोडाशस्याग्नावधिश्रयणं करिष्यन्खलु संयौति यथा खल्वधिवृक्तः पुरोडाशोऽग्नेः सकाशाज्जायेत ॥३॥ स खल्वध्वर्युर्यस्मिन्काले तस्य हविर्द्वयस्य पुनः संहरणमेकीकरणं करिष्यन्न भवेत्तदानीमिदमग्नेरित्येकं भागमभिमृशतीदमग्नीषोमयोरित्यपरं तावेतौ यथासंख्यमाग्नेयाग्नीषोमीयपुरोडाशौ ॥ पुरोडाशकपालस्याज्यस्य चाग्नेरुपरि अधिश्रयणस्य समानकालतां विवक्षिषुः कर्तृभेदमाह । एष अध्वर्युः । आग्नीध्रः २.१.२२. इत्यतः अदःशब्देन परामृश्यते ॥४॥ आज्यं यज्ञशरीरस्यार्धभागः उपस्तरणाभिघारयोः प्रयाजादीनां च तत्साध्यत्वात् इतरोऽर्धः पुरोडाशादिर्हविः । सहाधिश्रयणेन तदर्धद्वयमेकीकृत्य अग्निं प्रापयावेत्यध्वर्योराग्नीध्रस्य चाभिप्रायः ॥५॥ अधिवृणक्ति अग्नावुपरि वृणक्ति वर्जयति अपणार्थं स्थापयति । धर्मस्य सोमयागाङ्गस्य यत्प्रवृश्चनं सोमे तत्सदृशमेवैतत्पुरोडाशप्रवृश्चनम् ॥७॥ उपहितेषु कपालेषु तं विस्तारयति ॥८॥ सत्रेति निपातोऽनेकार्थत्वात्त्रातिशयवाची सत्रा पृथुं अतिपृथुम् । व्यृद्धं विगतऽर्द्धिकम् ॥९॥ पक्वान्तरमपवदति कस्तदिति । यं देवतासौविष्टकृतेडाग्नवदानपर्यन्तमेव मन्येत तत्परिमाणविशिष्टं ॥१०॥ क्ष्णुवन्ति हिंसन्ति विवृहन्ति विश्लेषयन्ति क्ष्णु हिंसायाम् [धा° ३०.४.] ॥११॥ तं पुरोडाशम् परितोऽग्निर्यस्य स पर्यग्निः ॥१३॥ भृतं पक्वम् आ पाके [धा° २४.४५.] निष्ठायां भृतं पाकऽइति [पा° ६.१.२७.] निपातितम् ॥१४॥ अभिवासयति साङ्गारेण भस्मना क्षादयति । नग्नः स्वभावतो विवसनः मुषितः चोरादिभिरपहृतवसनः ॥१६॥ इज्यते

ज्ञनेनेति यज्ञः पुरोडाशः स म्लानिरहितोऽभूत् ॥१७॥ निर्णिज्यते शोध्यतेऽनेनेति निर्णेजनमुदकम् ॥१८॥ २ ॥२॥

यं होतृकर्मणि प्रावृणत ते देवा इत्यर्थः । प्राधन्वत्प्रागद्रवियत धवि गमने [धा° १५.८८.] । भीषा पूर्वाग्निवन्मरणभयेन निलीनोऽन्तर्हितो बभूव । ष्ठिवु निरसने [धा° १५. ५२.] । अप्रपदनमनाशयभूताः । वः पञ्चम्यर्थे चतुर्थी युष्मत्सकाशात् । ततो निष्ठीवनलक्षणवीर्यधारणान्नाभ्योऽद्यः सकाशात् ॥१॥ यथेदानीं ब्राह्मणः पुरोहितः । तं बध्यं बधार्हं ज्ञातवन्तः । अनन्तरं चैनं विश्वरूपं त्रित एवेन्द्रसहाय्यार्थं जघान इन्द्रश्च तद्धननज्ञानितात्पापादतिमुक्तोऽभवत् यस्मात्स इन्द्रो देवः अतोऽस्मिन्पापसंश्लेषो न युक्त इत्यर्थः ॥२॥ ते लौकिका जना विश्वरूपहननानन्तरमेतदूचुः । एषु त्रितादिषु यद्विश्वरूपबधज्ञानितमेनस्तत्यज्ञो मृज्जीत शोषयेदिति अत एतत् एतेन पात्रीनिर्णेजनादिनिनयनेन एषु तदेनो यज्ञः संशोषयति तस्माद्वहननपेषणादिज्ञानितस्यैनसो रूपं पात्र्यादिनिर्णेजनमाप्त्येभ्यो निनेतव्यमित्यर्थः ॥३॥ वयमपोदमेनः परः परस्तादन्यत्राधारात्तरे अन्यत्रास्मत्तो नयाम ॥४॥ अन्वाहरति यज्ञसंबन्धि दोषजातं परिहरत्यनेनेति अन्वाहार्यो नाम ऋत्विग्भ्यो देय ओदनः ॥ निनोतमुदकमङ्गारेण प्रतपति ॥ एवं संस्कृतं पुरोडाशं पशुवेन स्तौति ॥५॥ यज्ञियः सारांशो मेधः ॥६॥ अस्य यजमानस्य ते एते पुरुषादयः आलब्धाः सन्तो यत्परिमाणविशिष्टवीर्यवद्धविः स्युः अस्य व्रीहियवयोः सर्वपशुसारवं विदुषो यजमानस्य तन्निष्पादितं पुरोडाशादिकं हविः तावद्वीर्यवद्धविरेव भवति एवं च पशुरूपमेव संस्क्रियते । लोमत्वगादिपञ्चावयवयोगाच्च या पशौ पाङ्क्तसंपदभिज्ञैरुच्यते सात्रापि पुरोडाशे विद्यते ॥७॥ लोमवत्पिष्टानां सूक्ष्मत्वाद्रूक्षत्वाच्च । वचोव श्लक्ष्णीभावदर्शनात् । दारुणः कठिनः । अस्थ्यन्तर्गतो धातुर्मज्जा । एषो एषा उ ॥८॥ अशितव्यं भक्षितव्यम् ॥१॥ ३ ॥२॥

वेदिकरणार्थं स्फ्यादानं विधित्सुः स्फ्यस्य वज्ररूपत्वं वक्तुमितिहासं व्याचष्टे इन्द्र इति । न्यूनाधिकाराहित्येन तृतीयांशत्वज्ञानं दुर्लभमित्यभिप्रेत्य पक्षान्तरमाह यावद्वेति तृतीयाद्भागान्न्यूनमधिकं वा यावदेव किंचित्तावानेव स्फ्यः । चतुर्थभागस्य परिणामप्रकारमाहाथ यत्रेति तत्तत्र देशे प्रक्षतः स वज्रः शकलो भूत्वा शीर्णोऽभूत् ॥१॥ संव्याधे युद्धे ॥२॥ संश्यति सम्यक्तनूकरोति तीक्ष्णीकरोति ॥५॥ स्तम्बयजुर्हरणं विधित्सुः तस्यासुरनिर्हरणलक्षणं प्रयोजनं वक्तुमाख्यायिकामाह देवा इति । यद्यदा खलु । ततोऽनन्तरक्षणम् ॥८॥ अनपजय्यं न जेतुं शक्यं पुनरुत्थानरहितम् see पा° ६.१.८०. ॥१॥ पलाय्य अय गतौ [धा° १४.१.] क्त्वो ल्यप् see पा° ८.२.१९. ॥१०॥ इतोऽस्माद्देदिलक्षणात्स्थानादुपसंरुद्यान्प्रतिबद्धगतीनसुरान्करिष्यथ । अभिनिधास्यामः अभितः सर्वतो निरुद्धगतीन्निहितान्करिष्यामः । यच्चतुर्थं लोकज्ञातमस्ति अस्माकमप्रत्यक्षं तेनापि बाधितान्करिष्यामः । ततोऽनन्तरं पुनः संगता न भविष्यन्ति विशीर्णा बाधिता एव भवेयुः ॥११॥ यदत्र स्तम्बयजुर्हरणं करिष्यते एतन्निदानेन मूलकारणेन निरूप्यमाणं सत् देवैः कृतं तदसुरनिरसनमतो यज्ञविघातकासुरनिर्हरणार्थं स्तम्बयजुर्हरणमिति विधिरत्रेयः ॥१२॥ वेदेरुत्तरतः परीत्य वर्तते ॥१३॥ शत्रुनिर्हरणमपि तत्प्रयोजनम् ॥ अधुर्युरस्याः पृथिव्या एव सकाशात्सर्वं स्तम्बयजुर्हरति नान्तरिक्षादे. अन्तरिक्षयुलोकयोर्हर्त-

व्यस्य स्तम्बस्याभावात् न तत्र तद्ग्रणं संभवति ॥१४॥ स्तम्बयजुर्हरणार्थं स्फ्येन तृणस्योपरि प्रहरणम् ॥१५॥ स्फ्यमाददानोऽध्वर्युरेनां पृथिवीमुपरिभागावस्थितमूलयुक्तामिव खल्वेतत्करोति अत उत्तरमूलत्वेन प्रहरणात्तद्धिंसाशंकायां तदभावोऽनेन प्रार्थ्यते ॥ प्रहरणनिष्पन्नस्य सतृणस्य पांसोरादानमन्त्रमनूद्य व्याचष्टे व्रजं गच्छेति । अभितो निखेप्स्यन्खल्वध्वर्युरेतदसुरज्ञातमपक्रमणरहितमितस्ततोगमनरहितं कुरुते ॥ वेदिप्रेक्षणमन्त्रमनूद्य तात्पर्यमाह वर्षवृद्धिति । अस्यै अस्याः पृथिव्याः संबन्धिनि यत्र स्थाने वेद्यर्थं खनन्तः क्रूरं निष्ठुरं कुर्वन्ति तेन च तां पृथिवीमपघ्नन्ति हिंसन्ति ॥ उत्करे निधानमन्त्रस्याभिप्रायमाविष्करोति देवमिति । अन्धे सर्वप्रकाशरहितेऽतिशयिते तमसि यस्मिन्बद्धो न पुनरावर्तते ॥ अमुचे अमोचनाय ॥१६॥ स्तम्बयजुरुत्करे निवपन्नुपरि हस्तनिधानेनाधस्तात्क्षिपति ॥१८॥ हे पृथिवि ॥१९॥ अभिनिदधाति अभितो निक्षिपति बाधते । एतत् हरणसाधनं यजुरपि प्रत्यक्षमेवानुष्ठेयार्थस्य साक्षात्प्रतिपादकत्वात् ॥२०॥ अनद्धो अप्रत्यक्षमेव ॥२१॥ ४ ॥२॥

वेदिपरिग्रहं वक्तुमितिहासमुपन्यस्यति । अनुव्यमनुगमन न्यग्भूतिं प्राप्ता इव बभूवुः ॥१॥ उक्षणोऽनड्वाहः संबन्धिभिः । पश्चात्प्रतीचीं दिशमारभ्य प्राङ्मुखा अभिजग्मुः ॥२॥ यदि अस्यै अस्याः सम्बन्धि स्थानं न प्राप्नुयामः ॥३॥ अन्वाभजत संयोजयत ॥४॥ वामनः खर्बः । हेडं अनादरे [धा° ८. ३२.] ॥५॥ पूर्वस्यां दिशि आहवनीयाख्यमग्निं प्रज्वाल्य तेन विष्णवात्मकेन यज्ञेनार्चन्तः पूजयन्तः आप्नुवन्तः कर्मानुष्ठानजनितं श्रमं प्राप्नुवन्तश्चेरुः चरित्वा च तेन यज्ञात्मकस्य विष्णोराधारभूतेन स्थानेन सर्वां पृथिवीं सम्यगालभन्त अतो विद्यते लभ्यतेऽनेनेति यज्ञस्थानस्य वेदिनामत्वम् यतो वेदिपरिग्रहादेवा असुरसकाशात्कृत्स्नां पृथिवीमपक्रतवन्तः तस्माद्वायव्येनेत्यादिभिर्मन्त्रैः स्फ्येन वेदिं दक्षिणतः पश्चादुत्तरतश्च रेखया परिगृह्णीयात् ॥७॥ वेदेः खननं विधित्सुरितिहासशेषमाह । इतस्ततश्चलितुमशक्यत्वेन श्रान्तः सन् मूलान्युपेत्य भूम्यन्तर्गतः सन्मुल्लोचास्तंगतोऽदृश्यो बभूव ॥८॥ पांचिः सोमयागस्यापि वेदिं त्र्यङ्गुलखातामेव मेने ॥९॥ वेदिनामनिर्वचनान्तरमाह ॥१०॥ गायत्रेण वेत्यादिभिः प्राक्कृतः पूर्वः परिग्रहः तदपेक्षयास्योत्तरत्वं तस्य स्वरूपमाह सुक्ष्मेति । वेदिं दक्षिणस्यां दिशि तेन यजुषा स्फ्येन लेखया परिगृह्णीयात् ॥११॥ पूर्वोत्तरपरिग्रहयोः संख्यां समुच्चित्य प्रशंसति । प्रजापतिः संवत्सरात्मकः संवत्सरकालभरणेन ज्ञातत्वात् यज्ञश्च श्रो श्रावयेत्यादिना [१.५.२.१६.] प्रजापत्यात्मकः ॥१२॥ व्याकृतयो मन्त्रावयवाः । पूर्वे परिग्रहे वान्तास्त्रयः गृह्णाम्यन्तास्त्रयः उत्तरपरिग्रहे अस्यन्ताः षट् ॥१३॥ गार्हपत्याहवनीययोर्मध्ये सा वेदिः कार्या । व्यामः प्रसारितकरद्वयान्तरललक्षणः । सवनत्रयादिरूपेण यज्ञस्य त्रिवृत्त्वम् । पन्नान्तरमाह नात्रेति ॥१४॥ वेद्यंसयोराहवनीयस्य स्पर्शं विधत्ते ॥१५॥ श्रोणितो विमृष्टं न्यूनमन्तरमवकाशो ययोः तथाविधावंसौ यस्याः सा । हस्तेन संगृहीतुं शक्या कृशोदरा ॥१६॥ प्राच्यां दिशि प्रवणं निम्नं यस्याः सा । अथो इति पन्नान्तरं द्योत्यते ॥ वेदेर्दक्षिणभागस्योत्खातैः पांसुभिरौत्तरत्यकरणं । नाद्भिः श्लक्ष्णीकरणम् । पुरीषं खातं पांसुम् । तदा तत्र सिक्तोदकवद्दक्षिणतोऽवस्थितं पितृलोकं क्षिप्रमियात् द्योक् चिरम् ॥१७॥ वेदिमार्जनप्रशंसार्थमितिहासमाह । आ समन्तान्मृतं सर्वदा नश्वरमामृतं तद्विपरीतं यद्देवयागाधिकरणभूतं स्थानम् इतोऽस्मात्स्थानात् तदा वयमेतत्स्थानं परित्यज्य तत एव चन्द्रमसि निहिते तस्मिन्नेव स्थाने पुनर्यज्ञं

कुर्वाणास्तेन यज्ञेनासुरान्पुनरभिभवेम । ईदृग्विधोपायज्ञनितहर्षद्योतको हन्तशब्दः ॥१८॥ वेदिकरणानन्तरं वज्रभूपाणां [see १. १. १७.] प्रोक्षणीनामासादनं यज्ञरक्षार्थं विधित्सुः प्रोक्षणीरित्यादिकं संप्रैषं विधत्ते । गुपू रक्षणे see पा° ३. १. ५०. । अथानन्तरमासादनसमकालमेवाग्नीध्रः स्फ्यमुद्यङ्न्विधारयति तदकृत्वा पूर्वं वेदिमध्ये निहितस्य स्फ्यस्योपरि सादनेऽप्स्फ्यलक्षणा वह्नी संगतौ भवेतां तेन च यजमानस्य बाधः स्यात् समेर् गम्यृङ्भ्यामिति [पा° १. ३. २१.] आत्मनेपदम् ॥२०॥ प्रतीकग्रहणेन विहितं संप्रैषमन्त्रं साकल्येनानुवदति । यजमानस्य पत्नीं योक्त्रेण संनह्य यत्प्रागग्रावधिश्रितमाज्यं तेनाग्नाक् । प्रोक्षण्यासादनादिकमन्येन कारयितुं कामयेत तदा एतत्संप्रैषवाक्यं ब्रूयात् । यदि तु स्वयमेव कुर्यामिति कामयेत ॥२१॥ द्विषतो बध इति मन्त्रेण स्फ्यं बहिर्वेर्युदङ्निरस्यति ॥२२॥ तत्खल्वस्या वेदेः खननादिकं क्रूरं कर्माभूत्तदनेन स्फ्यस्य निरसनेनास्या वेदेरहार्षीन्निरास्यत् तस्मात्पाण्योः क्रूरकर्मसंश्लेषादवनेजनेन शुद्धिः कार्या ॥२३॥ शृतानां हविषां यागात्प्राक् निर्मिताया वेदेश्च बर्हिःस्तरणात्पूर्वं स्पर्शनिषेधं विधित्सुः तत्सिद्ध्यर्थमितिहासमाचष्टे । अवमर्शं अवमृश्य संस्पृश्य । इतोऽस्माल्लोकात्प्रदीयमानं यज्ञविः तस्मात् ॥२४॥ ह आ इत्येति पदच्छेदनम् आगत्य ॥२५॥ यत्खलु देवानामर्थं परिषूतं परिगृहितं शुश्रुम तदेतदात्मक एष यज्ञः ॥ बर्हिषः स्तरणात्पूर्वमशान्ता सती सा वेदिः स्तोर्यमाणेन बर्हिषा खलु शान्ता भवति अतो बर्हिषः स्तरणात्पूर्वं यदि वेदिमध्ये किंचित्तृणादिकमापद्येत तदा तन्निरासार्थमपि तामशान्तां न स्पृशेत् किं तु स्तरणसमये बर्हिषः स्तरणं कुर्वन्नेव तत्तृणादिकं निरस्येत् तस्मिन्समयेऽध्वर्यवः पादेनापि तामभितिष्ठन्ति ॥२६॥ ५ ॥२॥

प्रोक्षणीरासादयेतिप्रैषमन्त्रानुसारेण [२. ५. २१.] प्रथमं प्रोक्षणीनामासादनमुक्तम् इध्मबर्हिषोरुपसादनं विशेषवक्तव्याभावात्सिद्धमित्यभिप्रेत्य क्रमप्राप्तं स्रुक्संमार्जनं विधत्ते ॥ मनुष्याणां भोज्यान्ने सूपशाकादौ पक्वे सति भोजनस्थाने च शोधिते तत्परिवेषणसाधनानि दव्यादीनि (दर्व्या?) पात्राणि अद्भिः प्रक्षालनेन शोध्यन्ते अतो मानुषव्यवहारविदानबादेव (निदा°?) व्यवहारस्य देवानामन्ने हविषि पक्वे (पक्वे?) वेद्यावा (वेद्यां च?) संस्कृतायां तत्परिवेषणसाधनानां स्रुचां संमार्जनं युक्तमिति यत्स्रुच इत्येवमन्तस्य वाक्यसंदर्भस्याभिप्रेतोऽर्थः ॥१॥ देवपात्राणां स्रुचां न मानुषपात्रवदद्भिः प्रक्षालनं केवलं कोरति किं तु संमार्जनेनैव सहितं प्रक्षालनम् निर्णिक्ताभिः स्रुग्भिः प्रचराणीत्यनेनाभिप्रायेण । आपो हि कुशाः see १. ३. ५. अतः कुशैः संमार्जने यज्ञियाभिरद्भिरेव प्रक्षालनं कृतवान्भवति ॥३॥ प्रथमं स्रुवस्य संमार्जनं विधातुं तस्यादानप्रतपने विधत्ते ॥४॥ see १. २. ३. ॥५॥ स्रुवस्यान्तरतो बिलमध्ये वेदाग्रैरिति प्राक् संमार्ष्टि संमार्जनप्रकाराभिनयार्थ इतशब्दः । अनुपरतः उपरतमप्राप्तः सन् । वाजो हविर्लक्षणमन्नं तदेव यज्ञः तदर्हत्वेन तद्वन्नम् वाजस्यान्नस्येन्धनं दीपनं भूयःकरणमनेन क्रियतऽइतिवाजेध्मा यज्ञः ॥ शुन्ध्वादीनां स्रुचां संमार्जनं विधत्तऽएतेनैवेति । प्राशित्राख्यो भागः ह्रियतेऽनेनेति प्राशित्रहरणं गोकर्णाकृति पात्रम् ॥६॥ अनेन प्रकारेण प्रागपवर्गं वेदाग्रैर्बिलमध्ये संमार्जनमनेन प्रकारेण प्रत्यगपवर्गमात्माभिमुखं बाह्यतः पृष्ठभागे वेदाग्रमूलैः । अयं प्राणवृत्त्यात्मको वायुः इतीव अनेन प्रकारेण प्राक्संचरति उदानवृत्त्यात्मकश्च इतीव अनेनैव खलु प्रकारेण प्रत्यक्संचरति इतिशब्दोऽत्राप्यभिनयार्थः अतः प्राक्प्रत्यक्सं-

मार्ष्टनाभ्यां स्रुक्तु प्राणापानावेव स्थापयति ॥ यस्माच्च स्रुचामुपरिभागस्य संमार्ष्टनं प्राचीनं पृष्ठभागस्य च प्रतीचीनं तस्मादरत्नेः उपरिभागस्य लोमानीतीव एवमेव प्राचीनानि भवन्ति पृष्ठभागस्य चेतीव इत्थं प्रतीचीनानि ॥७॥ स खल्वाग्नीध्रः तत्तत्संमार्गानन्तरमेव संमृष्टं पात्रं पुनरग्नौ प्रतप्याध्वर्यवे दद्यात् तदेतत्पुनः प्रतपनं लौकिकदृष्टान्तेनोपपादयति । यथा खलु कांस्यादिकं लौकिकं पात्रमवमृश्यावमृश्य निर्णिज्य प्रक्षाल्य उत्तमं चरमं क्रियाविशेषणमेतत् अतः अनवमर्शमवमर्शनमकृत्वैव केवलमुदकेनैव परितः अन्तरतो बाह्यतश्च सर्वतः क्षालयेत् एवं तत्संमार्ष्टनानन्तरं पुनः प्रतपनम् ॥८॥ प्राङ्मुख-इत्वाग्नेः सकाशाद्भूत्वा अग्नेरुपरि यथा संमार्ष्टनसाधनं कुशोदकादिकं न पतति तथा संमृज्जीत ॥१०॥ स्रुक्संमार्ष्टनानां वेदाग्राणामाहवनीये प्रहरणं शाखान्तराभिमतमुपन्यस्यति । यज्ञसाधनो हि वेदः संमार्ष्टनादावुपयुक्तत्वात् एतानि च वेदाग्राणि) तस्यावयवा अभूवन् अहेत्यवधारणे न केवलं वेदावयवत्वादेव वेदाग्राणां यज्ञियत्वमपि तु एभिर्वेदाग्रैः स्रुचः संमृष्टवन्त ऋत्विजः अतः इदं वेदाग्रजातं यज्ञसंबन्धि किंचिदङ्गम् यदि तदग्नेरन्यत्र निरस्येत्तदा तत् यज्ञाद्बाह्यतो भवेदग्नौ प्रक्षिप्तं हि यज्ञेऽन्तर्भवति । नैवेत्थं भवेदिति । तदेकीयमतं निषेधति । होमात्प्राक्संमार्ष्टनतृणानामग्नौ प्रहरणमयुक्तं तस्मादेतान्युत्करे प्रक्षिपेत् ॥११॥ प्रैषक्रमप्राप्तं पत्नीसंनहनं विधत्ते । गार्हपत्यानुष्ठेयेषु पत्नीसंयाजादिषु पत्न्याः संबन्धात्सा यज्ञस्यापार्धः । मदीयो यज्ञः प्रागपवर्गं विस्तीर्यमाणो गच्छेत् अतः परार्धमारभ्य यज्ञो विस्तारयितव्यः । अतो रथेऽश्वादीनामिव पत्न्या यज्ञेन सार्धं बन्धनम् युक्ता सा मदीयं यज्ञमनुलक्ष्य यज्ञसमाप्तिपर्यन्तमासीत न क्वयुक्तोऽश्वादी रथे नियमेनास्ते ॥१२॥ युगस्य धुरि बलीवर्दादियोजनार्थं दाम योक्त्रम् योग्यं योजनीयमनडुदश्वादिकम् । अयज्ञियस्य पत्न्या नाभेरधोभागस्य यज्ञियस्योपरिभागस्य मध्ये संनहनेन सांकर्यनिवारणात् यज्ञियेनैवोपरिभागेन विधास्यमानमाज्यावेक्षणं [see k. १८.] साधुकृतं भविष्यति ॥१३॥ परिहितस्य वासस उपरि ॥१४॥ तत्तस्मात्पृथिव्या इवास्याः राज्ञां रशनामलंकारार्थां मणिमुक्तादिखचितां मेखलामेव बध्नाति । हिरशब्दो मेखलापर्यायः ॥१५॥ योक्त्रस्य मूलाग्रे संयोज्यैकीकृत्य उपरिष्टाल्लम्बयेत्रेदग्रन्थिकरणाभावे योक्त्रं विस्रस्तं स्यात् ॥ संनहनसमये गार्हपत्यस्य नैर्ऋत्यां दिशि पत्न्या अन्वासनं विधित्सुः साक्षात्पश्चात्प्राङ्मुखोपवेशनं निषेधति । देवानां हि पत्नी गार्हपत्यस्य पश्चात्प्राङ्मुखी सर्वदा उपविशति अतस्तत्रान्वासीना पत्नीमामेव देवपत्नीमभ्यारोहेत्ततश्चाल्पकाले म्रियेत तत्स्थानवर्जनेन तु तां प्रीणयति तस्माद्देवपत्नीस्थानाद्दक्षिणभागेऽन्वासीत ॥१७॥ रेतसः पुरुषेणोपभुक्ताज्यपरिणामत्वात्कारणकार्ययोरभेदोपचारात्तादात्म्यं विहितम् ॥१८॥ आर्तिर्हिंसा तद्रहितेन ॥१९॥ आहवनीये हविःश्रपणपक्षश्चेत् [see १.२.२३.] आज्यं प्रथमतो गार्हपत्येऽधिश्रित्य पत्न्या सार्धं विलाप्य च पत्न्यवेक्षणानन्तरं ततः पुरस्तात् क्षुत्वा आहवनीयसमीपं च नीत्वा पुनस्तस्मिन्नधिश्रयति आज्यपुरोडाशादिलक्षणं सर्वमपि मदीयं हविः आहवनीये संस्कृतं भवेदित्यभिप्रायेण । अस्मिन्नपि पक्षे पत्न्यवेक्षणाद्येतास्तत्संनिधानाय अग्रे प्रथमतः पशुपुरोडाशाधिश्रयणकाले अमुत्र गार्हपत्येऽधिश्रयणं कर्तव्यमन्यथा [यदि पुरोडाशाधिश्रयणकाले एवाहवनीये आज्यमधिश्रयेत् तदा] गार्हपत्यसमीपे अन्वासीनायाः पत्न्यास्तदवेक्षणस्यानुपपत्तेः भिन्नदेशत्वात् यदि च पत्नीमेवेक्षयिष्यामीति तदर्थं सामि संस्कारमध्ये तत्प्रत्यक्ष पश्चात्पत्न्याः समीपं होत्तदा सं-

स्कारविघातः स्यादिति तस्याप्ययुक्तत्वात् यदि तु एतद्दोषपरिजिहीर्षया पत्नीं तत्रावेक्षयेत्तदाग्नेयाः पत्न्या यज्ञादत्तरायो भविष्यतीति तस्याः तदवेक्षणस्य प्रार्थनीयत्वात् । यस्य तु पत्न्या रजोदर्शनादिनिमित्तवशेन असंनिधानात्तदीयकर्माण्याज्यावेक्षणादीनि न क्रियन्ते तस्योक्तदोषाभावात्प्रथमत एवाहवनीये आज्याधिश्रयणं कार्यम् ॥२०॥ अतोऽस्मादेव खल्वाज्यादेवपत्नीनां यागः अतस्तत्संबद्धस्याज्यस्यात्तर्वेद्यासादने सति तंथव पत्नीरवसभाः अवगतज्ञानसमूहाः कोरोति यष्टव्यदेवसंघस्य वेद्यामवस्थानात् अहेति निपातो विनिग्रहे देवपत्नीनां तु सभाप्रापणादस्य यजमानस्य पत्न्यपि परःपुंसा स्वपुरुषादन्यत्र राजवीथ्यादौ पुरुषसमूहं प्राप्ता भवति ॥ तेषां मतं याज्ञवल्क्यमतेन दूषयति यथादिष्टं यथादेशनं यथाशास्त्रं पत्न्याः संबन्धि कार्यं भवतु ॥२१॥ see १. ३. ३-६. ॥२२-२४॥ ज्ञप्त्वा भक्षयित्वा see पा० २. ४. ३६. । यस्मादेवं गव्यं पयः परम्परया उदकरसपरिणामरूपं तस्मात्तत्कार्यस्याज्यस्यापां च यदुत्पवने संसर्जनं तदसस्यैव संपूर्णत्वाय कात्स्न्यर्य ॥२५॥ व्यतिरेत्र पश्यतिकर्मा ॥ ये एवं यजमानमवेक्षयन्ति ते स्वकीये यज्ञे कस्मादेव स्वयं यजमाना एव सन्तः अध्वर्यवो न भवन्ति कथं वा स्वयमेव होतारो भूत्वा याज्यानुवाक्यादीनि नानुब्रूयुः तत्परित्यज्य तेषां शाखिनामत्रैवावेक्षणं यजमानेनैव कर्तव्यमिति कस्मात्कारणात् अद्धा ज्ञाता । एवं तां अद्धां प्रहृत्य अध्वर्युनैव तदवेक्षणं कार्यमिति प्रतिपादयति । दक्षिणाभिः परिक्रीतवादृत्विग्भिः यत्फलमाशास्यते तद्यजमानस्यैवेति न तेन पृथगाशासनं कार्यम् ॥२६॥ अवेक्षणस्य करणं हि चक्षुः तच्च यथाभूतमेव वस्तु विषयीकरोतीति सत्यमेव देवलोकरूपमस्ति ॥२७॥ १ ॥३॥

अथ स्रुक्चपभृद्ध्रुवास्त्वेतस्याज्यस्य स्रुवेण ग्रहणं विधित्सुस्तत्समुदायस्य पुरुषावयवकल्पनया स्तुत्यर्थं तत्साध्यस्य यज्ञस्य पुरुषतादात्म्यमाह ॥१॥ तादृगवयवकल्पनिमभिनयेन दर्शयति । या स्रुक्सः सेयमयं दक्षिणो बाहुः योपभृत्सेयं वामबाहुः ध्रुवा आत्मा देहमध्यः । तस्माद्ध्रुवास्थस्याज्यस्य सर्वयागसाधारण्यम् ॥२॥ स्रुक्स्रादिषु सर्वासु स्रुक्षु स्रुवस्य संचरणमुपपादयितुं तस्य प्राणरूपतामाह ॥३॥ स्रुवस्य वायुरूपवाल्लोकत्रयात्मिकासु स्रुक्षु संचरणं युक्तम् ॥५॥ तासु स्रुक्षु आज्यग्रहणं विधित्सुः तस्य पुरोडाशादिहविरन्तरवत्प्रसक्तं देवतादेशनपूर्वकत्वं निवारयति । विस्तीर्यमाणो यज्ञः प्रथममग्न्यादिभ्यः प्रधानभूतेभ्यो देवेभ्यो विस्तीर्यते तत ऋतुभ्यः प्रयाजदेवताभ्यः छन्दोभ्यश्चानुयाजदेवताभ्यः ॥६॥ अथ तस्मिन्यज्ञे यदाज्यग्रहणं तत्प्रयाजानुयाजदेवतार्थं चशब्दादेव स्विष्टकृद्यागार्थं च तथा सति तदाज्यं देवतानामानादिश्य अनुक्ता आज्यस्वरूपसंबन्धिनैव रूपेण देवताया अनादेशनेन (see २. १. २२.) गृह्णन्ति ॥ स्रुक्सां चतुर्वारं स्रुवेणाज्यं गृह्णीयात् ॥७॥ ज्ञामितादोषराहित्याय । हविर्ग्रहणाज्यग्रहणयोर्देवतादेशने सत्येकरूप्येण (°ण!) ज्ञामिता स्यात्तमिमं दोषं विपक्षे दर्शयति ज्ञामि हेति ॥८॥ स्रुक्समनु भागी तस्य स्रुक्सभाग इत्यर्थः see पा० १. ४. १०. । तथा भोक्तृभोग्यस्य च क्रमेण भागौ ॥११॥ सार्वभौमो राजापारां निरवधिकां विशं राज्यं प्रावसाय प्राप्यापि एकगृहात्मनैव जयति स्वाधीनं करोति तत्र च एकमेकं वस्तु यथा कामयते तथा समवैति प्राप्नोति तदेतद्राज्ञः सामर्थ्यमेतेनैव वीर्येण जनितं यद्वीर्यं स्रुक्सा ग्रहणेन भोक्तुर्निष्पन्नम् ॥१४॥ अन्नराज्ञः सकाशात्पृथक् स्वतन्त्रा एव भवेयुः । रक्षार्थं क्षत्रियाधीनत्वे सत्येव वैश्यस्य धनसमृद्धिर्भवति । परः परस्तादन्यत्र गोप्यस्थाने निहितं यद्धनमस्ति ॥१५॥ सर्वे-

षां छन्दसामनुष्टुप्सकाशात्सृष्टेराम्नातत्वात्सा वागात्मिका वाचश्च सर्वज्ञगदुत्पत्तिहेतुत्वमाम्नातम् ॥ १६ ॥ शाखिनां समन्त्रकग्रहणस्य प्रत्येकं त्रिरावृत्तत्वमुपन्यस्य सकृत्त्वपक्षं निगमयति तदु न्विति अत्रापि हि ग्रहणस्य त्रिवसंख्या समाहारेण संपद्यते ॥ १८ ॥ २ ॥ ३ ॥

पूर्वभागे संनहनरज्ज्वोर्ग्रन्थिर्यथा भवति तथा ॥ ३ ॥ पूर्वदिग्भागे प्रस्तरमुष्टिं गृह्णीयात् आहवनीयनिकटे तद्ग्रहणाक्षिप्तामेव तस्मिन्स्थापयति । पिण्डीभावेन बद्धो मानुषः स्तुपः केशसंघातः शिरसः पूर्वभागे हि भवति अतो यज्ञस्यापि पूर्वभागे स्तुपधारणाय पुरस्ताद्ग्रहणं युज्यते ॥ ५ ॥ संनहनस्य विस्रंसने सति यजमानस्य स्त्री प्रकर्षेण क्लृप्तं दशमासं पूर्णावयवमपत्यं प्रसूयते । अस्य यजमानस्यैषा रज्जुर्नीविरेव भवति लोके हि वाससः परिधाने दक्षिणपार्श्वऽएव नीविः परिकल्प्यते तस्माद्दक्षिणश्रोणौ संनहनरज्जुनिधानं नीविपरिकल्पनमेव भवति । संनहनस्योपरि दर्भास्तरैश्छादनम् उपरिवाससा आवृतेव हि लौकिका नीविर्भवति ॥ ६ ॥ बर्हिषा वेदिं छादयति । योऽयं प्रस्तरः स ऊर्ध्वबद्धः केशसंघातात्मकः स्तुपः अथ तद्व्यतिरिक्तानि श्मश्रुप्रभृतीनि यान्यवाङ्मुखानि लोमानि स्तीर्यमाणेन बर्हिषा अस्य यज्ञस्य तान्येव संपाद्यन्ते ॥ ७ ॥ हविर्ग्रहणायागता ये देवा वेदेरुपरि तऽउपविशन्ति ये चं शुश्रुवांसः प्रयोगाभिज्ञा अनूचानाः अनुष्ठातॄरूपा ऋत्विजः समीपे वर्तन्ते ॥ ८ ॥ बर्हिष आहर्तरि यजमाने तद्बर्हिलस्तरणं कृतमुपनीवनीयतमबलक्षणं फलं भवति अधिशब्दो विभक्त्यर्थानुवादी ॥ एकं मुष्टिं वेदेः पूर्वभागे स्तोर्वा द्वितीयं मुष्टिं तन्मध्यमभागे पूर्वमुष्टिनासंबद्धं ततस्तृतीयं मुष्टिं वेदेरपार्धे द्वितीयमुष्टिनासंबद्धं स्तृणीयादित्येकः पक्षः पक्षान्तरमाहाथो इति । प्रवृश्च प्रवृश्च प्रथममुष्टिं वेद्यपार्धे स्तोर्वा तस्याग्रमुग्रम्याधस्तात्तत्संबद्धं द्वितीयमुष्टिं स्तृणीयादेवमेव तृतीयमपि एवं मुष्टित्रयस्य परस्परसंबन्धमृक्पादेन दृढयति (see वाजस° स° ७. ३२.) ॥ १० ॥ आहवनीयं क्लृप्तं हविर्दहनसमर्थं करोति । वेदेः पूर्वभागेऽवस्थानादाहवनीयो यज्ञस्य शिरः ॥ १२ ॥ परितो धीयन्तऽइति परिधयः पा° ३. ३. १२. इति कर्मणि किः । प्राधन्विषुः प्रागमन्प्रामृषत see २. ३. १. । अवकल्पयत मूर्तिसामर्थ्ययुक्तान्कुरुत ॥ १ ॥ प्रवर्ध्यति हिंसिष्यति ॥ २ ॥ युङ्क्थ युक्तान्कुरुत ॥ ३ ॥ परिधीनां बाह्यदेशे । अविष्यति तृप्तान्करिष्यति । हविः स्कन्नमिति यत्तदागः स अपराधो न भवति ॥ १६ ॥ तत्तत्रैवं नामोद्देशेनाभिमर्शने कृते सति यथा वषट्कारेण प्रत्तं हविः तस्यै देवतायै ज्ञतं भवति एवमेवास्य यजमानस्य एतेषु भुवपत्यादिनामकेषु परिधिरूपाग्निषु तत्स्कन्नं हविर्ज्ञतमेव भवतीत्यर्थः ॥ १७ ॥ इध्मस्येत्यवयवावयविसंबन्धार्था षष्ठी इध्मस्य अवयवभूतान् । अग्निसमिन्धनाय होध्मः क्रियते अतस्तदवयवानां समिन्धनसामर्थ्यमेव न तु परिधानसामर्थ्यमस्ति तस्मादिध्मानन्नैतानन्यानेव परिधीनध्वर्यव आहरेयुः ॥ १८ ॥ अग्निवायूवादित्यरूपेण हिरण्यगर्भस्य ब्रह्मण एवावस्थानादग्निरपि ब्रह्मात्मकः ॥ १९ ॥ २० ॥ ३ ॥ ३ ॥

मन्त्रः स्पष्टार्थ इत्यभिप्रेत्य ब्राह्मणेन न व्याख्यायते ॥ २ ॥ पूर्वाघारसमिधोऽभ्याधानं विधत्ते । वायव्यां दिशमारभ्याग्नेयदिग्भागपर्यन्तमविच्छिन्नधारया होमः पूर्वाघारः स च यत्र परिसमाप्यते तत्रैकं समिधमादध्यात् तत्र धर्मविशेषमाह अभ्याधानात्पूर्वं मध्यमं परिधिं तया समिधा संस्पृशेत् ॥ ५ ॥ उत्तराघारसमिधोऽभ्याधानं विधत्ते । द्वितीयाघारो नैर्ऋतीं दिशमारभ्यैशानीं दिशं प्रति वर्तते ॥ ७ ॥ अदःशब्दो विप्रकृष्टार्थवाची विप्रकृष्टेऽनुयाजप्राक्कालेऽभ्या-

धानायैका समिदवशेषितव्या तस्या अभिधास्यमानमभ्याधानमनूद्य प्रसंगात्तस्य प्रयोजनमाह ॥१॥ एवमाहवनीये कर्तव्याः परिधिपरिधानादयो विहिताः अथ वेद्यां हविरासादनार्थं प्रस्तरस्तरणं विधित्सुस्तदर्थं विधृत्योः सादनं विधत्ते । आहवनीयसमीपादुद्बर्हिषा स्तीर्णां वेदिमुपावृत्य बर्हिषः सकाशादूर्ध्वे तृणे आदाय बर्हिष उपरि तिर्यगग्रे निदधाति । प्रस्तरो हि यज्ञस्य स्तुपः केशसंघातः बर्हींषि श्मश्रुप्रभृतीनि लोमानि तथा च प्रस्तरबर्हिषोर्मध्ये तिर्यङ्निहिते एते तृणे भ्रूस्थानीये ॥ विधृत्यै विविधं धारणाय इतरथा हि प्रस्तरबर्हिषोः सांकर्यात् क्षत्रियवैश्ययोरपि सांकर्यः स्यात् ॥१०॥ तत्तत्र विधृत्योरुपरि ॥११॥ प्रस्तरस्योपरि सव्यं हस्तं निदध्यात् स्रुक्स्रुवादीनां सादनपर्याप्तम् ॥१२॥ स्रुक्मादाय प्रस्तरे सादयेत् न तु ग्रहणमात्रं मन्त्रस्य सादनलिङ्गत्वात् ॥ ततः स्रुगाज्यव्यतिरिक्तं हविः पुरोडाशादिकं सादयेत् ॥१४॥ प्रस्तरस्य ॥१५॥ आसन्नानि हवींषि ॥१५॥ ४ ॥३॥

अथेध्मेनाग्निसमिन्धनहेतुभूताः सामिधेनीर्विधास्यन् तासां नाम निर्वक्ति । सामिधेनीभिः प्र वो वाजा इत्यादिभिर्ऋग्भिः ॥१॥ इध्मेन संदीप्यमानायाग्नये तत्समिन्धनार्था या ऋचो वक्तव्याः ताः सामिधेनीरनुब्रूहीत्यध्वर्युसंप्रैषार्थः ॥२॥ प्रवरात्पूर्वं सामिधेनीरनुब्रुवाणस्य होतृत्वं नास्ति यदा खल्वेनं प्रवृणीते अग्निर्देवो दैव्यो होतेति [see ५.१.५.] अथानन्तरमेवासौ होता भवति अतः सामिधेन्यनुवचनसमये होतृत्वाभावात् होतरनुब्रूहीत्यपार्थकम् ॥३॥ अग्निदेवत्या ऋचः सामिधेनीरनुब्रूयात् ॥४॥ त्रिवृता हि देवा इति श्रुतेस्तदीया यज्ञाः प्रारम्भपरिसमाप्त्योस्त्रिरावृत्तियुक्ताः । यज्ञलिङ्गवादत्रापि ॥६॥ पञ्चदशस्तोमस्येन्द्रस्य च सह प्रजापतिबाङ्मसकाशादुत्पत्तिः इन्द्रसंबन्धाद्ब्रह्मोऽपि पञ्चदशस्तोमात्मकः ॥ सामिधेनीरभीति अभिरभागेऽइति [पा° १.४.९१.] लक्षणे अभिः कर्मप्रवचनीयः कर्मेति [पा° २.३.८.] द्वितीया ॥७॥ भवन्वर्धमानः ॥८॥ उपरिष्टाद्दर्शपूर्णमासयोरिति [k. ११.] विशेषणात् वाक्यशेषे च तं काममनपराधं राध्नोतीति कामप्राप्तिश्रवणात्तद्विकृतिभूता काम्येष्टिरत्रेष्टिशब्देन विवक्षिता अत एवापस्तम्बो दर्शपूर्णमासव्यतिरिक्तेष्टिपशुबन्धानां सामिधेनीसाप्तदश्यं सूत्रयामास ॥ अथ तासां कामेष्टीनां प्रधानयागस्योपांशुत्वं विधत्ते ॥ हेमन्तशिशिरयोरेकीकरणेन संवत्सरस्य पञ्चर्तवः । अनपराधमविकलम् ॥ उपांशूच्चारणस्य पार्श्वस्थानामर्थविशेषाप्रत्ययकत्वादनिरुक्तत्वम् अनिरुक्तं च विशेषनिरुक्तिविरहात्सर्वात्मकम् ॥१०॥ दर्शपूर्णमासयोरेव पक्षान्तरं विधाय प्रशंसति । मासापेक्षया य एकविंशः सूर्यः तमेव गतिप्रतिष्ठारूपं सामिधेनीनामेकविंशतिसंख्यया प्राप्नोति ॥११॥ इमं च पक्षमधिकारिविशेषे नियक्ति । गता प्रांक्षा यस्य श्रीः तस्यैव यजमानस्य नान्यस्य ॥ गतश्रीव्यतिरिक्तस्यापीमं पक्षं कर्तव्यत्वेनाशंक्य निरस्यति । यो यजमानः श्रैष्ठ्यं नैकृष्ट्यं च न कामयेत स तादृङ् तत्प्रकारविशिष्ट एव भवति यादृशाय यथोपलब्धप्रकारेण नियतेन ते होतारः सामिधेनीरन्वाङ्गः । यस्य खल्वेवमनियतमनुवचनप्रकारं विदुषो यजमानस्य एता एकविंशतिसामिधेनीरन्वाङ्गः स पापीयान्वा श्रेयान्वा भवति ॥ य इक्षेत्र श्रेयानित्यादिना योऽर्थः प्रतिपादितः सो विचार एव कवलं न तु तथानुवचनं कार्यम् ॥१२॥ कथं तर्ह्यनुवक्तव्यमित्यत आह त्रिरिति । अनवानन्नन्नुक्कसन् । तन्निसृणामृचां संतानं लोकत्रयसंतत्यै भवति । संतनोति संदधाति । स्पृणुते प्रीणयति बलयति वा ॥१३॥ अस्य होतुः यावदनुवक्तुं स्ववशः शक्तिः स्यात् । सामि ऋङ्मध्ये । यथाशक्त्य-

नुवचनपक्षे एषैव निन्दा ॥१४॥ एतद्यथाशक्त्यनुवचनं निन्दायुक्तावात्स होता यदा न कामयेत तदा एकैकामृचमनुकूसत्रनुब्रूयात् ॥१५॥ क्रिदून्वेषणशीलाय रात्तसादये प्रवेशोपायभूतं द्वारं न प्रयच्छति । उपतिष्ठते प्राप्नोत्यनेनेत्युपस्थानं प्राप्तिसाधनद्वारम् ॥१६॥ ५॥३॥

तस्मिन्सामिधेन्यनुवचने धर्मविशेषं विधत्ते । हिं इति शब्दमुच्चार्य ॥ सामरहितस्यायज्ञवाङ्निंकारप्रणवयोः सामावयवत्वात्सामिधेनीषु तत्कारणेन सामिधेनीयुक्ताः सर्वोऽपि सामवान्यज्ञः संपद्यते । ओमोमिति वीप्सया सर्वासु सामिधेनीषु स्थितस्य प्रणवस्यानुकरणम् ॥१॥ सामिधेनीनां लिङ्गविशेषं विधत्ते स वाऽएतीति । आ इति एति प्र इति प्रेति आङुपसर्गयुक्ताः प्रोपसर्गयुक्ताश्चर्चोऽनुब्रूयादित्यर्थः । आङुपसर्गो ह्याभिमुख्ये वर्तते प्रशब्दस्य पराङ्मुखत्वेऽपि वृत्तिरस्ति । देवयजनान्निष्क्रम्य पराङ्मुखो प्रवर्तमानैव गायत्री द्युलोकं प्रति यज्ञं वोढुं शक्नोति नार्वाचो । सा तु संनिधानान्मनुष्यान्वोढुं शक्नोति अतो लिङ्गद्वययुक्ता एवानुवक्तव्याः ॥४॥ प्राणस्य परावृत्तित्वात् उदानस्यान्तःप्रवेशवृत्तित्वात् ॥५॥ पशूनां तृणादिभक्षणाय यद्वनं प्रति परागमनं तत्प्रशब्दार्थः यच्च सायमागमनं तदाकारस्यार्थः । सर्वज्ञगत्प्रगमनस्वभावमावर्तनस्वभावं च ॥६॥ आयाहीत्यनेन यदस्मान्प्रत्याभिमुख्यगमनं प्रतिपादितं तत्स्वर्गवासिदेवापेक्षया परागमनमेवेत्येतिलिङ्गमपि प्रेतिलिङ्गं संपद्यतऽइत्येकीयमताभिप्रायः । तदेतद्दूरधिगममायाहोत्युक्ते यस्मादागमनमेव शीघ्रं श्रुत्वारोहति न तु प्रगमनम् ॥७॥ युशब्दो दिनवचनः [निघ° १.९.] दिवसानभि गता इति व्युत्पत्त्या अभियव अर्धमासाः ॥ क्षीरदध्याज्यादिहविर्जनकत्वात्तद्वत्तः ॥९॥ घृतशब्दोच्चारणस्याग्निसमिन्धनेऽतिशयितमानुकूल्यमाज्याग्निकया दर्शयति ॥ माधवो मधुनाम्नः पुत्रः विदेघो नाम राजा स्वमुखे विश्वनरहितमग्निं धारयामास ॥१०॥ ऋङ्मन्त्रैस्तस्य मुखगतमग्निं स्तुवन् तं विदेघमाख्यातुं निश्चितवान् ॥११॥ विदेघाः इति श्रुतिः असूयार्था ॥१२॥ तस्मिन्समये माधवश्च तापशमनाय सरस्वत्यां नद्यां निमग्नोऽभूत् सोऽग्निस्तस्मात्स्थानादारभ्य प्राङ् दहन्निमां सर्वां पृथिवीमभितो व्याप्नोत् । प्राचीनं दहतोऽस्य पुरस्तात्सदानीरा नाम नदी उत्तरा उदक्प्रवाहा एति गच्छति तया च व्यवहितः सोऽग्निः एनमग्निं सापि निःशेषेण धारयति इतस्ततो गमनं निवार्य धारितवती स चाग्निस्तां नदीमितरनदीवन्नातिददाह न अतिशयेन ददाह शोषयामास । अत एव सदा सर्वदा नीरं जलमस्यामस्तीति व्युत्पत्त्या सदानीरेत्युच्यते । तथा च निघण्टुः [अमर° १.२.४७. see Wilson Vishnupur, p.183.] कारतोया सदानीरा बाङ्गदा सैतवाहिनीति । तां ह नदीं पुरा तद्दहनोत्तरकाले ब्राह्मणा न तरन्ति न स्पृशन्ति अग्निदाहाभावेनाविप्लुतत्वात् ॥१३॥ तस्या नद्याः प्राग्देशः सर्वोऽप्योदानीं ब्राह्मणवासः । तच्च स्थानमतिशयेन निवासायोग्यं बभूव तथा स्रावितरं भग्नभाण्डे निक्षिप्तनीरवत्तद्देशेऽनुष्ठितं यज्ञदानादिकमतिशयेन स्रवणशीलं फलप्रदानासमर्थम् यतो वैश्वानराग्निनानास्वादितमतस्तत्स्थानमपवित्रम् ॥१५॥ ज्ञघन्ये निकृष्टे सर्वरसवर्जिते नैदाघे ग्रीष्मसंबन्धिकालेऽपि संयक् कोपयति बङ्गजलतया प्रकुपिता भवति ॥१६॥ स च माधवः अग्निं प्रतीक्ष्योवाच ॥ इति पृष्टे सोऽप्यग्निरनुवाच ॥ यस्मादेवं माधवायाग्निरदात्तस्मात्ते विदेहदेशाः अपि माधवा (माधवाः!) इत्युच्यन्ते ॥१७॥ यस्माद्घृतशब्दोच्चारणेनाग्निः प्रज्वलितो बभूव तस्मात्कारणात्सामिधेनीषु यत् घृतप्रातिपदिकयुक्तं पदं तत्सामिधेनीनामेवाग्निसमिन्धनहेतुर्भवति ॥२०॥ त-

स्मादूघृताच्ये[त्ये]तत्पदं सामिधेनीषु युक्ततरमिति निगमयति ॥ सुम्नं सुखं स्वर्गादिलक्षणमात्मनऽइक्षतीति सुम्नयुः । गा स्तुतौ । जिगीषति जेतुमिक्षति । देवान् स्तुत्या जिघांसति हन्तुं प्राप्तुमिक्षति । हन्तिरत्र गत्यर्थः तस्माज्जिगीषतीति व्याख्यानं युज्यते । अङ्कनगमां सनीति [पा° ६. ४. १६.] सनि दीर्घत्वम् ॥ यन्नामविशेषैरनिरुक्तं तत्सर्वात्मकम् ॥२१॥ वीतयऽइति पदं व्याख्यातुमितिहासमाह ॥ यथोर्ध्वबाङ्गना शाखाग्रं स्पृश्यतऽइति एवमेव द्यौरपि हस्तस्पृश्येव बभूव ॥२२॥ वितरामतिशयेन विप्रकृष्टाः । विश्लिष्टा इतिः वीतिः । तथा च वीतयऽइत्यस्य विविधमानायेत्यर्थो भवति ॥ एतां वीतयऽइति पदेन युक्तामग्नऽआयाहीत्यादिकाम् ॥२३॥ हविषो दाता हव्यदातिः ॥२४॥ तृतीयां सामिधेनीमनूद्य व्याचष्टे । अङ्गिरसो महर्षयो यदग्निं समिद्धमकुर्वन् तस्मादग्निरप्यङ्गिर इति संबोध्यते ॥ इतरे येऽङ्गारा आसुस्तेऽङ्गिरसोऽभवन्निति अङ्गिरसामङ्गारपरिणामरूपवादङ्गिरःशब्दाभिधेयता अङ्गिरोऽप्यङ्गारवद्रूप इति युक्तं तस्याप्यङ्गिरस्त्वम् ॥२५॥ यविष्ठो युवतमः नित्यं तरुण अजरणः ॥२६॥ अदः विप्रकृष्टं द्युस्थानं यस्मिन्देवाः सर्वे वसन्ति । अवणीयं प्रशस्यम् । देवेषितं द्युलोकरूपं स्थानमक् अभिलक्ष्य विवावसि प्रकाशय ॥२७॥ ईडेन्यः स्तोतव्यः नमस्यो नमस्कर्तव्यः । तमांसि तिरस्कृत्य ॥२९॥ ऋक्समन्त्रे यन्नेति पदं तदोमिति अङ्गीकारार्थतया प्रतिपत्तव्यम् ॥३०॥ ईड स्तुतौ ॥३१॥ दीदेतिः दीप्तिकर्मा छान्दसो धातुः दीदयेव दिदीपऽइव ॥३२॥ अग्निविशेषणभूतेनापि वृषंकब्देनेन्द्रोऽप्युपस्थाप्यते वृषंकब्दस्य तन्नामधेयत्वात् अतो वृषंकब्दयुक्तस्य तृचस्यानुवचनादितरयज्ञवत्सामिधेनीनामपीन्द्रसंबन्धः सिध्यति ॥३३॥ योत्स्यमानांस्तान्निवारयितुं गायत्री मध्ये प्रादुर्भूता सेयं पृथिव्येव । मेरोरग्रभागे हि अमरावती नाम नगरी तस्यां हि देवाः तथा मेरोरधस्ताद्भागे च यत् इरामुखं नाम नगरं तस्मिन्ह्यसुरा निवसन्ति तयोर्मध्ये पृथिवी वर्ततऽइति हशब्दद्योतितशास्त्रप्रसिद्धिः । मत्रि गुप्तभाषणे धा° ३३. ६. । असुररक्षसमसुरविरोधि रक्षः समासान्त अप्रत्ययः रक्षःशब्दस्य नियतनपुंसकबात्तत्समासान्तस्यापि तथात्वम् ॥३४॥ यद्यपि होतारमिति होतृशब्दो द्वितीयान्तः तथापि होता ऋमित्यपि श्रुतिसामान्यात्प्रतीयते स च ऋंशब्दो यशब्दपर्यायः [!ऽलंश°] बालमूललघ्वलमङ्गुलीनामिति [पा° ८. २. ८. वा° २.] लवस्य विकल्पितत्वात् स च शब्दोऽत्र निवारणार्थः आत्मानं निवारणविशिष्टं नैव ब्रवाणीति पाठान्तरमनुब्रुवतामभिप्रायः तं दूषयति । होतारमित्यार्षं पाठं परित्यज्य होता य इति पाठविपरिणामस्य मनुष्यबुद्धिप्रभवतया मानुषत्वम् ॥३५॥ निदानेन मूलकारणेन विचार्यमाणा ॥३६॥ यत्र सप्तदश सामिधेन्यः तत्र पृथुपाङ्क्तास्तं सबाधऽइति द्वे धाय्याख्ये ऋचौ सामिधेनीषु प्रक्षेप्तव्ये तयोः स्थानं पूर्वोत्तरपक्षाभ्यां दर्शयति । पुरस्तादष्टम्याः पूर्वम् । अत्रं च तदाद्यं च अत्राद्यमिदं धाय्यारूपं मुखप्रदेशऽएव धारयाम इति वदन्तः । अनवक्लृप्ता असमर्था । ऊर्ध्वं द्वयोर्धाय्ययोः प्रक्षेपात् अग्निं हृतमित्यष्टमी दशमी संपद्यते तथा चाष्टमीवदङ्गेन गायत्री वाऽएषा निदानेनेति प्रतिपादितं गायत्रीवदसमर्थं स्यात् तस्मात् समिध्यमानवतीसमिद्धवत्योर्मध्ये धाय्ये प्रक्षेप्तव्ये सा च समिध्यमानवती पाश्चदश्ये नवमी साप्तदश्ये अष्टम्या सहोत्कर्षात् एकादशी संपद्यते ॥ उभयत्र वाशब्दश्चार्थे ॥ उक्तमापस्तम्बेन समिध्यमानवतीं समिद्धवतीं चान्तरेण पृथुपाङ्क्तवत्यौ धाय्ये दधातीति ॥३७॥ तस्या दशम्याः सामिधेन्याः प्राक् अनुयाजार्थायाः समिधः यदन्यत्सर्वम् अस्मिन्नेव समये

इध्मशेषस्य सर्वस्याभ्याधानम् एतर्हि हि होता अग्नेः समिन्धनं परिसमापयतीव समिद्ध इत्यनेन समिन्धनस्य भूतवप्रतिपत्तेः ॥ अतिरिक्तं शत्रुवर्धनहेतुः ॥३८॥ अत्तिमां सामिधेनीमनूद्य व्याचष्टे ॥३९॥ अध्वरशब्दो हि सोमयागे रूढः स चात्र दर्शपूर्णमासविषये मन्त्रेण प्रस्तूयतऽइति सोमयागेन यावदेव फलं प्राप्नोति तावद्दर्शपूर्णमासयागेनापि ॥४०॥ १ ॥४॥

सामिधेन्यनुवचनानन्तरमग्ने महां असीति निगदस्यानुवचनं विधित्सुस्तत्प्रतिपाद्यायाः प्रशंसायाः कर्तव्यतां तदुपोद्घातत्वेन प्रतिपादयति ॥ हविर्वहनार्थं गुरुतमे तस्मिन्होतृत्वे अग्निं योजयित्वा तस्योत्साहं जनयितुमस्तुवन्ननया च स्तुत्या तमग्निं वीर्ये संयक्स्थापितवन्तः ॥१॥ स त्रेधात्मानं व्याकुरुताग्निं तृतीयं वायुं तृतीयमित्यादिश्रुतेः ॥२॥ होतृकर्तृप्रवरो विधीयते ॥३॥ तत्र धर्मविशेषमाह परस्तादिति । तस्मिन्नार्षेयप्रवरणे कूटस्थमृषिमारभ्य तत्पुत्रपौत्रादिक्रमेणार्वाचीनं वरणं कर्तव्यम् यथा आङ्गिरस बार्हस्पत्य भारद्वाजेत्यादि तथा च ज्यैष्ठ्यस्य पतये एवैतं निह्नुते अनेन प्रवरणेन निवेदयति ॥४॥ देवेद्ध इत्यादिनिवित्पदानां स्पष्टोऽर्थः ॥५॥ आस्यरूपं पात्रमास्पात्रम् । अग्नौ प्रक्षिप्तस्य हविषो देवैरश्यमानत्वादग्नेरेव पात्रत्वम् । यस्य खलु भोज्यस्य वस्तुनः संबन्धि पात्रं प्राप्तुमिच्छति तत्प्राप्नोत्येवंवेदिता ॥१३॥ निवित्पदानन्तरमावाहननिगदमप्यनूद्य पदशो व्याचष्टे ॥१६॥ दर्शपूर्णमासयोरुभयत्र योऽग्निः पुरोडाशदेवता तदावाहनानन्तरं निर्वापसमये यस्यै देवतायै येन क्रमेण निरूप्तं तेनैव क्रमेण तस्याः अग्नीषोमावावहेत्यादिवाक्यैरावाहनं कार्यम् ॥ कर्मवाचिना प्रयाजानुयाजशब्देन तत्सम्बन्धिनो देवा लक्ष्यन्ते तेषामाज्यमेव हि भागाः द्रौहविषभृतयोराज्ययोस्तद्ग्रविष्ठश्रवणात् ॥ अग्निं होत्रायेत्यनेन स्विष्टकृतोऽग्नेरावाहनं विवक्षितम् ॥ आ च वहेति वाक्येन प्राक्प्रतिपादितस्याज्यभागादिदेवतानां सर्वासामावाहनस्य निगमनम् ॥ असुष्या अनुक्रमेण सम्यक् ॥१७॥ अनुवाक्या हि द्युलोकरूपा तिष्ठंश्च द्युलोकसंबन्धो भवति अतोऽनुवाक्या तावत्तिष्ठतैवानुवक्तुं योग्या अनुवचनसाम्यात्सामिधेन्यादिकमपि तिष्ठतैव पठितुं युक्तम् ॥१८॥ इयं पृथिव्यात्मिकैव याज्या ॥१९॥ २ ॥४॥

सामिधेनीभिर्ऋग्भिः समिद्धस्याग्नेः लौकिकाग्निसकाशादतिशयमाह । राक्षसादिभिर्धर्षितुं स्प्रष्टुमशक्यः ॥१॥ अथैताः सामिधेनीः प्रत्येकं तत्तल्लिङ्गोपन्यासेन प्राणापानश्रोत्रादिकरणग्रामविशिष्टात्मसंस्कारहेतुतया प्रशंसति । प्रगमनयुक्तत्वात्प्राणः प्रशब्दवान् प्राणवृत्तिर्हि इडापिङ्गलाभ्यां प्राचीनं निर्गच्छति । बहिर्निर्गतस्य वायोरात्माभिमुखी वृत्तिरपानः उदानवायुर्देहस्योत्क्षेपणादधिकतेजोयुक्तः ॥३॥ वनीवाह्यते भृशं वहति देवान् शीघ्रं प्रापयति ॥६॥ अन्तस्था अन्तरवस्थिता । प्राणापानादिपञ्चवृत्त्याश्रयभूतो यः क्रियाशक्त्यात्मको देहमध्येऽवस्थितः प्राणः तमनया दीपयति अस्माच्च प्राणादारभ्य अन्ये प्राणाश्चक्षुःश्रोत्रादय ऊर्ध्वाश्चरन्ति अन्ये पायूपस्थयोन्यादयोऽवाञ्चः ॥८॥ अभिलषितस्त्रीविरहे अतिशयेन शोकहेतुत्वात् शोचिष्केशशब्देन पुंव्यञ्जनं लक्ष्यते तथा च एतत्कल्पवत्यैतयर्चा आनन्दव्यापारस्य उपस्थाख्यस्येन्द्रियस्य समिन्धनं कृतं भवति ॥९॥ तत अनन्तरमेकादश सामिधेनीः तदनुवचनसमये शपतो द्वेष्यस्य प्राणापानादिवियोजनहेतुत्वेन प्रशंसति । प्रथमायामनूच्यमानायामेनं होतारं यदि द्वेष्यः शपेत् अनुव्याहारः शाप इति हि धूर्तस्वामी भाष्यकारः तं प्रति होता ब्रूयात् एतर्हि आत्मनः स्वसंबधिनं प्राणं हे शत्रो अग्नौ निहितवानसि तेन च प्राणेन नि-

मित्तेन पीडां प्राप्स्यसीति ॥११॥ मनसो मोषणं विपरिलोपस्तेन गृहीतः अत एवातिशयेन मूढः [मूल्ढः B. गूढः A. गूढः C.] ॥१६॥ उध्नायेति [उध्ना C.] उध्नमनम् [उध्नानम् A. उधानम् C.] ऊर्ध्वश्वसनं [! ऊर्ध्वश्वस° A. C. ऊर्ध्वं वंस° B.] तत्प्राप्येत्यर्थः ॥१८॥ अपिनद्धो बन्धुयुक्तः ॥२०॥ न्येति नितरां प्राप्नोति ॥२२॥ ३ ॥४॥

अथाघाराख्यौ होमौ विधातुं सिद्धमर्थमनुवदति ॥१॥ चनशब्दोऽप्यर्थे । स्वाहेत्यपि शब्दं न ब्रूयात् ॥५॥ उपवहं वहप्रदेशोपरिश्लिष्टमौन्नत्यकरं दारु लौकिकाः कुर्वन्ति ॥७॥ आहवनीयस्य दक्षिणभागे असुरान्प्रति उक्षितवत्तः । उक्षितं पर्वतादिकमिव वीर्यमपि उरासदम् । आघारयोर्दक्षिणोत्तरपरिधिसंधिमारभ्योभयतः कारणम् ॥८॥ यद्वृक्षादीनां मूलं तन्नूष्णोमिव हि अदृश्यमानत्वात् ॥१०॥ एवमाघारयोः प्रतिनियतधर्मान्विधायानुष्ठानक्रमं विधत्ते । पूर्वाघारानन्तरं नोत्तराघार अपि तु अग्निमग्नीदित्याग्नीध्रं प्रति संप्रेषं ब्रूयात् अग्निमाहवनीयम् रथादिवहने अनडुदश्वादिकं योक्ष्यमाणास्तदीयस्कन्धस्योपरि युगधुरमध्युह्य पश्चात्पार्श्वयुर्युञ्जन्ति बध्नन्ति अतो धुरोऽध्यूहनस्थानीयः पूर्वाघारहोमः ॥१३॥ परिक्रम्य परिक्रम्य तत्तत्परिधिदेशं गत्वा तदनुसारेणाग्निं संमार्ष्टि । एकैकस्मिन्परिधौ संमार्जनस्य त्रिरावृत्तिं विधत्ते ॥१४॥ परिधित्रयानुसारेण परितोऽग्निं संमृज्य तदनन्तरमग्नेरुपरिष्टान्नूष्णीं त्रिः संमृज्यात् प्राञ्चेत्प्रेरयेत आघारयोर्मध्ये संमार्जनस्य कारणान्तद्व्यवधाने सति मनश्च वाक्चैतदुभयं समानविषयं समानाश्रयमपि भिन्नमिव भवति ॥१५॥ ४ ॥४॥

शुष्कपभृतोः पूर्वभागे । तदतिक्रमजनितमपराधं तन्नमस्कारेण शमयति ॥१॥ हवीर्नूपेण वेद्यामवस्थितो यज्ञोऽत्र विष्णुशब्देन विवक्षितः दक्षिणातिक्रमवेलायां तस्यातिक्रमशंका मा भूदित्यर्थः ॥२॥ यत्र स्थिवाधुर्युर्जुहोति तत्र तस्यान्तिकमिति नेदीयस्त्वव्यपदेशः ॥३॥ विद ज्ञानऽइत्यस्माच्छान्दसो लङ् सिपि दश्चेति [पा° ८. २. ७५.] दकारस्य ऋवे वेरिति नूपम् । स्विष्टकृत् शोभनयागस्य कर्ता ॥४॥ होमानन्तरं प्रत्याक्रम्य ध्रुवासमञ्जनम् । ध्रुवयेति ध्रुवामित्यर्थः ध्रुवास्थस्याऽयस्य सर्वयज्ञसाधारण्याद्यज्ञस्य मध्यदेह एव ध्रुवा । आघारशेषस्य तस्यां समञ्जनाक्रिय एव तस्मिन्प्रति दधाति । अर्धस्य देशभागस्य ग्रामादेः ॥५॥ ध्रुवामनु ध्रुवाभागो यजमानः उपभृद्भागः शत्रुः । उपभृतेति द्वितीयार्थे तृतीया ॥६॥ ध्रुवापेक्षया इतरा शुष्कः ॥७॥ प्राजापत्यस्य पूर्वाघारस्योपांशुवं प्रतिपादयितुं मनोवाग्भ्यां कृतं संवादमुपन्यस्यति । अहमेव भद्रः अहमेव भद्र इति स्वस्वोत्कर्षविषये ॥८॥ प्रश्नं प्रति प्रजापतिं जग्मतुः ॥११॥ विसिष्मिये विगतस्मया भग्नवीर्या बभूव । गर्भः देवमनुष्यादीनामुत्पत्तिहेतुः । अहव्यवाट् हव्यवहनस्याहेतुभूतैव ॥१२॥ तत्र एतत् वाचः सकाशात्पतितं रेतः चर्मणि अन्यस्मिन्वा यस्मिन्कस्मिंश्चित्पात्रे देवा धृतयत्तः भूत्वा च तत्प्रतिदिवसं पृक्षन्ति अत्रास्मिन्पात्रे किमेतत्प्रसिद्धं रेतः कथम्भूतमिति विचारयन्तः । विचार्यमाणानामिति [पा° ८. २. १७.] प्लुतः । अत्रैव त्याऽइदिति यस्मादेवैर्विचारितं ततस्तस्मात्स गर्भोऽत्रिः संबभूव । यतो गर्भाशयात्सृतो गर्भोऽत्रिः संपन्नः तस्मात्सृतगर्भा रजस्वला स्त्रीनाम्नात्रेयीत्याख्यायते तया योषिता सह संभाषणादिकं कुर्वन्पुरुष एनस्वी [एव स्त्री ABC] भवति । तैत्तिरीयकेऽप्याम्नातम् तन्मलवद्वाससा न संवदेत न सहासीतेति ॥ ननु यस्या गर्भोऽत्रिः संजातः सैव वागात्रेयी सर्वस्त्रीणां कथमात्रेयीत्वमित्यत आह स्त्रीरूपधारिण्या एतस्याः खलु वाग्देवतायाः एते लौकिकाः सर्वे गर्भाः सं-

भूताः गर्भाशयलक्षणे चर्मणि धृतं रेतो हि गर्भात्मना परिणमति तच्च वाक्संबन्ध्येवेति सिद्धं सर्वासामात्रेयीत्वम् ॥ १३॥ ५ ॥४॥

चतुर्थे सामिधेन्यादिराघारान्तः प्रदर्शितः प्रयोगः पञ्चमेऽस्मिन्प्रवरादिर्निरूप्यते । तत्र दैवहोत्रार्षेयमानुषहोतॄणां वरणं विवक्षुरादौ तदङ्गतयाश्रावणं विधत्ते ॥ १॥ आश्रावणाङ्गतयेध्मबन्धनदर्भाणां ग्रहणं विधत्ते । एवकारो वक्ष्यमाणपक्षद्वयनिरासार्थः । वेपनः कम्पनशीलः ॥ २॥ स्तरणसमिन्धनलक्षणस्य कार्यस्य कारणादिदं बर्हिरादिकं यज्ञस्य किंचिदङ्गम् ॥ तन्निराकरोति इध्मसंनहनाग्निसंमार्जनलक्षणकार्यद्वयकरणादेतदिध्मसंनहनात्मकमेव यज्ञस्य किंचित्प्रशस्तमङ्गम् अतस्तद्वारणपक्ष एव श्रेयान् ॥ ३॥ अथ देवहोतुरग्रेवरणं विधत्ते अग्रे आर्षेयवरणमानुषहोतृवरणाभ्यां पूर्वम् ॥४॥ विद्वानित्यनेन यष्टव्यदेवतापरिज्ञानम् चिकिद्वानिति परिज्ञातस्यार्थस्याविस्मरणम् अनुष्ठा अनुक्रमेण ॥ ६॥ नभोऽङ्गिरोमनुषां वत्युपसंख्यानमिति [पा° १. ४. १८. वा° २.] भसंज्ञया लुबभावः ॥७॥ ऋषीणां संबन्धिनमध्वर्युर्होतारं वृणीते ॥ १॥ ब्रह्म परिवृढं कर्म तत्साधुकृद्वदग्निरपि ब्रह्म स यथा आवहति तद्वत् ॥ ११॥ साङ्गवेदाध्ययिनोऽनूचानाः प्राविताः कर्तारः अवतिस्तत्क्रियावचनः ॥ १२॥ असावित्यत्र होतुर्नाम प्रथमान्तं निर्दिशेत् ॥ see ३. ५. ३. ॥ १३॥ हे सवितः सकलकर्मानुज्ञातर्देव एतदेतेन मम वरणेन मद्व्याजेन त्वामेव वृणतेऽध्वर्यवः । तेन मन्त्रपाठेन सवितुरनुज्ञा लब्धा भवति । होतुः कर्म होत्रम् इह हौत्रं कर्तुमग्निं वृणते न तु मामित्यर्थः ॥ १५॥ होता ऋनुवाक्याः पठिष्यन्याज्याभिर्यक्ष्यंश्च भवति ॥ १६॥ रातिर्दानं धनं लभेम । उर्व्यायामुरुत्वे महत्त्वे । सुप्रीतादित्या वयमदितये देवमात्रे अपापिनः अनपराधिनो भवेम अथ वा दितिः खण्डनं नाशः तदभावाय चिरकालजीवनाय भवेम ॥ १७॥ अनुब्रवदनुब्रूयात् ॥ १८॥ यथा सर्वेऽपि नरा आ सर्वतः शंसन्ति तथाविधशंसनाय प्रियाम् । अथ साधारण्येन नराणां यो ज्ञोष आशंसितः स युक्त एव न हि केवलं तद्धौत्रज्ञानामेव संलाषोऽपेक्षितः अपि तु यो शुष्टां वाचं जानाति यश्च न सर्वैरप्ययं साधु उक्तवानित्येवंरूपा वाचो (पया वाचा ABC.) विसृज्यन्ते उच्चार्यन्ते ॥ होतृवर्ये होतृवरणे । अमायि हिंसितमभूत् ॥ २०॥ अग्न्यादीनामुरुत्वं लोकसिद्धम् ॥ २२॥ संमर्शनदेशाद्धोतृषदनं प्रत्यागन्तुम् । परागतं वसु यज्ञाख्यं धनं यस्मात्स ॥ २३॥ अर्वा अर्वाक् अभिमुखं धनं यस्य स ॥ २४॥ हे विश्वकर्मन्महादेव त्वं शरीरस्य पाता भवसि ॥ उपवेशनस्थानादीषदुत्तरतश्चलनं समन्त्रकं विधत्ते हे उभावग्नी युवां मा मामुत्कृष्टमाधिक्येन मैषिष्टं दाहं मा कार्ष्टम् उष दाहे यतो लोकः स्थानं त्वां संबन्धी अतो हेतोर्मा मा हिंसिष्टमिति प्रार्थना युक्ता । होतृषदनादुदङ्मुखमेजति एजृ कंपने ॥ २५॥ the explication of यथेह-भागधेयं is wanting in ABC. । यथा लोके कश्चित्पाचकः तत्स्वामिनं पृच्छति पक्वमन्नं यथा आनेष्यामि यथा वा आनीतं पात्रे समर्पयामीति ॥ २६॥ १ ॥५॥

अथ स्रुगादापननिगदं नवधा विभज्य व्याचिख्यासुरार्षं भागमनूद्य तस्यार्थमाह । वेदितव्यस्य मन्त्रे अनिर्देशात् इदमिति तत्कर्मप्रदर्शनम् इदमनुष्ठेयं कर्म वेत्तु जानातु । तस्य हौत्रेण प्रतिनियतं संबन्धमाह तस्यो हि तस्यैव हि स च संबन्धनियम एवकारार्थेन उशब्देन द्योत्यते । प्रकर्षेणावतीति प्रावित्रो यज्ञः । घृतपूर्णां स्रुचमास्यस्व हस्ते धारय उपसर्गादस्यत्यूह्योर्वेति [पा° १. ३. २१. वा° ३.] आत्मनेपदम् ॥ १॥ मन्त्रे स्रुचमित्येकस्या एव नि-

र्देशं द्विवनिर्देशपत्तनिन्दापुरःसरं दूषयति । प्रत्युद्यामिनं प्रतिकूलोद्योगवन्तम् ॥२॥ देवानिङ्कृतीति देवयुः विश्वैरपि देवैर्वरणीया विश्ववारा । कुशलादिस्तुतिमात्रेण प्रायेण परितोषादीतरेन्या मनुष्याः । हविःप्रदानमन्त्रेणापरितोषादेवा यज्ञियाः ॥३॥ देवमनुष्यात्मकासु प्रजासु मध्ये याः प्रजा यष्टव्यत्वेन यज्ञमन्वभजन् तं प्रकारमाह । यज्ञसंस्पर्शवतां न कदाचित्पराभवोऽस्ति तदसंस्पृष्टं च न किंचिदस्तीति यज्ञस्तुतिः ॥४॥ निगदविभागगतां नवसंख्यां प्रशंसति । व्याकृतय उक्तवाक्यानि तानि च नव सप्त शीर्षण्या द्वाववाञ्चाविति ॥५॥ अथाश्रावणप्रत्याश्रावणे विधातुमाख्यायिकामाह ॥६॥ अध्वर्युकर्तृकमाश्रावणमाग्नीध्रकर्तृकं प्रत्याश्रावणम् । स्वर्गाख्यफलोदयात् वीजत्वं यज्ञस्य । अध्वर्व्वादयः सम्यक् प्रदाय-प्रदाय एकोऽन्यस्मै सोऽप्यन्यस्मा इत्येवं प्रकारेण यज्ञमनुतिष्ठन्ति यज्ञमानमनपेक्ष्य तस्य तत्र व्यापाराभावात् । यथा ज्ञलैरापूर्णं घटादिपात्रं गृहान्तर्गतप्रभूतभाण्डपूरणसमये परस्परहस्तेन संचरन्ति तद्वत् ॥७॥ अथ संग्रहेणोक्तं यज्ञसंप्रदानं विशिंषन्नध्वर्व्वादेः स्वस्वकालेषु मौनं विधत्ते । होतारं प्रत्यनुब्रूहीत्युक्ता प्रस्तुतानुपयोगि वचनं न ब्रूयात् होताप्यनुवचनद्वारेण वाग्यूपयज्ञस्य स्वस्मिन् (ज्ञः स्वस्व° B. ज्ञः स्व AC.) समावेशात् न व्याहरेत् ॥८॥ स वषट्कारेणेति सोऽध्वर्युः होतृकृतेन वषट्कारेण हविःप्रदानसाधनेन अग्नौ योनिभूते रेतोभूतं हविः सिञ्चति ॥ अथ सोमविषयं वाङ्नियमं प्रतिज्ञानीतेऽथेति ॥११॥ यदा उद्गातार स्तोत्रं प्रारभेरन् तावदध्वर्युर्ग्रहणादनन्तरं नापव्याहरेत् ॥१२॥ तऽउद्गातारोऽपि यदाध्वर्युरुपावर्तध्वमिति ब्रूयात्तदानीं तस्य यज्ञस्तान्याप्नोति अतः प्रभृति उक्तमास्तोत्रियापर्यन्तं न वदेयुः ॥१३॥ होतापि यैषान्तिमा च स्तोत्रियेति यदा प्रज्ञापयन्ति तदा प्रभृति न वदेत् ॥१४॥ यथा पूर्णपात्रमभिमतप्रदेशे घटादिषु प्रक्षेपमकृत्वा अन्यत्र परासिञ्चेत् । संविदानाः ऐकमत्यं प्राप्ताः स्वस्वकर्तव्यमेकाग्रेण ज्ञानन्तः । एवं सत्येकोऽप्यृत्विङ्न मुह्यति स्वानुष्ठेयं न विस्मरति । भर्तव्यः पोषयितव्यः ॥१५॥ आश्रावणादिपंचकमनूद्य प्रशंसति । यज्ञोऽपि पाङ्क्तः धानाः करम्भ इत्यादिहविर्गतपञ्चसंख्यायोगात् पाङ्क्तः पशुः चत्वारः पादाः शिर एकमिति वा लोमवङ्क्रमांसास्थिमज्ज्ञभेदेन वा ॥१६॥ समप्लावयन् सर्वत्र व्याप्तानकुर्वन् ॥१८॥ यदीष्ट्या सौर्यादिकया फलान्तरसाधनभूतया यजेत तत्र वा ॥१९॥ चरुपुरोडाशादिना विशेषेण राजतऽइति विराट् वेत्यात्मिका पृथिवी सा धेनुत्वेन प्रकल्प्यते । स्तनपानाय वत्सस्य कण्ठगतं पाशं व्यश्लेषयन् । अपरिवीतं वत्समूर्ध्वमूधसोऽभिमुखमनयन् । उपासीदन् दोहाय गोः समीपे स्थिताः । य एतदाश्रावणादिकमवं दोहात्मकतया ज्ञानाति ॥२०॥ २ ॥५॥

प्रयाज्ञान्विधित्सुर्निर्वचनद्वारेण तान्प्रशंसितुमाख्यायिकामाह । एतस्मिन्दर्शपूर्णमासात्मके यज्ञे प्रज्ञापतौ आश्रावयास्तु औषडित्यादिसप्तदशात्मकस्य प्रज्ञापतेर्यज्ञरूपत्वात् यज्ञे प्रज्ञापताविति सामानाधिकरण्यम् ॥२॥ स्वं पयः प्रतिनियतधनरूपं क्षीरं । पयःकार्यत्वादाज्यमपि पयः गोमहिष्यादीनां संवत्सरपर्यन्तप्रायेण दोहात्मत्वम् ॥५॥ अभितरामु वै शत्रोरत्यन्तमभिमुखं खलु अग्नावपि ईषदीषत्पुरस्तादाक्रम्य भुञ्जयात् ॥६॥ आश्रावणस्य प्रदानाङ्गतया तयोः प्रदेशैक्यलाभादित्यभिप्रायात्पत्नीत्वमाह यत्रोऽएवेति । आहवनीयमध्ये यस्मिन्नेव प्रदेशेऽग्निं प्रज्वलितं मन्येत तत्र पत्न्याप्याङ्क्तोर्भुञ्जयात् यस्मात्समिद्धाग्निदेशहोमाद्दाङ्क्तयोऽपि प्रदीप्ताः फलज्ञाननसमर्था स्युः ॥७॥ हे होतः समिन्नामिका अग्निमूर्तीः प्रति तासां यागाय या-

ऽयां पठेति प्रैषार्थः ॥८॥ ऋतवो ह वाऽइत्यत्र [k. १.] संघशो विहिताः पञ्च प्रयाजाः तेषु-कैकं विधाय प्रशंसति ॥ अवृश्चत स्वैर्लब्धवादसुरेभ्यस्तं वर्जितमकुर्वन्। वसन्ते निखिलवृक्षाणां कुसुमाद्युद्गमेन प्रदीप्ततास्ति ॥१॥ यदिदं क्षुद्रकं प्राणिजातं सरीसृपं कृकलासगोधादिकं ग्रीष्महेमन्ताभ्यां नितरां परित्यक्तं शरीरक्षीणं भवति तत्सर्वं वर्षाः द्वितीयाबहुवचनं ताः प्रति ईडितमिव अहो विनष्टप्रायं सत् इदानीं पुनश्चेष्टतऽइति सर्वैः प्रशंसितमिव अन्नं स्वोचितं तृणशलादिरूपमिष्यमानमिष्टां कुर्वत् इतस्ततश्चरति वर्षासु तृणशलादिसमृद्धिसंभवात् ॥११॥ आस्तृतदर्भवर्हिरे शेरते ॥१२॥ पराध्यः परस्मिन्नर्धभागे भवः ॥१३॥ प्रयाजमन्त्रेषु ॥ एकस्य पुंसो ज्ञायाबहुत्वं संभवति स्त्रियाश्चैक एव पतिः ॥१५॥ चतुर्थे बर्हिराज्ये प्रयाजे होतव्ये सति उपभृतः सकाशाऽज्ञुह्वां समानयत्याऽध्वर्युः। अभ्यावृत्याभ्यावृत्य कर्मवशाद्देहसंबन्धं प्राप्नुवन्ति ॥१६॥ संयत्तयोः युद्धाय प्रयतमानयोः ॥१७॥ उपभृतः सकाशादाऽध्वर्युस्यानेताध्वर्युः शत्रोः सकाशात् बलिमुपायनद्रव्यम् यजमानाय प्रदापयति ॥१८॥ उत्तरामुपभृदुपरीतनीं कृत्वा स्रुचं विधारयेत् ॥२०॥ हन्त विजितमेव। अनु तदनुसृत्य एतस्मिन्नेवावसरे प्रयाजे सर्वप्रयाजव्यतिरिक्तं सकलमपि यज्ञं संस्थापयाम नेदस्माकं यज्ञं समापनात्प्रागेव असुरा आगच्छेयुः ॥२१॥ उभयत्राच्युतः अमावास्यायां च पौर्णमास्यां च नित्यः ॥२२॥ पौर्णमास्याममावास्यायां च विष्णुरग्नीषोमौ प्रजापतिश्चेति विकल्पिता उपांशुयाजदेवताः एकादशकपालदेवता अग्नीषोमौ अमावास्यायां चोभयत्र साधारणोऽष्टाकपालदेवोऽग्निः इन्द्राग्नी एकादशकपालदेवता दधिपयोदेवते इन्द्रमहेन्द्राविति या दर्शपूर्णमासप्रधानदेवताः सन्ति ता अनतिक्रम्य तत्तद्देवताकं यागं समस्थापयन्नित्यर्थः अत्र देवतानामनियतत्वाद्यथादेवतमिति संग्रहेणाभिधानम्। यातयामा निर्गतसारः ॥२३॥ स इत्यनर्थको वाक्यालंकारार्थः। प्रयाजहोमेभ्योऽवशिष्टमाज्यम्। यथापूर्वमित्याग्नेयोऽग्नीषोमीयादिति हविषां पूर्वं पूर्वमनतिक्रम्य। पशोः पुरोडाशस्य वाज्यव्यतिरिक्तस्य हविषोऽवत्तम् ॥२५॥ ३॥५॥

अथ प्रयाजान्प्रकारान्तरेणानूद्य प्रशंसति। प्राणोपाध्यभावे शरीरसंबन्धायोगात्तेषां पुरुषसमिन्धनहेतुत्वम्। समिधः प्राणत्वसमर्थनाय प्रासङ्गिकं नैमित्तिकमभिमर्शनमाह तस्मादिति। यजमानो ज्वरादिनोपतापवान्यदि स्यात्तदाध्वर्युः समिद्यागसमये प्राणप्राबल्यायात्मनाभिमृशेति यजमानं ब्रूयात् यावदाशंसेत अस्योपतापः शाम्यतु ॥१॥ हेमन् हेम्नि हेमन्ते। प्रतितरामिव अत्यन्तं प्रतिकूला-इव हिमोपहतपत्रत्वादुपक्षीणा-इव। अर्धे भागे देशे ॥५॥ इत्थं प्रयाजान्प्रशस्य तदनुमन्त्रणमन्त्रान्विधातुमाख्यायिकामाह। वाग्रूपऽएव मन्त्रे विवदमाना ऊचुः तुमिङ्कामहै। नोऽस्माकं वाचमस्माभिरुक्तां पुल्लिङ्गवचनं मिथुनेन स्त्रीलिङ्गान्तप्रतिवचनाभिधानेन मिथुनं कृत्वा यः अनुक्रमेण नितरां न आक्रामति स सर्वं पराजयं प्राप्नुयात् ॥६॥ एकः पुत्रः एका पुत्री ॥७॥ उक्तार्थज्ञानं प्रशंसति पञ्च-पञ्चेत्येवेति ॥१६॥ ४॥५॥

अथ वसन्तादिप्रयाजदेवेषु कथमग्नेः संबन्ध इति तदुपपादनायाख्यायिकामाह। ईषिरे ऐक्षन् ॥१॥ तेषु यामृद्धिं देवाः श्रुत्वा व्यथन्ते तादृशीमेधतुमृद्धिमसुरेषु प्रवर्धयां चक्रुः तेषु प्रवर्धितेषु सत्सु असुराः के चन वपनात्पूर्वं वृष्टिबाहुल्यात्कृषन्तो यन्ति किल के चन कृष्टे क्षेत्रे वीजानि वपन्तो यन्ति उप्तवीजाश्च के चन सस्यानि सम्यक्फलितानीति परस्परमुच्चारयन्तः परिपक्वानि सस्यानि लुनन्तो यन्ति के चन लूनानि व्रीहिफलानि मृणन्तः प्रहरन्तः खले

बलोवर्दाक्रमणादिना स्तम्बाद्यान्यं पृथक्कुर्वन्तः । तथा असुरदेशे कंलुखर्षानपेक्षिता [! BC. सुरहेशेकेलुख A?] नोवारादयो मुञ्जर्मुञ्जः सर्वदा परिपक्वा आसन् ॥३॥ अतोऽस्मादृवतिक्रमाद्धेतोः असुरसंघो देवसंघाय शात्रवमाचरितुमिच्छति एतत्कनीय इत्तु निकृष्टं खलु अतः प्रवृद्धैः सह कलहो न कार्यः किं तु यथा इदमृवतिक्रमलक्षणं विक्षिप्तं कार्यमन्यथा भवेत् एतावन्मात्रमबबुध्यध्वम् ॥४॥ अस्य ज्ञातुरहं समान इति स्वात्मानं ब्रुवाणः कश्चित्पुरुषो यत्पुण्यं कर्म दर्शपूर्णमासादिकं करोति तत्रासावपि भागवान्भवति ॥८॥ आवाहनक्रमेणैव सर्वत्र यागो दृष्ट अत्र कथं वैलक्षण्यमिति ब्रह्मवादिनामाशयः तैर्दृष्टं तत्कारणं दर्शयति उत्तमान्होति । यस्मात्प्रथमभागकल्पनासमये एनानुत्तमान् चरमभाविन एव देवाः कल्पितवन्तः पश्चादपगतानां तेषां पुनरागमनाय यतो युष्मान्प्रथमान्यज्ञामेत्यब्रुवन् तस्मादुक्तविधं वैलक्षण्यं संजातमिति अत्रैषामावाहनात्तिमवं देवानाज्यपानावहेत्यभिधानाद्दृष्टव्यं (see 8. २.१७.) आज्यपाः खलु प्रयाजानुयाजदेवाः ॥१॥ आदिमध्यावसानेषनुष्ठेयानामाज्यभागप्रधानस्विष्टकृद्यागानामग्निदेवताकवमभिधातुमाह । चतुर्थप्रयाजेनैव पुरा देवाः दर्शपूर्णमासाख्यं यज्ञमाप्त्वा तं पञ्चमेन समस्थापयन् तत्र यष्टव्यान्देवान्क्रमेणोद्दिश्य स्वाहाकृतवात् । यदत ऊर्ध्वं यज्ञस्यावशिष्टमाज्यभागाद्यस्ति तेन स्वर्गं लोकं समाश्नुवत ॥१०॥ आसिसंक्षत्रासङ्गं प्रतिबन्धमैक्षन् ॥१२॥ एतं यजमानं प्रति यदि निन्दको यज्ञस्य पूर्वभागे वैकल्यविषयं वाक्यं ब्रूयात्तं प्रति स यजमानोऽपि ब्रूयात् ॥१६॥ स्वदृषकात्स्वयं परः उत्कृष्टो भवति ॥१८॥ संवत्सरं खलु जयति प्रयाजैः जयन् ज्ञितप्रकारः पूर्वाध्याये उक्तः । योऽस्य संवत्सरस्य द्वाराणि जानाति स खल्वेवैनं जयति नानभिज्ञः । यान्प्रयाजानन्तरतः मध्यतो हि न व्यवजानाति ते च यथा येन प्रकारेण अस्योपकारका भवन्ति (न व्यवजानाति) सोऽनुष्ठाता तैर्गृह्यमाणैरनुष्ठेयैः प्रयाजैः किं साधयेत् । the explanation of तस्य - प्रपद्यते is wanting ॥१९॥ आज्यदृव्यं प्राजापत्यवेन प्रशंसति । प्रजापतेः सकलदेवतासमष्ट्यात्मकवेन अयमसाविति निर्वक्तुमशक्यवादनिरुक्तावम् ॥२०॥ अध्वर्युः पुरोडाशस्थापनदेशमाज्येनास्तृतं कृवा हविःपुरोडाशादूद्विरवदायावत्तस्योपरि आज्यमभिघारयति । यथैव खलु अन्ने सदः सदसो देवयजनस्य संनिधाविष्टं साङ्गं स्यात् एवमाज्यस्य यजमानदेवत्यवप्रकारं जानतो यजमानस्य देशात्तस्थस्यापि भवति व्यवधानदोषो नास्तीत्यर्थः । पापमङ्गभ्रंशादिलक्षणं ॥२१॥ १ ॥६॥

आग्नेयं पुरोडाशं विधातुमाख्यायिकामाह । इमां क्षितिमिदानीं परिदृश्यमानप्रकारं स्वर्गजयम् । धीवा पीवा यथा सरघा मधु निःशेषेणास्राव्य गतसारं परिशेषयन्ति एवं यज्ञं विदोहं कृवा तं यूपेनाक्राय तिरोहिता अभवन् ॥१॥ अनुश्रुतप्रकारं पुनरनुवदति । see ऐतरेयब्राह्म° २.१. शतपथब्रा° ३.२.२.१२. । तं यूपेन योपितं यज्ञमृषयोऽन्वेष्टुमन्वेषणे मतिं कृवा ॥२॥ तदन्वेषणेन अन्वेष्टव्यं पूजयन्तोऽन्वेषणप्रयासेनात्मानं खेदयन्तः इतस्ततः संचेरुः देवा ऋषयश्च हि पूर्वं क्षेतुं शक्यमर्थं श्रमेणैव जयन्ति । अथ तदन्वेषणे एतेषां देवा अपि रुच्युत्पादनमकुर्वन् (? मुध्युत्पा° A. B. C.) तेऽपि स्वयमपि तदर्थं मतिं कृवा परस्परं यूपं प्रगल्भामेत्युक्ता किं तव मतं किं तव मतमिति ब्रुवाणाश्चेरुः परिभ्रम्य च कूर्मरूपं धृवा सर्पन्तं पुरोडाशमा इत् आजग्मुः आ इत्युपसर्गश्रुतेर्योगक्रियाध्याहारः । ते सर्वेऽपि अयं कूर्म एव अस्माभिरन्वेष्टव्यो यज्ञ इति निश्चिताः ॥३॥ प्रोचत रुचिमुदपादयत् । तमसृजन्त उदपादयन्

तमेवाङ्गकलापैर्विस्तारितवन्तः ॥ यथा पराभावी सन्कस्यचिदुपादिष्टः सन्मुखादन्यस्योपदेशनात् अयमेव अवरः पश्चाद्भावी भवति तथानुक्रमेणोच्यते । उपनीतस्यैव वेदविद्याधिकारादब्रह्मचारिणऽइत्युक्तम् ॥४॥ पुरोडाशं नामनिर्वचनद्वारेण स्तौति । यतः स कूर्मरूपेणाकृन्तो मनुष्यैर्दृष्टस्ततः यागसमये पुरः पूर्वस्मिन्काले यज्ञमुखे अदाशयत् फलमदापयत् तथा यः पुरोडाशः एभ्यो मनुष्येभ्योऽर्थं यज्ञं प्रोचयत् ॥ स उभयत्र दर्शे पौर्णमास्यां च नित्यं कर्तव्यो भवति ॥५॥ उभयसाधारण्यमेव स्थापयति । यज्ञसाधनत्वात्पुरोडाशो यज्ञ एव स उभयकालोऽपि तयोः पूर्वकाले क्रियते ॥६॥ अस्या आग्नेयेष्टेर्ऋद्धिफलार्थं पृथक्प्रयोक्तव्यतामाह । एनमध्वर्युः (र्युम्?) एतयैव आग्नेयेष्ट्यैव । तमग्निं बङ्धा प्रशंसति यस्यै कस्याऽइति ॥७॥ अज्ञातमामतिशयेन प्रत्यक्षफलदम् ॥१॥ अथ पृथक्प्रयोक्तव्याया आग्नेयेष्टेर्वैशेषिकमङ्गज्ञातमाह । यदीष्टिं दर्शपूर्णमासात्पृथगेव कुर्वीत । see ३.५.१०. । प्रधानदेवता उपांशु यजेत तदुपांशुत्वं काम्येष्टिरूपं खलु । मूर्धन्वत्यौ (see पा° ४.४.१२७.) अग्निर्मूर्धा भुवो यज्ञस्येत्येते [वाजस° स° १३.१४.१५.] मूर्धन्शब्दवत्यौ प्रधानस्य याज्ये । स्विष्टकृद्याज्यापुरोऽनुवाक्ये विराजौ विराट्छन्दस्के प्रेद्धोऽग्नऽइमो(?)ऽग्नऽइत्येते [वाज° स° १७.७६. and ?] भवतः ॥१२॥ २ ॥६॥

अग्नीषोमीयमेकादशकपालं विधातुमाख्यायिकामाह । see शतप° ५.५.४.२-८. ॥१॥ वदेकस्मिन्नङ्गे घृतविन्दवः परिदृश्यन्ते वत् एकत्र अङ्गे मधोर्विन्दव इव पर्णेषु चटकपक्षेषु आश्रुतिताः आक्तं (?) प्राप्ताः । जठरमावयत् अवतिरवगत्यर्थः (! अयति° A.B.C.) अगमयत् ॥५॥ असाविन्द्रो मे पुत्रं कुवित् बङ्प्रकारमवधीदिति क्रुद्धो भूत्वा अपेन्द्रमेव इन्द्रेण विरहितमेव सोममाजह्रे स च सोमो यथापेन्द्रः प्रसुतः प्रदानेऽप्यपेन्द्र एवाभूत् ॥६॥ शुक्रः शोधितः सोमः ॥७॥ अथ स वष्टा मम सोममतिप्रसुतमनाकारित एवापिबदिति क्रुद्धः सन् स्वयमेव नष्टस्य यज्ञस्य यज्ञवेशसं यज्ञहिंसापरिहारं कृतवान् प्रवर्तयामास ज्ञतवान् स च ज्ञतः सोमः अग्निप्राप्तिसमकलऽएव पुरुषरूपेण संबभूव । केचित्प्रवर्तनसामर्थ्यात् अग्निमस्पृशन्नेव मध्ये संबभूवेत्याङ्गः । स च संभवन्नग्नीषोमावेवाभि व्याप्नुवन्भक्षयन् संबभूव न केवलं जगत्कारणभूतौ तावेव किं तु लोके या विद्या यद्यशो यददनीयमन्नं या च श्रीः तानि सर्वाण्यभिलक्ष्य भक्षयन् संबभूव ॥८॥ सर्वं व्याप्य वर्ततऽइति वृत्रः । सर्पसाम्यादहिः । रक्षणाय परिजगृहतुः ॥१॥ स वष्टा ग्रहप्रचारसमये (ग्रहप्रचार° C.) इन्द्रशत्रुरिति पूर्वपदोदात्ततयेन्द्रः शत्रुर्यस्येति बङ्व्रीहिसमासं कृत्वा मन्त्रं प्रयुक्तवानतस्तमिन्द्रो जघान । यद्यसौ अन्तोदात्ततया तत्पुरुषसमासेन वा इन्द्रस्य शत्रुरिति व्यस्तंनिर्देशेन वा ब्रूयात्तदा निश्चितमेव स इन्द्रं हन्यात् ॥१०॥ इषुमात्रं धनुषः सकाशाद्बलात्प्रमुक्तेषुर्यावद्दूरं गच्छति तावन्मात्रं प्रतिक्षणं तिर्यक् उभयपार्श्वतः अवर्धत । प्राक्पश्चात्समुद्भावपि शरीरवृद्ध्या अवाक्चकार । यावद्यावत्प्रवृद्धं आस तावत्तावत्प्रवृद्धान्नभक्षक एवाभूत् ॥११॥ इन्द्रस्तु वृत्रशरीरवृद्धिक्रमानुसारेणैवेषदीषत्प्रणुन्नो दूरऽएव चरन्नोदनमसहमानो वृत्रमनुगतावग्नीषोमावित्यमुपमन्त्रयामास ॥१३॥ ततो वृत्रवदननिर्गमनादावयोः किं फलं लब्धं स्यात् ॥१४॥ तावनु सर्वेऽपि वृत्रमुखान्निर्गता देवाः निरीयुः । यदिदमिदानीं परिदृश्यमानप्रकारमिन्द्रस्य सर्वाधिपत्यमस्ति तदग्नीषोमीयैकादशकपालयागेनेष्टभवत् । एष एव वष्टुर्हं वेत्युपक्रम्य पौर्णमा-

स्यामसाधारणयेनानुष्ठेयस्य हविषो बन्धुः बन्धकोऽर्थनियामकः एतदेव ब्राह्मणमित्यर्थः ॥१५॥ दृतिस्त्वि चर्मनिर्मितपात्रमिव स यथा संल्लीनः संकुचितकुक्षितनुः पतति एवं संल्लीनो (संप्लीनो B.) भूमावशयिष्ट । तथा निर्धूतसक्तुका (निर्धू° A.) भस्त्रा चर्ममयी संलीना (संल्लीना B.) तद्वत्संलीनः (संल्लीनः B.) शेते कुक्षिगतानां सक्तुस्थानीयानां देवानामुदकस्थानीयानामसृगादीनां च स्रावात् ॥१६॥ इदानीमेतत्सर्वं त्वं भवसि पूर्वं यदहमभवम् अतो व्याकुर्वेव शरीरं द्विविधमा सर्वतो भग्नं कुरु विदारय । अमुया इदानीमनुभूयमानप्रकारया स्थित्या मा भूवं सर्वदा न भवामीति । यद्वस्तु सौम्यं श्रेष्ठं स्रुतमासीत्तं चन्द्रमसं चकार प्रतिनिर्देशापेक्षया पुंलिङ्गता यदसुर्यमसुरेभ्यो हितमुक्तिष्टमासीत्तेनेमाः सर्वा अपि प्रजाः उदरप्रदेशेन अयुध्यत् (B. अयुध्ययत् A. C.) तद्रूपेणोपस्थापयामास । तस्माद्यः कश्चिद्यदि ब्रह्मत्वं भक्षयेत्तर्हि तदा सर्वेऽपि ज्ञना इदानीं वृत्र एतर्हि अन्नाद आसीदित्याङ्गः । असौ चन्द्रः पूर्वपक्षे चन्द्रस्याप्यायनप्रकार उपरिष्टाद्वक्ष्यते see ६. ४. १५. ॥१७॥ प्रयाजानन्तरं वक्तव्यौ तावाज्यभागौ अग्नीषोमीयपुरोडाशप्रसङ्गेन विधातुमाह । यतो वृत्रदेहान्निर्गतयोर्युवयोरिदं पुरोडाशद्रव्यं प्रातिस्विकमभूदतो युवामेव प्रभूतभागभाजौ भवथः युवयोर्मध्येऽस्मानपि अन्वाभजतम् ॥१८॥ निर्वपान् निर्वपेयुः यष्टारः तत्र च निरूप्तप्रधानदेवताभ्यः पूर्वमाज्यभागं यजेयुः । निर्वापाभावादेव पशुसोमयोरप्राप्तस्याज्यभागस्य पुनर्निषेधेनैष्टिकमाज्यभागविधानं स्तूयते यथा दशमाध्यायस्याष्टमे पादे द्वितीयाधिकरणे (but where? in the Mîmânsâsûtra?) न सौम्येऽध्वरऽइत्यत्र किं निषिध्यते उत पर्युदस्यते अथार्थवाद इति त्रेधा विकल्प्यार्थवाद इति सिद्धान्तितम् ॥१९॥ एतद्वैतेनैव खलु कारणेन सर्वेऽपि देवास्त्रेधा त्रिप्रकारेणाग्निसोमेन्द्रात्मका एकदेवत्या एकैकदेवतार्था अभवन् । अग्न्यादीनामेकदेवबलक्षणश्रेष्ठबपरिज्ञानेन स्वयमपि स्वकीयानां मध्ये एक एव श्रेष्ठो भवति ॥२२॥ आज्यभागोपांशुयाजपुरोडाशानां यदग्नीषोमदेवताकत्वमस्ति तत्प्रशंसति । किमेतावद्बलं क्रियते । एतावदिति संग्रहेणोक्तस्य विवरणमग्नीषोमयोरिति । एतावतो सूर्यचन्द्रादिभेदेन त्रैधा विभूतिः विभावो (विभवो A.) बलभावः विभूतिरित्यस्य व्याख्यानं प्रज्ञातिरिति प्रज्ञातिः प्रकर्षेणोत्पत्तिः ॥२३॥ सूर्यादियुगलत्रयस्याग्नीषोमात्मकतां विभज्य योजयति । सूयोक्षोश्चन्द्ररात्र्योश्चाग्निसोमात्मकतायामुष्णत्वशीतत्वे हेतू । आपूर्यमाणपक्षस्याग्नेयत्वमग्नेर्भिन्नस्य सवितुः किरणानामनुक्रमेण चन्द्रमस्यनुप्रवेशात् अपक्षीयमाणपक्षस्य सौम्यत्वं च क्रमेण सूर्यांशापनये सति स्वकीयकारणोपवापात् (°यकिर°?) ॥२४॥ अतस्त्रिविधविभूत्याप्तये त्रयाणामपि यागानामग्नीषोमीयत्वं युक्तम् ॥२५॥ आसुरिराचार्यस्त्वेवं मन्यते । उभयेषु (?) त्रिषु यागेषु आज्यभागाभ्यामेव सूर्याहोऽर्धमासयुगलत्रयात्मकासु (°यात्सकलासु the mspts.) त्रिविधासु विभूतिषु द्वे वस्तुनी यतमे वाहोरात्ररूपे वा शुक्लकृष्णपक्षरूपे वा द्वे आप्नोति । वीप्सया त्रिविधान्यपि युगलानि परिगृह्यन्ते । त्रिष्वपि यागेषु एकैकेनैव त्रिविधामप्यग्नीषोमयोर्विभूतिमाप्तवान्भवति ॥२६॥ अथाज्यभागादियागत्रयद्रव्ययोराज्यपुरोडाशयोरेकदेवतात्वप्रयुक्तं ज्ञामितादोषमाक्षिप्य द्रव्यमन्त्रधर्माणां भेदेन त्रेधा तत्परिहरति । आज्यपुरोडाशस्य प्रदानमिति शेषः । अथवा आज्यस्य पुरोडाशस्य वा पशावप्यग्नीषोमयोरेव दीयतऽइत्यर्थः । कथमेतावता ज्ञामितेति । तत्राह यदिति । एकरूपं यद्वस्तुद्वयं तद्विलक्षणेन वस्त्वन्तरेणाव्यव-

हितं तेनाव्यवधानेन तद्वस्तु ज्ञापयति भवति अत्र तु व्यवधानम् आग्नेयेन अनेन वक्ष्यमाणेन च खल्वज्ञापयति । केनेति । उच्यते । आज्यस्य द्रव्यस्येतरम् इतरत्कर्म उपांशुयाजाख्यं तथा पुरोडाशस्येतरं धानाख्यम् अन्योन्यापेक्षयोभयोरितरत्वम् अन्यदिवेति द्रव्यभेदादेकदेवत्यमपि कर्मद्वयमन्यदिवान्यदिव भवति अतोऽन्ययोर्न ज्ञापितास्ति ॥ मन्त्रभेदेन चाज्यभागप्रधानद्वययोरज्ञापितत्वम् प्रधानद्वययोर्जुषाण इत्यस्यासंभवात् यद्यप्याज्यभागप्रधानयोर्देवतैक्यं तथाप्याज्यभागस्य ऋचमग्निर्वक्त्राणि [वाज° सं° ३३.१.] वं से प्रासीत्यादिकामनुवाक्यां [वाज° सं° १३.५२.] कृत्वा जुषाणोऽग्निराज्यस्य वेतु जुषाणः सोम इति जुषाणेन यजति । प्रधानाभ्यां तु क्रमेण अग्नीषोमा योऽअग्न वाम् अग्नीषोमा सवेदसेत्यनूच्यऽर्चमान्यं दिवो मातरिश्वा ऽजभार युवमेतानीत्यृग्भ्यां [ऋक्सं° १.१४.१.२.१.६.५.] यजति ॥ तथाज्यपुरोडाशयोरुपांशु उच्चैश्च भेदाद्ज्ञापितत्वम् । उपांशोः प्रजापतिरुपवक्तास्य प्रजापतिरुचितामनुष्टुप्छन्दस्कामग्नीषोमा योऽअग्न वामित्येतामनुवाक्यामनुब्रूते ॥ २७ ॥ उपत्सर्य उप पार्श्वेन गवा ॥ २८ ॥ आज्यभागोपांशुयाजयोर्ज्ञापितापरिहाराय याज्यापुरोऽनुवाक्ययोर्विलक्षणयमुक्ता प्रशंसति । उदाहृतौ जुषाणशब्दयुतौ मन्त्रौ तत्तादृगनुष्ठानमनु तत्सामर्थ्यात् । अन्यत्र ऋक्करणादेतत्कर्मान्यतरतोऽस्थि अस्थिवद्दृढं करोति तस्मादन्यतरत ऋक्करणं युक्तम् ॥ २९ ॥ द्विविधप्रज्ञाव्यतिरेकेण प्रज्ञान्तराभावात्सर्वप्रज्ञालाभाय याज्यानुवाक्ययुगलयोरुक्तं वैलक्षण्यम् ॥ ३० ॥ The explanation of ३१. ३२. is wanting in ABC. । पक्षान्तरमाह । न पूर्वी पौर्णमासीमुपवसेत् उत्तरामेव । तस्मिन्पक्षे गुणमाह । यथा कश्चित्परराष्ट्रं प्राप्य प्रतिमुखं पलायमानं हननोद्योगरहितं सम्यक्चूर्णितं करोति ॥ ३३ ॥ इत्थं पक्षान्तरं सोपपत्तिकमभिधाय प्रथमं पक्षं सिद्धान्तयितुं पुनरुपादत्ते । यथा कश्चिन्मन्दोऽन्येन पूर्वमेव पातितं पुनः स्वयं पिंष्यात् । उत्तरानादरे कारणान्तरमाह सोऽन्यस्येति । उत्तरोपवासो अन्येन यत्कृतं कार्यं तस्यानुकारी अन्येनाध्यवसितस्य पुनरध्यवसायी भवति । संप्रत्युपवसन्तं दृष्ट्वा तदनुकर्तुं स्वयमपि परेद्युरसावुपवसतीत्येवं प्रतिभवनात् ॥ ३४ ॥ संप्रतिपक्षं सिद्धान्तयितुमाख्यायिकामाह । संधयः विस्रस्ता आसन् । ऋतुमुखानि वसन्तादीनि ॥ ३५ ॥ संहातुं संगतो भवितुम् । सोमव्यतिरिक्तपुरोडाशादिसाध्या हविर्यज्ञाः ॥ ३६ ॥ स एव प्रजापतिः कालात्मकः दृष्टपर्वा संवत्सरमध्ये यदन्नं व्रीह्यादिरूपं पक्वं भवति तत्सर्वमभिलक्ष्य भोक्तुमुत्थितवान् कालावयवानां विश्लेषाभावान्नतत्कालोचितमन्नं भोगायोग्यमासीत् (भोगयो° the mspts.) । इदानीमुपवासयोग्यं पर्व विधत्ते संप्रति हैव पर्वविस्रंसनसमकालऽएव प्रजापतेः पर्व संप्रत्युपवसन् चिकित्सितवान्भवति । प्रजापतिवत्स्वयमपि सर्वान्नादो भवति ॥ ३७ ॥ आज्यभागस्थाननियममाह ॥ ३८ ॥ अथ केषांचित्पक्षमाह । अविज्ञान्यमिव विज्ञानेन हीनमिव वैषम्याभावेन साक्षात्स्थानविज्ञानस्याशक्यत्वात् ॥ तस्य कस्य पुरस्तादित्यत आह हवींषीति । उक्तहविःपुरोभागे विशेषमाह यत्रोऽइति ॥ ३९ ॥ आज्यभागयाज्यानुवाक्ययोर्यादृग्जुषाणवैलक्षण्यं पूर्वमुक्तं [क° २७.] तदपि तयोश्चक्षुष्टप्रयुक्तम् । अस्थन्वस्थनि मुखे अस्थिमये सति ऋग्यजुषोः [ऋग्जुषयोः A. ऋग्जुषाणयोः?] काठिन्यमृदुत्वात्साम्यादस्थ्यनस्थ्यात्मता ॥ ४० ॥ आग्नेयसौम्ययोराज्यभागयोर्यज्ञश्चक्षुष्टं लौकिकचक्षुःसाम्येन समर्थयति । अन्वायत्ते अनुप्राप्ते । आज्ञासं वयोहानिपर्यन्तं चक्षुर्मोघं न भवति अमुष्मिन् स्वर्गलोकेऽपि सचक्षुरेव संभवत्याज्यभागयोश्चक्षुष्टवेदिता ॥ ४१ ॥ ३ ॥ ६ ॥

अथामावास्यानि हवींषि विधातुमाख्यायिकामाह । अबलीयानहमिति मत्वा नास्तृषि स्तृङ् हिंसायां लुङ् अहं न हिंसितवानस्मीति भीतः सन्पुनर्बाधशङ्कया निलीनोऽभूत् । अत्यन्तं विप्रकृष्टदेशं गतवान् परावदिति दूरनाम [निघ° ३. २६.] तस्योपसर्गाच्छन्दसि धावर्थ ऽइति [पा° ५. १. ११८.] मतुप् ॥१॥ लब्धेनेन्द्रेण सह एतां रात्रिं रात्रिशब्दो दिनस्योपलक्षणः कृष्णमप्यमावास्यादिवसं सहोषितवान् । स इन्द्रो देवानां धनभूपो वासयिता वा यत एवं यतश्च देवानां मध्ये वीरः अतस्तदागमनायाग्नेर्विलम्बो युक्तः ॥२॥ अस्माकं य इन्दुः प्रवासमकरोत्स नो वसुरग्ना अग्निना सह वसतीत्युक्ता ताभ्यां सखिभावेन सह वसञ्चामिन्द्राग्निभ्यामेतदुद्वादशकपालं हविरिति शेषः प्रयक्षाम इत्यर्थः । मानुषं मनुष्येभ्यः कर्तव्यं सत्कारणम् ॥३॥ व्यस्मये विस्मितोऽभवं विगतप्रबले स्मयदर्शनात् अतः कृशोऽस्मि तस्मादिदं काठिनं पुरोडाशं मां न प्रीणयति अतः मम प्रीतिकरं हविः संपादयत ॥४॥ स एवोभयतश्चन्द्रदर्शनरहितायां संपूर्णामावास्यायां भूलोकमागत्याप्स्वोषधीषु च प्रविशति स प्रविष्ट एव चन्द्रमा देवधनं यत एषां व्रीहियवसोमादिरूपेणान्नं भवति । इह भूलोके ओषधिषु ॥५॥ तमनुप्रविष्टं सोमं गोभिरनुक्रमेण विविधं स्थापयित्वा धारयित्वैव समभरन् । तत्प्रकारमाह यदोषधीरभक्षयन्गावस्तेन ओषधिभ्यः सोममभरन् तथानुप्रविष्टसोमा अपः पिबन्ति गावस्तेनाद्याः ॥६॥ न अयते न तिष्ठति न सात्म्यं भजते । घृतेन पक्वक्षीरेणैव तमअयन् ॥७॥ यद्यपि तैत्तिरीयके प्रथमं घृतं पश्चाद्धोति क्रमस्तथाप्यत्र सायंप्रातर्दोहाभ्यां दधिपयसोः संभवादनेन क्रमेणाभिधानमिति द्रष्टव्यं तत्प्रशंसति तत्प्रथमतश्चन्द्रात्मकमेतद्घृतरूपेण परिणतं वस्तुतः समानमेकरूपमेव । the explanation of the rest of the kandikâ is wanting in ABC. ॥८॥ अंशुः सोमः यथाप्याययेदेवं सांनाय्यमपि तथा पीतवतां पाप्मानं हरिमाणं शरीरहरितवमपहन्ति ॥९॥ विहितस्य सांनाय्यस्याधिकारितां निश्चेतुं केषांचिन्मतमाह । अनवरुद्धा न संपन्ना ॥१०॥ स्वाभिमतं पक्षमाह । नन्वत्र विषये अक्षरेण मध्ये एव श्रुतवन्तः स्म इन्द्रेणोक्तं वचनम् तत्प्रमाणत्वेन पुनः श्रावयन्निगमयति ॥११॥ अमावास्योपवासस्य कालं विधित्सुः पुरा कल्पमाह । पौर्णमास्यां क्रियमाणं यद्यविरस्ति तद्वृत्रहननसंबन्धि वृत्रहननाय तदन्तर्गतनिगमनावसरे एकादशकपालोपांशुयाजहविषोः प्रदानात् आमावास्यं तु हविर्वृत्रहत्यमेव वृत्रं हतवत इन्द्रस्याप्यायनार्थं कृतत्वात् । वृत्रस्य चन्द्रत्वं प्रागुक्तम् see ६. ३. १७. । एनं वृत्रमेतेन हविषा । अतः सर्वपापक्षयाय चन्द्रदर्शनरहितायां मुख्यामावास्यायामेवोपवसेदित्यर्थः ॥१३॥ उपवासतिथिविषये केषांचित्पक्षमाह । ते चन्द्रदर्शनयुक्तायां चतुर्दशीयुक्तामावास्यायामेवोपवसन्ति परस्मिन्नहनि अव्यवहिते एव भविष्यति काले उदयं न प्राप्नोतीति अदो अविप्रकृष्टं प्रत्यक्षं (विप्रकृष्टमप्रत्यक्षं?) चन्द्रारथं (?थ A.?) खलु देवानामविक्षीणमन्नं भवति अथ चन्द्रक्षयसमनन्तरमेवैभ्यो देवेभ्यः वयमितो लोकात्प्रदास्याम इति । दृष्टोपवासपक्षदोषाभिधानपुरःसरमदर्शनोपवासमेव समर्थयते असोमयाजी क्षीरयाजी भवति समेव नयेदिति निगमितत्वात् अदो हैव ऊतं क्षीरमेव लोकान्तरवर्ति सत् सोमो राजा भवति ॥१४॥ अस्तु । ततः किमित्यत आह । यथा पुरा अमावास्यातः पूर्वदिवसे गावः केवलाश्चन्द्रानुप्रवेशरहिता ओषधीरुपश्चाहारं कृत्वा केवलं चन्द्ररहितमेव पयो दुह्रे दुहते एवं तत्क्षीरयजनं चन्द्रानुप्रवेशरहितं

केवलं भवति अतो दृष्टोपवासे चन्द्रस्यौषधीष्वननुप्रवेशेन केवलवात्तदानीं क्षीरस्य चन्द्रात्मकान्नत्वाभावात्स पक्षो न युक्त इत्यर्थः । अस्तु । को दोष इत्याशङ्क्यावश्यं चन्द्रानुप्रवेशवता क्षीरेणभवितव्यमित्याह एष वाऽऽति एतत्सांनाय्यब्राह्मणवदूव्याख्येयम् । तममावास्यायामप्स्वोषधीष्वनुप्रविष्टं ताभ्य' क्षीरूपेण संभृत्य आकृतिभ्यः सकाशात्पुनरुत्पादयति क्षीरयाजी । स एषोऽमुं लोकमागतः पुनराकृतिद्वारेणान्तरिक्षऽउत्पन्नः प्रतीच्यां दिशि दृश्यते ॥१५॥ तदेतच्चन्द्राख्यमन्नं परिभ्रमति ॥१६॥ चन्द्रोपक्षयऽएवान्नप्रच्यवः च्युतस्य च भूलोकप्रवेश उक्तः । निष्ठा नीचाः उक्तार्थज्ञान्निकृष्टतराः ॥१७॥ तपन्नादित्य एवेन्दुः परमैश्वर्ययोगात् चन्द्रस्य वृत्रत्वं प्रतिपादितम् पुरा अमावास्यातः पूर्वदिवसेषत्यन्तं दूरमुदितोऽपि अथैनं सूर्याख्यमिन्दुं प्रत्यमुममावास्यादिवसं प्रति समीपे एव आगच्छति अथ इन्दुस्य विवृतं मुखं प्राप्नोति ॥१८॥ तं निघ्नन् सूर्य उदेति ॥१९॥ पूर्वस्यां दिशि भक्षितः पश्चाद्भागे निर्गतो रेखामात्रो दृश्यते स च पुनः कलाक्रमेण तस्यैव सूर्यस्यान्नत्वाय प्रवर्धते ॥२०॥ विजिग्यानः शत्रून्जित्वा ॥२१॥ ४ ॥६॥

प्रधानयागः सकलः साख्यानः संप्रकीर्तितः । प्राधान्येनाथ तद्धर्मा निरूप्यन्तेऽथ सप्तमे ॥ तत्रादौ संनिहितत्वात्सांनाय्यधर्माः प्रथममुच्यन्ते । तत्र वत्सापाकरणार्थशाखाछेदं विधास्यन् तदुचितं शाखायाः पर्णत्वं सार्थवादमाह । यत्र यस्मिन्देशे गायत्री पक्षिरूपेण सोममभिलक्ष्यानयनायागच्छन्नाहरत्या (°कृन्तदाह°?) अपाधस्ता (?°वस्ता AC.) अधस्तात्प्रदेशेऽभ्यायत्य पर्णं प्रचिछेद वाशब्दश्चार्थे गायत्र्याः सोमस्य च । पतितात्पर्णादुत्पन्नः पलाशः तस्मात्सोमांशस्यैव संपादितप्रायत्वादस्यैव शाखाछेदनम् ॥१॥ समवार्जन्ति संयोजयन्ति । वायोर्गवां वर्धकत्वसमर्थनाय सर्वत्रागद्वर्धकतामाह ॥ शाखान्तरे पठितं मन्त्रमनूद्य निराचष्टे see तैत्तिरीयस° १.१.९. । यदेनं भागं ब्रूयाद्यजमानस्य द्वितीयः शत्रुरुपागच्छति अतो न ब्रूयात् ॥३॥ व्याकृत्य पृथक्कृत्य । यज्ञं यज्ञसाधनं क्षीरं संभरेयुः ॥४॥ अदः अग्नये हविर्ग्रहणादौ see १.२.१७. ॥६॥ तदूब्रह्मणव एतन्मन्त्रपाठेन शाखायै पय्नां परिदानम् तदधीनत्वेन रक्षणार्थम् ॥८॥ दोहनार्थं तस्यां पवित्रं कुशद्वयात्मकं त्रिवृद्वा बध्नीयात् ॥९॥ अमावास्यायां रात्रौ संनयतः क्षीरस्यान्यार्थत्वेन नियोगात् अग्निहोत्रस्य द्रव्यान्तरं विधत्ते । इन्द्रार्थस्य दुग्धस्यान्यर्थत्वस्यायुक्तत्वात् ॥ दोहकालापलक्षणार्थं क्षुरक्षति समकालं तद्धोमे परिसमाप्तऽएव उखा सांनाय्यस्थाली अध्वर्युणा अपणप्रदेशे उपक्लृप्ता भवति तस्याः समानयनानन्तरं उपसृष्टां वत्सेन संगतां प्रब्रूतादिति दोग्धारं प्रत्यध्वर्युराह यदा उपसृष्टा तदा उपसृष्टेति दोग्धा ब्रूयात् स च शूद्रव्यतिरिक्तो भवेत् ॥१०॥ यज्ञे यथा घर्मे प्रवर्ग्ये प्रवृज्यात् एवं स्थाल्यधिश्रयणेन प्रवृणक्ति प्रवर्ग्यं कृतवान्भवति अतो यज्ञसंपादनम् । क्षुला नाशः ॥११॥ प्राग्रं स्थाल्यां निदध्यात् । पवते गच्छति ॥१२॥ सांनाय्यस्य सोमात्मकवान्नत्पवनसाधनदशापवित्रवदस्याप्युदग्ग्रवं युक्तम् ॥१३॥ वाचा मन्त्रेण साध्यत्वाद्वाग्यज्ञः ॥१५॥ पयस आसेचनसमयेऽध्वर्युर्जपति ॥१६॥ अतः परं वाङ्नियमं विसृजेदथ काममिति ॥१७॥ दोहनपात्रक्षालनोदकस्य पुनः क्षीरे समर्पणमाह । उदस्तोकमुदकबिन्दुधाराम् पल्ययित्वा परितो गमयित्वा दोहपात्रऽउदकमासिच्य प्रक्षाल्य । पयसोऽवशिष्टं यदह्नायि हुतमभूत् तदपि इह भवेत् । क्षीरस्य कात्स्न्यार्थ । उदकस्यापि क्षीरोपादानतामाह । तोव्रीकरणं सारत्वकरणम् । आतञ्चनद्रव्यं सूत्रकार आह

[कात्य° ४. २. ३३.] प्राग्घुतशेषेणेति यवाग्वेत्यर्थः ॥१८॥ सोमस्य देत्रानामतिप्रियत्वात्कीर्तितेनैव [°नैतद्दु° A.] द्रव्यं तेभ्यः स्वाहु करोति ॥१९॥ नेत्क्षीरमुपरिभागे अवमृशेयुः ॥२० ॥२१॥ १ ॥७॥

अवदानस्वरूपं विवक्षुराख्यायिकामाह । ऋणवे जननमेव निमित्तम् ॥१॥ संग्रहेणोक्तं विवृणोति ॥२॥ अनुब्रूवीत अनुवचनं कुर्यात् अधीयेत । ऋषीणां संबन्धी वेदाख्यो निधिः ॥३॥ वासयेत गृहान्नादिप्रदानेनेदानीमवकाशं प्रयच्छेत् ॥५॥ अवदयते दयतिर्दानार्थः । अवप्रत्यर्पणं देवानां स्वभूतमृणं विभज्य दत्तवान्भवति । यत्किं च चरुपुरोडाशादिकमग्नौ जुह्वति तदवत्तं हविरवदानमिति प्रसिद्धं भवति ॥६॥ अनुवाक्यात्मकमिदं खलु प्रथमम् । एवं क्रमेण पुरोऽनुवाक्याया आश्वतस्रो देवताः क्रमेण चत्वार्यवदानान्यनुप्राप्ताः हिशब्दश्चार्थे । कस्मै प्रयोजनाय पञ्चममवद्येत्तदभिमानिन्याः पञ्चम्या देवताया अभावात् ॥७॥ अथ पुनश्चतुरवत्तमेव स्थापयति एतदिति । एतदेव कुरुपञ्चालदेशे प्रसिद्धम् अतस्तत्र प्रज्ञातत्वादनुष्ठानसंप्रदायानुरोधेन चतुरवत्तमेव कर्तव्यम् ॥८॥ अवदानस्येयत्तां विधत्ते । इवशब्दोऽनर्थको वाक्यालंकारे । यावन्मात्रमेव अङ्गुष्ठपर्वमात्रमेव । आधिक्यदोषमाह ॥९॥ इदानीं चतुरवदानप्रकारं दर्शयति । पुरोडाशांशौ द्वौ तदध उपरि चोपस्तृताभिघारिताज्याभ्यां चतुरवत्तत्वम् पुरोडाशस्योभयत आज्यकरणं प्रशंसति द्वे वाऽऽहुति । सर्वाप्याज्याहुतिः सोमाज्यभेदेन द्विविधा तत्र सोमस्य स्वरूपेणाज्याहुतित्वादाज्यापेक्षैव नास्ति अवशिष्टौ हविर्यज्ञपशुयज्ञावाज्याज्याहुतिकौ भवितव्यौ ॥१०॥ अनुवाक्यायाज्ययोः क्रमेण देवताह्वानहविःप्रदानसाधनत्वं वक्ष्यते आह्वातव्यानां देवानां द्युलोकसंबन्धात्तयोः क्रमेण द्युभ्वात्मकता तयोः स्त्रीलिङ्गत्वादूद्वन्द्वे वषट्कारस्य पुल्लिङ्गत्वात्सह मिथुनतास्ति ॥११॥ पुरोऽनुवाक्यादीनां द्युत्वात्मकताभिधानस्य प्रयोजनमाह । तयोः समनन्तरं वषट्कुर्यात् । वौषडित्युच्चारणकाले वा समनन्तरं वा प्रदानमस्तु सर्वथा वषट्कारात्प्राक् न भुञ्जीयात् ॥१२॥ प्रदानस्य वषट्कारानन्तरत्वं प्रकारान्तरेणोपपादयति तत्पात्रोद्धारपूर्वकप्रदानमिव भवति । उक्तवैपरीत्ये दोषमाह । भूमौ निदग्धं प्रास्तं दुष्टत्वेनोपयोगाभावाद्दग्धम् । अमुया अनेन वषट्कारात्पूर्वकालहोमेन दग्धं स्यात् ॥१३॥ पुरोऽनुवाक्यायाज्ये गायत्रोत्रिष्टुभौ कर्तव्ये इति विधातुमाह । असौ द्युलोकः । अनुवाक्याया गायत्रीत्वे द्यावापृथिव्यावुभेऽपि योनितत्त्वान्भवति ॥१५॥ अमुष्या अधि द्युलोकस्योपरि । एने द्यावापृथिव्यौ । तस्मात्सायुज्यादिमे सहाभ्यवहरतः द्यावापृथिवीभ्यां स्वाहेति सह प्रदानात् अथवा वृष्ट्यन्नयोः परस्परापेक्षत्वात्सह भोगः ॥१६॥ अनुवाक्याया उच्चारणधर्ममाह । अङ्क्तयन्निव वर्णानालोडयन्निव शनैः अङ्क्तिर्गत्यर्थः ॥ कार्यभेदं चाह अनुवाक्यया यष्टव्यदेवानाह्वयति याज्यया हविःप्रदानसाधनम् ॥१७॥ पुरस्तात् मन्त्रस्य पुरोभागे लक्षणं यष्टव्यदेवनाम (°वानाम AC.) [य]स्यां सा पुरोऽनुवाक्या । अमुष्या अधस्ताल्लक्ष्माणीव अधोभाग तेषां परिभ्रमणात् ॥१८॥ उक्तं पुरस्ताद्परिष्टाल्लक्ष्मत्व विशिनष्टि । यस्या अनुवाक्यायाः प्रथमात्पदादग्निः प्रत्नेन सोम गोभिरित्यादिलक्षणां यष्टव्यदेवतां ब्रूयात्सैव समृद्धानुवाक्या याज्या तु सा समृद्धा यस्या उत्तमात्पदाद्विज्ञाय अग्ने चक्रुषऽइत्यादिकादभिहितायाः देवताया उपरि वषट्करोति ॥२०॥ याज्यानन्तरभाविनं वषट्कारं विभज्य विधाय प्रशंसति । वौगित्युच्चारणं कुर्यात् वौगित्येतदौकारस्थाने आकारे कृते वागिति भवति । तस्मादेवं वौषडिति

वषट्कुर्यात् ॥२१॥ इत्थं दर्शपूर्णमासोभयसाधारणमवदानादिकं वषट्कारान्तं धर्ममभिधाय न (!) तत्प्रसङ्गाद्यवादिशब्दाभिधानद्वारेण दर्शपूर्णमासयागं प्रशंसति । दायं पैतृकं वित्तम् ॥२२॥ संवृञ्जीमहि अपहरेमहि । समवृञ्जत स्वाधीनं कृतवन्तः ॥२३॥ यौतीति यवः तस्य यवेति नाम । तेनापूर्यमाणपक्षेण समसृज्यन्त ॥२५॥ अयवनादमिश्रणाद्यवा शुक्लपक्षः । अहोरात्रमाससंवत्सराणामपि नाम दर्शयति । यवशब्दाभिधेयान् शुक्लकृष्णपक्षान[य]तीति मासो यव्यः । सुष्ठु एकः स्वेकः सर्वस्यापि कालस्य तत्रैवान्तर्भावात्संवत्सर एक एव कालः मकारोप[यु]क्तेन सुमेक इति पदोक्तनाम संपन्नम् । प्रसङ्गादहरादिनामाभिधाय प्रकृतमुपसंहरति यवा चेति यवा अयवा च हि यवनोवायवेत्येव (!?) भवति यवनस्योभयानुगतत्वात् अथवा देवैरेवायवात्मकस्य कृष्णपक्षस्यापि यवनात्पक्षद्वयमपि यवा । अत एतेषां यवादीनां मध्ये येन निमित्तेन ना (!) होता भवेत् तत्कार्यं याविहोत्रम् [°र्या यादि° A.B.C.] । तैत्तिरीयकेऽपि ऋतव्या उपदधातीत्यत्र [५.३.२.] चयनप्रकरणे यवादयो व्याख्याताः ॥२६॥ २ ॥७॥

अथाग्नये स्विष्टकृद्यागं तस्य प्रधानयागसमानन्तर्यं च विधातुमाख्यायिकामाह । पञ्चभिमानी देवो रुद्र इह यज्ञवास्तावुषिवा [°°स्तवरोषि° A.B.C.] युलोकाद्योनोऽभूत् अत एव वास्तावेव स्थितवाद्रुद्रो वास्तव्य इति वेदविदः कथयन्ति ॥१॥ स्वयं यज्ञप्रदेशं (यज्ञाप्र° B. यज्ञं विप्र° A.) प्रत्युत्तमा (°त्युच्चक्राम?) स कुद्रो (?सत्तद्रा B. सेत्तद्रो AC.) भूवोत्तरस्यां दिशि स्विष्टकृत्काले यज्ञं प्रतिरोद्धुमुत्तस्थौ ॥३॥ अमुं यज्ञं विसृष्टं मा कार्षीः । यज्ञं समबृहत् ऊर्ध्वं प्रापयत् न च हविरादिकं बहिः क्षिप्तवान् तथा किमपि यज्ञावयवानां न हिंसितवान् ॥४॥ तेषां सर्वेषामाज्ञप्तिर्ज्ञता ॥५॥ यावन्तः प्रदानशेषास्तेष्वेकैकमवदानं कुरु ॥६॥ अवशिष्टभाक्त्वेन रुद्रस्य वास्तव्यत्वप्रसिद्धिमाह ॥७॥ प्राच्यादिदेशभेदेन शर्वादिनामभेदेऽपि देवतैकैव ॥८॥ स्विष्टकृतऽइति विशेषणस्य कारणमाह । वयि अमुत्राहवनीयदेशे आज्ञप्त्याधारभूते सति ॥९॥ अथ स्विष्टकृन्निगदमभिदधाति (till to k. १५.) स होता स्विष्टकृदनुवाक्यानन्तरं ये आनुर्येण प्रयाजाद्यभागादिदेवा स्विष्टाः तान् तं स्विष्टकृतमग्निं च संपश्यति संस्मरेत् संभूयानुवदेत् संदर्शनप्रकारमनूद्य क्रमेण व्याचष्टे अयालग्निरित्यादिना (ल A.B.C.) अयं स्विष्टकृदग्निः प्रथमाज्यभागदेवस्य प्रियाणि धामानि निःशेषाण्ययाट् इष्टवान् तत्तेनैतद्भागपाठेन प्रथमाज्यभागं स्विष्टं कृतवानित्युक्तवान्भवति । एष स्विष्टकृन्निगदः आवाहननिगदेनैव व्याख्यातप्रायः see ३.२.१६. ॥१०॥ एनेन यत्तदग्नेरिति भागेन भूयसीं प्रीतिमुदपादयन् । सर्वथाग्नेः संतुष्टवाय स्विष्टकृत्त्वकारणस्य प्रकाशनादेवं संपश्येत् ॥११॥ देवतां देवतानाम पूर्वामयाट्कारात्प्राक् । तद्धिरुङ् स्विष्टीकरणस्यैवानभ्यर्हितत्वेन (°वात° BC.) प्रथमं निर्देष्टव्यत्वात् ॥१२॥ यत्तद्यजेत । स्विष्टकृत इदानीमपि अकृतवादयाडिति नोच्यते । यथा आवाहिता देवताः सर्वा अपीष्टा एवं स्वं महिमार्थमपि यष्टव्यं । यत इतः प्राक् किं चन स्वाय महिम्नऽइदं हविरिति न क्रियते तस्मादत्र स्विष्टकृन्निगदाभिधानसमये तत्तेन स्वं महिमानमित्यनेन तं प्रीणितवान्भवति ॥१३॥ इट्शब्देनात्रमुच्यते तदुपज्ञीवित्वात्प्रज्ञा अपीषः । एड्याः पुनः पुनरिड्याः (?इष्ट्या B. यष्टा CA.) । यायजूकाः इज्याशीलाः ॥१४॥ ज्ञातवेदा आज्ञप्त्याधारः स्विष्टकृदग्निः हविः सौविष्टकृतं सेवताम् ॥१५॥ इत्थं स्वि-

ष्टकृन्निगदं व्याख्याय तस्य याज्यां पुरोऽनुवाक्यां चाह । अवक्लृप्ततमे अत्यन्तं योग्ये । अयं स्विष्टकृद्यागः तृतीयसवनस्थानीयः अन्तिमत्वसाम्यात् ॥१६॥ स्विष्टकृतो ज्ञतावशिष्टहूपवादे-तद्यज्ञस्य वास्तुस्थानीयं । प्रजापतेः बलवद्भ्यः ओजोबाज्ञभ्यः सकाशादिन्द्रेण सहोत्पन्नत्वात्त्रिष्टु-बिन्द्रियम् ॥१७॥ पेसुकमभिवर्धनशीलम् पिस्यति अतिवृद्धो भवति ॥१८॥ पतत्रेकं बाज्ञं भूमौ प्रसारितवान् स बाज्ञर्विस्रस्तोऽभूत् । अपत् प्राप्तमभूत् । सक्न्दसौ समानक्न्दस्के ॥१९॥ स्विष्टकृदवदानहोमप्रदेशयोर्विशेषमाह । उत्तरदिशो (°रपूर्वदिशो ABC.) लोकपाल-त्वेन रुद्रसंबन्धः सर्वशास्त्रप्रसिद्धः ॥२०॥ उत्तरदेशे प्रदानेऽपि प्रधानहविषा सहासंस्पर्शं वि-धत्ते । प्रधानाज्ञतिभ्यः सकाशादभ्यर्धे संनिहितप्रदेशऽएव न तासां स्थाने । विपक्षे बाध-माह इतरा इति । इतराः पशुफलज्ञनकाः । यदि ताभिः सह स्विष्टकृदाज्ञतिमासज्ञयेत् त-दा रुद्रेण सह पशून्योज्ञयेत् अत यज्ञमानस्य गृहावस्थिताः पशवः समीपऽएव म्रियमाणाः प्राप्नुयुः ॥२१॥ आहवनीयगार्हपत्ययोरन्यतरस्मिन्हविःअपणं विधास्यति तदर्थं तयोराधान-प्रदेशपरिमाणं विधातुमाह । यस्त्विह भूमावेवावशिष्टः स गार्हपत्यः तस्मादिदानीमपि दिवं गन्तुकामा एतमाहवनीयं यज्ञसाधनं गार्हपत्यात्प्राग्देशं यज्ञमानायोद्धरेयुः ॥२२॥ विक्रम्यते ऽनेनेति एकपादप्रक्षेपपरिमितः अंशो विक्रमः । गार्हपत्यमवधीकृत्य ॥२३॥ गार्हपत्ये अप-येयुरिति यत्सोऽपस्खलः अपस्खलनाम च हविषां भवति । फालितानां व्रीह्यादीनां तुषवि-मोकादिसंपादनप्रदेशः स्खलः यथा व्रीह्यादिराशिः स्खलाद्बहिरपि प्राप्तो व्यर्थो भवति ए-वमन्यत्रअपणमपि ॥२६॥ अन्येषां पक्षमाह । यस्मादेष आहवनीयः आहवनार्हः अथ एष पक्षस्य हविषो होमाय योग्यो न वामस्य पाकाय ॥२७॥ अग्नेः परिस्तरणं विधातुमाह । ए-वकारेण स्वतर्पणादपि ब्राह्मणतर्पणमेव श्रेय इत्ययमर्थो द्योत्यते । यज्ञमानो ब्रूयात् ॥२८॥ ३ ॥७॥

The commentary of *Harisvâmin*, the extracts out of which are now beginning, is much shorter, than that of *Sâyaṇa*, and leaves the greater part of the text unexplained. प्राशित्रावदानविध्यर्थमाख्यायिकामाह । प्रजापतिः प्राणपिण्डलोककाल-त्रयज्ञात्मा । अभिध्यातवान् लोकात्मना दिवं कालात्मना उषसं प्राणपिण्डात्मना ऋक्षेभ्यो मृ-गेरोहितं (?) रोहिणीनाम नक्षत्रं यज्ञात्मना वाचम् । मिथुनो मिथुनवान् ॥१॥ दुहिता न गन्तव्येति संधां संधानं मर्यादामतीत्य । व्याध ताडने ताडयेषुणा । इक्बब्दोऽवधारणार्थः नू-नंशब्दो यस्मादर्थे यस्मान्नथैव तदास ॥३॥ क्ष्मया क्ष्मायां (क्ष्मयां ABC.) पृथिव्याम् । त-दाग्निमारुतं नाम शस्त्रं तस्मिन् तद्भिरुद्याख्यायते see ऋक्संहि° ८. १. २७. २. ॥४॥ यदिदमि-षीरनीकं यज्ञरसविलिप्तं तद्यथा न वृथा स्याद्यथा च प्रधानाज्ञतेः न महत्स्यात्तथा उपायं ज्ञानीत ॥५॥ प्रसन्नः एव ब्राह्मणशेषः किं चित्तु वक्ष्यामः ॥ नो इति प्रतिषेधः नु इति वा-क्यपूरणः । दतः दन्तान् ॥७॥ ततो बृहस्पतिप्राशनादर्वाक् ॥८॥ संसारस्वभावाद्यदत्र किं-चिदज्ञानं तन्निर्मिमीते बहिः करोति निष्कर्षति । पशुबमिडायाः प्रसिद्धं पशवश्च रुद्रादुत्क्र-मणीया अतो रुद्रिये प्राशित्रे दत्तेऽप उपस्पृश्येडावदेया ॥९॥ खदत् (°दन् C. °दम B. °दच A.) खद् स्थैर्ये हिंसायां च [धातु° ३. १३.] अल्पतरवादस्थिरंमगाढबलं निःसरणवद्भवति इ-तरथा तु चतुर्गृहीतं महत्त्वाद्गाढं स्यात् ॥१०॥ तिर्यक् प्रग्रहीत (!) ओहाङ् गतौ [धा° २५.

७.] प्रगङ्केत्प्राशित्रम् ॥१२॥ तत्प्रतिगृह्णातीत्यत आरभ्य ब्रह्मत्वं प्राह (प्राय AC. प्राशिय B.) आध्यायसमाप्तेः ॥१३॥ अथ परिक्षाल्य पात्रं नाभिमालभतऽइति शाखान्तरात् इति क्षेदः ॥१७॥ अथास्मै ब्रह्मभागमित्याधुर्यवम्। प्रतिविदानः जानन् एष मे भाग इत्याशयः ॥१८॥ आ एतस्मादध्वर्युवचनात्। पाकयज्ञार्हया इडया पाकयज्ञेषु क्रतशेषो भक्ष्यते तेन पाकयज्ञार्हेत्युच्यते। ब्रह्मा हि प्रायश्चित्तैर्यज्ञं भिषज्यति ॥१९॥ अनुयाजप्रसवविधिः। यस्मात्तुभ्यमेतेऽध्वर्यवो यज्ञं प्राङ्गर्ब्रहस्पतये च न मह्यं मनुष्याय तेन कारणेन त्वमनुज्ञया यज्ञादीनवपालय ॥२१॥ ज्रूतिर्गन्त्री ॥२२॥ ४ ॥७॥

इडाब्राह्मणमेतत्। तत्रेडाया मानवीमिडां देवतां वक्तुं मानवी घृतपदी मैत्रावरुणीत्येतानि च निगदपदानि व्याख्यातुमितिहासः प्रवृत्तः। स चेतिहासः प्रसक्त एव किंचित्तु दर्शयामः। अवनेज्यते हस्ताद्यनेनेति अवनेज्यं कारणे कृत्यः। परिचारकाः आनीतवन्तः। भाविनोऽर्थस्य सिद्ध्यर्थं देवतैव मत्स्यरूपेणाऽऽगाम ॥१॥ पाल रक्षणे। वहतीत्यौघः उदकसंघातः स इमा भरतवर्षनिवासिनीः प्रजा निःशेषं वोढा देशान्तरं प्रापयिता ॥२॥ क्षुल्लकाः क्षुद्रकाः अल्पकाः। गॄ निगरणे निगरति। बिभरासि बिभ्रियाः पुष्णियाः। अतिवर्धे अतिरिच्य वर्धितास्मि। कर्षूः खातिका ॥३॥ शश्वत्शब्दोऽत्र सामर्थ्यात्त्विप्रवचनः क्षणे महामत्स्यः। ज्येष्ठं वृद्धतमम्। इतिथोमित्यभिनयः तेन संख्येयाः समादर्शितवान् इयतीनां दशानां द्वादशानां वा पूरणीतिथी इयतिथीं यावतिथीं तावतिथीमिति प्राप्ते छान्दसो यशब्दावशब्दलोपः। समा संवत्सरः मामुपासासै उपासीथाः ॥४॥ नावमुपकल्प्य मत्स्यमुपासितवान् औघे चोत्थिते नावमधिरूढः। शृङ्गे भवितव्यतयैव निष्पादिते। उत्तरं गिरिं हिमवन्तम् ॥५॥ समवायात् एकीभावाय अधः गक्षेत् अवतेस्त् ॥६॥ पिब्दमाना पिवद् [°वधृ AC.] क्षरणे घृतप्रभवत्वात् घृतं स्रवन्ती सुस्निग्धा उदकाडुत्थिता ॥७॥ आवयोर्डुहितेति ब्रूषेत्यूचतुः। अपिबं भागः तं प्रार्थितवन्तौ। तच्च भागित्वं वा ज्ञौ वाशब्दश्चशब्दार्थे ज्ञानातिश्च प्रतिपूर्वो द्रष्टव्यः प्रतिज्ञातवती च न च प्रतिज्ञातवतीति यावता मैत्रावरुणीति व्यपदिश्यते तावत्प्रतिज्ञातवती यत्र तस्याः किंचित्ताभ्यां क्ष्वेयेत्येवं न प्रतिज्ञातवती ॥८॥ अज्ञोऽजनथाः जनितवानसि। मया हेतुभूतया मय्युपक्ष्वयमानायामुपक्षतो यजमान इत्येतेन होतृवचनेन यामाशिषमाशासिष्यसे ॥९॥ उपस्तरणादिविशेषः शाखान्तरात् पशुप्रभवघृतादिप्रभवत्वात्पशव इडा ॥१२॥ इहेत्यभिनयेन प्रदेशिनीपर्व मध्यमं दर्शयति। शाखान्तरात् ॥१४॥ हेवक्तरं शाखान्तरादेव श्रोष्टयोरित्यत्राविशेषेण निलिम्पेदिति श्रुतम् शाखान्तरे वधरमधरऽउत्तरमुत्तरे। किं पुनर्निलिम्पते द्रुवत्वात्संनिधानाद्दनीयत्वाच्च आज्यम् तत्राज्ये तदेवैनां प्रापयतऽइति इडानिष्क्रयवचनादैडमेवाज्यमिति गम्यते ॥१५॥ निलेपार्थत्वादोऽयम् तनिष्ठं तनुतमम् पाकयज्ञार्हा मनुष्यप्रधानत्वान्मन्दतरवीर्या। इह तनिष्ठे देशे। एत्यमिडामेतद्यदोष्ठयोर्निलिम्पते तत्पुरा रक्षोभ्यो यावदेवोच्चैरुपक्ष्वानं श्रुत्वा नागक्षन्ति रक्षांसि तावत्प्रापयते प्राणेष्वेव क्ष्वयतऽइति वक्ष्यते तं प्राणदेशं प्रापितवान् ॥१६॥ अवान्तरेडावदानमेतत् ॥१७॥ अत ऊर्ध्वं हौत्रमिडोपक्ष्वानं विधीयते। तदपि द्विविधमुपांशु चोच्चैश्च तत्र प्रथमं तावदुपांशूपक्ष्वानं युज्यते। उपपूर्वो क्ष्वयतिरभ्यनुज्ञायां वर्तते। इयमिडा सर्वैर्ऋत्विग्यजमानैर्विभज्य भक्षणीया तत्र वोऽनतिरेकं (नातिरेकां B.) शङ्कानिवृत्तये परस्परमनुज्ञातव्यम् तद्वै तत्साधारणमेवानुज्ञानं मध्यावस्थानीयो (म-

ध्यव° BC. मध्यक A.) होता सर्वैरन्वारब्धः करोति ॥१८॥ इडाया एवैतानि रूपाणि गवादीनि पृथिव्यादीनि च रूपाणि ततश्च तस्यामुपक्लृप्तायां तान्युपक्लृप्तानि भवन्ति तेषु चोपक्लृप्तेषु सा उपक्लृप्ता भवति देवतानामननुज्ञातां मनुष्या भक्षयितुं नार्हन्ति अतः सानुज्ञाप्यते । मामित्येतच्च तुल्यहेतुत्वात्सर्वेषामृत्विग्यजमानानां प्रदर्शनार्थम् ॥१९॥ अथोपांशूपक्लृप्यतऽइति यदुक्तं (k. १८.) तस्य विवेकार्थमथ प्रतिपद्यतऽइत्याह तेनेत ऊर्ध्वं यथाप्राप्तमुच्चैर्वक्तव्यम् ॥२४॥ वत्सा वै दैव्या अध्वर्यव इति सांनाय्यं हविः संभवत्यध्वर्युर्वदित्यभिप्रायः ॥२७॥ सामान्यरूपेण यजमान इति वाच्यं न विशेषरूपेण देवदत्तो यज्ञदत्त इति ॥२९॥ यो मनोरथो यजमानस्य तस्मिन्नयमनुज्ञातः समृध्यताम् ॥३७॥ वक्ष्यद्भः समुच्चयार्थः । अन्ये तु प्रत्यक्षमेव प्राशिष्यन्ति । ब्रह्मौदनोधारपि ग्रहणे पञ्चसंख्या संपन्ना ॥३९॥ यत्र काले होता प्रतिपद्यते इडोपक्लृप्तेत्येतं निगदं तदा चतुर्धा कृत्वा पुरोडाशमाग्नेयं शाखान्तरात् बर्हिषि सादयति ॥४०॥ यत्र काले आशिषमुपक्लृप्तो यजमान इति होता आशास्ते तदा यजमानो ज्ञपति ॥४२॥ पवित्रयोः पवित्राभ्यामिति विभक्तिव्यत्ययः पवित्रपूतास्तनवामहऽइति वाक्यशेषात् मार्ष्टयन्ते आत्मानं शोधयन्ति ॥४३॥ अपिसृज्ञति संसृज्ञति ॥४४॥ १ ॥८॥

अनुयाजब्राह्मणमेतत् अथाग्निं कल्पयतोत्यस्मिन्क्रमे (see ३.३.१२.) उल्मुके द्वे ऊर्ध्वं नयत्यग्नितः पृथक्कुर्वन्त्यृत्विग्यजमानाः साक्षादध्वर्युरितरे तदनुज्ञानेन । यातयामो गतरसो गतवीर्यः एतत् एतस्मिन्ननुयाजकाले अग्निर्भवति देवेभ्यो यज्ञमूढवान्भवति ततश्च गतवीर्यत्वादनुयाजेष्वक्षमः स्यादाभ्यां तु प्रागुत्रीताभ्यां पुनः संसृष्टाभ्यामगतवीर्यो भविष्यति ॥१॥ अनु यागे नीते पश्चात्सगमयन्ति ॥२॥ उल्मुकसमासेन पुनर्नवीकृतोऽग्निः समिधा सामिधेनीस्थानीयया चैषा तऽइत्यन्यऽर्चा समिध्यते ॥३॥ see ४.४.१५. ससृवान् ससृतवानिति प्राप्ते तकारलोपः ॥५॥ उत्तरस्यां कण्डिकायां बर्हिषा ज्ञगतोवं वक्ष्यते अस्यां तु ज्ञगत्या अनुयाजेषु प्राथम्यकारणमाह । तद्वै तत्र सामिधेनीषु स्थानविपर्यासं मन्यन्ते विद्वांसः यज्ञगत्यां परिमाणतो ज्येष्ठायामेव तिष्ठमानायामल्पाक्षरा गायत्री प्रथमं युज्यते तथायथं कर्तुमिहानुयाजेषु देवा ज्ञगतीं प्रथमामकल्पयन् सा च ज्ञगतो बर्हिः । पापं ज्येष्ठापेक्षया कनिष्ठं नेत्पापमेव सत् वस्यः प्रशस्यतरं यज्ञेनेदमसत् तदनुकाराच्च प्रज्ञास्वपि यत्पापं वित्तबन्धुकर्मादिना तद्वस्यः वसुतरं प्रशस्यतरमितरस्मादपापान्मा भूत् ॥१०॥ येयं बर्हिराख्या देवतात्रेज्यते एषा अयं लोकः परिवृज्ञो हि सः ॥११॥ नराः प्रज्ञाः शंसन्ति वदन्त्यस्मिन्नित्यन्तरिक्षं नराशंसः । अन्तरिक्षमु वै त्रिष्टुप् मध्यमत्वादेकादशभागत्वाच्च दश दिश आत्मनैकादश तद्बन्धुसंबन्धाद्वा ॥१२॥ बर्हिरादिषु यष्टव्येषु बर्हिर्यजेत्यादिना होतापि सर्वत्र देवं देवमित्याह न बर्हिराद्येव केवलम् । यस्माच्छन्दोदेवत्या अनुयाजाश्छन्दांसि च देवानां देवाः तस्मादेवान्यजेत्येवाध्वर्युराह गृहभोगाः पशुमन्त (°मत ABC.) एवेति गृहाः पशवः ॥१४॥ सर्वत्रैव यागे देवतायाऽएव होत्रा वषट्क्रियते अध्वर्युणा च क्ष्यते अत्र तु अनुयाजेषु न प्रसिद्धा देवतास्ति बर्हिर्नराशंसयोर्देवतात्वेनाप्रसिद्धेरग्नेश्च गायत्रीप्रधानत्वात् तेन वसुवने वसुधेयस्येति शब्दाभ्यामग्निमिन्द्रं चोपादाय ताभ्यां बर्हिरादीनुपलक्ष्य इन्द्राग्न्यात्मकेभ्यो बर्हिरादिभ्यो वषट्करोति होताध्वर्युश्च तदात्मकेभ्यो जुहोति । वसु हविर्लक्षणं भजन्ति वसुवनिः । वसूनि हवींषि धीयन्तेऽस्मिन्निति वसुधेयः ॥१५॥ वसुवने इत्यामन्त्रितान्तं [against the ac-

cent] वसुधेयस्येति षष्ठ्यन्तं ते कथं बर्हिर्वेबिति प्रथमान्तेन बर्हिरादिना संबध्येते । नैष दोषः । एवमु हैतदिति ध्रुवं द्वेऽग्र्येते विभक्ती व्यत्ययेन चतुर्थ्यर्थवृत्ते दर्शयति । तस्यापि यास्काचार्येण [यस्का° ACB.] वसुवननाय च वसुधानाय चेति [निरुक्तं° १.४२.४३.] तादर्थ्ये चतुर्थ्या एकवाक्यता दर्शिता ॥ १६ ॥ १७ ॥ २ ॥ ८ ॥

ऊह वितर्के प्रेरणे वत्र द्रष्टव्यः अन्योन्यविपरीतं नामयति ॥ १ ॥ यस्मादेतत्समाने अभिन्ने व्यूहनकर्मणि विलक्षणमाक्रियतेऽभिव्यज्यते भोक्तृत्वं भोग्यत्वं च तस्माद्यज्ञानुकारेण भूतेष्वपि समानादभिन्नात्पुरुषात् भोक्ता पतिः भोग्यश्च भार्या ज्ञायेते यथा समाने कर्मणि शुल्कपभृतौ । तथा च ननु (च न AC. च ननु च B.) समानजातीययोर्विवाह एव नास्ति कुतो भोक्तृभोग्यभावः (°ग्ये भागः B.) पशुन्यायेन श्विद्धर्तेत (°न श्विद्धा व° A. °न कश्चिद्धा वर्तते C.) न स यज्ञानुकारः स्यात्किं तर्हि यज्ञमानैकतानुकारः स्यात् सत्यम् एवं व्यवहारस्य यज्ञमूलत्वादन्याय्यस्यापि तमेव व्यवहारं दर्शयति । इदं हि अधुनापि ज्ञात्याः [समा]नजातीयाः दीव्यमाना रममाणाः परितुष्टान्तःकरणाः नाकार्यकारिण-इवापरियूनाः (-इव प° C. -दव प° A.) आसते । कथं दीव्यमानाः । विदेवम् । दिवेर्व्यवहा[रा]र्थस्य अन्योऽन्यं भोक्तारो भोग्यैः सह भोग्या भोक्तृभिः सह दीव्यामहे व्यवच्छेत्य [व्य]वच्छेत्य । व्यवहर्तॄणामभिप्रायेण व्यवहारं दर्शयति इदं प्रत्यक्षमेव विवाहेन वयं संगच्छामहे एकस्मादेव पुरुषान्मूलभूताडुत्पद्य पुनरेकडुम्बारम्भेण समानापत्यारम्भेण च संयुज्यामहे इति भर्तॄणां योषितां चाभिप्रायवचनम् । एवं व्यवहारं दीव्यमाना आसतेऽथ के (तत्रेके B. तेत्यात्क A. तैत्क C.) पुनः संगच्छामहऽइत्याङ्गः किमनन्तरऽएव पुरुषे नेत्याह चतुर्थे तृतीये वा त्राशब्दोऽत्र लुप्तनिर्दिष्टो द्रष्टव्यः चतुर्थे वा तृतीये वा । तथा च काण्वानां तृतीये पुरुषे संगच्छामहऽइति श्रूयते चतुर्थे संगच्छामहऽइति सौराष्ट्राणां व्यवहारः तृतीये संगच्छामहऽइति दाक्षिणात्यानां ते हि मातुलडुहितृषु (°हितुः त्रिषु ABC.) पितृष्वसृपुत्रेषु संगच्छन्ते ते च मूलपुरुषादृण्यमानास्तृतीया भवन्ति ॥ एतस्मादेव स्रुग्व्यूहनात्कारणान्नत्था भवति ॥ ६ ॥ शुल्कगतेनाङ्येन संस्नेहयति । परिधेयोऽपि स्याग्नेयो देवास्तेऽपि देवपात्रेण देवात्रमर्हन्ति पलायिवा तु न समग्रम् ॥ ७ ॥ वयि पार्थिवान्यात्मके तृप्ते पार्थिवा वसवस्तृप्यन्ते वस्वर्थं वामनडिम ॥ ८ ॥ अभिपद्याभिगम्य हस्तेनालभ्य ॥ १ ॥ स्वगा अव्ययमेतत्स्वस्थानगामिवचनं स्वस्थानगामिनं करोति । अगन् अगमत् गतः अपिनयति संनयति ॥ ११ ॥ व्यत्तु खादत्तु इमं प्रस्तरं देवाः येभ्यो होष्यते कीदृशम् वयः पक्षिभूतम् Here is the conclusion of B. ॥ १३ ॥ यथा पृथिवी मूल्यमूलान्नसंस्पृष्टा पृश्निस्तद्योगाच्च वशा वश्या काम्या ॥ १५ ॥ तं प्रकृतं प्रस्तरं प्राग्रं सूक्तवाके उक्ते पश्चात्समग्रमेव प्रक्षिपति । युप रुप लुप विमोहने [धा° २६.१२४.] मूर्च्छयेयुः । ऋषी गतौ नयनेऽत्र द्रष्टव्यः विस्तारयन्ति (विस्मा° A. C.) सुदग्धवाय ॥ १८ ॥ संवदस्वेत्यादीनां व्याख्यातानां बाह्यस्तावदर्थः । अग्नीदध्वर्यु प्रेष्यति संवदस्व वं मया सह शम्युवाकप्रैषार्थमिति । तमध्वर्युः पृच्छति किमगमत्प्रस्तरशरीरो यजमानः स्वर्गलोकम् किं दग्धः प्रस्तर इत्यर्थः । अग्नीदगात्रिति प्रतिवचनमाह गतो यजमानो दग्धः प्रस्तर इत्यर्थः । अध्वर्युस्वाह यद्येवं ततः शम्युवाकपरि[धि]प्रहरणयोः कालो वर्तते ततश्चाश्रावय होतारमाकर्णय । अग्नीच्चाह श्रौषट् (°हा वौ AC.) शृणोत्येवायमपिवाहितो (अणोत्यो A. अणोत्यो C·) ब्रूहि

वं यद्विवक्षितमिति । स्वगा दैव्या होतृभ्य इति शम्युवाकप्रैषः हे होतः शम्योर्ब्रूहि अस्य ऋषेरार्षं ब्रूहि स्वगा स्वस्थानगामिभ्यो (°मिर्वा AC.) दैव्या देवेभ्यो होतृभ्यः परिधिशरीरेभ्यो ह्वयताम् मानुषेभ्यस्तु होतृभ्यः स्वस्तिरविनाशोऽस्त्वित्येवंरूपं वा ब्रूहीति ॥ श्रुतिस्तु सांकेतिकं दूरतरमर्थं व्याचष्टे तत्र च यथैव प्रहरणसंबन्धसूक्तवाकप्रैषसंबन्धमाश्रावणमनुषङ्गतः परिधीनामुपकारकमित्युक्तम् तथेहापि परिधिप्रहरणसंबन्धशम्युवाकप्रैषसंबद्धा व्याहृतयोऽनुषङ्गात्प्रस्तरवृत्तान्तं प्रकाशयन्तीति (°यतीति AC.) दर्शयति संवादयैनं देवैरिति प्रियमिवातिथिमागतैर्देवैः संभाषय ॥२०॥ बह्वनां मानुषाणां होतॄणामभावादेकवचनस्थानऽएवैतद्बह्वृचवचनम् ॥२१॥ संप्रगृह्णाति संगते उद्गृह्णाति संस्रवहोमाय आज्यशेषस्य स्वगाकाराय च ॥२३॥ अपिबिन्यो भागिन्योऽत्र वयमपीत्येवं मन्यन्ते ॥२४॥ स यन्निधायावद्येदिति प्रसङ्गेनार्थप्राप्तं चारकश्रुतिप्राप्तं च निधायावदानं प्रतिषेधति वाहनमश्वादि यथा तद्वार्हेत् अधः पतेत् एवं निधानं स्रुचोः प्राग्विमोकात् अधश्चलनं तथाङ्गस्य स्यात् । विमुच्यतेऽस्मिन्निति विमोचनं स्थानम् ते तत्र सादयत्यध्वर्युः विश्रमार्थं विमुञ्चति । गतिमध्वानम् ॥२७॥ ३ ॥ ८ ॥

आध्वर्यवः सूक्तवाकप्रैषः शम्युवाकप्रैषश्चाधस्ताद्उक्तस्तत्प्रसङ्गात्सूक्तवाकशम्युवाकयोरेतद्ब्राह्मणम् तत्रापि सूक्तवाकस्य प्रयोजनं विवक्षुः कालसंबन्धगतमुपादाय (!) प्रयोजनमाह । यस्मिन्काले अध्वर्युराहेषिता इत्यादि (see ८. ३. १०.) अतस्तत इति सर्वनामव्यत्ययो द्रष्टव्यः तत ऊर्ध्वं होता यदाह इदं द्यावापृथिवी इत्यादि (k. 8.) तत्सूक्तान्याहेति सूक्तवाकशब्दनिर्वचनम् ॥१॥ बह्वृब्दः समुच्चये । देवान्प्रीत्वा तर्पयित्वा शास्त्रपरिषदीव संतप्रश्ने (!) संदत्वा (!) तेषु देवेषु तेषां मध्ये अपिबिन्यो भागी भवति । अप्रैषीत्तर्पितवान् ॥३॥ प्रतिपद्यते होता वक्तुमारभते । आर्ध्न ऋद्धवतः । नमोवाकमन्त्रदानवचनम् । वं सूक्तानां वक्तासि नाहं मानुष इति वेदित्वा मामधिष्ठातुमर्हसि । उपशृणोतोत्युपश्रुतिः ततः सप्तमी द्विवचनमुपश्रुत्योरिति प्राप्तं ततश्छान्दसः पूर्वसवर्णः । श्रवति तर्पयति इत्योमा ॥४॥ शंगवी शं च ते गावौ च शंगव्याविति प्राप्ते पूर्वसवर्णः । जीवनस्य दात्र्यौ । अत्रसनशीले ते देवते उपासीनो न त्रस्यतीति देवधर्मं यजमाने दर्शयति नाहेति । नास्ति प्रवेदनं प्रलाभः एतयोः दुर्लभे ॥५॥ गावः श्रवन्ति तृप्यन्त्यस्यामिति गव्यूतिः गोप्रचारः सा च क्षेमऽउर्वी भवति । व्याघ्रादिभये त्रसन्ति न दूरं ग्रामाद्गावो गच्छन्तीत्यनुर्वी गव्यूतिर्भवति तेन गवां क्षेमहेतू स्तामित्यर्थः । वृष्टेर्दात्र्यौ ददातेर्वनिप् यकारश्चागमः वृष्टिदातारौ । रीतिस्तृप्तिस्तामापतऽइति रीत्यापा सुडुवर्षवत्यौ ॥६॥ ऊर्जः मतुपि असुगागमः वकारस्य च भवम् ॥७॥ आवेदनमावित् ॥८॥ महो मंहनं पूजा विभूतिः ॥११॥ see ८. १. २१. ॥१२॥ अमुत्र see ८. १. ३० ॥१३॥ अमुत्र see ८. १. ३३. ॥१४॥ सज्ञाता भ्रातरः आत्मिकास्तु प्राणाः तेषां च तस्य संभक्तिस्तैर्वियोगः सज्ञातवनस्या वन[स्]शब्दः कण्ड्वादिषु द्रष्टव्यः कण्ड्वादिभ्यो यक् [पा° ३. १. २७.] वननं वनस्या ॥१५॥ अश्यात् अशू व्याप्तौ प्राप्नोतु ॥१६॥ तिस्र इडायाम् see ८. १. ३०. ३३. ३७. ॥१७॥ शाखान्तराधीतानां प्रतिषेधः ॥१८॥ रासन्ताम् रासु (!) दाने । वनु याचने याचताम् वयं च मानुषा होतारः आत्मनि बह्वृचवचनम् अधिशब्दोऽग्नेरित्यस्य पञ्चम्यन्तव्यत्ययोतनार्थ अनेकपञ्चम्यर्थसंभावेऽपादानार्थद्योतकः [पा° २. ३. २८.] ॥१९॥ अञ्जसा ऋजु सम्यक् । तत्तदा तद्विज्ञानं भवितव्यतावशादेव अन्तर्हितं विक्षिप्तं मनुष्येभ्यो बभूव ॥२४॥ संस्थानं श-

म्युना दृष्टं प्रार्थयामहे ॥२६॥ अनया दक्षिणस्य पाणेः कनिष्ठिकया इति एवम् इत्यभिनयेन पृथिव्या उपदर्शनं दर्शयति । अथ कनिष्ठिकया पृथिवीमुपस्पृशतीति काण्वश्रुत्युपरोधः (!)। अग्निर्देवो दैव्यो होतेति [५.१.५.] ब्रियमाणोऽग्निभवं चित्तेनोपगतः स पृथिवीस्पर्शनेनाभिनयेन मानुषायतनं पृथिवीमुपगतोऽस्ति ॥ एव प्रासङ्गिकं होतृब्राह्मणं समाप्तम् ॥२१॥१॥१॥

पत्नीसंयाजब्राह्मणमेतत् ॥ देवानां पत्नीः देवैः सह संगता याजयिष्यन्तः । आहवनीयात्परास्तमभिमुखमायन्ति ॥१॥ गार्हपत्यमुत्तरेणातीत्य पत्नीं चापरेण पत्नीदक्षिणपार्श्वे स्थितो यजेदिति (यज्ञा° A. C.) अपरे शाखिन आहुः । भसदुत्सर्गायतनं यथा भसदि शिरः संयोजयेत्तद्वायुक्तमित्यभिप्रायः ॥३॥ चरणशब्दे सर्वं हौत्राध्वर्यवमश्राव्यम् । तिरोऽन्तर्हितमप्रकाशं मिथुनेन लिङ्गद्वयेन चर्यते लोके ॥८॥ आहवनीयात्ताभ्य एवैतत्तिरः करोति अन्तर्धानेनादर्शनमिङ्गन्ति । पुंसः अन्तर्हिता पुंसश्चादृश्यमाना (पुंसश्च दृश्यमाना C.) जिघत्सन्ति भक्षयितुमिङ्गन्ति तस्माद्यज्ञाङ्गानुकारात् क्षुद्रयोषितस्तु पुंसः समक्षमप्यन्ते अश्नन्ति ॥१२॥ परिधिप्रस्तरसंबन्धौ सूक्तवाकशम्युवाकौ तदभावेऽनुपपन्नौ । इयसशब्दोऽवसानवचनः कण्ड्वादिषु पठ्यते अवसानमवसादं पत्न्याः कुर्यात् चूपं प्रतिनिधिः ॥१४॥ प्रैषसामर्थ्यान्न सूक्तवाकमाह ॥१८॥ अशीतमः भोक्तृतमः । आत्मनि अग्नौ दक्षिणाग्निहोमादि शाखान्तरात् ॥२०॥ बर्हिराज्यं यज्ञादतिरिक्तां जुहोति । समिष्टयजुर्हि देवताविसर्जनार्थम् ॥३०॥ अध्वर्युरुत्तरपार्श्वाद्दक्षिणपार्श्वं वेदेर्गत्वा स्वदेशेऽवस्थिता एव प्रणीता नोचैर्नयति भूमौ पर्यस्यति । प्रक्षिणीयात् हिंस्यात् ॥३२॥ फलीक्रियन्ते तण्डुला एभिरिति फलीकरणाः ॥३३॥ संवृज्य समाप्तिपूर्वं संहृत्य । निर्भजन् बहिर्यज्ञात्कृतवन्तः । अस्रा लोहितेन । भागिनं स्वल्पभागेनापि भक्तम् । अभागं भागमदत्त्वा यं निर्भजन्ति स आशंसतऽएव । अबलो हि बलवतो वशे भवति लब्ध्वा आसाद्य कुतश्चित्कालपर्यायात् किं वं मां बभक्थ मनसि किं मह्यं वया दत्तम् । तेदनो (तेमनो A C.) लोहितम् ॥३५॥ २ ॥१॥

यागमानकर्माभिधायि ब्राह्मणमेतत् । अध्वर्युर्निनयति । दक्षतेः समृद्ध्यर्थस्य दक्षिणा चूपम् यज्ञसमृद्ध्यर्थं यज्ञमनु विलग्ना दक्षिणेति । दक्षिणामन्वारभ्य सा हि परिक्रियार्थे ऋत्विङ्निष्पादिता परिक्रीयते यथान्यत्रापि परिक्रयसंबन्धः परिक्रेता एवमत्रापि ॥१॥ यः अकृतकृत्यः तमोषतः यस्तु कृतनियतकर्मा तमतिसृजतः ॥२॥ यद्वै यज्ञस्य मिथ्या क्रियते अकरणमन्यथाकरणं च ॥४॥ अध्वर्योर्निनयने व्यापृतवान्मन्त्रस्याशीर्लिङ्गवाच्यजमानः प्रतिगृह्णाति ॥६॥ सर्वमेवातः परं यजमानम् ॥७॥ तद्वै तत्र इत एव लोकात्पराचोनमूर्ध्वमन्तरिक्षं दिवमित्येवं बहुतमाः क्रमन्ते ॥१॥ आदित्यस्य ये रश्मयः कदम्बकेसरवदनन्तभेदास्ते सुकृतो ये पूर्वे यजमानाः तेजःशरीराः उपरित[न]मेव तद्यज्ञरूपो प्रजापतिः । स्वर्गो वा लोकः अज्ञानानां कर्मकर्तृणाम् प्रज्ञानां पतिः ज्ञानिनामुपभोग्यं स्थानम् तत्र ते गच्छन्तीत्यभिप्रायः । भाः प्रकाशमात्रं सूर्यरूपम् ॥१०॥ प्राङ्निरोक्षणेन संतर्पिता गच्छन्तो देवा निरोक्षिता भवन्तीत्यभिप्रायः ॥१३॥ उपगम्य उदता (!) पितुरुपोदिता स्त्रीभ्यो ढक् [पा° ४.१.१२०.] ॥१६॥ प्रदक्षिणमावर्तते ॥१७॥ असहायो वाह्यः स्थूरः तत्रासहायमात्रं लक्ष्यते स्थूरोऽस्मिन्नस्तीति स्थूरी न स्थूरी अस्थूरी । ससहायानि ॥१९॥ पुत्ररहितश्चेन्मृतपुत्रो वा तथा इदं मे कर्मेदं वीर्यं देवदत्तोऽहं संतनवानीति नामग्रहणम् ॥२१॥ see १.१.६. ॥२३॥ समाप्तोऽयं पौर्णमासिकः

सर्वास्विष्टिषु पशुबन्धेषु यागेषु सौत्रामण्यां प्रकृतिभूतः । यद्यप्ययं (?यथोक्तोयं A. यथायंयं C.) कृताधानस्य भवति तथापि आधानेष्टीनां तनूहविःसंज्ञकानां पौर्णमासिको यागः प्रकृतिः तस्मात्पूर्वमुपदेश्यः । ननु तर्हि तनूहविषामेव सर्वेष्टिप्रकृतित्वं (°तवं A. C.) कृत्वा तान्येव पूर्वं कस्मान्नोपदिष्टानि सत्यम् किं तु तेष्विति कर्तव्यतावैकृत्यदर्शनात्सर्वप्रकृतित्वं न संभवति तस्मात्पौर्णमासयाग एव पूर्वमुपदिष्टः ॥ ॥ आचार्यहरिस्वामिनः कृतौ शतपथभाष्ये हविर्यज्ञेषु नवमो (अष्टमो AC.) ऽध्यायः समाप्तः ॥ ॥

VARIOUS READINGS AND CORRECTIONS OF THE PRESS.

अध्याये १ ब्राह्मणे १ कण्डिकायाम् १ M. B. C read प्राड्डिष्ठ° instead of °ड्ढि° and so is the general usage of Vedic manuscripts: see Benfey »die Hymnen des Sâmaveda Leipzig 1848. Brockhaus« p. XLVIII. I have retained this manner of writing only in the Nomin. mascul. of the themata terminating in ढ्. - ३ न्वेवो M apograph. - १० °डुपचं Sây. - १७ निर्दहन्ति M. - २. ७ निर्ममे Sây. B. निर्ममि Sây. A. C. but निर्मिमा ३. १. २१. - ८ °र्ध्वधस्ताड्ड° Sây. - १२ °ताद्गात° MBC. °ताद्ग्रात° Sây. which reading I now prefer: see ४. ३. १८. - ३. ५ °तिपप्लुविरे Sây. - ४. १ °वत्साया° M. - ११ वर्धयति M. B. C unaccented against पा° ८. १. ५६. — अध्या° २. ब्रा° १. क° ८. रुद्रामप° M. - १५ क्षिनसाव M. °सातऽइ°? - २. ७ प्रवृज्यादे° M. - १ तन्न I. ११ क्षणवन्ति MBC. क्षिणवन्ति Sây. see ७. ४. १९. and १. ३. ६. - ३. १ अप्रदनवꣳ I. देवा अन्विष्य Sây. - ४. १६ क्रूरं कु° Sây. - ५. ५ °मनुरिति M. - ६ निपात्य Sây. - १ पाञ्चिस्यङ्गुलामिव M apograph. - २० वब्रो रु I - २२ प्रकरामीति M apogr. - २३ अस्याः क्रूरमभूत्तद्यस्या एतद° Sây. — अध्या° ३. ब्रा° १. क° ७. °रतः संमा° B

prima manu. °रतः संमा° B sec. manu. C. M. See पा° ८. १. ६३. - ११ °द्भवे-दिति Sây. - २० °दाय प्राडुदाद्रवति M. °दाद्रति coni. °त्पत्नी नात्तरेति M apogr. - २५ रसस्यो वैव I. B prima m. - २. ७ °भृति चतुर्धुवायाम् coni. - ३. ३ प्रयछंति M. B. C. °छति I. - ११ पूर्वार्धो वै M apogr. - ५. १२ स ते Sây. against the accent, for the mspts have क्वैव, not क्वैव; सते is Datif Part. Praes. — अध्या° ४. ब्रा° १. क° १०. विदेय° M. माधव° Sây. - १३ निषेदे M apogr. - १४ सदा-नीरित्युत्तरेनं निर्धारयति Sây.! - २१ जिगाछति M apogr. °घांसति Sây. - २५ °तिर्व्वृणा° M. B. C sec. manu. = घृ? - २६ इडे° M apogr. ईडेन्य° Sây. see ४. ३. ५. - ३३ तृच° Sây. त्रिच° MBC. - ३५ सुक्रतुर्य° BC. M sec. m. सुक्रतुर्य° M prima m. - ३६ °न्धिढ्वं instead of °न्धिड्ढ्वं see ४. ३. १८. - २. १७ °नुष्या C. B. and Sây. - ३. १६ °मुगश्च° M. °मुयश्च° I. B. C. घ is my coniecture. - १८ उद्ग्राय M. B. C. and Sây. उद्ग्राय I. उद्ध्माय is my coniecture. द्ध is very often given in the mspts by ग्धः see Benfey p. XLVII. - ४. १३ °ढीति and ५. १२ °ढि in all the manuscripts: see Benfey p. XXXIV. - ५. ११ the accent allows to consider प्रतिप्रश्नं either as a bahuvrîhi, or as an avyayîbhâva: the latter menning is understood by Sâyana. - १३ वा यस्मिन्वा in all the mspts. Sâyana seems to read वान्यस्मिन्वा. — अध्या° ५. ब्रा° १. क° ६. and २६ अनुष्या C. and Sây. - २० क्षोत्रवर्ये I. - २५ उदोषिष्टं has lost the augment after मा, else it should be read उदौषिष्टं. - २. १ वेत्व° M. B. C. क्षौत्र° Sây. - ११ °रात्स वषट्कारिणा° Sây. - ३. ६ वै संक्रा° M apogr. संगतयोः Sây. - ११. Sây. reads नुक्षकं. - १७ मित्र आग° Sây. — अध्या° ६. ब्रा° १. क° १. अत्तर्यात I. - ४ इन्वतो M. B. C. - ११ जयं जयति M. B. C. The final न् is changed very

often in the manuscripts into Anusvâra: see Benfey p. XXXVII. XXXVIII. वेह् M. °ख्या यथास्य M. apogr. - २१ सतः is Gen. Part. praes., Sây. reads सदः. - २.२ यय्यमास M. C prima manu. ज्ञय्यमास C sec. m. B.I. - ४ सस्-र्यैवा° M. सर्य्यै B.C. समर्थे I. The mspts use to have र्क्. र्त्. र्य्य instead of र्क. र्त. र्प. - तमसृज्ञत्त M. apogr. तम् is my coniecture. - ३.१ दनायुः Sây. - १६ संव्लीनः M. संव्लीनः I. संल्लीनः Sây. संल्लीनः Sây. and my coni. - १७ मा आकुरु Sây. against the accent. उद्रेणायुध्यत्त° Sây. - १८ °ज्ञतऽइति M. ज्ञत-मिति C.B.I. - २२ इन्द्रज्येष्ठा दे° Sây. — अध्या° ७. ब्रा° १. क° १. अपाधस्ता Sây. अपादस्ता means either: *the archer Apâd*, or: *an insidiator* from the root दसु उपक्षये धा° २६. १०४. - ३ द्वितीयोऽवतीति M. apogr. ऽयती° is my coni. - १० °खा भवत्य° M. - २.१३ निदग्धं Sây. - १८ अधस्ताल्ल° Sây. - ३.१० °मया-लग्नि° Sây. - ११ सस्रे Sây. आपदीति M. apogr. अपदिति Sây. - २१ °द्रुद्रेण प-शू° Sây. - ४.१२ प्रज्ञहीत Harisv. — अध्या° ८. ब्रा° १. क° १. अवनेज्यमु° Har. - ७ चकार् M. चचार् I.B. पिवद्माना Har. - १ याममुया M. apogr. यामु मुया coni. - २५ °त्येवोपक्ल्येतोपक्लृतेऽोपक्लृतेऽेति वे°? coni. - २.५ ससृवान् Har. - ३.२१ क्षोतृक्षलामा° M. क्षोत्रे दकलामा° I. क्षोत्रेऽक्ष° coni. see ७.१.११. - २२ ने न व° M. नेव° I. C. नेव° coni. see Benfey p. XLVII. - २६ यत्ते क्षेवं M. apogr. - २७ तत्सादयति coni. — अध्या° १. ब्रा° १. क° १ सूक्तानि तदाह Har.? - २ क्युक्ता M. apogr. क्युक्ता coni. - ४ दिवस्पथिव्योरि° M against पा° ६.२.१४२. दिव° coni. - ५ शंघवी M on both times. शंगवी I.C. नाह Harisv. - २.२० °य-वित्यशी° M. against the rule. - ३.११ ज्ञयं ज्ञयति the mspts. see ६.१.१९. -

१६ वाव see शान्तनाचार्य° ४. १४ वावादीनामुभावुदात्तौ. Boehtlingk »über den Accent im Sanscrit §. 2« reads erroneously वाचा. —

Read: पत्र १. पङ्क्ति १३ °मानुष-इव. २. १४ यज्ञमेवै°. २० ऽइति. २२ तत. ३. १५ °लानि च. ४. १ स्मऽर्षयो. १० एव गृ°. ११ °स्ताडु°. १३ ऽएन°. १७ क्वैनमे°. १८ तद्-भ्याह. २१ °ताद्भ्रातमनसो. ६. ५ ऽ-इवै°. १६ ऽभिप्रसुस्राव सर्वत-इव. ७. २२ यज्ञः. ८. ८ ऽअस्यै. किं च. १ संजानीते. १. ६ °मेवैत°. १०. ३ °तऽ-सं°. ५ वर्धयति. १० किं च. ११ °ष्क एव. २२ ऽउपालभतऽउपैव. १२. १ वैतराणि. ४ °देवमभ्यू°. १४ साव इ°? १५ °ह्म्यया. १३. ७ °मेकं. १४. ३ ऽउभा°. ५ ज्ञायते. १३ ज्ञाणवन्ति. १८ वा. २२ भैषी°? १५. १८ ऽउ. २२ देवाः. १६. ६ ह्वविर्ह्विरेव. २०. २२ पशुम°. २१. १० °यँश्चन्द्र°. २२ °ञिरे. २२. १५ निर्णि°. २७. २ and ४ °क्वैव. १. १०. १४ ध्रु°. १५ तु? २८. ४ °स्रऽ-. १६ न्वृषि°? २१. ४ स्यां. ३०. १०. १२. १३. १४. ११ °न्द्रे. ३१. १४ °त्र-मेवै°. २० °न्द्रे. ३२. २ °ब्रूहीत्येव. ३. ४. ६ °न्द्रे. १ °भि संपा°. १५. ११ °चर्त°. १८ °धेनीः. ३३. ४ वशः. ३४. २१ स्मैतां? ३७. ४ °वर्चा°. ३८. १८ °हर्षि°. ४०. ४ प्र व इति. ४२. १६ युञ्जन्ति. ४४. १२ °त्रैव. ४६. २२ मोदोषिष्ठं. ४७. १ मो-. ४१. ७ °दनय-न्ये. २२ वै स क्राम°. ५०. १ °रामेव. २ कुर्यात्. ६. ७ यज्ञ-य°. ५१. २ °तु-व्य°. °तु-वै°. २२ and ५२. ११ °क्षा-स्वा°. ५३. ७ °नऽ हि. १० तन्मि°. १२ and ११ °स्व-प°. ५८. ११ वाभि सं°. ६०. १६ यं-यम°. ७०. ८ य एष. ७२. १० वै स. ७१. १६ कृता°. ८५. १७ यन्नि°? १०. १० °घत्स°. १४ °यसितऽ. १४. १ °र्वाङ् क्रमेत. —

ओम् । स यद्वाऽऋतश्चेतश्च सम्भरति । तत्सम्भाराणाꣳ सम्भारत्वं यत्र-यत्राग्निर्न्यक्तं ततस्ततः सम्भरति तद्यशसेव त्वदेवैनमेतत्समर्धयति पशुभिरिव त्वन्मिथुनैनेव त्वत्सम्भरन् ॥१॥ अथोल्लिखति । तद्यदेवास्यै पृथिव्याऽअभिष्ठितं वाभिष्यूतं वा तदेवास्याऽएतद्वृङ्क्त्यथ यन्नियायमिव पृथिव्यामाधत्ते तस्माद्वाऽउल्लिखति ॥२॥ अथाद्भिरभ्युन्नति । एष वा अपाꣳ सम्भारो यदद्भिरभ्युन्नति तद्यदपः सम्भरत्यन्नं वाऽआपोऽन्नꣳ हि वाऽआपस्तस्माद्यदिमं लोकमाप आगच्छन्त्यथैकान्नाद्यं जायते तदन्नाद्येनैवैनमेतत्समर्धयति ॥३॥ योषा वाऽआपः । वृषाग्निर्मिथुनेनैवैनमेतत्प्रजननेन समर्धयत्यद्भिर्वाऽइदꣳ सर्वमाप्तमद्भिरेवैनमेतदाप्नुवाधत्ते तस्मादपः सम्भरति ॥४॥ अथ हिरण्यꣳ सम्भरति । अग्निर्ह वाऽअपोऽभिदध्यौ मिथुन्याभिः स्यामिति ताः सम्बभूव तासु रेतः प्रासिञ्चत्तद्धिरण्यमभवत्तस्मादेतदग्निसंकाशमग्नेर्हि रेतस्तस्माद्-प्सु विन्दत्यप्सु हि प्रासिञ्चत्तस्मादेनेन न धावयति न किं चन करोत्यथ यशो देवरेतसꣳ हि तद्यशसैवैनमेतत्समर्धयति सरेतसमेव कृत्स्नमग्निमाधत्ते तस्माद्धिरण्यꣳ सम्भरति ॥५॥ अथोषात्सम्भरति । असौ ह वै द्यौरस्यै पृथिव्याऽएतान्य-शून्यद्दौ तस्मात्पशव्यमूषरमित्याहुः पशवो ह्येवैते साक्षादेव तत्पशुभिरेवैनमेतत्समर्धयति तेऽमुत आगता अस्यां पृथिव्यां प्रतिष्ठितास्तमनयोर्द्यावापृथिव्यो रसं मन्यन्ते तदनयोरेवैनमेतद्द्यावापृथिव्यो रसेन समर्धयति तस्मादूषात्सम्भरति ॥६॥ अथाखुकरीषꣳ सम्भरति । आखवो ह वाऽअस्यै पृथिव्यै रसं विदुस्तस्मात्तेऽधोऽध ऽमां पृथिवीं चरन्तः पीविष्ठा अस्यै हि रसं विदुस्ते यत्र तेऽस्यै पृथिव्यै रसं

विड्डस्तत डत्किरन्ति तद्स्याऽएवैनमेतत्पृथिव्यै रसेन समर्धयति तस्मादाखुकरीषꣳ सम्भरति पुरीष्य इति वै तमाहुर्यः श्रियं गच्छति समानं वै पुरीषं च करीषं च तदेतस्यैवावरुद्ध्यै तस्मादाखुकरीषꣳ सम्भरति ॥ ७॥ अथ शर्कराः सम्भरति । देवाश्च वाऽअसुराश्चोभये प्राजापत्याः पस्पृधिरे सा ह्येयं पृथिव्यलेलायद्यथा पुष्करपर्णमेवं ताꣳ ह स्म वातः संवहति सोपैव देवान्जगामोपासुरात्सा यत्र देवानुपजगाम ॥ ८॥ तद्ध्रोचुः । हन्तेमां प्रतिष्ठां दृꣳहामहै तस्यां ध्रुवायामशिथिलायामग्नीऽआदधामहै ततोऽस्यै सपत्नान्निर्भज्याम इति ॥ ९॥ तद्यथा शङ्कुभिश्चर्म विहन्यात् । एवमिमां प्रतिष्ठाꣳ पर्यबृꣳहन्त सेयं ध्रुवाशिथिला प्रतिष्ठा तस्यां ध्रुवायामशिथिलायामग्नीऽआदधत ततोऽस्यै सपत्नान्निरभजन् ॥ १०॥ तथोऽएवैष एतत् । इमां प्रतिष्ठाꣳ शर्कराभिः परिबृꣳहते तस्यां ध्रुवायामशिथिलायामग्नीऽआधत्ते ततोऽस्यै सपत्नान्निर्भजति तस्माच्छर्कराः सम्भरति ॥ ११॥ तान्वाऽएतान् । पञ्च सम्भाराꣳसम्भरति पाङ्क्तो यज्ञः पाङ्क्तः पशुः पञ्चर्तवः संवत्सरस्य ॥ १२॥ तद्दाल्भ्यः । षडेवर्तवः संवत्सरस्येति न्यूनमु तर्हि मियुनं प्रजननं क्रियते न्यूनाद्धाऽइमाः प्रजाः प्रजायन्ते तद्धाऽश्रेयसमुत्तरावत्तस्मात्पञ्च भवन्ति यद्यु षडेवर्तवः संवत्सरस्येत्यग्नेरेवैतेषाꣳ षष्ठस्तथोऽएवैतदन्यूनं भवति ॥ १३॥ तदाल्भ्यः । नैवैकं चन सम्भारꣳ सम्भरेदित्यस्यां वाऽएते सर्वे पृथिव्यां भवन्ति स यदेवास्यामाधत्ते तत्सर्वान्सम्भारानाप्नोति तस्मान्नैवैकं चन सम्भारꣳ सम्भरेदिति तदु समेव भरेद्यद्ध्येवास्यामाधत्ते तत्सर्वान्सम्भारानाप्नोति यदु सम्भारैः सम्भृतैर्भवति तदु भवति तस्मादु समेव भरेत् ॥ १४॥ ब्राह्मणम् ॥ १॥

कृत्तिकास्वग्नीऽआदधीत । एता वाऽअग्निनक्षत्रं यत्कृत्तिकास्तद्ध्येतल्लोम यो ऽग्निनक्षत्रेऽग्नी आदधाति तस्मात्कृत्तिकास्वादधीत ॥ १॥ एकं द्वे त्रीणि । चत्वारीति वाऽअन्यानि नक्षत्राण्यथैता एव भूयिष्ठा यत्कृत्तिकास्तद्भूमानमेवैतद्गमयति

तस्मात्कृत्तिकास्वादधीत ॥२॥ एता ह वै प्राच्यै दिशो न च्यवन्ते । सर्वाणि ह वाऽअन्यानि नक्षत्राणि प्राच्यै दिशश्च्यवन्ते तत्प्राच्यामेवास्यैतद्दिश्याहितौ भवतस्तस्मात्कृत्तिकास्वादधीत ॥३॥ अथ यस्मान्न कृत्तिकास्वादधीत । ऽर्क्षाणाꣳ ह वाऽएता अग्रे पत्न्य आसुः सप्तऽर्षीनु ह स्म वै पुरुऽर्क्षा इत्याचक्षते ता मिथुनेन व्यार्ध्यन्तामी व्युत्तराहि सप्तऽर्षय उज्यन्ति पुर एता अशमिव वै तद्यो मिथुनेन व्यृद्धः स नेन्मिथुनेन व्यृध्याऽइति तस्मान्न कृत्तिकास्वादधीत ॥४॥ तद्वै व दधीत । अग्निर्वाऽएतासां मिथुनमग्निनैता मिथुनेन समृद्धास्तस्मादेव दधीत ॥५॥ रोहिण्यामग्नीऽआदधीत । रोहिण्याꣳ ह वै प्रजापतिः प्रजाकामोऽग्नीऽआदधे स प्रजा असृजत ता अस्य प्रजाः सृष्टा एकरूपा उपस्तब्यास्तस्थू रोहिण्य इवैव तद्वै रोहिण्यै रोहिणीत्वं बहुर्हैव प्रजया पशुभिर्भवति य एवं विद्वान्रोहिण्यामाधत्ते ॥६॥ रोहिण्यामु ह वै पशवः । अग्नीऽआदधिरे मनुष्याणां कामꣳ रोहेमेति ते मनुष्याणां काममरोहन्यमु हैव तत्पशवो मनुष्येषु काममरोहँस्तमु हैव पशुषु कामꣳ रोहति य एवं विद्वान्रोहिण्यामाधत्ते ॥७॥ मृगशीर्षेऽग्नीऽआदधीत । एतद्वै प्रजापतेः शिरो यन्मृगशीर्षꣳ श्रीर्वै शिरः श्रीर्हि वै शिरस्तस्माद्योऽर्धस्य श्रेष्ठो भवत्यसावमुष्यार्धस्य शिर इत्याहुः श्रियꣳ ह गच्छति य एवं विद्वान्मृगशीर्षऽआधत्ते ॥८॥ अथ यस्मान्न मृगशीर्षऽआदधीत । प्रजापतेर्वाऽएतद्धरीरं यत्र वाऽएनं तद्विध्यंस्तद्दिषुणा त्रिकाण्डेनेत्याहुः स एतद्धरीरमनक्षाद्वास्तु वै शरीरमयज्ञियं निर्वीर्यं तस्मान्न मृगशीर्षऽआदधीत ॥९॥ तद्वै व दधीत । न वाऽएतस्य देवस्य वास्तु नायज्ञियं न शरीरमस्ति यत्प्रजापतेस्तस्मादेव दधीत पुनर्वस्वोः पुनराधेयमादधीतेति ॥१०॥ फल्गुनीष्वग्नीऽआदधीत । एता वाऽइन्द्रनक्षत्रं यत्फल्गुन्योऽप्यस्य प्रतिनाम्न्योऽर्जुनो ह वै नामेन्द्रो यदस्य गुह्यं नामार्जुन्यो वै नामैतास्ता एतत्परोऽक्षमाचक्षते फल्गुन्य इति को ह्येतत्यार्हति गुह्यं नाम य-

क्षीतुमिन्द्रो वै यज्ञमानस्तत्स्वꣳएवैतन्नक्षत्रेऽग्नी आधत्तऽइन्द्रो यज्ञस्य देवतेतेनो क्षास्यैतत्सेन्द्रमग्न्याधेयं भवति पूर्वयोरादधीत पुरस्तात्क्रतुर्ह्यैवास्मै भवत्युत्तरयोरादधीत श्वःश्रेयसꣳ ह्यैवास्माऽउत्तरावद्भवति ॥ ११ ॥ क्षत्तेऽग्नीऽआदधीत । य इक्षेत्र मे दीयेतेति तद्वाऽअनुष्या यद्धस्तेन प्रदीयते प्र ह्यैवास्मै दीयते ॥ १२ ॥ चित्रायामग्नीऽआदधीत । देवाश्च वा असुराश्चोभये प्राजापत्याः पस्पृधिरे तऽउभयऽएवामुं लोकꣳ समारुरुक्षां चक्रुर्दिवमेव ततोऽसुरा रौक्मिणामित्यग्निं चिक्यिरेऽनेनामुं लोकꣳ समारोह्याम इति ॥ १३ ॥ इन्द्रो ह वाऽईक्षां चक्रे । इमं चेद्वाऽइमे चिन्वते तत एव नोऽभिभवन्तीति स ब्राह्मणो ब्रुवाण एकेष्टकां प्रबध्येयाय ॥ १४ ॥ स होवाच । हृत्साक्रमिमामप्युपदधाऽइति तथेति तामुपाधत्त तेषामल्पकाद्ध्वाग्निरसंचित आस ॥ १५ ॥ अथ होवाच । अन्वाऽअक्रं तां दास्ये या ममेक्रेति तामभिपद्याबबर्ह तस्यामाबृहायामग्निर्व्यवशशादग्नेर्व्यवशादन्वसुरा व्यवशेडुः स ता एवेष्टका वज्रान्कृत्वा ग्रीवाः प्रचिच्छेद ॥ १६ ॥ ते ह देवाः समेत्योचुः । चित्र वाऽअभूम यऽइयतः सपत्नानबधिष्मेति तद्वै चित्रायै चित्रावꣳ चित्रꣳ ह भवति क्रुन्ति सपत्नान्क्रुन्ति द्विषन्तं भ्रातृव्यं य एवं विद्वांश्चित्रायामाधत्ते तस्मादेतत्क्षत्रिय एव नक्षत्रमुपैत्यैन्द्राघꣳसतीव क्षेष सपत्नान्वीव जिगीषते ॥ १७ ॥ नाना ह वाऽएतान्यग्ने क्षत्राण्यासुः । यथैवासौ सूर्य एवं तेषामेष उग्यन्नेव वीर्यं क्षत्रमादत्त तस्मादादित्यो नाम यदेषां वीर्यं क्षत्रमादत्त ॥ १८ ॥ ते ह देवा ऊचुः । यानि वै तानि क्षत्राण्यभूवन्न वै तानि क्षत्राण्यभूवन्निति तद्वै नक्षत्राणां नक्षत्रत्वं तस्माद्धु सूर्यनक्षत्रऽएव स्यादेष क्षेषां वीर्यं क्षत्रमादत्त यद्धु नक्षत्रकामः स्यादेतद्वाऽअनपराद्धं नक्षत्रं यत्सूर्यः स एतेनैव पुण्याहेन यदेतेषां नक्षत्राणां कामयेत तदुपैत्यैत्तस्माद्धु सूर्यनक्षत्रऽएव स्यात् ॥ १९ ॥ ब्राह्मणम् ॥ २ ॥

वसन्तो ग्रीष्मो वर्षाः । ते देवा ऋतवः शरद्धेमन्तः शिशिरस्ते पितरो य एꣳ

वापूर्यतेऽर्धमासः स देवा योऽपक्षीयते स पितरोऽहरेव देवा रात्रिः पितरः पुनरह्नः पूर्वाह्णो देवा अपराह्णः पितरः ॥१॥ ते वाऽएतऽऋतवः । देवाः पितरः स यो हैवं विद्वान्देवाः पितर इति ह्वयत्या ह्यस्य देवा देवह्वयं गच्छत्या पितरः पितृह्वयमवन्ति हैनं देवा देवह्वयेऽवन्ति पितरः पितृह्वये य एवं विद्वान्देवाः पितर इति ह्वयति ॥२॥ स यत्रोदगावर्तते । देवेषु तर्हि भवति देवांस्तर्प्यभिगोपायत्यथ यत्र दक्षिणावर्तते पितृषु तर्हि भवति पितॄंस्तर्प्यभिगोपायति ॥३॥ स यत्रोदगावर्तते । तर्प्यग्नीऽआदधीतापहतपाप्मानो देवा अप पाप्मानꣳ हृतेऽमृता देवा नामृतत्वस्याशास्ति सर्वमायुरेति यस्तर्प्याधत्तेऽथ यत्र दक्षिणावर्तते यस्तर्प्याधत्तेऽनपहतपाप्मानः पितरो न पाप्मानमपहृते मर्त्याः पितरः पुरा ह्यायुषो म्रियते यस्तर्प्याधत्ते ॥४॥ ब्रह्मैव वसन्तः । क्षत्रं ग्रीष्मो विडेव वर्षास्तस्माद्ब्राह्मणो वसन्तऽआदधीत ब्रह्म हि वसन्तस्तस्मात्क्षत्रियो ग्रीष्मऽआदधीत क्षत्रꣳ हि ग्रीष्मस्तस्माद्वैश्यो वर्षास्वादधीत विड्वै वर्षाः ॥५॥ स यः कामयेत । ब्रह्मवर्चसी स्यामिति वसन्ते स आदधीत ब्रह्म वै वसन्तो ब्रह्मवर्चसी हैव भवति ॥६॥ अथ यः कामयेत । क्षत्रꣳ श्रिया यशसा स्यामिति ग्रीष्मे स आदधीत क्षत्रं वै ग्रीष्मः क्षत्रꣳ हैव श्रिया यशसा भवति ॥७॥ अथ यः कामयेत । बह्वः प्रजया पशुभिः स्यामिति वर्षासु स आदधीत विड्वै वर्षा अन्नं विशो बह्वर्हैव प्रजया पशुभिर्भवति य एवं विद्वान्वर्षास्वाधत्ते ॥८॥ ते वाऽएतऽऋतवः । उभयऽएवापहतपाप्मानः सूर्य एवैषां पाप्मनोऽपहन्तोऽन्नैवैषामुभयेषां पाप्मानमपहन्ति तस्माद्यदैवैनं कदा च यज्ञ उपनमेद्यद्यग्नीऽआदधीत न श्वःश्वमुपासीत को हि मनुष्यस्य श्वो वेद ॥९॥ ब्राह्मणम् ॥३॥

यदहरस्य श्वोऽग्न्याधेयꣳ स्यात् । दिवैवाश्नीयान्मनो ह वै देवा मनुष्यस्याजानन्ति तेऽस्यैतच्छ्वोऽग्न्याधेयं विदुस्तेऽस्य विश्वे देवा गृहानागच्छन्ति तेऽस्य गृहे-

षूपवसन्ति स उपवसथः ॥१॥ तन्नैवानवक्लृप्तं यो मनुष्येष्वनश्नत्सु पूर्वोऽश्नीयादथ किमु यो देवेष्वनश्नत्सु पूर्वोऽश्नीयात्तस्माद्व दिवैवाश्नीयात्तद्वपि काममेव नक्तमश्नीयान्नो क्वनाहिताग्नेर्व्रतचर्यास्ति मानुषो क्वैवैष तावद्भवति यावदनाहिताग्निस्तस्माद्वपि काममेव नक्तमश्नीयात् ॥२॥ तद्वैकेऽन्नमुपबध्नन्ति । आग्नेयोऽन्नोऽग्नेरेव सर्वत्वायेति वदन्तस्तद्व तथा न कुर्याद्यद्यस्याद्यः स्यादग्नीधऽएवैनं प्रातर्दद्यात्तेनैव तं काममाप्नोति तस्माद्व तन्नाद्रियेत ॥३॥ अथ चातुष्प्राश्यमोदनं पचन्ति । इन्द्राऽस्येनेन प्रीणीम इति यथा वैन वाहनेन स्यन्त्स्यन्त्स्यात्तत्सुहितं कर्तवै ब्रूयादेवमेतदिति वदन्तस्तद्व तथा न कुर्याद्यद्वाऽस्य ब्राह्मणाः कुले वसन्त्यृत्विजश्चानृत्विजश्च तेनैव तं काममाप्नोति तस्माद्व तन्नाद्रियेत ॥४॥ तस्य सर्पिरासेचनं कृत्वा । सर्पिरासिच्याश्वत्थीस्तिस्रः समिधो घृतेनान्वज्य समिद्वतीभिर्घृतवतीभिर्ऋग्भिरभ्यादधति शमीगर्भमेतदाप्नुम इति वदन्तः स यः पुरस्तात्संवत्सरमभ्यादध्यात्स क्वतं काममाप्नुयात्तस्माद्व तन्नाद्रियेत ॥५॥ तद्व क्वोवाच भाल्लवेयः । यथा वाऽअन्यत्करिष्यन्त्सोऽन्यत्कुर्याद्यथान्यद्वदिष्यन्त्सोऽन्यद्वदेद्यथान्येन पथैष्यन्त्सोऽन्येन प्रतिपद्येतैवं तद्य एतं चातुष्प्राश्यमोदनं पचेदपराद्धिरेव सेति न हि तदवकल्पते यस्मिन्नग्नावृचा वा साम्ना वा यजुषा वा समिधं वाभ्यादध्यादाहुतिं वा जुहुयाद्यत्तं दक्षिणा वा क्रियुरनु वा गमयेयुर्दक्षिणा वा क्वेनद्ध क्रियत्यन्वाहार्यपचनो भविष्यतीत्यनु वा गमयन्ति ॥६॥ अथ जाग्रति जाग्रति देवाः । तद्देवानेवैतदुपावर्तते स सदेवतरः आत्ततरस्तपस्वितरोऽग्नीऽआधत्ते तद्वपि काममेव स्वप्यान्नो क्वनाहिताग्नेर्व्रतचर्यास्ति मानुषो क्वैवैष तावद्भवति यावदनाहिताग्निस्तस्माद्वपि काममेव स्वप्यात् ॥७॥ तद्वैकेऽनुदिते मथित्वा । तमुदिते प्राश्नमुद्धरन्ति तदु नदुभेऽअहोरात्रे परिगृह्णीमः प्राणोदानयोर्मनसश्च वाचश्च पर्यायाऽइति वदन्तस्तदु तथा न कुर्यादुभौ क्वैवास्य तथानुदितऽआहितौ भवतोऽनुदिते हि मथित्वा तमु-

दिते प्राञ्चमुद्धरन्ति स य उदितऽआहवनीयं मन्येत्स कृ तत्पर्याप्नुयात् ॥ ८ ॥ अ-
कृर्वै देवाः । अनपकृतपाप्मानः पितरो न पाप्मानमपकृते मर्त्याः पितरः पुरा
कृायुषो म्रियते योऽनुदिते मन्यत्यपकृतपाप्मानो देवा अप पाप्मानꣳ कृतेऽमृता
देवा नामृतत्वस्याशास्ति सर्वमायुरेति श्रीर्देवाः श्रियं गछति यशो देवा यशो कृ
भवति य एवं विद्वानुदिते मन्यति ॥ ९ ॥ तदाहुः । यन्नऽर्चा न साम्ना न यजुषा-
ग्निराधीयतेऽथ केनाधीयतऽइति ब्रह्मणो कैवैष ब्रह्मणाधीयते वाग्वै ब्रह्म तस्यै
वाचः सत्यमेव ब्रह्म ता वाऽएताः सत्यमेव व्याकृतयो भवन्ति तदस्य सत्येने-
वाधीयते ॥ १० ॥ भूरिति वै प्रजापतिः । इमामजनयत भुव इत्यन्तरिक्षꣳ स्वरिति
दिवमेतावद्वाऽइदꣳ सर्वं यावदिमे लोकाः सर्वेणैवाधीयते ॥ ११ ॥ भूरिति वै प्र-
जापतिः । ब्रह्माजनयत भुव इति क्षत्रꣳ स्वरिति विशमेतावद्वाऽइदꣳ सर्वं याव-
द्ब्रह्म क्षत्रं विट् सर्वेणैवाधीयते ॥ १२ ॥ भूरिति वै प्रजापतिः । आत्मानमजनयत
भुव इति प्रजाꣳ स्वरिति पशूनेतावद्वाऽइदꣳ सर्वं यावदात्मा प्रजा पशवः सर्वे-
णैवाधीयते ॥ १३ ॥ स वै भूर्भुव इति । एतावतैव गार्हपत्यमादधात्यथ यत्सर्वै-
राद्ध्यात्केनाहवनीयमादध्याद्धुऽअक्षरे परिशिनष्टि तेनोऽएतान्यथातथामानि भ-
वन्ति तैः सर्वैः पञ्चभिराहवनीयमादधाति भूर्भुवः स्वरिति तान्यष्टावक्षराणि स-
म्पद्यन्तेऽष्टाक्षरा वै गायत्री गायत्रमग्नेश्छन्दः स्वेनैवैनमेतच्छन्दसाधत्ते ॥ १४ ॥ दे-
वान्ह वाऽअग्नेऽआधास्यमानान् । तानसुररक्षसानि ररक्षुर्नाग्निर्जनिष्यते नाग्नी
आधास्यधऽइति तद्यद्ररक्षंस्तस्माद्रक्षाꣳसि ॥ १५ ॥ ततो देवा एतं वज्रं ददृशुः ।
यदश्वं तं पुरस्ताद्युदश्रयंस्तस्याभयेऽनाष्ट्रे निवातेऽग्निरजायत तस्माद्यत्राग्निं मन्थि-
ष्यन्त्स्यात्तदश्वमानयेवै ब्रूयात्स पूर्वेणोपतिष्ठते वज्रमेवैतद्युक्रूयति तस्याभयेऽनाष्ट्रे
निवातेऽग्निर्जायते ॥ १६ ॥ स वै पूर्ववाट् स्यात् । स ह्यपरिमितं वीर्यमभिवर्धते
यदि पूर्ववाहं न विन्देदपि य एव कश्चाश्वः स्याद्यद्यश्वं न विन्देदन्यनडानेव

स्यादेष क्षेवानडुहो बन्धुः ॥ १७॥ तं यत्र प्राञ्चꣳ करन्ति । तत्पुरस्तादश्वं नयन्ति तत्पुरस्तादेवैतन्नाष्ट्रा रक्षाꣳस्यपघ्नन्नेत्यथाभयेनानाष्ट्रेण करन्ति ॥ १८॥ तं वै तथैव कुर्युः । यथैनमेष प्रत्यङ्डुपाचरेदेष वै यज्ञो यदग्निः प्रत्यङ् क्षैवैनं यज्ञः प्रविशति तं क्षिप्रे यज्ञ उपनमत्यथ यस्मात्पराङ् भवति पराङु क्षैवास्माद्यज्ञो भवति स यो क्षैनं तत्रानुव्याकुर्यात्पराङस्माद्यज्ञोऽभूदितीश्वरो क्ष यत्तथैव स्यात् ॥ १९॥ एष उ वै प्राणः । तं वै तथैव कुर्युर्यथैनमेष प्रत्यङ्डुपाचरेत्प्रत्यङ् क्षैवैनं प्राणः प्रविशत्यथ यस्मात्पराङ् भवति पराङु क्षैवास्मात्प्राणो भवति स यो क्षैनं तत्रानुव्याकुर्यात्पराङस्मात्प्राणोऽभूदितीश्वरो क्ष यत्तथैव स्यात् ॥ २०॥ ॥ शतम् १०० ॥ ॥ अयं वै यज्ञो योऽयꣳ पवते । तं वै तथैव कुर्युर्यथैनमेष प्रत्यङ्डुपाचरेत्प्रत्यङ् क्षैवैनं यज्ञः प्रविशति तं क्षिप्रे यज्ञ उपनमत्यथ यस्मात्पराङ् भवति पराङु क्षैवास्माद्यज्ञो भवति स यो क्षैनं तत्रानुव्याकुर्यात्पराङस्माद्यज्ञोऽभूदितीश्वरो क्ष यत्तथैव स्यात् ॥ २१॥ एष उ वै प्राणः । ते वै तथैव कुर्युर्यथैनमेष प्रत्यङ्डुपाचरेत्प्रत्यङ् क्षैवैनं प्राणः प्रविशत्यथ यस्मात्पराङ् भवति पराङु क्षैवास्मात्प्राणो भवति स यो क्षैनं तत्रानुव्याकुर्यात्पराङस्मात्प्राणोऽभूदितीश्वरो क्ष यत्तथैव स्यात्तस्माङु तथैव कुर्युः ॥ २२॥ अथाश्वमाक्रमयति । तमाक्रमय्य प्राञ्चमुन्नयति तं पुनरावर्तयति तमुदञ्चं प्रमुञ्चति वीर्यं वाऽअश्वो नेदस्मादिदं पराग्वीर्यमसदिति तस्मात्पुनरावर्तयति ॥ २३॥ तमश्वस्य पदऽआधत्ते । वीर्यं वाऽअश्वो वीर्यऽएवैनमेतदाधत्ते तस्मादश्वस्य पदऽआधत्ते ॥ २४॥ स वै तूष्णीमेवाग्रऽउपस्पृशति । अथोऋक्त्यथोपस्पृशति भूर्भुवः स्वरित्येव तृतीयेनादधाति त्रयो वाऽइमे लोकास्तदिमानेवैतल्लोकानाप्नोत्येतन्नैकम् ॥ २५॥ अथेदं द्वितीयं । तूष्णीमेवाग्रऽउपस्पृशत्यथोऋक्ति भूर्भुवः स्वरित्येव द्वितीयेनादधाति यो वाऽअस्यामप्रतिष्ठितो भारमुऋक्ति नैनꣳ शक्नोत्युद्यन्तुꣳ सꣳ क्षैनꣳ मृणाति ॥ २६॥ स यत्तूष्णीमुपस्पृशति ।

तद्स्यां प्रतिष्ठायां प्रतितिष्ठन्ति सोऽस्यां प्रतिष्ठित आधत्ते तथा न व्यथते तद्ध
स्मैतत्पश्चेव दध्रिरऽआसुरिः पाञ्चर्माधुकिः सर्वं वाऽअन्यदियसितमिव प्रथमेनैवो-
च्यत्यादध्याद्भूर्भुवः स्वरिति तदेवानियसितमित्यतो यतमथा कामयेत तथा कुर्यात्
॥ २७ ॥ अथ पुरस्तात्परीत्य । पूर्वार्धमुल्मुकानामभिपद्य जपति द्यौरिव भूम्ना पृ-
थिवीव वरिम्णेति यथासौ द्यौर्बह्वी नक्षत्रैरेवं बह्वभूयासमित्येवैतदाह यदाह
द्यौरिव भूम्नेति पृथिवीव वरिम्णेति यथेयं पृथिव्युर्व्येवमुरुर्भूयासमित्येवैतदाह त-
स्यास्ते पृथिवि देवयजनि पृष्ठेऽग्न्यायनि पृष्ठेऽधत्तेऽग्निमन्नादमन्नाय्यायादध
ऽइत्यन्नादोऽग्निरन्नादो भूयासमित्येवैतदाह सैषाशीरेव स यदि कामयेत जपेदेत-
द्यद्यु कामयेतापि नाद्रियेत ॥ २८ ॥ अथ सर्पराज्ञ्या ऋग्भिरुपतिष्ठते । आयं गौः पृ-
श्निरक्रमीदसदन्मातरं पुरः । पितरं च प्रयन्त्स्वः ॥ अन्तश्चरति रोचनास्य प्राणाद्-
पानती । व्यख्यन्महिषो दिवम् ॥ त्रिꣳशद्धाम विराजति वाक्पतङ्गाय धीयते ।
प्रति वस्तोरह द्युभिरिति तद्यदेवास्यात्र सम्भारैर्वा नक्षत्रैर्वर्तुभिर्वाधानेन वा-
नाप्तं भवति तदेवास्यैतेन सर्वमाप्तं भवति तस्मात्सर्पराज्ञ्या ऋग्भिरुपतिष्ठते ॥ २१ ॥
तदाहुः । न सर्पराज्ञ्या ऋग्भिरुपतिष्ठेतेतीयं वै पृथिवी सर्पराज्ञी स यदेवास्यामा-
धत्ते तत्सर्वान्कामानाप्नोति तस्मान्न सर्पराज्ञ्या ऋग्भिरुपतिष्ठेतेति ॥ ३० ॥ ब्राह्म-
णम् ॥ ४ ॥ अध्यायः ॥ १ [१०.] ॥ ॥

उद्धृत्याहवनीयं पूर्णाहुतिं जुहोति । तद्यत्पूर्णाहुतिं जुहोत्यन्नादं वाऽएतमा-
त्मनो जनयते यदग्निं तस्माऽएतदन्नाद्यमपिदधाति यथा कुमाराय वा जाताय व-
त्साय वा स्तनमपिदध्यादेवमस्माऽएतदन्नाद्यमपिदधाति ॥ १ ॥ स एतेनान्नेन शा-
न्तः । उत्तराणि हवीꣳषि अप्यमाणान्युपरमति शश्वद्ध वाऽअध्वर्यु वा यजमानं वा
प्रदहेत्तौ ह्यस्य नेदिष्ठं चरतो यदस्मिन्नेतामाहुतिं न जुहुयात्तस्माद्धाऽएतामाहु-
तिं जुहोति ॥ २ ॥ तां वै पूर्णां जुहोति । सर्वं वै पूर्णꣳ सर्वेणैवैनमेतद्धमयति

स्वाहाकारेण जुहोत्यनिरुक्तो वै स्वाहाकारः सर्वं वाऽअनिरुक्तꣳ सर्वेणैवैनमेतद्दमयति ॥३॥ यां वै प्रजापतिः । प्रथमामाकुतिमजुहोत्स्वाहेति वै तामजुहोत्सो स्विदेषा निदानेन तस्मात्स्वाहेति जुहोति तस्यां वरं ददाति सर्वं वै वरः सर्वेणैवैनमेतद्दमयति ॥४॥ तदाहुः । एतामेवाकुतिꣳ हुत्वाथोत्तराणि हवीꣳषि नाद्रियेतैतयैव तं काममाप्नोति यमभिकाममुत्तराणि हवीꣳषि निर्वपतीति ॥५॥ स वाऽअग्नये पवमानाय निर्वपति । प्राणो वै पवमानः प्राणमेवास्मिन्नेतद्दधाति तद्धेतयैवास्मिंस्तद्दधात्यन्नꣳ हि प्राणोऽन्नमेषाकुतिः ॥६॥ अथाग्नये पावकाय निर्वपति । अन्नं वै पावकमन्नमेवास्मिन्नेतद्दधाति तद्धेतयैवास्मिंस्तद्दधात्येषा ह्येव प्रत्यक्षमन्नमाकुतिः ॥७॥ अथाग्नये शुचये निर्वपति । वीर्यं वै शुचि यद्धाऽअस्येतदुज्ज्वलत्येतदस्य वीर्यꣳ शुचि वीर्यमेवास्मिन्नेतद्दधाति तद्धेतयैवास्मिंस्तद्दधाति यदा ह्येवास्मिन्नेतामाकुतिं जुहोत्यथास्यैतद्वीर्यꣳ शुच्युज्ज्वलति ॥८॥ तस्मादाहुः । एतामेवाकुतिꣳ हुत्वाथोत्तराणि हवीꣳषि नाद्रियेतैतयैव तं काममाप्नोति यमभिकाममुत्तराणि हवीꣳषि निर्वपतीति तदु निर्वपेदेवोत्तराणि हवीꣳषि परोऽक्षमिव वाऽएतद्यद्दस्तदिदमितीव ॥९॥ स यदग्नये पवमानाय निर्वपति । प्राणा वै पवमानो यदा वै जायतेऽथ प्राणोऽथ यावन्न जायते मातुर्वैव तावत्प्राणमनु प्राणिति यथा वा तज्जातऽएवास्मिन्नेतत्प्राणं दधाति ॥१०॥ अथ यदग्नये पावकाय निर्वपति । अन्नं वै पावकं तज्जातऽएवास्मिन्नेतदन्नं दधाति ॥११॥ अथ यदग्नये शुचये निर्वपति । वीर्यं वै शुचि यदा वाऽअन्नेन वर्धतेऽथ वीर्यं तदन्नेनैवैनमेतद्वर्धयित्वाथास्मिन्नेतद्वीर्यꣳ शुचि दधाति तस्मादग्नये शुचये ॥१२॥ तद्धेतदेव सद्विपर्यस्तमिव । अग्निर्ह यत्र देवेभ्यो मनुष्यानभ्युपाववर्त तद्धेक्षां चक्रे मैव सर्वेणेवात्मना मनुष्यानभ्युपावृतमिति ॥१३॥ स एतास्तिस्रस्तनूरेषु लोकेषु विन्यधत्त । यदस्य पवमानꣳ रूपमासीत्तदस्यां पृथिव्यां न्यधत्ताथ यत्पावकं तदन्तरिक्षे

ऽथ यद्कुचि तद्दिवि तद्वाऽऋषयः प्रतिबुबुधिरे यऽउ तर्ह्यृषय आसुरसर्वेण वै न आत्मनाग्निरभ्युपावृतदिति तस्माऽएतानि हवीꣳषि निरवपन् ॥ १४ ॥ स यदग्नये पवमानाय निर्वपति । यदेवास्यास्यां पृथिव्याꣳ रूपं तदेवास्यैतेनाप्नोत्यथ यदग्नये पावकाय निर्वपति यदेवास्यान्तरिक्षे रूपं तदेवास्यैतेनाप्नोत्यथ यदग्नये शुचये निर्वपति यदेवास्य दिवि रूपं तदेवास्यैतेनाप्नोत्येवमु कृत्स्नमेवाग्निमनपनिकितमाधत्ते तस्माद्ध निर्वपेदेवोत्तराणि हवीꣳषि ॥ १५ ॥ केवलबर्हिः प्रथमꣳ हविर्भवति । समानबर्हिषीऽउत्तरेऽअयं वै लोकः प्रथमꣳ हविरयमन्तरिक्षं द्वितीयं द्यौरेव तृतीयं बङ्कुलेव वाऽइयं पृथिवी लेलयेवान्तरिक्षं लेलयेवासौ द्यौरुभे चिदेनां प्रत्युष्यामिनी स्तामिति तस्मात्समानबर्हिषी ॥ १६ ॥ अष्टाकपालाः सर्वे पुरोडाशा भवन्ति । अष्टाक्षरा वै गायत्री गायत्रमग्नेश्छन्दः स्वेनैवैनमेतच्छन्दसाधत्ते तानि सर्वाणि चतुर्विꣳशतिः कपालानि सम्पद्यन्ते चतुर्विꣳशत्यक्षरा वै गायत्री गायत्रमग्नेश्छन्दः स्वेनैवैनमेतच्छन्दसाधत्ते ॥ १७ ॥ अथादित्ये चरुं निर्वपति । प्रच्यवतऽइव वाऽएषोऽस्माल्लोकाद्य एतानि हवीꣳषि निर्वपतीमान्हि लोकान्त्समारोहन्नेति ॥ १८ ॥ स यदादित्ये चरुं निर्वपति । इयं वै पृथिव्यदितिः सेयं प्रतिष्ठा तदस्यामेवैतत्प्रतिष्ठायां प्रतितिष्ठति तस्मादादित्ये चरुं निर्वपति ॥ १९ ॥ तस्यै विराजौ संयाज्ये स्यातामित्याहुः । विराडीयमित्यथो त्रिष्टुभौ त्रिष्टुब्भीयमित्यथो जगत्यौ जगती ह्योयमिति विराजावित्येव स्याताम् ॥ २० ॥ तस्यै धेनुर्दक्षिणा । धेनुरिव वाऽइयं मनुष्येभ्यः सर्वान्कामान्दुहे माता धेनुर्मातेव वाऽइयं मनुष्यान्बिभर्ति तस्माद्धेनुर्दक्षिणेतन्नैकमयनम् ॥ २१ ॥ अथेदं द्वितीयम् । आग्नेयमेवाष्टाकपालं पुरोडाशं निर्वपति परोऽक्षमिव वाऽएतद्यदग्नये पवमानायाग्नये पावकायाग्नये शुचयऽइतीवाथाक्षमेवैनमेतत्प्रत्यक्षमाधत्ते तस्मादग्नेयोऽथादित्ये चरुं निर्वपति स य एव चरोर्बन्धुः स बन्धुः ॥ २२ ॥ ब्राह्मणम् ॥ ५ [२. १.] ॥ ॥

घ्नन्ति वाऽएतद्यज्ञं । यदेनं तन्वते यन्त्रेव राज्ञानमभिषुण्वन्ति तत्तं घ्नन्ति यत्यश्नुꣳ संज्ञपयन्ति विशासति तत्तं घ्नन्त्युलूखलमुसलाभ्यां दृषदुपलाभ्याꣳ हविर्यज्ञं घ्नन्ति ॥१॥ स एष यज्ञो हतो न ददत्ते । तं देवा दक्षिणाभिरदक्षयंस्तद्यदेनं दक्षिणाभिरदक्षयंस्तस्माद्दक्षिणा नाम तद्यदेवात्र यज्ञस्य हतस्य व्यथते तदेवास्यैतद्दक्षिणाभिर्दक्षयत्यथ समृद्ध एव यज्ञो भवति तस्माद्दक्षिणा ददाति ॥२॥ ता वै षड्दद्यात् । षड्वाऽऋतवः संवत्सरस्य संवत्सरो यज्ञः प्रजापतिः स यावानेव यज्ञो यावत्यस्य मात्रा तावतीभिर्दक्षयति ॥३॥ द्वादश दद्यात् । द्वादश वै मासाः संवत्सरस्य संवत्सरो यज्ञः प्रजापतिः स यावानेव यज्ञो यावत्यस्य मात्रा तावतीभिर्दक्षयति ॥४॥ चतुर्विꣳशतिं दद्यात् । चतुर्विꣳशतिर्वै संवत्सरस्यार्धमासाः संवत्सरो यज्ञः प्रजापतिः स यावानेव यज्ञो यावत्यस्य मात्रा तावतीभिर्दक्षयत्येषा मात्रा दक्षिणानां दद्याद्येव यथाश्रद्धं भूयसीस्तद्यद्दक्षिणा ददाति ॥५॥ द्वया वै देवा देवाः । अरुणेव देवा अथ ये ब्राह्मणाः शुश्रुवाꣳसोऽनूचानास्ते मनुष्यदेवास्तेषां द्वेधा विभक्त एव यज्ञ आहुतय एव देवानां दक्षिणा मनुष्यदेवानां ब्राह्मणानाꣳ शुश्रुवुषामनूचानानामाहुतिभिरेव देवान्प्रीणाति दक्षिणाभिर्मनुष्यदेवान्ब्राह्मणांꣳशुश्रुवुषोऽनूचानांस्तऽएनमुभये देवाः प्रीताः सुधायां दधति ॥६॥ तद्यथा योनौ रेतो दध्यात् । एवमेवैतद्ब्रह्मिजो यजमानं लोके दधति तद्यदेभ्य एतद्ददाति ये मेदꣳ सम्प्रापिपन्निति नु दक्षिणानाम् ॥७॥ देवाश्च वाऽअसुराश्च । उभये प्राजापत्याः पस्पृधिरे तऽउभयऽएवानात्मान आसुर्मर्त्या ह्यासुरनात्मा हि मर्त्यस्तेषूभयेषु मर्त्येष्वग्निरेवामृत आस तꣳ ह स्मोभयेऽमृतमुपजीवन्ति स यꣳ ह स्मैषां घ्नन्ति तꣳ ह स्म वै स भवति ॥८॥ ततो देवाः । तनोयाꣳस इव परिशिशिषिरे तेऽर्चन्तः श्राम्यन्तश्चेरुरुतासुरात्सपत्नान्मर्त्यानभिभवेमेति तऽएतदमृतमग्न्याधेयं ददृशुः ॥९॥ ते होचुः । हन्तेदममृतमन्तरात्मन्नादधामहै तऽइदममृतमन्तरात्मन्नाधा-

यामृता भूत्वास्तर्या भूत्वा स्तर्यात्सपत्नान्मर्त्यानभिभविष्याम इति ॥१०॥ ते होचुः । उभयेषु वै नोऽयमग्निः प्र वेवासुरेभ्यो ब्रवामेति ॥११॥ ते होचुः । आ वै वयमग्नौ धास्यामहेऽथ यूयं किं करिष्यथेति ॥१२॥ ते होचुः । अथैनं वयं न्येव धास्यामहेऽत्र तृणानि दहात्र दारूणि दहात्रौदनं पचात्र माꣳसं पचेति स यं तमसुरा न्यदधत तेनानिन मनुष्या भुञ्जते ॥१३॥ अथैनं देवाः । अत्तरात्मन्नादधत तꣳ इममृतमत्तरात्मन्नाधायामृता भूत्वास्तर्या भूत्वा स्तर्यात्सपत्नान्मर्त्यानभ्यभवंस्तथोऽएवैष एतदमृतमत्तरात्मन्नाधत्ते नामृतत्वस्याशास्ति सर्वमायुरेत्यस्तर्यो हैव भवति न हैनꣳ सपत्नस्तुस्तूर्षमाणश्चन स्तृणुते तस्माद्यदाहिताग्निश्चानाहिताग्निश्च स्पर्धेतेऽआहिताग्निरेवाभिभवत्यस्तर्यो हि खलु स तर्हि भवत्यमृतः ॥१४॥ तद्यत्रैनमद्यो मन्थन्ति । तज्ज्ञातमभिप्राणिति प्राणो वाऽअग्निर्ज्ञातमेवैनमेतत्सन्तं जनयति स पुनरुपानिति तदेनमत्तरात्मन्नाधत्ते सोऽस्यैषोऽत्तरात्मन्नग्निराहितो भवति ॥१५॥ तमुद्दीप्य समिन्द्धे । इह यद्यऽइह सुकृतं करिष्यामीत्येवैनमेतत्समिन्द्धे योऽस्यैषोऽत्तरात्मन्नग्निराहितो भवति ॥१६॥ अत्तरेणागाद्यवृतदिति । न ह वाऽअस्यैतं कश्चनात्तरेणैति यावज्जीवति योऽस्यैषोऽत्तरात्मन्नग्निराहितो भवति तस्माद्ध तन्नाद्रियेत यदनुगह्येन्न ह वाऽअस्यैषोऽनुगह्यति यावज्जीवति योऽस्यैषोऽत्तरात्मन्नग्निराहितो भवति ॥१७॥ ते वाऽएते प्राणा एव यदग्नयः । प्राणोदानावेवाहवनीयश्च गार्हपत्यश्च व्यानोऽन्वाहार्यपचनः ॥१८॥ तस्य वाऽएतस्याग्न्याधेयस्य । सत्यमेवोपचारः स यः सत्यं वदति यथाग्निꣳ समिद्धं तं घृतेनाभिषिञ्चेदेवꣳ हैनꣳ स उद्दीपयति तस्य भूयो-भूय एव तेजो भवति श्वः-श्वः श्रेयान्भवत्यथ योऽनृतं वदति यथाग्निꣳ समिद्धं तमुदकेनाभिषिञ्चेदेवꣳ हैनꣳ स ज्ञासयति तस्य कनीयः-कनीय एव तेजो भवति श्वः-श्वः पापीयान्भवति तस्माद्ध सत्यमेव वदेत् ॥११॥ तद्ध स्माप्यरुणौपवेशिं ज्ञातय ऊचुः । स्थविरो वाऽअ-

स्यग्नीऽआधत्स्वेति स होवाच ते मैतद्भूय वाचंयम एवैधि न वाऽआहिताग्निना-नृतं वदितव्यं न वदन्जातु नानृतं वदेत्तावत्सत्यमेवोपचार इति ॥२०॥ ब्राह्मणम् ॥ ६ [२. २.]॥ प्रथमः प्रपाठकः ॥ ॥ कण्डिकासंख्या ११४ ॥ ॥

वरुणो हैनद्राज्यकाम आदधे । स राज्यमगह्नत्तस्माद्यश्च वेद यश्च न वरुणो राज्येत्येवाहुः सोमो यशस्कामः स यशोऽभवत्तस्माद्यश्च सोमे लभते यश्च नोभावेवागह्नतो यश एवैतद्भ्रष्टुमागह्नन्ति यशो ह भवति राज्यं गह्नति य एवं विद्वानाधत्ते ॥१॥ अग्नौ ह वै देवाः । सर्वाणि रूपाणि निदधिरे यानि च ग्राम्याणि यानि चारण्यानि विज्ञयं वोपप्रेष्यन्तः कामचारस्य वा कामायायं नो गोपिष्ठो गोपायदिति वा ॥२॥ तान्यु हाग्निर्निचकमे । तैः संगृह्यऽर्तून्प्रविवेश पुनरेम इति देवा एदग्निं तिरोभूतं तेषाꣳ हेयसेवास किमिहु कर्तव्यं केहु प्रज्ञेति वा ॥३॥ तत एतद्भ्रष्टा पुनराधेयं ददर्श । तदादधे तेनाग्नेः प्रियं धामोपजगाम सोऽस्माऽउभयानि रूपाणि प्रतिनिःससर्ज यानि च ग्राम्याणि यानि चारण्यानि तस्मादाहुस्त्वाष्ट्राणि वै रूपाणीति त्वष्टुर्ह्येव सर्वꣳ रूपमुप हु त्वेवान्याः प्रजा यावत्सो-यावत्स इव तिष्ठत्ते ॥४॥ तस्मै कं पुनराधेयमादधीत । एवꣳ हैवाग्नेः प्रियं धामोपगह्नति सोऽस्माऽउभयानि रूपाणि प्रतिनिःसृजति यानि च ग्राम्याणि यानि चारण्यानि तस्मिन्नेतान्युभयानि रूपाणि दृश्यन्ते परमता वै सा स्यूहयत्यु हास्मै तथा पुष्यति लोक्यमेवापि ॥५॥ आग्नेयोऽयं यज्ञः । ज्योतिरग्निः पाप्मनो दग्धा सोऽस्य पाप्मानं दहति स इह ज्योतिरेव श्रिया यशसा भवति ज्योतिरमुत्र पुण्यलोकत्वेतन्नु तद्यस्मादादधीत ॥६॥ स वै वर्षास्वादधीत । वर्षा वै सर्वऽऋतवो वर्षा हि वै सर्वऽऋतवोऽथादो वर्षमकुर्मादो वर्षमकुर्मेति संवत्सरात्संपश्यन्ति वर्षा हु त्वेव सर्वेषामृतूनाꣳ रूपमुत हि तद्वर्षासु भवति यदाहुर्ग्रीष्मऽइव वाऽअग्येत्युतो तद्वर्षासु भवति यदाहुः शिशिरऽइव वाऽअग्येति वर्षादिद्वर्षाः ॥७॥

अथैतदेव परोऽक्षꣳ रूपं । यदेव पुरस्ताद्याति तद्वसन्तस्य रूपं यत्तनयति तद्ग्रीष्मस्य यद्वर्षति तद्वर्षाणां यद्विद्योतते तच्छरदो यद्बिभेत्यद्भ्यो हेमन्तस्य वर्षाः सर्वऽऋतव ऋतून्प्राविशदृतुभ्य एवैनमेतन्निर्मिमीते ॥८॥ आदित्यस्त्वेव सर्वऽऋतवः । यदेवोदेत्यथ वसन्तो यदा संगवोऽथ ग्रीष्मो यदा मध्यन्दिनोऽथ वर्षा यदापराह्णोऽथ शरद्यदेवास्तमेत्यथ हेमन्तस्तस्माद्ध मध्यन्दिनऽएवाद्धीत तर्हि क्षेषोऽस्य लोकस्य नेदिष्ठं भवति तन्नेदिष्ठादेवैनमेतन्मध्यान्निर्मिमीते ॥९॥ क्षायेव वाऽअयं पुरुषः । पाप्मनानुषक्तः सोऽस्यात्र कनिष्ठो भवत्यधस्पदमिवेयस्यते तत्कनिष्ठमेवैतत्पाप्मानमवबाधते तस्माद्ध मध्यन्दिनऽएवाद्धीत ॥१०॥ तं वै दर्भैरुद्धरति । दारुभिर्वै पूर्वमुद्धरति दारुभिः पूर्वं दारुभिरपरं ज्ञामि कुर्यात्समदं कुर्यादापो दर्भा आपो वर्षा ऋतून्प्राविशदद्भिरेवैनमेतद्भ्यो निर्मिमीते तस्माद्दर्भैरुद्धरति ॥११॥ अर्कपलाशाभ्यां । व्रीहिमयमपूपं कृत्वा यत्र गार्हपत्यमाधास्यन्भवति तन्निदधाति तद्गार्हपत्यमादधाति ॥१२॥ अर्कपलाशाभ्यां । यवमयमपूपं कृत्वा यत्राहवनीयमाधास्यन्भवति तन्निदधाति तदाहवनीयमादधाति पूर्वाभ्यामेवैनावेतदग्निभ्यामन्तर्दधत इति वदन्तस्तु तथा न कुर्याद्रात्रिभिर्ह्येवान्तर्हितौ भवतः ॥१३॥ आग्नेयमेव पञ्चकपालं पुरोडाशं निर्वपति । तस्य पञ्चपदाः पङ्क्तयो याज्यानुवाक्या भवन्ति पञ्च वाऽऋतव ऋतून्प्राविशदृतुभ्य एवैनमेतन्निर्मिमीते ॥१४॥ सर्व आग्नेयो भवति । एवꣳ हि त्वष्टाग्नेः प्रियं धामोपागच्छत्तस्मात्सर्व आग्नेयो भवति ॥१५॥ तेनोपाꣳशु चरन्ति । यद्ध ज्ञातये वा सख्ये वा निष्केवल्यं चिकीर्षति तिर इवैतेन बोभवद्धेश्वदेवोऽन्यो यज्ञोऽथैष निष्केवल्य आग्नेयो यद्ध तिर इव तदुपाꣳशु तस्मादुपाꣳशु चरन्ति ॥१६॥ उच्चैरुत्तममनुयाजं यजति । कृतकर्मैव हि स तर्हि भवति सर्वो हि कृतमनुबुध्यते ॥१७॥ स आश्राव्याह । समिधो यजेति तदाग्नेयꣳ रूपं परोऽक्षं त्वग्नीन्यजेति वेव ब्रूयात्तदेव प्रत्यक्षमाग्नेयꣳ रूपꣳ ॥१८॥ स यजति । अग्नऽआज्य-

स्य व्यन्तु वौकगग्निमाज्यस्य वेतु वौकगग्निनाज्यस्य व्यन्तु वौकगग्निराज्यस्य वेतु वौकगिति ॥ ११ ॥ अथ स्वाकाग्निमित्याह । आग्नेयमाज्यभागꣳ स्वाकाग्निं पवमानमिति यदि पवमानाय ध्रियेरꣳस्त्स्वाकाग्निमिन्दुमन्तमिति यद्यग्नयऽइन्दुमते ध्रियेरꣳस्त्स्वाकाग्निꣳ स्वाकाग्नीनाज्यपान्जुषाणोऽअग्निराज्यस्य वेवित्ति यजति ॥ २० ॥ अथाकाग्नेयेऽनुब्रूकीति । आग्नेयमाज्यभागꣳ सोऽन्वाकाग्निꣳ स्तोमेन बोधय समिधानोऽअमर्त्यम् । कव्या देवेषु नो दधदिति स्वपितीव खलु वाऽएतद्यद्वुद्वासितो भवति सम्प्रबोधयत्येवैनमेतत्समुदीर्यति जुषाणोऽअग्निराज्यस्य वेवित्ति यजति ॥ २१ ॥ अथ यद्यग्नये पवमानाय ध्रियेरन् । अग्नये पवमानायानुब्रूकीति ब्रूयात्सोऽन्वाकाग्नऽआयूꣳषि पवसऽआसुवोर्जमिषं च नः । आरे बाधस्व दुकुनामिति तथाकाग्नेयो भवति सोमो वै पवमानस्तꣳ सौम्यादाज्यभागान्नयन्ति जुषाणोऽअग्निः पवमान आज्यस्य वेवित्ति यजति ॥ २२ ॥ अथ यद्यग्नयऽइन्दुमते ध्रियेरन् । अग्नयऽइन्दुमतेऽनुब्रूकीति ब्रूयात्सोऽन्वाकेक्यू षु ब्रवाणि तेऽग्नऽइत्येतरा गिरः । एभिर्वर्धसऽइन्दुभिरिति तथा काग्नेयो भवति सोमो वाऽइन्दुस्तꣳ सौम्यादाज्यभागान्नयन्ति जुषाणोऽअग्निरिन्दुमानाज्यस्य वेवित्ति यजत्येवमु सर्वमाग्नेयं करोति ॥ २३ ॥ अथाकाग्नेयेऽनुब्रूकीति कविषः । अग्निं यजाग्नये स्विष्टकृतेऽनुब्रूक्यग्निꣳ स्विष्टकृतं यजेत्यथ यदेवान्यजेत्यग्नीन्यजेत्येवैतदाह ॥ २४ ॥ स यजति । अग्नेर्वसुवने वसुधेयस्य वेतु वौकगग्नाऽउ वसुवने वसुधेयस्य वेतु वौकग्देवोऽग्निः स्विष्टकृदिति स्वयमाग्नेयस्तृतीय एवम्वाग्नेयाननुयाजान्करोति ॥ २५ ॥ ता वाऽएताः । षड्भिर्भक्तीर्यजति चतस्रः प्रयाजेषु द्वेऽअनुयाजेषु षड्वाऽऋतव ऋतून्प्राविशदृतुभ्य एवैनमेतन्निर्मिमीते ॥ २६ ॥ द्वादश वा त्रयोदश वाक्षराणि भवन्ति । द्वादश वा वै त्रयोदश वा संवत्सरस्य मासाः संवत्सरमृतून्प्राविशदृतुभ्य एवैनमेतत्संवत्सरान्निर्मिमीते न द्वे चन सक्राजामितायै जामि कर्कुर्याद्यद्वै चित्सक्र स्यातां व्यन्तु वे-

त्विन्येव प्रयाजानाꣳ रूपं वसुवने वसुधेयस्येत्यनुयाजानाम् ॥२७॥ तस्य हिरण्यं दक्षिणा । आग्नेयो वाऽएष यज्ञो भवत्यग्नेरेतो हिरण्यं तस्माद्धिरण्यं दक्षिणानड्वान्वा स हि वक्रेनाग्नेयोऽग्निदग्धमिव क्यस्य वक्रं भवति देवानाꣳ हव्यवाहनोऽग्निरिति वक्रति वाऽएष मनुष्येभ्यस्तस्मादनड्वान्दक्षिणा ॥२८॥ ब्राह्मणम् ॥१ [२.३.] ॥ ॥

प्रजापतिर्ह वाऽइदमग्रऽएक एवास । स ऐक्षत कथं नु प्रजायेयेति सोऽश्राम्यत्स तपोऽतप्यत सोऽग्निमेव मुखाज्जनयां चक्रे तद्यदिनं मुखादजनयत तस्मादन्नादोऽग्निः स यो हैवमेतमग्निमन्नादं वेदान्नादो हैव भवति ॥१॥ तद्वाऽएनमेतदग्रे देवानामजनयत । तस्मादग्निरग्रिर्ह वै नामैतद्यदग्निरिति स जातः पूर्वः प्रेयाय यो वै पूर्व एत्यग्रऽएतीति वै तमाहुः सोऽएवास्याग्रिता ॥२॥ स ऐक्षत प्रजापतिः । अन्नादं वाऽइममात्मनोऽजीजनं यदग्निं न वाऽइह मदन्यदन्नमस्ति यं वाऽअयं नाद्यादिति कात्वालीकृता हैव तर्हि पृथिव्यास नौषधय आसुर्न वनस्पतयस्तदेवास्य मनस्यास ॥३॥ अथैनमग्निर्व्यात्तिनोपपर्यावर्त । तस्य भीतस्य स्वो महिमापचक्राम वाग्वाऽअस्य स्वो महिमा वागस्यापचक्राम स आत्मन्नेवाकृतिमीषे स उदमृष्ट तद्यदुदमृष्ट तस्मादिदं चालोमकमिदं च तत्र विवेद घृताकृतिं वैव पयआकृतिं वोभयꣳ ह्येव तत्पय एव ॥४॥ सा हैनं नाभिराधयां चकार । केशमिश्रेव ह्यास तां व्यौन्दोष धयेति तत ओषधयः समभवंस्तस्मादोषधयो नाम स द्वितीयमुदमृष्ट तत्रापरामाकृतिं विवेद घृताकृतिं वैव पयआकृतिं वोभयꣳ ह्येव तत्पय एव ॥५॥ सा हैनमभिराधयां चकार । स व्यचिकित्सज्जुहवानीꣳ मा हौषाꣳमिति तꣳ स्वो महिमाभ्युवाद जुहुधीति स प्रजापतिर्विदां चकार स्वो वै मा महिमाहेति स स्वाहेत्येवाजुहोत्तस्माद्ध स्वाहेत्येव ह्रयते तत एष उदियाय य एष तपति ततोऽयं प्रबभूव योऽयं पवते तत एवाग्निः पराङ्

पर्यावर्तत ॥ ६ ॥ स ऊर्ध्वा प्रजापतिः । प्र चाजायतात्मन्यतश्चाग्नेर्मृत्योरात्मानमत्रायत स यो हैवं विद्वानग्निहोत्रं जुहोत्येताꣳ हैव प्रजातिं प्रजायते यां प्रजापतिः प्राजायतैवमु हैवात्मन्यतोऽग्नेर्मृत्योरात्मानं त्रायते ॥ ७ ॥ स यत्र म्रियते । यत्रैनमग्नावभ्यादधति तदेषोऽग्नेरधिजायतेऽथास्य शरीरमेवाग्निर्दहति तद्यथा पितुर्वा मातुर्वा जायतैवमेषोऽग्नेरधिजायते शश्वद्ध वाऽएष न सम्भवति योऽग्निहोत्रं न जुहोति तस्माद्धाऽअग्निहोत्रꣳ होतव्यम् ॥ ८ ॥ तद्धाऽएतत् । एव विचिकित्सायै जन्म यत्प्रजापतिर्व्यचिकित्सत्स विचिकित्सञ्छ्रेयस्यधियत यः प्र चाजायतात्मन्यतश्चाग्नेर्मृत्योरात्मानमत्रायत स यो हैवमेतद्विचिकित्सायै जन्म वेद ग्रद्ध किं च विचिकित्सति श्रेयसि हैव धियते ॥ ९ ॥ स ऊर्ध्वा न्यमृष्ट । ततो विकङ्कतः समभवत्तस्मादेष यज्ञियो यज्ञपात्रीयो वृक्षस्तत एते देवानां वीरा अजायन्ताग्निर्योऽयं पवते सूर्यः स यो हैवमेतान्देवानां वीरान्वेदाहास्य वीरो जायते ॥ १० ॥ तऽऊ हैत ऽऊचुः । वयं वै प्रजापतिं पितरमनु स्मो हन्त वयं तत्सृजामहै यदस्मानन्वसदिति ते परिश्रित्य गायत्रेणापहिंकारिणा तुष्टुविरे तद्यत्पर्यश्रयन्त्स समुद्रोऽथेयमेव पृथिव्यास्तावः ॥ ११ ॥ ते स्तुत्वा प्राञ्च उच्चक्रमुः । पुनरेम इति देवा एद्धाꣳ सम्भूताꣳ सा हैनानुदीद्य हिंचकार ते देवा विदां चक्रुरेष साम्नो हिंकार इत्यपहिंकारꣳ हैव पुरा ततः सामास स एष गवि साम्नो हिंकारस्तस्मादेषोपजीवनीयोपजीवनीयो ह वै भवति य एवमेतं गवि साम्नो हिंकारं वेद ॥ १२ ॥ ते होचुः । भद्रं वाऽइदमजीजनामहि य गामजीजनामहि यज्ञो ह्येवेयं नो हन्ति गौर्यज्ञस्तायतेऽन्नꣳ ह्येवेयं यद्धि किं चान्नं गौरेव तदिति ॥ १३ ॥ तद्धाऽएतदेवैतासां नाम । एतद्यज्ञस्य तस्मादेतत्परिहरेत्साधु पुण्यमिति वक्तव्यो ह वाऽअस्यैता भवन्त्युपनामुक एनं यज्ञो भवति य एवं विद्वानेतत्परिहरति साधु पुण्यमिति ॥ १४ ॥ तामु हाग्निरभिदध्यौ । मिथुन्यनया स्यामिति ताꣳ सम्बभूव तस्याꣳ रेतः प्रासिञ्चत्तत्प-

योऽभवत्तस्मादेतदामायां गवि सत्याꣳ घृतमग्नेर्हि रेतस्तस्माद्यदि कृष्णायां यदि रोहिण्याꣳ शुक्लमेव भवत्यग्निसंकाशमग्नेर्हि रेतस्तस्मात्प्रथमदुग्धमुष्णं भवत्यग्नेर्हि रेतः ॥१५॥ ते होचुः । कुतेदं जुहवामहाऽइति कस्मै न इदं प्रथमाय होष्यन्तीति मह्यमिति हैवाग्निरुवाच मह्यमिति योऽयं पवते मह्यमिति सूर्यस्ते न सम्पादयां चक्रुस्ते होसम्पाद्योचुः प्रजापतिमेव पितरं प्रत्ययाम स यस्मै न इदं प्रथमाय होतव्यं वदति तस्मै न इदं प्रथमाय होष्यन्तीति ते प्रजापतिं पितरं प्रतीत्योचुः कस्मै न इदं प्रथमाय होष्यन्तीति ॥१६॥ स होवाच । अग्नयेऽग्निरनुघा स्वꣳ रेतः प्रजनयिष्यते तथा प्रजनिष्यधऽइत्यथ तुभ्यमिति सूर्यमथ यदेव हूयमानस्य व्यश्नुते तदेवैतस्य योऽयं पवतऽइति तदेभ्य इदमप्येतर्हि तथैव जुह्वत्यग्नयऽएव सायꣳ सूर्याय प्रातरथ यदेव हूयमानस्य व्यश्नुते तदेवैतस्य योऽयं पवते ॥१७॥ ते ह्वा देवाः । इमां प्रजातिं प्राजायन्त येषामियं प्रजातिरिमां विजितिं व्यजायन्त येयमेषां विजितिरिमामेव लोकमग्निरजयदन्तरिक्षं वायुर्दिवमेव सूर्यः स यो हैवं विद्वानग्निहोत्रं जुहोत्येताꣳ हैव प्रजातिं प्रजायते यामेतऽएतत्प्राजायन्तैतां विजितिं विजयते यामेतऽएतद्व्यजयन्तैतेरु हैव सलोको भवति य एवं विद्वानग्निहोत्रं जुहोति तस्माद्वाऽअग्निहोत्रꣳ होतव्यम् ॥१८॥ ब्राह्मणम् ॥ २ [२.४.] ॥ अध्यायः ॥ २ [११.] ॥ ॥

सूर्यो ह वाऽअग्निहोत्रं । तद्यदेतस्या अग्रऽआहुतेरुदैत्तस्मात्सूर्योऽग्निहोत्रꣳ ॥१॥ स यत्सायमस्तमिते जुहोति । य इदं तस्मिन्निह सति जुहवानीत्यथ यत्प्रातरनुदिते जुहोति य इदं तस्मिन्निह सति जुहवानीति तस्माद्वै सूर्योऽग्निहोत्रमित्याहुः ॥२॥ ॥ शतम् १००० ॥ ॥ अथ यदस्तमेति । तदग्नावेव योनौ गर्भो भूत्वा प्रविशति तं गर्भं भवन्तमिमाः सर्वाः प्रजा अनु गर्भा भवन्तीलिता हि शेरे संज्ञानाना अथ यदुदात्रिस्तिरएवैतत्करोति तिर इव हि गर्भाः ॥३॥ स यत्सा-

यमस्तमिते जुहोति । गर्भमेवैतत्सन्तमभिजुहोति गर्भꣳ सन्तमभिकरोति स यद्गर्भꣳ सन्तमभिजुहोति तस्मादिमे गर्भा अनश्नन्तो जीवन्ति ॥ ४ ॥ अथ यत्प्रातरनुदिते जुहोति । प्रजनयत्येवैनमेतत्सोऽयं तेजो भूत्वा विभ्राजमान उदेति शश्वद्ध त्वै नोदियाद्यदस्मिन्नेतामाकुतिं न जुहुयात्तस्माद्धाऽएतामाकुतिं जुहोति ॥ ५ ॥ स यथाऽहिस्त्वचो निर्मुच्येत । एवꣳ रात्रेः पाप्मना निर्मुच्यते यथा ह वाऽअहिस्त्वचो निर्मुच्येतैवꣳ सर्वस्मात्पाप्मनो निर्मुच्यते य एवं विद्वानग्निहोत्रं जुहोति तदेतस्यैवानु प्रजातिमिमाः सर्वाः प्रजा अनु प्रजायन्ते वि ह्येते सृज्यन्ते यथार्थꣳ ॥ ६ ॥ स यः पुरादित्यस्यास्तमयात् । आहवनीयमुद्धरत्येते वै विश्वे देवा रश्मयोऽथ यत्परं भाः प्रजापतिर्वा स इन्द्रो वैतदु ह वै विश्वे देवा अग्निहोत्रं जुह्वतो गृहानागच्छन्ति स यस्यानुद्धृतमागच्छन्ति तस्माद्वा अपप्रयन्ति तद्धाऽअस्मै तद्बृध्यते यस्माद्वा अपप्रयन्ति तस्यानु व्यृद्धिं यश्च वेद यश्च नानुद्धृतमभ्यस्तमगादित्याहुः ॥ ७ ॥ अथ यः पुरादित्यस्यास्तमयात् । आहवनीयमुद्धरति यथा श्रेयस्यागमिष्यत्यावसथेनोपलृप्तेनोपासीतैवं तत्स यस्योद्धृतमागच्छन्ति तस्याहवनीयं प्रविशन्ति तस्याहवनीये निविशन्ते ॥ ८ ॥ स यत्सायमस्तमिते जुहोति । अग्नावेवैभ्य एतत्प्रविष्टेभ्यो जुहोत्यथ यत्प्रातरनुदिते जुहोत्यप्रेतेभ्य एवैभ्य एतज्जुहोति तस्मादुदितहोमिनां विछिन्नमग्निहोत्रं मन्यामहेऽइति ह स्माहासुरिर्यथा शून्यमावसथमाहरेदेवं तदिति ॥ १ ॥ द्वयं वाऽइदं जीवनं । मूलि चैवामूलं च तदुभयं देवानाꣳ सन्मनुष्या उपजीवन्ति पशवो मूला ओषधयो मूलिन्यस्ते पशवो मूला ओषधीर्मूलिनीर्जग्धापः पीत्वा तत एष रसः सम्भवति ॥ १० ॥ स यत्सायमस्तमिते जुहोति । अस्य रसस्य जीवनस्य देवेभ्यो जुहवानि यदेषामिदꣳ सदुपजीवाम इति स यत्ततो रात्र्याश्नाति हुतोच्छिष्टमेव तन्निरवत्तबल्यश्नाति हुतोच्छिष्टस्य ह्येवाग्निहोत्रं जुह्वदशिता ॥ ११ ॥ अथ यत्प्रातरनुदिते जुहोति । अस्य रसस्य जीवनस्य देवेभ्यो

जुहवानि यदेषामिदꣳ सदुपजीवाम इति स यत्ततोऽक्षाश्नाति कृतोच्छिष्टमेव तन्नि-रवत्तबल्यश्नाति कृतोच्छिष्टस्य क्वेवाग्निहोत्रं जुह्वदशिता ॥ १२ ॥ तदाहुः । समे-वान्ये यज्ञास्तिष्ठन्तेऽग्निहोत्रमेव न संतिष्ठतेऽपि द्वादशसंवत्सरमन्तवदेवाधितदे-वानन्तꣳ सायꣳ हि हुत्वा वेद प्रातर्होष्यामीति प्रातर्हुत्वा वेद पुनः सायꣳ हो-ष्यामीति तदेतदनुपस्थितमग्निहोत्रं तस्यानुपस्थितिमन्वनुपस्थिता इमाः प्रजाः प्र-जायन्तेऽनुपस्थितो ह वै श्रिया प्रजया प्रजायते य एवमेतदनुपस्थितमग्निहोत्रं वे-द ॥ १३ ॥ तद्दुग्धाधिश्रयति । भृतमसदिति तदाहुर्यद्युदक्तं तर्हि जुहुयादिति तद्वै नोदक्तं कुर्यादुप ह दह्येद्युदक्तं कुर्यादप्रज्ञि वै रेत उपदग्धं तस्मान्नोदक्तं कुर्यात् ॥ १४ ॥ अधिश्रित्यैव जुहुयात् । यन्नु वैतदग्ने रेतस्तेन नु वै भृतं यद्वेनदग्नावधिश्रय-न्ति तेनोऽएव भृतं तस्मादधिश्रित्यैव जुहुयात् ॥ १५ ॥ तदवद्योतयति । भृतं वे-दानीत्यथापः प्रत्यानयति शान्त्यै नु वै रसस्यो चैव सर्वत्वायेदꣳ हि यदा वर्षत्य-थौषधयो जायन्तऽओषधीर्जग्धापः पीत्वा तत एष रसः सम्भवति तस्मादु रसस्यो चैव सर्वत्वाय तस्माद्यद्येनं क्षीरं केवलं पानेऽभ्याभवेदुदस्तोकमाश्रोतयितवै ब्रू-याद्धान्त्यै न्वेव रसस्यो चैव सर्वत्वाय ॥ १६ ॥ अथ चतुरुन्नयति । चतुर्धाविकृतꣳ ह्येदं पयोऽथ समिधमादायोदाद्रवति समिद्धोमायैव सोऽनुपसाद्य पूर्वामाहुतिं जुहोति स यदुपसादयेद्यथा यस्माऽअशनमाहरिष्यन्त्स्यात्तदत्तरा निदध्यादेवं तदथ यदनुपसाद्य यथा यस्माऽअशनमाहरेत्तस्माऽआहृत्यैवोपनिदध्यादेवं तदुपसाद्यो-त्तरां नानावीर्यऽएवैनेऽएतत्करोति मनश्च ह वै वाक्चैतेऽआहुती तन्मनश्चैवैत-द्वाचं च व्यावर्तयति तस्मादिदं मनश्च वाक्च समानमेव सन्नानेव ॥ १७ ॥ स वै द्विरग्नौ जुहोति । द्विरुपमार्ष्टि द्विः प्राश्नाति चतुरुन्नयति तद्दश दशाक्षरा वै वि-राड्विराड्वै यज्ञस्तद्विराजमेवैतद्यज्ञमभिसम्पादयति ॥ १८ ॥ स यदग्नौ जुहोति । तदे-वेषु जुहोति तस्मादेवाः सन्त्यथ यदुपमार्ष्टि तत्पितृषु चौषधीषु च जुहोति त-

स्मात्पितरश्चौषधयश्च सन्त्यथ यदुवा प्राश्नाति तन्मनुष्येषु जुहोति तस्मान्मनुष्याः सन्ति ॥११॥ या वै प्रजा यज्ञेऽनन्वाभक्ताः । पराभूता वै ता एवमेवैतच्या इमाः प्रजा अपराभूतास्ता यज्ञमुखऽआभजति तेनो ह पशवोऽन्वाभक्ता यन्मनुष्याननु पशवः ॥२०॥ तदु होवाच याज्ञवल्क्यः । न वै यज्ञ इव मल्लवै पाकयज्ञ इव वा ऽइतीदꣳ हि यदन्यस्मिन्यज्ञे स्रुच्यवद्यति सर्वं तदग्नौ जुहोत्यथैतदग्नौ कुर्वोत्सृप्याचामति निर्लेढि तदस्य पाकयज्ञस्येवेति तदस्य तत्पशव्यꣳ रूपं पशव्यो हि पाकयज्ञः ॥२१॥ सैषैकाकृतिरेवाग्रे । यामेवामूं प्रजापतिरजुहोदथ यदेतऽएतत्पश्चेवाधियन्ताग्निर्योऽयं पवते सूर्यस्तस्मादेषा द्वितीयाकृतिर्हूयते ॥२२॥ सा या पूर्वाकृतिः । साग्निहोत्रस्य देवता तस्मात्तस्यै जुहोत्यथ योत्तरा स्विष्टकृद्वाजनमेव सा तस्मात्तामुत्तरार्धे जुहोत्येषा हि दिक् स्विष्टकृतस्तन्मिथुनायैवैषा द्वितीयाकृतिर्हूयते द्वन्द्वꣳ हि मिथुनं प्रजननम् ॥२३॥ तद्धयमेवैतेऽआकृती । भूतं चैव भविष्यच्च ज्ञातं च ज्ञनिष्यमाणं चागतं चाशा चाद्य च श्वश्च तद्धयमेवानु ॥२४॥ आत्मैव भूतं । श्रद्धा हि तद्यद्भूतमद्धो तद्यदात्मा प्रजैव भविष्यदनद्धा हि तद्यद्भविष्यदनद्धो तद्यत्प्रजा ॥२५॥ आत्मैव ज्ञातम् । श्रद्धा हि तद्यज्ज्ञातमद्धो तद्यदात्मा प्रजैव ज्ञनिष्यमाणमनद्धा हि तद्यज्ज्ञनिष्यमाणमनद्धो तद्यत्प्रजा ॥२६॥ आत्मैवागतम् । श्रद्धा हि तद्यदागतमद्धो तद्यदात्मा प्रजैवाशानद्धा हि तद्यदाशानद्धो तद्यत्प्रजा ॥२७॥ आत्मैवाद्य । श्रद्धा हि तद्यदद्याद्धो तद्यदात्मा प्रजैव श्वोऽनद्धा हि तद्यच्छ्वोऽनद्धो तद्यत्प्रजा ॥२८॥ सा या पूर्वाकृतिः । सात्मानमभिहूयते तां मल्लेण जुहोत्यद्धा हि तद्यन्मल्लोऽद्धो तद्यदात्माऽथ योत्तरा सा प्रजामभिहूयते तां तूष्णीं जुहोत्यनद्धा हि तद्यत्तूष्णीमनद्धो तद्यत्प्रजा ॥२९॥ स जुहोति । अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहेत्यथ प्रातः सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहेति तत्सत्येनैव हूयते यदा क्वैव सूर्याऽस्तमेत्यथाग्निर्ज्योतिर्यदा सूर्य उदेत्यथ सूर्यो

ज्योतिर्यद्वै सत्येन हूयते तद्देवान्गच्छति ॥ ३० ॥ तदु हैतदेवारुणये ब्रह्मवर्चसकामाय तन्नानूवाचाग्निर्वर्चो ज्योतिर्वर्चः सूर्यो वर्चो ज्योतिर्वर्च इति ब्रह्मवर्चसी हैव भवति य एवं विद्वानग्निहोत्रं जुहोति ॥ ३१ ॥ तद्वस्त्येव प्रजननस्येव रूपम् । अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहेति तदुभयतो ज्योती रेतो देवतया परिगृह्णात्युभयतः-परिगृहीतं वै रेतः प्रजायते तदुभयत एवैतत्परिगृह्य प्रजनयति ॥ ३२ ॥ अथ प्रातः । सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहेति तदुभयतो ज्योती रेतो देवतया परिगृह्णात्युभयतःपरिगृहीतं वै रेतः प्रजायते तदुभयत एवैतत्परिगृह्य प्रजनयति तत्प्रजननस्य रूपम् ॥ ३३ ॥ तदु होवाच जीवलश्चैलकिः । गर्भमेवारुणिः करोति न प्रजनयतीति स एतेनैव सायं जुहुयात् ॥ ३४ ॥ अथ प्रातः । ज्योतिः सूर्यः सूर्यो ज्योतिः स्वाहेति तद्बहिर्धा ज्योती रेतो देवतया करोति बहिर्धा वै रेतः प्रजातं भवति तदेनत्प्रजनयति ॥ ३५ ॥ तदाहुः । अग्नावेवैतत्सायꣳ सूर्यं जुहोति सूर्ये प्रातरग्निमिति तद्वै तदुदितहोमिनामेव यदा क्वैव सूर्योऽस्तमेत्यथाग्निर्ज्योतिर्यदा सूर्य उदेत्यथ सूर्यो ज्योतिर्नास्य सा परिचन्नेयमेव परिचन्ना यत्तस्यै नाहुता देवतायै हूयते याग्निहोत्रस्य देवताग्निर्ज्योतिर्ज्योतिरग्निः स्वाहेति तत्र नाग्नये स्वाहेत्यथ प्रातः सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहेति तत्र न सूर्याय स्वाहेति ॥ ३६ ॥ अनेनैव जुहुयात् । सन्नूर्देवेन सवित्रेति तत्सवितृमत्प्रसवाय सन्नू रात्र्येन्द्रवत्येति तद्रात्र्या मिथुनं करोति सेन्द्रं करोतीन्द्रो हि यज्ञस्य देवता जुषाणोऽग्निर्वेतु स्वाहेति तदग्नये प्रत्यन्नं जुहोति ॥ ३७ ॥ अथ प्रातः । सन्नूर्देवेन सवित्रेति तत्सवितृमत्प्रसवाय सन्नूरुषसेन्द्रवत्येत्यङ्केति वा तदङ्कां वोषसां वा मिथुनं करोति सेन्द्रं करोतीन्द्रो हि यज्ञस्य देवता जुषाणः सूर्यो वेतु स्वाहेति तत्सूर्याय प्रत्यन्नं जुहोति तस्मादेवमेव जुहुयात् ॥ ३८ ॥ ते होचुः । को न इदꣳ होष्यतीति ब्राह्मण एवेति ब्राह्मणेदं नो जुहुधीति किं मे ततो भविष्यतीत्यग्निहोत्रोच्छिष्टमेवेति स

यत्स्रुचि परिशिनष्टि तदग्निहोत्रोच्छिष्टमथ यत्स्थाल्यां यथा परीणह्यो निर्वपेदेवं तत्तस्मात्तस्य एव कश्च पिबेत्तद्वै नाब्राह्मणः पिबेद्यद्ध्यधिश्रयन्ति तस्मान्नाब्राह्मणः पिबेत् ॥३१॥ ब्राह्मणम् ॥३[३.१.]॥ ॥

एता ह वै देवता योऽस्ति। तस्मिन्वसन्तीन्द्रो यमो राज्ञा नडो नैषिधोऽनश्नत्सांगमनोऽसन्याऽसवः ॥१॥ तद्वाऽएष एवेन्द्रः। यदाहवनीयोऽथैष एव गार्हपत्यो यमो राजाथैष एव नडो नैषिधो यदन्वाहार्यपचनस्तस्यदेतमहरहर्दक्षिणात आहरन्ति तस्मादाहुरहरहर्वै नडो नैषिधो यमꣳ राजानं दक्षिणात उपनयतीति ॥२॥ अथ य एष सभायामग्निः। एष एवानश्नत्सांगमनस्तस्यदेतमनशित्वेवोपसंगह्णन्ते तस्मादेषोऽनश्नथ यदेतद्वस्मोद्धृत्य परावपत्येष एवासन्याऽसवः स यो ह्येवमेतद्वेदैवं मथ्येता देवता वसन्तीति सर्वान्ह्येवैतांल्लोकान्नयति सर्वाल्लोकाननुसंचरति ॥३॥ तेषामुपस्थानं। यदेव सायं प्रातराहवनीयमुप च तिष्ठत ऽउप चास्ते तदेव तस्योपस्थानमथ यदेव प्रतिपरेत्य गार्हपत्यमास्ते वा शेते वा तदेव तस्योपस्थानमथ यत्रैव संव्रजन्नन्वाहार्यपचनमुपस्मरेत्तदेव तं मनसोपतिष्ठेत तदेव तस्योपस्थानम् ॥४॥ अथ प्रातः। अनशित्वा मुहूर्तꣳ सभायामासित्वापि कामं पल्ययेत तदेव तस्योपस्थानमथ यत्रैव भस्मोद्धृतमुपनिगह्णीत्तदेव तस्योपस्थानमेवमु ह्यस्यैता देवता उपस्थिता भवन्ति ॥५॥ यज्ञमानदेवत्यो वै गार्हपत्यः। अथैष भ्रातृव्यदेवत्यो यदन्वाहार्यपचनस्तस्मादेतं नाहरहराहरेयुर्न ह वाऽअस्य सपत्ना भवन्ति यस्यैवं विदुष एतं नाहरहराहरत्यन्वाहार्यपचनो वाऽएषः ॥६॥ उपवसथऽएवैनमाहरेयुः। यत्रैवास्मिन्यद्ध्यक्तो भवति तद्धो ह्यस्यैषोऽमोघायाहृतो भवति ॥७॥ नवावसिते वैनमाहरेयुः। तस्मिन्पचेयुस्तद्ब्राह्मणा अश्नीयुर्यद्यु तत्र विन्देयुत्पचेदपि गोरेव दुग्धमधिश्रयितवै ब्रूयात्तस्मिन्ब्राह्मणान्न्याययितवै ब्रूयात्पापीयाꣳसो ह वाऽअस्य सपत्ना भवन्ति यस्यैवं विदुष एवं

कुर्वन्ति तस्मादिवमेव चिकीर्षेत् ॥ ८ ॥ तद्यत्रैतत्प्रथमꣳ समिद्धो भवति । धूप्यत ऽइव तर्हि ह्येष भवति रुद्रः स यः कामयेत यथेमा रुद्रः प्रजा अश्वङ्येव वत्सक्रसेव वन्निघातमिव वत्सचतऽएवमन्नमद्यामिति तर्हि ह स जुहुयात्प्राप्नोति ह्येवैतदन्नाद्यं य एवं विद्वांस्तर्हि जुहोति ॥ ९ ॥ अथ यत्रैतत्प्रदीप्ततरो भवति । तर्हि ह्येष भवति वरुणः स यः कामयेत यथेमा वरुणः प्रजा गृह्णन्निव वत्सक्रसेव वन्निघातमिव वत्सचतऽएवमन्नमद्यामिति तर्हि ह स जुहुयात्प्राप्नोति ह्येवैतदन्नाद्यं य एवं विद्वांस्तर्हि जुहोति ॥ १० ॥ अथ यत्रैतत्प्रदीप्तो भवति । ऊर्ध्वधूमः परमया जूत्या बल्बलीति तर्हि ह्येष भवतीन्द्रः स यः कामयेतेन्द्र इव श्रिया यशसा स्यामिति तर्हि ह स जुहुयात्प्राप्नोति ह्येवैतदन्नाद्यं य एवं विद्वांस्तर्हि जुहोति ॥ ११ ॥ अथ यत्रैतत्प्रतितरामिव । तिरश्चीवार्चिः संशाम्यतो भवति तर्हि ह्येष भवति मित्रः स यः कामयेत मैत्रेणेदमन्नमद्यामिति यमाहुः सर्वस्य वाऽअयं ब्राह्मणो मित्रं न वाऽअयं कं चन हिनस्तीति तर्हि ह स जुहुयात्प्राप्नोति ह्येवैतदन्नाद्यं य एवं विद्वांस्तर्हि जुहोति ॥ १२ ॥ अथ यत्रैतदङ्गारावाकशयत्तऽइव । तर्हि ह्येष भवति ब्रह्म स यः कामयेत ब्रह्मवर्चसी स्यामिति तर्हि ह स जुहुयात्प्राप्नोति ह्येवैतदन्नाद्यं य एवं विद्वांस्तर्हि जुहोति ॥ १३ ॥ एतेषामेकꣳ संवत्सरमुपेत्यैत् । स्वयं जुहुयादि वास्यान्यो जुहुयादथ योऽन्यथान्यथा जुहोति यथापो वाभिखनन्नन्यद्वान्नाद्यꣳ स सामि निवर्तेतैवं तदथ यः सार्धं जुहोति यथापो वाभिखनन्नन्यद्वान्नाद्यं तत्त्वाप्रेऽभितृन्द्यादेवं तत् ॥ १४ ॥ अग्नयो ह वाऽएता अन्नाद्यस्य यदाहुतयः । अग्निं ह्येवैतदन्नाद्यं तृणत्ति य एवं विद्वानग्निहोत्रं जुहोति ॥ १५ ॥ सा या पूर्वाहुतिः । ते देवा अथ योत्तरा ते मनुष्या अथ यत्स्रुचि परिशिनष्टि ते पशवः ॥ १६ ॥ स वै कनीय इव पूर्वामाहुतिं जुहोति । भूय इवोत्तरां भूय इव स्रुचि परिशिनष्टि ॥ १७ ॥ स यत्कनीय इव पूर्वामाहुतिं जुहोति ।

कनीयाꣳसो हि देवा मनुष्येभ्योऽथ यद्वयऽइवोत्तरां भूयाꣳसो हि मनुष्या देवेभ्योऽथ यद्वय इव सुचि परिशिनष्टि भूयाꣳसो हि पशवो मनुष्येभ्यः कनीयाꣳसो ह वाऽअस्य भार्या भवन्ति भूयाꣳसः पशवो य एवं विद्वानग्निꣳहोत्रं जुहोति तद्वै समृद्धं यस्य कनीयाꣳसो भार्या असन्भूयाꣳसः पशवः ॥१८॥ ब्राह्मणम् ॥४[३.२.]॥ ॥ द्वितीयः प्रपाठकः ॥ ॥ कण्डिकासंख्या १०३ ॥ ॥

यत्र वै प्रजापतिः प्रजाः ससृज्ञे । स यत्राग्निꣳ ससृज्ञे स इदं जातः सर्वमेव दुग्धुं दध्रऽइत्येवाबिलमेव ता यास्तर्हि प्रजा आसुस्ता हैनꣳ सम्पेष्टुं दधिरे सोऽतितिक्षमाणः पुरुषमेवाभ्येयाय ॥१॥ स होवाच । न वाऽअहमिदं तितिक्षे हन्त वा प्रविशानि तं मा ज्ञनयित्वा बिभृहि स यथैव मां त्वमस्मिंल्लोके ज्ञनयित्वा भरिष्यस्येवमेवाहं त्वाममुष्मिंल्लोके ज्ञनयित्वा भरिष्यामीति तथेति तं ज्ञनयित्वाबिभः ॥२॥ स यदग्नीऽआधत्ते । तदेनं ज्ञनयति तं ज्ञनयित्वा बिभर्ति स यथा हैवैष एतमस्मिंल्लोके ज्ञनयित्वा बिभर्त्येवमु हैवैष एतममुष्मिंल्लोके ज्ञनयित्वा बिभर्ति ॥३॥ तन्न साम्युद्वासयेत । सामि ह्यस्मै स ग्लायति स यथा हैवैष एतस्माऽअस्मिंल्लोके सामि ग्लायत्येवमु हैवैष एतस्माऽअमुष्मिंल्लोके सामि ग्लायति तस्मान्न साम्युद्वासयेत ॥४॥ स यत्र म्रियते । यत्रैनमग्नावभ्यादधति तदेषोऽग्नेरधिज्ञायते स एष पुत्रः सन्यिता भवति ॥५॥ तस्मादेतदृषिणाभ्यनूक्तꣳ । शतमिन्नु शरदोऽअन्ति देवा यत्रा नश्चक्रा जरसं तनूनाम्। पुत्रासो यत्र पितरो भवन्ति मा नो मध्या रीरिषतायुर्गन्तोरिति पुत्रो ह्येष सन्त्स पुनः पिता भवत्येतन्नु तद्यस्मादग्नीऽआदधीत ॥६॥ तद्वाऽएष एव मृत्युः । य एष तपति तद्यदेष एव मृत्युस्तस्माद्या एतस्मादर्वाच्यः प्रजास्ता म्रियन्तेऽथ याः पराच्यस्ते देवास्तस्माद्ध तेऽमृतास्तस्येमाः सर्वाः प्रजा रश्मिभिः प्राणैर्ह्यभिहितास्तस्माद्ध रश्मयः प्राणानभ्यवतायन्ते ॥७॥ स यस्य कामयते । तस्य प्राणमादायोदेति स म्रियते स यो हैतं मृत्युम-

नतिमुच्याथामुं लोकमेति यथा हैवास्मिंल्लोके न संयतमाद्रियते यदा यदेव कामयतेऽथ मारयत्येवमु हैवामुष्मिंल्लोके पुनःपुनरेव प्रमारयति ॥ ८ ॥ स यत्सायमस्तमिते द्वेऽआहुती जुहोति । तदेताभ्यां पूर्वाभ्यां पद्भ्यामेतस्मिन्मृत्यौ प्रतितिष्ठत्यथ यत्प्रातरनुदिते द्वेऽआहुती जुहोति तदेताभ्यामपराभ्यां पद्भ्यामेतस्मिन्मृत्यौ प्रतितिष्ठति स एनमेष ऽभ्यन्नेवादायोदेति तदेतं मृत्युमतिमुच्यते सैषाग्निहोत्रे मृत्योरतिमुक्तिरिति ह वै पुनर्मृत्युं मुच्यते य एवमेतामग्निहोत्रे मृत्योरतिमुक्तिं वेद ॥ ९ ॥ यथा वाऽइषोरनीकम् । एवं यज्ञानामग्निहोत्रं येन वाऽइषोरनीकमेति सर्वा वै तेनेषुरित्येतेनो ह्यस्य सर्वे यज्ञक्रतव एतं मृत्युमतिमुक्ताः ॥ १० ॥ अहोरात्रे ह वाऽअमुष्मिंल्लोके परिप्लवमाने । पुरुषस्य सुकृतं क्षिणुतोऽर्वाचीनं वाऽअतोऽहोरात्रे तथो ह्यस्याहोरात्रे सुकृतं न क्षिणुतः ॥ ११ ॥ स यथा रथोपस्थे तिष्ठन् । उपरिष्टाद्रथचक्रे पल्यद्यमानेऽउपावेक्षेतैवं परस्तादर्वाचीनोऽहोरात्रेऽउपावेक्षते न ह वाऽअस्याहोरात्रे सुकृतं क्षिणुतो य एवमेतामहोरात्रयोरतिमुक्तिं वेद ॥ १२ ॥ पूर्वेणाहवनीयं परीत्य । अन्तरेणा गार्हपत्यं चैति न वै देवा मनुष्यं विदुस्तऽएनमेतदन्तरेणातियन्तं विदुरयं वै न इदं जुहोतीत्यग्निर्वै पाप्मनोऽपहन्ता तावस्याहवनीयश्च गार्हपत्यश्चान्तरेणातियतः पाप्मानमपहतः सोऽपहतपाप्मा ज्योतिरेव श्रिया यशसा भवति ॥ १३ ॥ उत्तरतो वाऽअग्निहोत्रस्य द्वारम् । स यथा द्वारा प्रपद्येतैवं तदथ यो दक्षिणत एत्यास्ते यथा बहिर्धा चरेदेवं तत् ॥ १४ ॥ नौर्ह वाऽएषा स्वर्ग्या । यदग्निहोत्रं तस्याऽएतस्यै नावः स्वर्ग्याया आहवनीयश्चैव गार्हपत्यश्च नौमण्डेऽअथैष एव नावाऽनो यत्क्षीरहोता ॥ १५ ॥ स यत्प्राङुपोदेति । तदेनां प्राचीमभ्यञ्जति स्वर्गं लोकमभि तया स्वर्गं लोकꣳ समश्नुते तस्या उत्तरत आरोहणꣳ सैनꣳ स्वर्गं लोकꣳ समापयत्यथ यो दक्षिणत एत्यास्ते यथा प्रतीर्णायामागह्येत्स विहीयेत स तत एव बहिर्धा स्यादेवं तत् ॥ १६ ॥

अथ यामिताꣳ समिधमभ्यादधाति सेष्टका येन मल्लेण जुहोति तथजुर्येनैतामिष्टकामुपदधाति यदा वाऽइष्टकोपधीयतेऽथाऽकृतिर्हूयते तदस्योपकृितास्वेवेष्टकास्वेता आकृतयो हूयन्ते या एता अग्निहोत्राकृतयः ॥१७॥ प्रजापतिर्वाऽअग्निः । संवत्सरो वै प्रजापतिः संवत्सरे-संवत्सरे ह वाऽअस्याग्निहोत्रं चित्येनाग्निना संतिष्ठते सवत्सरे-संवत्सरे चित्यमग्निमाप्नोति य एवं विद्वानग्निहोत्रं जुहोत्येतद्ध ह्यस्याग्निहोत्रं चित्येनाग्निना संतिष्ठते चित्यमग्निमाप्नोति ॥१८॥ सप्त च वै शतान्यशीतीनामृचः । विꣳशतिश्च स यत्सायं प्रातरग्निहोत्रं जुहोति ते द्वेऽआकृती ता अस्य संवत्सरऽआकृतयः सम्पद्यन्ते ॥१९॥ सप्त चैव शतानि विꣳशतिश्च । संवत्सरे-संवत्सरे ह वाऽअस्याग्निहोत्रं मरुतोक्थेन सम्पद्यते संवत्सरे-संवत्सरे मरुद्भिरुक्थमाप्नोति य एवं विद्वानग्निहोत्रं जुहोत्येतद्ध ह्यस्याग्निहोत्रं मरुतोक्थेन सम्पद्यते मरुद्भिरुक्थमाप्नोति ॥२०॥ ब्राह्मणम् ॥१[३.३.]॥ ॥

अग्नौ ह वै देवाः । सर्वान्पशून्निदधिरे ये च ग्रा या ये चारण्या विज्ञये वोपप्रेष्यन्तः कामचारस्य वा कामायायं नो गोपिष्ठो गोपायदिति वा ॥१॥ तानु हाग्निर्निचकमे । तैः संगृह्य रात्रिं प्रविवेश पुनरेम इति देवा एदग्निं तिरोभूतं ते ह विदां चक्रुरिह वै प्राविक्षद्रात्रिं वै प्राविक्षदिति तमेतत्प्रत्यायत्याꣳ रात्रौ सायमुपातिष्ठन्त देहि नः पशून्पुनर्नः पशून्देहीति तेभ्योऽग्निः पशून्पुनरददात् ॥२॥ तस्मै कमग्नीऽउपतिष्ठेत । अग्नी वै दातारौ तावेवैतद्याचते सायमुपतिष्ठेत सायꣳ हि देवा उपातिष्ठन्त दत्तो ह्येवास्माऽएतौ पशून्य एवं विद्वानुपतिष्ठते ॥३॥ अथ यस्मान्नोपतिष्ठेत । उभये ह वाऽइदमग्रे सहासुर्देवाश्च मनुष्याश्च तथद्ध स्म मनुष्याणां न भवति तद्ध स्म देवान्याचन्तऽइदं वै नो नास्तीदं नोऽस्त्विति ते तस्याऽएव याज्यायै द्वेषेण देवास्तिरोभूता नेड्विनसानि नेद्वेष्योऽसानीति तस्मान्नोपतिष्ठेत ॥४॥ अथ यस्मादुपैव तिष्ठेत । यज्ञो वै देवानामाशीर्यज्ञमानस्य त-

द्वाऽएष एव यज्ञो यदाकृतिराशीरेव यजमानस्य तद्यदेवास्यात्र तदेवैतदुपतिष्ठमानः कुरुते तस्मादुपैव तिष्ठेत ॥ ५ ॥ अथ यस्मान्नोपतिष्ठेत । यो वै ब्राह्मणं वा शꣳसमानोऽनुचरति क्षत्रियं वायं मे दास्यत्ययं मे गृहान्करिष्यतीति यो वै तं वाचेन वा कर्मणा वाभिरिराधयिषति तस्मै वै स देयं मन्यतेऽथ य आह किं नु वं ममासि यो मे न ददासीतीश्वर एनं द्वेष्टोरीश्वरो निर्वेदं गन्तोस्तस्मान्नोपतिष्ठेतैतदेवैष एत याचते यदिन्द्रे यज्जुहोति तस्मान्नोपतिष्ठेत ॥ ६ ॥ अथ यस्मादुपैव तिष्ठेत । उत वै याचन्द्रातारं लभतऽएवोतो भर्ता भार्यं नानुबुध्यते स यदैवाह भार्यो वै तेऽस्मि बिभृहि मेत्यथैनं वेदाथैनं भार्यं मन्यते तस्मादुपैव तिष्ठेतेदमित्तु समस्तं यस्मादुपतिष्ठेत ॥ ७ ॥ प्रजापतिर्वाऽएष भूवा । यावत ईष्टे यावदेनमनु तस्य रेतः सिञ्चति यदग्निहोत्रं जुहोतीदमेवैतत्सर्वमुपतिष्ठमानोऽनुविकरोतीदꣳ सर्वमनुप्रजनयति ॥ ८ ॥ स वाऽउपवत्या प्रतिपद्यते । इयं वाऽउप इयेनियमुप यद्धीदं किं च ज्ञायतेऽस्यां तदुपजायतेऽथ यन्यूकृत्यस्यामिव तदुपोप्यते तदह्ना रात्र्या भूयो-भूय एवाद्यं भवति तदद्यमेणैवैतद्रूपा प्रतिपद्यते ॥ ९ ॥ स आह । उपप्रयन्तोऽअधरमित्यधरो वै यज्ञ उपप्रयन्तो यज्ञमित्येवैतदाह मन्त्रं वोचेमाग्नयऽइति मन्त्रमु ह्यस्माऽएतद्वद्यन्भवत्यारेऽअस्मे च शृण्वतऽइति यद्यप्यस्मदारकादस्थ न एतच्छृण्वेवैवमेवैतन्मन्यस्वेत्येवैतदाह ॥ १० ॥ अग्निर्मूर्धा दिवः । ककुत्पतिः पथिव्या अयम् । अपाꣳ रेताꣳसि जिन्वतीत्यन्वेव धावति तद्यथा याचन्कल्याणं वदेदामुष्यायणो वै त्वमस्यत्रं वै त्वमेतस्माऽअसीत्येवमेषा ॥ ११ ॥ अथेन्द्राग्नी । उभा वामिन्द्राग्नीऽआहुवध्याऽउभा राधसः सह मादयध्यै । उभा दातारा विषाꣳ रयीणामुभा वाजस्य सातये हुवे वामित्येष वाऽइन्द्रो य एष तपति स यदस्तमेति तदाहवनीयं प्रविशति तदुभावेवैतत्सह सत्ताऽउपतिष्ठतऽउभौ मे सह सत्तौ दत्तामिति तस्मादिन्द्राग्नी ॥ १२ ॥ अयं ते योनिर्ऋत्वियः । यतो जातोऽअ-

रोचथाः । तं ज्ञानन्नग्ऽआरोहाथा नो वर्धया रयिमिति पुष्टं वै रयिर्भूयो-भूय एव न इदं पुष्टं कुर्वित्येवैतदाह ॥१३॥ अयमिह प्रथमः । धायि धातृभिर्होता यन्निष्ठोऽअधरेषूदयः । यमप्नवानो भृगवो विरुरुचुर्वनेषु चित्रं विभुं विशे-विशऽइत्यन्वेव धावति तद्यथा याचन्कल्याणं वदेदामुष्यायणो वै त्वमस्यत्वं वै त्वमेतस्माऽअसीत्येवमेषा यथोऽएवैष तथोऽएवैनमेतदाह यदाह विभुं विशे-विशऽइति विभूर्ह्येष विशे-विशे ॥१४॥ अस्य प्रत्नाम् । अनु द्युतꣳ शुक्रं दुदुह्रेऽअह्रयः । पयः सहस्रसामृषिमिति परमा वाऽएषा सनीनां यत्सहस्रसनिस्तदेतस्यैवावरुद्ध्यै तस्मादाह पयः सहस्रसामृषिमिति ॥१५॥ तदेतत्समाहार्यꣳ षड्ऋचं । तस्योपवती प्रथमा प्रत्नवत्युत्तमावोचाम तद्यस्माऽउपवत्यथाद एव प्रत्नं यावन्तो ह्येव सनाग्ने देवास्तावन्त एव देवास्तस्माददः प्रत्नं तदिमेऽएवान्तरेण सर्वे कामास्तेऽअस्माऽइमे संजानाने सर्वान्कामान्त्संनमतः ॥१६॥ स वै त्रिः प्रथमां जपति । त्रिरुत्तमां त्रिवृत्प्रायणा हि यज्ञास्त्रिवृदुदयनास्तस्मात्त्रिः प्रथमां जपति त्रिरुत्तमाम् ॥१७॥ यद्ध वाऽअत्राग्निहोत्रं जुह्वत् । वाच्येन वा कर्मणा वा मिथ्या करोत्यात्मनस्तद्वद्यत्यायुषो वा वर्चसो वा प्रजायै वा ॥१८॥ तदु खलु तनूपा अग्नेऽसि । तन्वं मे पाह्यायुर्दा अग्नेऽस्यायुर्मे देहि वर्चोदा अग्नेऽसि वर्चो मे देहि । अग्ने यन्मे तन्वा ऊनं तन्मऽआपृणेति ॥१९॥ यद्ध वाऽअत्राग्निहोत्रं जुह्वत् । वाच्येन वा कर्मणा वा मिथ्या करोत्यात्मनस्तद्वद्यत्यायुषो वा वर्चसो वा प्रजायै वा तन्मे पुनरापृणत्येवैतदाह तथो ह्यस्यैतत्पुनरापृणते ॥२०॥ इन्धानास्त्वा । शतꣳ हिमा द्युमत्तꣳ समिधीमहीति शतं वर्षाणि जीव्यास्मेत्येवैतदाह तावत्वा महान्तꣳ समिधीमहीति यदाह द्युमत्तꣳ समिधीमहीति वयस्वन्तो वयस्कृतꣳ सहस्वन्तः सहस्कृतमिति वयस्वन्तो वयं भूयास्म वयस्कृत्वं भूया इत्येवैतदाह सहस्वन्तो वयं भूयास्म सहस्कृत्वं भूया इत्येवैतदाहाग्ने सपत्नदम्भनमदब्धासोऽअदाभ्यमिति त्वया

वयꣳ सपत्नान्पापीयसः क्रियास्मेत्येवैतदाह ॥ २१ ॥ चित्रावसो स्वस्ति ते पारमशीयेति । त्रिरेतज्जपति रात्रिर्वै चित्रावसुः सा क्रीयꣳ संगृह्येव चित्राणि वसति तस्मान्नारकाश्चित्रं ददृशे ॥ २२ ॥ एतेन ह स्म वाऽऋषयः । रात्रेः स्वस्ति पारꣳ समश्नुवतऽएतेनो ह स्मैनान्रात्रिर्नाष्ट्रा रक्षाꣳसि न विन्दत्येतेनोऽएवैष एतद्रात्रेः स्वस्ति पारꣳ समश्नुतऽएतेनोऽएनꣳ रात्रिर्नाष्ट्रा रक्षाꣳसि न विन्दत्येतावन्तु तिष्ठन्जपति ॥ २३ ॥ अथासीनः । सं त्वमग्ने सूर्यस्य वर्चसा गथा इति तद्यदस्तं यन्नादित्य आहवनीयं प्रविशति तेनैतदाह समृषीणाꣳ स्तुतेनेति तद्यदुपतिष्ठते तेनैतदाह सं प्रियेण धाम्नेत्याकृतयो वाऽअस्य प्रियं धामाकृतिभिरेव तदाह समहमायुषा सं वर्चसा सं प्रजया सꣳ रायस्पोषेण गमिषीयेति यथा त्वमेतैः समगथा एवमहमायुषा वर्चसा प्रजया रायस्पोषेणेति यद्गच्छेति तदेवमहमेतैः संगच्छाऽइत्येवैतदाह ॥ २४ ॥ अथ गामभ्येति । अन्ध स्थान्धो वो भक्षीय महꣳ स्थ महो वो भक्षीयेति यानि वो वीर्याणि यानि वो महाꣳसि तानि वो भक्षीयेत्येवैतदाहोर्ज स्थोर्जं वो भक्षीयेति रꣳ स्थ रꣳ वो भक्षीयेत्येवैतदाह रायस्पोष स्थ रायस्पोषं वो भक्षीयेति भूमा स्थ भूमानं वो भक्षीयेत्येवैतदाह ॥ २५ ॥ ॥ शतम् ११०० ॥ ॥ रेवती रमध्वमिति रेवतो हि पशवस्तस्मादाह रेवती रमध्वमित्यस्मिन्योनावस्मिन्गार्हेऽस्मिंल्लोकेऽस्मिन्क्षये । इहैव स्त मापगातेत्यात्मन एवैतदाह मदेव मापगातेति ॥ २६ ॥ अथ गामभिमृशति । सꣳहितासि विश्वरूपीति विश्वरूपा इव हि पशवस्तस्मादाह विश्वरूपीत्यूर्जा माविश गौपत्येनेत्यूर्जेति यदाह रसेनेति तदाह गौपत्येनेति यदाह भूम्नेति तदाह ॥ २७ ॥ अथ गार्हपत्यमभ्येति । स गार्हपत्यमुपतिष्ठतऽउप त्वाग्ने दिवे-दिवे दोषावस्तर्धिया वयम् । नमो भरन्त एमसीति नम एवास्माऽएतत्करोति यथैनं न हिꣳस्यात् ॥ २८ ॥ राजन्तमध्वराणां । गोपामृतस्य दीदिविम् । वर्धमानꣳ स्वे दमऽइति स्वं वै तऽइदं यन्मम

तन्नो भूयो-भूय एव कुर्वित्येवैतदाह ॥ २१ ॥ स नः पितेव सूनवे । अग्ने सूपाय-नो भव । सचस्वा नः स्वस्तयऽइति यथा पिता पुत्राय सूपचरो नैवैनं केन चन हिनस्त्येवं नः सूपचर एधि मैव त्वा केन चन हिꣳसिष्मेत्येवैतदाह ॥ ३० ॥ अथ द्विपदाः । अग्ने त्वं नोऽअन्तम उत त्राता शिवो भवा वरूथ्यः । वसुरग्निर्वसुश्रवा अच्छा नक्षि द्युमत्तमꣳ रयिं दाः ॥ तं त्वा शोचिष्ठ दीदिवः सुम्नाय नूनमीमहे सखिभ्यः । स नो बोधि श्रुधी हवमुरुष्या णोऽअघायतः समस्मादिति ॥ ३१ ॥ यद्वा ऽआहवनीयमुपतिष्ठते । पशूंस्तद्याचते तस्मात्तमुच्चावचैश्छन्दोभिरुपतिष्ठतऽउच्चा-वचा इव हि पशवोऽथ यद्गार्हपत्यं पुरुषांस्तद्याचते तद्गायत्रं प्रथमं त्रिचं गायत्रं वाऽअग्नेश्छन्दः स्वेनैवैनमेतच्छन्दसोपपरैति ॥ ३२ ॥ अथ द्विपदाः । पुरुषछन्दसं वै द्विपदा द्विपाद्वाऽअयं पुरुषः पुरुषानेवैतद्याचते पुरुषान्हि याचते तस्माद्द्विपदाः पशुमान्हि वै पुरुषवान्भवति य एवं विद्वानुपतिष्ठते ॥ ३३ ॥ अथ गामभ्यैति । इ-डऽएव्यदितऽएहीतीडा हि गौरदितिर्हि गौस्तामभिमृशति काम्या एतेति मनु-ष्याणाꣳ हीतासु कामाः प्रविष्टास्तस्मादाह काम्या एतेति मयि वः कामधरणं भूयादित्यहं वः प्रियो भूयासमित्येवैतदाह ॥ ३४ ॥ अथान्तरेणाहवनीयं च गार्ह-पत्यं च । प्राङ् तिष्ठन्नग्निमीक्षमाणो जपति सोमानꣳ स्वरणं कृणुहि ब्रह्मणस्प-ते । कक्षीवन्तं य औशिजः ॥ यो रेवान्योऽअमीवहा वसुवित्पुष्टिवर्धनः । स नः सिषक्तु यस्तुरः ॥ मा नः शꣳसोऽअररुषो धूर्तिः प्रणङ्मर्त्यस्य । रक्षा णो ब्रह्मण-स्पतऽइति ॥ ३५ ॥ यद्वाऽआहवनीयमुपतिष्ठते । दिवं तदुपतिष्ठतेऽथ यद्गार्हपत्यं पृथिवीं तद्यदेतदन्तरिक्षमेषा हि दिग्बृहस्पतेरेताꣳ हीतद्दिशमुपतिष्ठते तस्माद्बृ-हस्पत्यं जपति ॥ ३६ ॥ महि त्रीणामवोऽस्तु । द्युक्षं मित्रस्यार्यम्णः । दुराधर्षं व-रुणस्य ॥ न हि तेषाममा चन नाधसु वारणेषु । ईशे रिपुरघशꣳसः ॥ ते हि पुत्रासोऽअदितेः प्र जीवसे मर्त्याय । ज्योतिर्यच्छन्त्यजस्रमिति तत्रास्ति नाधसु वा-

रणोषित्येते ह वाऽअधानो वारणा यऽइमेऽन्तरेणा द्यावापृथिवीऽएतान्क्षेतऽउपतिष्ठते तस्मादाह नाधसु वारणोषिति ॥३७॥ अथैन्द्री । इन्द्रो वै यज्ञस्य देवता सेन्द्रमेवैतदग्न्युपस्थानं कुरुते कदा चन स्तरीरसि नेन्द्र सश्चसि दाशुषऽइति यजमानो वै दाश्वान्न यजमानाय दुक्ष्यसीत्येवैतदाहोपोपेन्नु मघवन्भूय इन्नु ते दानं देवस्य पृच्यतऽइति भूयो-भूय एव न इदं पुष्टं कुर्वित्येवैतदाह ॥३८॥ अथ सावित्री । सविता वै देवानां प्रसविता तयो ह्यास्माऽएते सवितृप्रसूता एव सर्वे कामाः समृध्यन्ते तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि । धियो यो नः प्रचोदयादिति ॥३९॥ अथाग्नेयी । तदग्नयऽएवैतदात्मानमन्ततः परिददाति गुप्त्यै परि ते दूडभो रथोऽस्मां॥३९॥अश्नोतु विश्वतः । येन रक्षसि दाशुष इति यजमाना वै दाश्वाꣳसो यो ह वाऽअस्यानाधृष्यतमो रथस्तेनैष यजमानानभिरक्षति स यस्तेऽनाधृष्यतमो रथो येन यजमानानभिरक्षसि तेन नः सर्वतोऽभिगोपायेत्येवैतदाह त्रिरेतज्जपति ॥४०॥ अथ पुत्रस्य नाम गृह्णाति । इदं मेऽयं वीर्यं पुत्रोऽनुसंतनवदिति यदि पुत्रो न स्यादप्यात्मन एव नाम गृह्णीयात् ॥४१॥ ब्राह्मणम् ॥२[३. ४]॥ अध्यायः ॥३[१२]॥ ॥

अथ कृतेऽग्निहोत्रऽउपतिष्ठते । भूर्भुवः स्वरिति तत्सत्येनैवैतद्वाचꣳ समर्धयति यदाह भूर्भुवः स्वरिति तया समृद्ध्याशिषमाशास्ते सुप्रजाः प्रजाभि स्यामिति तत्प्रजामाशास्ते सुवीरो वीरैरिति तद्वीरानाशास्ते सुपोषः पोषैरिति तत्पुष्टिमाशास्ते ॥१॥ यद्वाऽअदो दीर्घमग्न्युपस्थानम् । आशीरेव साशीरियं तदेतावतैवैतत्सर्वमाप्नोति तस्मादितेनैवोपतिष्ठतेतेन न्वेव वयमुपचराम इति ह स्माह्यासुरिः ॥२॥ अथ प्रवत्स्यन् । गार्हपत्यमेवाग्नऽउपतिष्ठतेऽथाहवनीयꣳ ॥३॥ स गार्हपत्यमुपतिष्ठते । नर्यं प्रजां मे पाह्यीति प्रजाया वैष ईष्टे तत्प्रजामेवास्माऽएतत्परिददाति गुप्त्यै ॥४॥ अथाहवनीयमुपतिष्ठते । शꣳस्य पशून्मे पाह्यीति पशूनाꣳ

ह्येष ईष्टे तत्पशूनेवास्माऽएतत्परिददाति गुप्त्यै ॥५॥ अथ प्र वा व्रजति प्र वा धावयति । स यत्र वेलां मन्यते तत्स्यन्त्वा वाचं विसृजतेऽथ प्रोष्य परेत्य यत्र वेलां मन्यते तद्वाचं यच्छति स यद्यपि राज्ञान्तरेणा स्यान्नैव तमुपेयात् ॥६॥ स आहवनीयमेवाग्रऽउपतिष्ठते । अथ गार्हपत्यं गृहा वै गार्हपत्यो गृहा वै प्रतिष्ठा तद्गृहेष्वेवैतत्प्रतिष्ठायां प्रतितिष्ठति ॥७॥ स आहवनीयमुपतिष्ठते । आगन्म विश्ववेदसमस्मभ्यं वसुवित्तमम् । अग्ने सम्राडभि द्युम्नमभि सह आयच्छस्वेत्यथोपविश्य तृणान्यपलुम्पति ॥८॥ अथ गार्हपत्यमुपतिष्ठते । अयमग्निर्गृहपतिर्गार्हपत्यः प्रजाया वसुवित्तमः । अग्ने गृहपतेऽभि द्युम्नमभि सह आयच्छस्वेत्यथोपविश्य तृणान्यपलुम्पत्येतन्नु ज्ञपयैनेतेन न्वेव भूयिष्ठा इवोपतिष्ठते ॥९॥ स वै खलु तूष्णीमेवोपतिष्ठेत । इदं वै यस्मिन्वसति ब्राह्मणो वा राज्ञा वा श्रेयान्मनुष्यो न्वेव तमेव नार्हति वक्तुमिदं मे वं गोपाय प्राहं वत्स्यामीत्यथास्मिन्नेते श्रेयाꣳसो वसन्ति देवा अग्नयः क उ तानर्हति वक्तुमिदं मे यूयं गोपायत प्राहं वत्स्यामीति ॥१०॥ मनो ह वै देवा मनुष्यस्याजानन्ति । स वेद गार्हपत्यः परिदां मेदमुपागादिति तूष्णीमेवाहवनीयमुपतिष्ठते स वेदाहवनीयः परिदां मेदमुपागादिति ॥११॥ अथ प्र वा व्रजति प्र वा धावयति । स यत्र वेलो मन्यते तत्स्यन्त्वा वाचं विसृजतेऽथ प्रोष्य परेत्य यत्र वेलां मन्यते तद्वाचं यच्छति स यद्यपि राज्ञान्तरेण स्यान्नैव तमुपेयात् ॥१२॥ स आहवनीयमेवाग्रऽउपतिष्ठते । अथ गार्हपत्यं तूष्णीमेवाहवनीयमुपतिष्ठते तूष्णीमुपविश्य तृणान्यपलुम्पति तूष्णीमेव गार्हपत्यमुपतिष्ठते तूष्णीमुपविश्य तृणान्यपलुम्पति ॥१३॥ अथातो गृहाणामेवोपचारः । एतद्ध वै गृहपतेः प्रोषुष आगताद्गृहाः समुत्त्रस्ता इवं भवन्ति किमयमिह वदिष्यति किं वा करिष्यतीति स यो ह तत्र किंचिद्वदति वा करोति वा तस्माद्गृहाः प्रत्रसन्ति तस्येश्वरः कुलं विद्धोर्ब्योरथ यो ह तत्र न वदति न किं चन क-

रोति तं गृहा उपसृज्यन्ते न वाऽअयमिहावादीन्न किं चनाकरदिति स यदिहापि सुक्रुद्ध इव स्याद्भूय एव ततस्तत्कुर्याद्यद्वदिष्यन्वा करिष्यन्वा स्यादेष उ गृहाणामुपचारः ॥ १४ ॥ ब्राह्मणम् ॥ ३ [४. १.] ॥ ॥

प्रजापतिं वै भूतान्युपासीदन् । प्रजा वै भूतानि वि नो धेहि यथा जीवामेति ततो देवा यज्ञोपवीतिनो भूत्वा दक्षिणं जान्वाच्योपासीदंस्तानब्रवीद्यज्ञो वोऽन्नममृतत्वं व ऊर्ग्वः सूर्यो वो ज्योतिरिति ॥ १ ॥ अथैनं पितरः । प्राचीनावीतिनः सव्यं जान्वाच्योपासीदंस्तानब्रवीन्मासि-मासि वोऽशनꣳ स्वधा वो मनोजवो वश्चन्द्रमा वो ज्योतिरिति ॥ २ ॥ अथैनं मनुष्याः । प्रावृता उपस्थं कृत्वोपासीदंस्तानब्रवीत्सायं प्रातर्वोऽशनं प्रजा वो मृत्युर्वोऽग्निर्वो ज्योतिरिति ॥ ३ ॥ अथैनं पशव उपासीदन् । तेभ्यः स्वेषमेव चकार यदेव यूयं कदा च लभाधै यदि काले यज्यनाकालेऽथैवाश्नाथेति तस्मादेते यदेव कदा च लभन्ते यदि काले यज्यनाकालेऽथैवाश्नन्ति ॥ ४ ॥ अथ हैनꣳ शश्वद्ध्यसुरा उपसेदुरित्याङ्गः । तेभ्यस्तमश्च मायां च प्रददावस्त्यहैवासुरमायेतीव पराभूता ह्व एव ताः प्रजास्ता इमाः प्रजास्तथैवोपजीवन्ति यथैवाभ्यः प्रजापतिर्व्यदधात् ॥ ५ ॥ नैव देवा अतिक्रामन्ति । न पितरो न पशवो मनुष्या एवैकेऽतिक्रामन्ति तस्माद्यो मनुष्याणां मेध्यत्यप्रभे मेधति विदूर्हति हि न क्षयनाय चन भवत्यनृतꣳ हि कृत्वा मेधति तस्माद्व सायंप्रातराश्येव स्यात्स यो हैवं विद्वात्सायंप्रातराशी भवति सर्वꣳ हैवायुरेति यद्व ह किं च वाचा व्याहरति तद्व हैव भवत्येतद्धि देवसत्यं गोपायति तद्धैतत्तेजो नाम ब्राह्मणं य एतस्य व्रतꣳ शक्नोति चरितुम् ॥ ६ ॥ तद्धाऽएतत् । मासि-मास्येव पितृभ्यो ददतो यदैवैष न पुरस्तान्न पश्चाद्दृशेऽथेभ्यो ददात्येष वै सोमो राजा देवानामन्नं यच्चन्द्रमाः स एताꣳ रात्रिं क्षीयते तस्मिन्क्षीणे ददाति तथैभ्योऽसमदं करोत्यथ यदक्षीणे दद्यात्समदꣳ ह कुर्यादेवेभ्यश्च पितृभ्यश्च तस्माद्यदैवैष न पुर-

स्तान्न पश्चाद्दृशेऽथेभ्यो ददाति ॥७॥ स वाऽअपराह्णे ददाति । पूर्वाह्णो वै देवानां मध्यन्दिनो मनुष्याणामपराह्णः पितॄणां तस्मादपराह्णे ददाति ॥८॥ स ऋघनेन गार्हपत्यं । प्राचीनावीती भूत्वा दक्षिणासीन एतं गृह्णाति स तत एवोपोत्थायोत्तरेणान्वाहार्यपचनं दक्षिणा तिष्ठन्नवकृन्ति सकृत्फलीकरोति सकृदु ह्येव पराञ्चः पितरस्तस्मात्सकृत्फलीकरोति ॥९॥ तꣳ श्रपयति । तस्मिन्नधिश्रितऽआज्यं प्रत्यानयत्यग्नौ वै देवेभ्यो जुह्वत्युद्धरन्ति मनुष्येभ्योऽथैव पितॄणां तस्मादधिश्रितऽआज्यं प्रत्यानयति ॥१०॥ स उद्धास्याग्नौ द्वेऽआकुती जुहोति देवेभ्यः । देवान्वाऽएष उपावर्तते य आहिताग्निर्भवति यो दर्शपूर्णमासाभ्यां यजतेऽथैतत्पितृयज्ञेनेवाचारीत्तदु देवेभ्यो निह्नुते स देवैः प्रसूतोऽथैतत्पितृभ्यो ददाति तस्मादुद्धास्याग्नौ द्वेऽआकुती जुहोति देवेभ्यः ॥११॥ स वाऽअग्नये च सोमाय च जुहोति । स यदग्नये जुहोति सर्वत्र ह्येवाग्निरन्वाभक्तोऽथ यत्सोमाय जुहोति पितृदेवत्यो वै सोमस्तस्मादग्नये च सोमाय च जुहोति ॥१२॥ स जुहोति । अग्नये कव्यवाहनाय स्वाहा सोमाय पितृमते स्वाहेत्यग्नौ मेक्षणमभ्यादधाति तत्स्विष्टकृद्भाजनमथ दक्षिणेनान्वाहार्यपचनꣳ सकृदुल्लिखति तद्वेदिभाजनꣳ सकृदु ह्येव पराञ्चः पितरस्तस्मात्सकृदुल्लिखति ॥१३॥ अथ परस्तादुल्मुकं निदधाति । स यदनिधायोल्मुकमथैतत्पितृभ्यो दद्यादसुररक्षसानि हैषामेतद्विमथ्नीरंस्तथो हैतत्पितॄणामसुररक्षसानि न विमथ्नते तस्मात्परस्तादुल्मुकं निदधाति ॥१४॥ स निदधाति । ये रूपाणि प्रतिमुञ्चमाना असुराः सन्तः स्वधया चरन्ति । परापुरो निपुरो ये भरन्त्यग्निष्टांल्लोकात्प्रणुदात्यस्मादित्यग्निर्हि रक्षसामपकृन्ता तस्मादेवं निदधाति ॥१५॥ अथोदपात्रमादायावनेजयति । असाववनेनिक्ष्वेत्येव यजमानस्य पितरमसावक्ष्वनेनिक्ष्वेति पितामहमसावक्ष्वनेनिक्ष्वेति प्रपितामहं तद्यथाशिष्यतेऽभिषिञ्चेदेवं तत् ॥१६॥ अथ सकृदाच्छिन्नान्युपमूलं दिनानि भवन्ति । अयमिव वै देवानां मध्यमिव

मनुष्याणां मूलमिव पितॄणां तस्माद्उपमूलं दिनानि भवन्ति सकृदाह्निनानि भवन्ति सकृद्ध्व क्षेव पराञ्चः पितरस्तस्मात्सकृदाह्निनानि भवन्ति ॥ १७ ॥ तानि दक्षिणोपस्तृणाति । तत्र ददाति स वाऽइति ददातीतीव वै देवेभ्यो ह्रुक्कृत्युद्धरन्ति मनुष्येभ्योऽथैवं पितॄणां तस्मादिति ददाति ॥ १८ ॥ स ददाति । असावितत्तऽइत्येव यज्ञमानस्य पित्रे ये च त्वामन्वित्यु क्रैकऽआह्रस्तद्ध तथा न ब्रूयात्स्वयं वै तेषाꣳ सक्थ येषाꣳ सक्थ तस्माद्ध ब्रूयादसावेतत्तऽइत्येव यज्ञमानस्य पित्रेऽसावेतत्तऽइति पितामहायासावेतत्तऽइति प्रपितामहाय तथ्यदितः पराग्ददाति सकृद्ध्व क्षेव पराञ्चः पितरः ॥ १९ ॥ तत्र जपति । अत्र पितरो मादयध्वं यथाभागमावृषायधमिति यथाभागमश्नीतेत्येवैतदाह ॥ २० ॥ अथ पराङ् पर्यावर्तते । तिर्-इव वै पितरो मनुष्येभ्यस्तिर्-इवैतद्भवति स वाऽआ तमितोरासीतेत्याहुरेतावान्क्यसुरिति स वै मुहूर्तमेवासितः ॥ २१ ॥ अथोपपल्ययय जपति । अमीमदन्त पितरो यथाभागमावृषायिषतेति यथाभागमाशिषुरित्येवैतदाह ॥ २२ ॥ अथोदपात्रमादायावनेजयति । असाववनेनिद्ध्वेत्येव यज्ञमानस्य पितरमसाववनेनिद्ध्वेति पितामहमसाववनेनिद्ध्वेति प्रपितामहं तथ्यथा जानुषेऽभिषिञ्चेदेवं तत् ॥ २३ ॥ अथ नीविमुद्गृह्य नमस्करोति । पितृदेवत्या वै नीविस्तस्मान्नीविमुद्गृह्य नमस्करोति यज्ञो वै नमो यज्ञियानेवैनानेतत्करोति षट् कृत्वो नमस्करोति षड्वाऽऋतव ऋतवः पितरस्तस्मात्षट् कृत्वो नमस्करोति गृह्णान्नः पितरो दत्तेति गृह्णाणाꣳ ह पितर ईशतऽऋषोऽऋतस्याशीः कर्मणोऽथावज्रिघ्रति प्रत्यवधाय पिण्डान्त्स यज्ञमानभागोऽग्नौ सकृदाह्निनान्यभ्यादधाति पुनरुल्मुकमपि सृजति ॥ २४ ॥ ब्राह्मणम् ॥ ४ [४. २.] ॥ ॥

तद्ध क्षेवाच कहोडः कौषीतकिः । अनयोर्वाऽअयं द्यावापृथिव्यो रसोऽस्य रसस्य हुत्वा देवेभ्योऽथेममश्नामेति तस्माद्वाऽआग्रयणेष्ट्या यजतऽइति ॥ १ ॥ तद्ध

ह्योवाच याज्ञवल्क्यः । देवाश्च वाऽअसुराश्चोभये प्राजापत्याः पस्पृधिरे ततोऽसुरा उभयीरोषधीर्याश्च मनुष्या उपजीवन्ति याश्च पशवः कृत्यैव त्वद्विषेणैव त्वत्प्रलिलिपुरुतैवं चिद्देवानभिभवेमेति ततो न मनुष्या आप्नुर्न पशव आलिलिशिरे ता ह्येमाः प्रजा अनाशकेन नोत्पराबभूवुः ॥२॥ तद्धै देवाः शुश्रुवुः । अनाशकेन ह वाऽइमाः प्रजाः पराभवन्तीति ते होचुर्हन्तेदमासामपजिघाꣳसामेति केनेति यज्ञेनैवेति यज्ञेन ह स्म वै तद्देवाः कल्पयन्ते यदेषां कल्पमासऽर्षयश्च ॥३॥ ते होचुः । कस्य न इदं भविष्यतीति ते मम-ममेत्येव न सम्पादयां चक्रुस्ते ह्यास्याद्योचुरान्निमेवास्मिन्नज्ञामहै स यो न उज्जेष्यति तस्य न इदं भविष्यतीति तथेति तस्मिन्नान्निमाजन्त ॥४॥ ताविन्द्राग्नीऽउदजयतां । तस्मादैन्द्राग्नो द्वादशकपालः पुरोडाशो भवतीन्द्राग्नी ह्यस्य भागधेयमुदजयतां तौ यत्रेन्द्राग्नीऽउज्जिगीवाꣳसौ तस्थतुस्तद्विश्वे देवा अन्वाजग्मुः ॥५॥ क्षत्रं वाऽइन्द्राग्नी । विशो विश्वे देवा यत्र वै क्षत्रमुज्जयत्यन्वाभक्ता वै तत्र विट्तद्विश्वान्देवानन्वाभजतां तस्मादेष वैश्वदेवश्चरुर्भवति ॥६॥ तं वै पुराणानां कुर्यादित्याहुः । क्षत्रं वाऽइन्द्राग्नी नेत्क्षत्रमभ्यारोहयाणीति तौ वाऽअभावेव नवानाꣳ स्यातां यद्धि पुरोडाश इतरश्चरुरितरस्तेनैव क्षत्रमनभ्यारूढं तस्मादुभावेव नवानाꣳ स्याताम् ॥७॥ तऽउ ह विश्वे देवा ऊचुः । अनयोर्वाऽअयं द्यावापृथिव्यो रसो ह्यतेमेऽअस्मिन्नाभजामेति ताभ्यामेतं भागमकल्पयन्नेतं द्यावापृथिव्यमेककपालं पुरोडाशं तस्माद्द्यावापृथिव्य एककपालः पुरोडाशो भवति तस्येयमेव कपालमेकेव ह्रीयं तस्मादेककपालो भवति ॥८॥ तस्य परिचक्षा । यस्यै वै कस्यै च देवतायै हविर्गृह्यते सर्वत्रैव स्विष्टकृदन्वाभक्तोऽथैतꣳ सर्वमेव जुहोति न स्विष्टकृतेऽवद्यति सा परिचक्षोतो ह्यतः पर्यावर्तते ॥९॥ तदाहुः । पर्याभूद्वाऽअयमेककपालो मोक्ष्यति राष्ट्रमिति नास्य सा परिचक्षाहवनीयो वाऽआहुतीनां प्रतिष्ठा स यदाहवनीयं प्राप्यापि

दश कृत्वः पर्यावर्तेत न तदाद्रियेत यदीतरेऽन्ये वदन्ति कस्तत्संधमुपेयात्तस्मादाज्यस्यैव यजेदाज्यꣳ ह वाऽअनयोर्द्यावापृथिव्योः प्रत्यक्षꣳ रसस्तत्प्रत्यक्षमेवैनेऽएतत्स्वेन रसेन मेधेन प्रीणाति तस्मादाज्यस्यैव यजेत् ॥ १० ॥ एतेन वै देवाः । यज्ञेनेष्ट्वोभयीनामोषधीनां याश्च मनुष्या उपजीवन्ति याश्च पशवः कृत्यामिव वद्विषमिव वदपजघ्नुस्तत आश्नन्मनुष्या आलिशन्त पशवः ॥ ११ ॥ अथ यदेष एतेन यजते । तन्नाहुरन्तरैवैतस्य तथा कश्चन कृत्ययेव वद्विषेणैव वत्प्रलिम्पतीति देवा अकुर्वन्निति तदेष एतत्करोति यमु चैव देवा भागमकल्पयन्त तमु चैवेभ्य एष एतद्भागं करोतीमा उ चैवैतदुभयीरोषधीर्याश्च मनुष्या उपजीवन्ति याश्च पशवस्ता अनमीवा अकिल्बिषाः कुरुते ता अस्यानमीवा अकिल्बिषा इमाः प्रजा उपजीवन्ति तस्माद्वाऽएष एतेन यजते ॥ १२ ॥ तस्य प्रथमजो गौर्दक्षिणा । अग्र्यमिव ह्येदꣳ स यदीज्ञानः स्यादर्शपूर्णमासाभ्यां वा यजेतार्थितेन यजेत यद्युऽअनीज्ञानः स्याच्चातुष्प्राश्यमेवैतमोदनमन्वाहार्यपचने पचेयुस्तं ब्राह्मणा अश्नीयुः ॥ १३ ॥ द्वया वै देवा देवाः । अरैव देवा अथ ये ब्राह्मणाः श्रुश्रुवाꣳसोऽनूचानास्ते मनुष्यदेवास्तथा वषट्कृतꣳ हुतमेवमस्यैतद्भवति तत्रो यद्दक्षिणाद्यान्नादक्षिणꣳ ह्यविः स्यादिति व्याकुर्नाग्निहोत्रे जुहुयात्समदꣳ ह कुर्याद्यदग्निहोत्रे जुहुयादन्यद्वाऽआग्रयणमन्यदग्निहोत्रं तस्मान्नाग्निहोत्रे जुहुयात् ॥ १४ ॥ ब्राह्मणम् ॥ ५ [४. ३.] ॥

तृतीयः प्रपाठकः ॥ ॥ कण्डिकासंख्या ११३ ॥ ॥

प्रजापतिर्ह वाऽएतेनाग्रे यज्ञेनेजे । प्रजाकामो बहुः प्रजया पशुभिः स्याꣳ श्रियं गच्छेयं यशः स्यामन्नादः स्यामिति ॥ १ ॥ स वै दक्षो नाम । तद्यदेनेन सोऽग्रेऽयजत तस्माद्दाक्षायणायज्ञो नामोतैनमेके वसिष्ठयज्ञ इत्याचक्षतऽएष वै वसिष्ठ एतमेव तदन्वाचक्षते स एतेन यज्ञेनेजे स एतेन यज्ञेनेष्ट्वा येयं प्रजापतेः प्रजातिर्या श्रीरेतद्बभूवेताꣳ ह वै प्रजातिं प्रजायतऽएताꣳ श्रियं गच्छति य एवं विद्वानेः

तेन यज्ञेन यजते तस्माद्वाऽएतेन यजेत ॥२॥ तेनो ह तत ईजे । प्रतीदृशः श्वैक्षः स ये तं प्रत्यासुस्तेषां विवचनमिवास विवचनमिव ह वै भवति य एवं विद्वानेतेन यज्ञेन यजते तस्माद्वाऽएतेन यजेत ॥३॥ तमाजगाम । सुप्ता सार्ञ्जयो ब्रह्मचर्यं तस्मादेतं च यज्ञमनूचेऽन्यमु च सोऽनूच्य पुनः सृञ्जयान्जगाम ते ह सृञ्जया विदां चक्रुर्यज्ञं वै नोऽनूच्यागन्निति ते होचुः सह वै नस्तद्दैवैरागन्यो नो यज्ञमनूच्यागन्निति स वै सहदेवः सार्ञ्जयस्तदप्येतन्निवचनमिवास्त्यन्यद्वाऽअरे सुप्ता नाम दधऽइति स एतेन यज्ञेनेजे स एतेन यज्ञेनेष्ट्वा येयꣳ सृञ्जयानां प्रज्ञातिर्यां श्रीरेतद्बभूवैताꣳ ह वै प्रज्ञातिं प्रज्ञायतऽएताꣳ श्रियं गह्नति य एवं विद्वानेतेन यज्ञेन यजते तस्माद्वाऽएतेन यजेत ॥४॥ तेनो ह तत ईजे । देवभागः श्रौतर्षः स उभयेषां कुरूणां च सृञ्जयानां च पुरोहित आस परमता वै सा यो न्वेवैकस्य राष्ट्रस्य पुरोहितोऽसत्सा न्वेव परमता किमु यो द्वयोः परमतामिव ह वै गह्नति य एवं विद्वानेतेन यज्ञेन यजते तस्माद्वाऽएतेन यजेत ॥५॥ तेनो ह तत ईजे । दक्षः पार्वतिस्तऽइमेऽप्येतर्हि दाक्षायणा राज्यमिवैव प्राप्ता राज्यमिह वै प्राप्नोति य एवं विद्वानेतेन यजते तस्माद्वाऽएतेन यजेत स वाऽएकैक एवानूचीनाꣳ पुरोडाशो भवत्येतेनो ह्यास्यासपत्नानुपबाधा श्रीर्भवति स वै द्वे पौर्णमास्यौ यजते द्वेऽअमावास्ये द्वे वै मिथुनं मिथुनमेवैतत्प्रजननं क्रियते ॥६॥ अथ यत्पूर्वेद्युः । अग्नीषोमीयेण यजते पौर्णमास्यां ते द्वे देवते द्वे वै मिथुनं मिथुनमेवैतत्प्रजननं क्रियते ॥७॥ अथ प्रातः । आग्नेयः पुरोडाशो भवत्यैन्द्रꣳ सांनाय्यं ते द्वे देवते द्वे वै मिथुनं मिथुनमेवैतत्प्रजननं क्रियते ॥८॥ अथ यत्पूर्वेद्युः । ऐन्द्राग्नेन यजतेऽमावास्यायां ते द्वे देवते द्वे वै मिथुनं मिथुनमेवैतत्प्रजननं क्रियते ॥९॥ अथ प्रातः । आग्नेयः पुरोडाशो भवति मैत्रावरुणी पयस्या नेत्यऽइदाद्यानीति न्वेवाग्नेयः पुरोडाशोऽथैतावेव मित्रावरुणौ द्वे देवते द्वे वै मिथुनं मिथुनमे-

वैतत्प्रजननं क्रियतऽएतद्वै ह्यस्य तद्रूपं येन बकुर्भवति येन प्रजायते ॥१०॥ अथ यत्पूर्वेद्युः । अग्नीषोमीयेण यजते पौर्णमास्यां यमेवामुमुपवसथेऽग्नीषोमीयं पशुमालभते स एवास्य सः ॥११॥ अथ प्रातः । आग्नेयः पुरोडाशो भवत्यैन्द्रꣳ सांनाय्यं प्रातःसवनमेवास्याग्नेयः पुरोडाश आग्नेयꣳ हि प्रातःसवनमथैन्द्रꣳ सांनाय्यं माध्यन्दिनमेवास्य तत्सवनमैन्द्रꣳ हि माध्यन्दिनꣳ सवनम् ॥१२॥ अथ यत्पूर्वेद्युः । ऐन्द्राग्नेन यजतेऽमावास्यायां तृतीयसवनमेवास्य तद्वैश्वदेवं वै तृतीयसवनमिन्द्राग्नी वै विश्वे देवाः ॥१३॥ अथ प्रातः । आग्नेयः पुरोडाशो भवति मैत्रावरुणी पयस्या नेत्यज्ञाद्यानीति न्वेवाग्नेयः पुरोडाशोऽथ यामेवामूं मैत्रावरुणीं वशामनूबन्ध्यामालभते सैवास्य मैत्रावरुणी पयस्या स पौर्णमासेन चामावास्येन चेष्ट्वा यावत्सौम्येनाधरेणेष्ट्वा ज्ञयति तावज्ज्ञयति तद्ध खलु महायज्ञो भवति ॥१४॥ अथ यत्पूर्वेद्युः । अग्नीषोमीयेण यजते पौर्णमास्यामेतेन वाऽइन्द्रो वृत्रमहन्नेतेनोऽएव व्यजयत यास्येयं विजितिस्तां तथोऽएवैष एतेन पाप्मानं द्विषन्तं भ्रातृव्यꣳ हन्ति तथोऽएव विजयतेऽथ यत्संनयत्यामावास्यं वै सांनाय्यं दूरे तद्यदमावास्येति क्षिप्रऽएवैतद्वृत्रं जघ्नुषे तमेतेन रसेनाप्रीणान्क्षिप्रे ह वै पाप्मानमपहते य एवं विद्वान्पौर्णमास्याꣳ संनयत्येष वै सोमो राजा देवानामन्नं यच्चन्द्रमास्तमेतत्पूर्वेद्युरभिषुण्वन्ति प्रातर्भक्षयिष्यन्तस्तमेतद्भक्षयन्ति यदपक्षीयते ॥१५॥ अथ यत्पूर्वेद्युः । अग्नीषोमीयेण यजते पौर्णमास्यामभिषुणोत्येवैनमेतत्तस्मिन्नभिषुतऽएतꣳ रसं दधात्येतेन रसेन तीव्रीकरोति स्वदयति ह वै देवेभ्यो हव्यꣳ स्वदते ह्यस्य देवेभ्यो हव्यं य एवं विद्वान्पौर्णमास्याꣳ संनयति ॥१६॥ अथ यत्पूर्वेद्युः । ऐन्द्राग्नेन यजतेऽमावास्यायां दर्शपूर्णमासयोर्वै देवते स्त इन्द्राग्नीऽएव तेऽएवैतद्ऋसा प्रत्यक्षं यजत्यृक्षसा ह वाऽअस्य दर्शपूर्णमासाभ्यामिष्टं भवति य एवमेतद्वेद ॥१७॥ अथ प्रातः । आग्नेयः पुरोडाशो भवति मैत्रावरुणी पयस्या नेत्यज्ञाद्यानी-

ति न्वेवाग्नेयः पुरोडाशोऽथैताविवार्धमासौ मित्रावरुणौ य एवापूर्यते स वरुणो योऽपक्षीयते स मित्रस्तावेता रात्रिमुभौ समागह्यतस्तदुभावेवैतत्सह सन्तौ प्रीणाति सर्वꣳ ह वाऽअस्य प्रीतं भवति सर्वमायुं य एवमेतद्वेद ॥ १८ ॥ तद्वाऽएताꣳ रात्रिं । मित्रो वरुणो रेतः सिञ्चति तदेतेन रेतसा प्रजायते यदापूर्यते तस्यदेषात्र मैत्रावरुणी पयस्यावक्लृप्ततमा भवति ॥ १९ ॥ सांनाय्यभाजना वाऽअमावास्या । तद्दस्तत्पौर्णमास्यां क्रियते स यद्धात्रापि संनयेज्जामि कुर्यात्समदं कुर्यात्तदेनमद्य ओषधिभ्यः सम्भृत्याकृतिभ्योऽधिजनयति स एष आकृतिभ्यो जातः पश्चाद्दृशे ॥ २० ॥ मिथुनादिद्वाऽएनमेतत्प्रजनयति । योषा पयस्या रेतो वाजिनं तद्वाऽअनुष्ठा यन्मिथुनाज्जायते तदेनमेतस्मान्मिथुनात्प्रजननात्प्रजनयति तस्मादिषात्र पयस्या भवति ॥ २१ ॥ अथ वाजिभ्यो वाजिनं जुहोति । ऋतवो वै वाजिनो रेतो वाजिनं तद्वनुष्ठैवैतद्रेतः सिच्यते तदृतवो रेतः सिक्तमिमाः प्रजाः प्रजनयन्ति तस्माद्वाजिभ्यो वाजिनं जुहोति ॥ २२ ॥ स वै पश्चादिव यज्ञस्य जुहोति । पश्चाद्धि परीत्य वृषा योषामधिद्रवति तस्याꣳ रेतः सिञ्चति स वै प्रागेवाग्ने जुहोत्यग्ने वीहात्यनुवषट्करोति तत्स्विष्टकृद्वाजनꣳ स वै प्रागेव जुहोति ॥ २३ ॥ अथ दिशो व्याघारयति । दिशः प्रदिश आदिशो विदिश उद्दिशो दिग्भ्यः स्वाहेति पञ्च दिशः पञ्चर्तवस्तदृतुभिरेवैतद्दिशो मिथुनीकरोति ॥ २४ ॥ तद्वै पञ्चैव भक्षयन्ति । होता चाध्वर्युश्च ब्रह्मा चाग्नीच्च यजमानः पञ्च वाऽऋतवस्तदृतूनामेवैतद्रूपं क्रियते तदृतुष्ठैवैतद्रेतः सिक्तं प्रतिष्ठापयति प्रथमो यजमानो भक्षयति प्रथमो रेतः परिगृह्णानीत्यथोऽअप्युत्तमो मय्युत्तमे रेतः प्रतितिष्ठादित्युपह्वत उपह्वयस्वेति सोममेवैतत्कुर्वन्ति ॥ २५ ॥ ब्राह्मणम् ॥ १ [४. ४.] ॥ अध्यायः ॥ ४ [१३.] ॥ ॥

प्रजापतिर्ह वाऽइदमग्रऽएक एवास । स ऐक्षत कथं नु प्रजायेयेति सोऽश्राम्यत्स तपोऽतप्यत स प्रजा असृजत ता अस्य प्रजाः सृष्टाः पराबभूवुस्तानीमानि

वयाꣳसि पुरुषो वै प्रजापतेर्नेदिष्ठं दियाद्वाऽअयं पुरुषस्तस्माद्द्विपादो वयाꣳसि ॥ १ ॥ स ऐक्षत प्रजापतिः । यथा न्वेव पुरैकोऽभूवमेवमु न्वेवाप्येतर्ह्येक एवास्मीति स द्वितीयाः ससृजे ता अस्य परैव बभूवुस्तद्दिदं नुद्यꣳ सरीसृपं यदन्यत्सर्पेभ्यस्तृतीयाः ससृजऽइत्याकुस्ता अस्य परैव बभूवुस्तऽइमे सर्पा एता ह न्वेव द्वयोर्याज्ञवल्क्य उवाच त्रयीरु तु पुनर्ऋचा ॥ २ ॥ सोऽर्चन्क्ष्याम्यन्प्रजापतिरीक्षां चक्रे । कथं नु मे प्रजाः सृष्टाः पराभवन्तीति स हैतदेव ददर्शानशनतया वै मे प्रजाः पराभवन्तीति स आत्मन एवाग्ये स्तनयोः पय आप्याययां चक्रे स प्रजा असृजत ता अस्य प्रजाः सृष्टा स्तनावेवाभिपद्य तास्ततः सम्बभूवुस्ता इमा अपराभूताः ॥ ३ ॥ तस्मादेतदृषिणाभ्यनूक्तं । प्रजा ह तिस्रोऽत्यायमीयुरिति तयाः पराभूतास्ता एवैतदभ्यनूक्तं न्यन्या अर्कमभितो विविश्रऽइत्यग्निर्वाऽअर्कस्तया इमाः प्रजा अपराभूतास्ता अग्निमभितो निविष्टास्ता एवैतदभ्यनूक्तम् ॥ ४ ॥ मक्षू तस्थौ भुवनेष्वन्तरिति । प्रजापतिमेवैतदभ्यनूक्तं पवमानो हरित आविवेशेति दिशो वै हरितस्ता अयं वायुः पवमान आविष्टस्ता एवैषऽर्गभ्यनूक्ता ता इमाः प्रजास्तथैव प्रजायन्ते यथैव प्रजापतिः प्रजा असृजतेदꣳ हि यदेव स्त्रियै स्तनावाप्यायतेऽऊधः पशूनामथैव यज्जायते तज्जायते तास्तत स्तनावेवाभिपद्य सम्भवन्ति ॥ ५ ॥ तद्वै पय एवान्नम् । एतद्ध्यग्ये प्रजापतिरन्नमजनयत तद्वाऽअन्नमेव प्रजा अन्नाद्धि सम्भवन्तीदꣳ हि यासां पयो भवति स्तनावेवाभिपद्य तास्ततः सम्भवन्त्यथ यासां पयो न भवति ज्ञातमेव ता अथाद्यन्ति तदु ता अन्नादेव सम्भवन्ति तस्माद्वन्नमेव प्रजाः ॥ ६ ॥ स यः प्रजाकामः । एतेन हविषा यजतऽआत्मानमेवैतद्यज्ञं विधत्ते प्रजापतिं भूतꣳ ॥ ७ ॥ ॥ शतम् १२०० ॥ ॥ स वाऽआग्नेयोऽष्टाकपालः पुरोडाशो भवति । अग्निर्वै देवतानां मुखं प्रजननयिता स प्रजापतिस्तस्मादाग्नेयो भवति ॥ ८ ॥ अथ सौम्यश्चरुर्भवति । रेतो वै सोमस्तद्रेतो प्रजननयितरि

सोमꣳ रेतः सिञ्चति तत्पुरस्तान्मिथुनं प्रजननम् ॥ ९ ॥ अथ सावित्रः । द्वादशकपालो वाष्टाकपालो वा पुरोडाशो भवति सविता वै देवानां प्रसविता प्रजापतिर्मध्यतः प्रजनयिता तस्मात्सावित्रो भवति ॥ १० ॥ अथ सारस्वतश्चरुर्भवति । पौष्णश्चरुर्योषा वै सरस्वती वृषा पूषा तत्पुनर्मिथुनं प्रजननमेतस्माद्वाऽउभयतो मिथुनात्प्रजननात्प्रजापतिः प्रजाः ससृजऽइतश्चोर्ध्वा इतश्चावाचीस्तथोऽएवैष एतस्मादुभयत एव मिथुनात्प्रजननात्प्रजाः सृजतऽइतश्चोर्ध्वा इतश्चावाचीस्तस्माद्वाऽएतानि पञ्च हवीꣳषि भवन्ति ॥ ११ ॥ अथातः पयस्यायाऽएवायतनं । मारुतस्तु सप्तकपालो विशो वै मरुतो देवविशस्ता हेदमनिषेद्धाऽइव चेरुस्ताः प्रजापतिं यजमानमुपेत्योचुर्वि वै ते मथिष्यामहऽइमाः प्रजा या एतेन हविषा सृज्यसऽइति ॥ १२ ॥ स ऐक्षत प्रजापतिः । परा मे पूर्वाः प्रजा अभूवन्निमा उ चेदिमे विमथ्नते न ततः किं चन परिशेक्ष्यतऽइति तेभ्य एतं भागमकल्पयदेतं मारुतꣳ सप्तकपालं पुरोडाशꣳ स एष मारुतः सप्तकपालस्तद्यत्सप्तकपालो भवति सप्त-सप्त हि मारुतो गणास्तस्मान्मारुतः सप्तकपालः पुरोडाशो भवति ॥ १३ ॥ तं वै स्वतवोभ्य इति कुर्यात् । स्वयꣳ हि तऽएतं भागमकुर्वतोतो स्वतवोभ्यो याज्यानुवाक्ये न विन्दन्ति स उ खलु मारुत एव स्यात्स वाऽएष प्रजाभ्य एवाहिꣳसायै क्रियते तस्मान्मारुतः ॥ १४ ॥ अथातः पयस्यैव । पयसो वै प्रजाः सम्भवन्ति पयसः सम्भूतास्तद्यत एव सम्भूता यतः सम्भवन्ति तदेवाभ्य एतत्करोति तद्याः पूर्वैर्हविर्भिः प्रजाः सृजते ता एतस्मात्पयस एतस्यै पयस्यायै सम्भवन्ति ॥ १५ ॥ तस्यां मिथुनमस्ति । योषा पयस्या रेतो वाजिनं तस्मान्मिथुनाद्विश्वमसंमितमनु प्राजायत तद्यदेतस्मान्मिथुनाद्विश्वमसंमितमनु प्राजायत तस्माद्विश्वदेवी भवति ॥ १६ ॥ अथ द्यावापृथिव्य एकैकपालः पुरोडाशो भवति । एतैर्वै हविर्भिः प्रजापतिः प्रजाः सृष्ट्वा ता द्यावापृथिवीभ्यां पर्यगृह्णात्ता इमा द्यावापृथिवीभ्यां परिगृहीतास्तथोऽएवैष

एतस्य एतैर्हविर्भिः प्रजाः सृजते ता द्यावापृथिवीभ्यां परिगृह्णाति तस्माद्द्यावापृथिव्य एककपालः पुरोडाशो भवति ॥ १७ ॥ अथात आवृदेव । नोपकिरेल्लुत्तरवेदिं विसृष्टमसत्सर्वमसद्वैश्वदेवमसदिति त्रेधा बर्हिः संनद्धं भवति तत्पुनरेकधैतद्वि प्रजननस्य रूपं प्रजननमु ह्येदं पिता माता यज्जायते तत्तृतीयं तस्मात्त्रेधा सत्पुनरेकधा प्रस्व उपसंनद्धा भवन्ति तं प्रस्तरं गृह्णाति प्रजननमु ह्येदं प्रजननमु हि प्रस्वस्तस्मात्प्रसूः प्रस्तरं गृह्णाति ॥ १८ ॥ आसाद्य हवीꣳष्यग्निं मन्थन्ति । अग्निꣳ ह वै जायमानमनु प्रजापतेः प्रजा अज्ञिरे तथोऽएवैतस्याग्निमेव जायमानमनु प्रजा जायन्ते तस्मादासाद्य हवीꣳष्यग्निं मन्थन्ति ॥ १९ ॥ नवप्रयाजं भवति । नवानुयाजं दशाक्षरा वै विराडथैतामुभयतो न्यूनां विराजं करोति प्रजननायैतस्माद्वाऽउभयतो न्यूनात्प्रजननात्प्रजापतिः प्रजाः ससृजऽइतश्चोर्ध्वा इतश्चावाचीस्तथोऽएवैष एतस्मादुभयत एव न्यूनात्प्रजननात्प्रजाः सृजतऽइतश्चोर्ध्वा इतश्चावाचीस्तस्मान्नवप्रयाजं भवति नवानुयाजम् ॥ २० ॥ त्रीणि समिष्टयजूꣳषि भवन्ति । त्र्याय इव ह्येदꣳ हविर्यज्ञाद्यत्र नवप्रयाजं नवानुयाजमथोऽअग्नेयेकमेव स्याद्धविर्यज्ञो हि तस्य प्रथमजो गौर्दक्षिणा ॥ २१ ॥ एतेन वै प्रजापतिः यज्ञेनेष्ट्वा । येयं प्रजापतेः प्रजातिर्या श्रीरेतद्वभूवैताꣳ ह वै प्रजातिं प्रजायतऽएताꣳ श्रियं गच्छति य एवं विद्वानेतेन यज्ञेन यजते तस्माद्वाऽएतेन यजेत ॥ २२ ॥ ब्राह्मणम् ॥ २ [५. १.] ॥ ॥

वैश्वदेवेन वै प्रजापतिः । प्रजाः ससृजे ता अस्य प्रजाः सृष्टा वरुणस्य यवान्नजुर्वरुणयो ह वाऽअग्रे यवस्तयन्नेव वरुणस्य यवान्प्रादस्तस्माद्वरुणप्रघासा नाम ॥ १ ॥ ता वरुणो जग्राह । ता वरुणगृहीताः परिदीर्णा अनत्यश्च प्राणत्यश्च शिश्यिरे च निषेदुश्च प्राणोदानौ ह्येवाभ्यो नापचक्रमतुरथान्याः सर्वा देवता अपचक्रमुस्तयोर्ह्येवास्य हेतोः प्रजा न पराबभूवुः ॥ २ ॥ ता एतेन हविषा प्रजापतिरभिषज्यत् । तस्याश्चैवास्य प्रजा जाता आसन्याश्चाजाताास्ता उभयीर्वरुणपाशा-

त्प्रामुञ्चत्ता अस्यानमीवा अकिल्विषाः प्रजाः प्राजायत ॥३॥ अथ यदेष एतेश्चतुर्थे मासि यजते । तन्नाकू न्वेवैतस्य तथा प्रजा वरुणो गृह्णातीति देवा अकुर्वन्निति न्वेवैष एतत्करोति याश्च न्वेवास्य प्रजा जाता याश्चाजातास्ता उभयीर्वरुणपाशात्प्रमुञ्चति ता अस्यानमीवा अकिल्विषाः प्रजाः प्रजायते तस्माद्वाऽएष एतेश्चतुर्थे मासि यजते ॥४॥ तद्वै द्वे वेदी द्वावग्नी भवतः । तद्यद्वै वेदी द्वावग्नी भवतस्तदुभयत एवैतद्वरुणपाशात्प्रजाः प्रमुञ्चतीतश्चोर्ध्वा इतश्चावाचीस्तस्माद्वै वेदी द्वावग्नी भवतः ॥५॥ स उत्तरस्यामिव वेदौ । उत्तरवेदिमुपकिरति न दक्षिणास्यां क्षत्रं वै वरुणो विशो मरुतः क्षत्रमेवैतद्विश उत्तरं करोति तस्मादुपर्यासीनं क्षत्रियमधस्तादिमाः प्रजा उपासते तस्मादुत्तरस्यामिव वेदाऽउत्तरवेदिमुपकिरति न दक्षिणास्याम् ॥६॥ अथैतान्येव पञ्च हवीꣳषि भवन्ति । एतैर्वै हविर्भिः प्रजापतिः प्रजा असृजतैतैरुभयतो वरुणपाशात्प्रजाः प्रामुञ्चदितश्चोर्ध्वा इतश्चावाचीस्तस्माद्वाऽएतानि पञ्च हवीꣳषि भवन्ति ॥७॥ अथैन्द्राग्नो द्वादशकपालः पुरोडाशो भवति । प्राणोदानौ वाऽइन्द्राग्नी तद्यथा पुण्यं चक्षुषे पुण्यं कुर्यादेवं तत्तयोर्हेदास्य हेतोः प्रजा न पराबभूवुस्तत्प्राणोदानाभ्यामेवैतत्प्रजा भिषज्यति प्राणोदानौ प्रजासु दधाति तस्मादैन्द्राग्नो द्वादशकपालः पुरोडाशो भवति ॥८॥ उभयत्र पयस्ये भवतः । पयसो वै प्रजाः सम्भवन्ति पयसः सम्भूतास्तद्यत एव सम्भूता यतः सम्भवन्ति तत एवैतदुभयतो वरुणपाशात्प्रजाः प्रमुञ्चतीतश्चोर्ध्वा इतश्चावाचीस्तस्मादुभयत्र पयस्ये भवतः ॥९॥ वारुण्युत्तरा भवति । वरुणो ह वाऽअस्य प्रजा अगृह्णात्तत्प्रत्यनं वरुणपाशात्प्रजाः प्रमुञ्चति मारुती दक्षिणाज्ञामितायै न्वेव मारुती भवति ज्ञामि ह कुर्याद्यदुभे वारुण्यौ स्यातामतो ह वाऽअस्य दक्षिणातो मरुतः प्रजा अजिघाꣳसंस्तानेतेन भागेनाशमयत्तस्मान्मारुती दक्षिणा ॥१०॥ तयोरुभयोरेव करीराण्यावपति । कं वै प्रजापतिः प्रजाभ्यः करीरैरकुरुत कमेवै-

ष एतत्प्रजाभ्यः कुरुते ॥ ११ ॥ तयोरुभयोरेव शमीपलाशान्यावपति । शं वै प्रजापतिः प्रजाभ्यः शमीपलाशैरकुरुत शमेवैष एतत्प्रजाभ्यः कुरुते ॥ १२ ॥ अथ काय एककपालः पुरोडाशो भवति । कं वै प्रजापतिः प्रजाभ्यः कायेनैककपालेन पुरोडाशेनाकुरुत कमेवैष एतत्प्रजाभ्यः कायेनैककपालेन पुरोडाशेन कुरुते तस्मात्काय एककपालः पुरोडाशो भवति ॥ १३ ॥ अथ पूर्वेद्युः । अन्वाहार्यपचनेऽतुषानिव यवान्कृत्वा तानीषदिवोपतप्य तेषां करम्भपात्राणि कुर्वन्ति यावन्तो गृह्याः स्युस्तावत्येकेनातिरिक्तानि ॥ १४ ॥ तत्रापि मेषं च मेषीं च कुर्वन्ति । तयोर्मेषे च मेष्यां च यद्यनैडकीर्नूर्णा विन्देत्ताः प्रणीय निश्लेषयेद्यद्यु ह्यनैडकीर्न विन्देदथोऽअपि कुशोर्णा एव स्युः ॥ १५ ॥ तद्यन्मेषश्च मेषी च भवतः । एष वै प्रत्यक्षं वरुणस्य पशुर्यन्मेषस्तत्प्रत्यक्षं वरुणपाशात्प्रजाः प्रमुच्यति यवमयौ भवतो यवान्हि जन्तुषीर्वरुणोऽगृह्णान्मिथुनौ भवतो मिथुनादेवैतद्वरुणपाशात्प्रजाः प्रमुच्यति ॥ १६ ॥ स उत्तरस्यामेव पथ्यायां मेषीमवदधाति । दक्षिणास्यां मेषमेवमिव हि मिथुनं क्लृप्तमुत्तरतो हि स्त्री पुमाꣳसमुपशेते ॥ १७ ॥ स सर्वाण्येव हवीꣳष्यधर्युः । उत्तरस्यां वेदावासादयत्यथैतामेव पथ्यां प्रतिप्रस्थाता दक्षिणास्यां वेदावासादयति ॥ १८ ॥ आसाद्य हवीꣳष्यग्निं मन्थति । अग्निं मन्थित्वानुप्रकृत्याभिजुहोत्यथाधर्युरेवाह्वाग्नये समिध्यमानायानुब्रूहीति ताꣳउभावेवेध्मावभ्याधत्त उभौ समिधौ परिशिꣳष्टऽउभौ पूर्वावाघारावाघारयतोऽथाधर्युरेवाह्वाग्निमग्नीत्संमृट्टीत्यसंमृष्टमेव भवति सम्प्रेषितम् ॥ ११ ॥ अथ प्रतिप्रस्थाता प्रतिपरैति । स पत्नीमुदानेष्यन्पृच्छति केन चरसीति वरुणं वाऽएतत्स्त्री करोति यदन्यस्य सत्यन्येन चरत्यथो नेन्मेऽन्तःशल्या जुहुवदिति तस्मात्पृच्छति निरुक्तं वाऽएनः कनीयो भवति सत्यꣳ हि भवति तस्मादेव पृच्छति सा यन्न प्रतिजानीत ज्ञातिभ्यो ह्यस्यै तद्धितꣳ स्यात् ॥ २० ॥ तां वाचयति । प्रघासिनो हवामहे मरुतश्च रिशादसः ।

करम्भेण सन्नोषस इति यथा पुरोऽनुवाक्यैवमेषैतयैवैनानेतेभ्यः पात्रेभ्यो ह्वयति ॥ २१ ॥ तानि वै प्रतिपुरुषं । यावन्तो गृह्याः स्युस्तावत्स्येकेनातिरिक्तानि भवन्ति तत्प्रतिपुरुषमेवैतद्देकैकेन या अस्य प्रजा ज्ञातास्ता वरुणपाशात्प्रमुञ्चत्येकेनातिरिक्तानि भवन्ति तया एवास्य प्रजा अज्ञातास्ता वरुणपाशात्प्रमुञ्चति तस्मादेकेनातिरिक्तानि भवन्ति ॥ २२ ॥ पात्राणि भवन्ति पात्रेषु ह्यशनमश्यते यवमयानि भवन्ति यवान्हि ज्ञत्नुषीर्वरुणोऽगृह्णाद्भूर्पेण जुहोति भूर्पेण ह्यशनं क्रियते पत्नी जुहोति मिथुनादेवैतद्वरुणपाशात्प्रजाः प्रमुञ्चति ॥ २३ ॥ पुरा यज्ञात्पुराकृतिभ्यो जुहोति । अकृतादो वै विशो विशो वै मरुतो यत्र वै प्रजापतेः प्रजा वरुणगृहीताः परिदीर्णा अनत्यश्च प्राणत्यश्च शिश्यिरे च निषेदुश्च तद्वासां मरुतः पाप्मानं विमेथिरे तथोऽएवैतस्य प्रजानां मरुतः पाप्मानं विमथ्नते तस्मात्पुरा यज्ञात्पुराकृतिभ्यो जुहोति ॥ २४ ॥ स वै दक्षिणोऽग्नौ जुहोति । यद्ग्रामे यदरण्यऽइति ग्रामे वा ह्यरण्ये वैनः क्रियते यत्सभायां यदिन्द्रियऽइति यत्सभायामिति यन्मानुषऽइति तदाह यदिन्द्रियऽइति यद्देवत्रेति तदाह यदेनश्चकृमा वयमिदं तद्वयन्नामहे स्वाहेति यत्किं च वयमेनश्चकृमेदं वयं तस्मात्सर्वस्मात्प्रमुच्यामहऽइत्येवैतदाह ॥ २५ ॥ अथैन्द्रीं मरुत्वतीं जपति । यत्र वै प्रजापतेः प्रजानां मरुतः पाप्मानं विमेथिरे तद्विद्वां चक्रऽइमे ह मे प्रजा न विमथ्नीरन्निति ॥ २६ ॥ स एतामैन्द्रीं मरुत्वतीमजपत् । क्षत्रं वाऽइन्द्रो विशो मरुतः क्षत्रं वै विशो निषेद्धा निषेद्धा असन्निति तस्मादैन्द्री ॥ २७ ॥ मो षू णः । इन्द्रात्र पृत्सु देवैरस्ति हि ष्मा ते शुष्मित्रवयाः । महश्चिद्यस्य मीळुषो यव्या हविष्मतो मरुतो वन्दते गीरिति ॥ २८ ॥ अथैनां वाचयति । अक्रन्कर्म कर्मकृत इत्यक्रन्हि कर्म कर्मकृतः सह वाचा मयोभुवेति सह हि वाचाक्रन्देवेभ्यः कर्म कृतेति देवेभ्यो हि कर्म कृतवास्तं प्रेत सचाभुव इत्यन्यतो ह्योऽया सह भवन्ति तस्मादाह सचाभुव इत्यस्तं प्रेतेति ज-

घनार्धौ वाऽएष यज्ञस्य यत्पत्नी तामेतत्प्राचीं यज्ञं प्रासीषदद्दृंहा वाऽअस्तं गृहाः प्रतिष्ठा तद्दृंहेष्वेवैनामेतत्प्रतिष्ठायां प्रतिष्ठापयति ॥ २१ ॥ प्रतिपराणीयोदिति प्रतिप्रस्थाता । संमृज्यन्त्यग्निꣳ संमृष्टेऽग्नौ ताऽउभावेवोत्तरावाघारावाघार्यतोऽथाधर्युरेवाश्राव्य होतारं प्रवृणीते प्रवृतो होतोत्तरस्यै वेदेर्होतृषदनऽउपविशत्युपविश्य प्रसौति ताऽउभावेव प्रसूतौ स्रुच आदायातिक्रामतोऽतिक्रम्याश्राव्याधर्युरेवाह समिधो यजेति यज-यजेति चतुर्थे-चतुर्थे प्रयाजे समानयमानौ नवभिः प्रयाजैश्चरतः ॥ ३० ॥ अथाधर्युरेवाहाग्नेयेऽनुब्रूहीति । आग्नेयमाज्यभागं ता ऽउभावेव चतुराज्यस्यावदायातिक्रामतोऽतिक्रम्याश्राव्याधर्युरेवाहाग्निं यजेति ताऽउभावेव वषट्कृते स्रुक्तः ॥ ३१ ॥ अथाधर्युरेवाह सोमायानुब्रूहीति । सौम्यमाज्यभागं ता ऽउभावेव चतुराज्यस्यावदायातिक्रामतोऽतिक्रम्याश्राव्याधर्युरेवाह सोमं यजेति ताऽउभावेव वषट्कृते स्रुक्तः ॥ ३२ ॥ तत्र किं च वाचा कर्तव्यम् । अधर्युरेव तत्करोति न प्रतिप्रस्थाता तद्यदधर्युरेवाश्रावयतीवैव यत्र वषट्क्रियते ॥ ३३ ॥ कृतानुकर एव प्रतिप्रस्थाता । क्षत्रं वै वरुणो विशो मरुतस्तत्क्षत्रायैवैतद्विशं कृतानुकारमनुवर्त्मानं करोति प्रत्युष्यामिनीꣳ ह क्षत्राय विशं कुर्याद्यदपि प्रतिप्रस्थाताश्रावयेत्तस्मान्न प्रतिप्रस्थाताश्रावयति ॥ ३४ ॥ पाणावेव प्रतिप्रस्थाता । स्रुचौ कृत्वोपास्तेऽथाधर्युरेवैतैर्हविर्भिः प्रचरत्याग्नेयेनाष्टाकपालेन पुरोडाशेन सौम्येन चरुणा सावित्रेण द्वादशकपालेन वाष्टाकपालेन वा पुरोडाशेन सारस्वतेन चरुणा पौष्णेन चरुणैन्द्राग्नेन द्वादशकपालेन पुरोडाशेन ॥ ३५ ॥ अथैताभ्यां पयस्याभ्यां प्रचरिष्यन्तौ विपरिक्रामतः । स यो मेषो भवति मारुत्यां तं वारुण्यामवदधाति या मेषी भवति वारुण्यां तां मारुत्यामवदधाति तद्यदेवं विपरिक्रामतः क्षत्रं वै वरुणो वीर्यं पुमान्वीर्यमेवैतत्क्षत्रे धत्तोऽवीर्या वै स्त्री विशो मरुतस्तद्वीर्यामेवैतद्विशं कुरुतस्तस्मादेवं विपरिक्रामतः ॥ ३६ ॥ अथाधर्युरेवाह वरुणाया-

नुब्रूहीति । स उपस्तृणीतऽआज्यमथास्यै वारुण्यै पयस्यायै द्विरवद्यति सोऽन्यतरेणावदानेन सकृ मेषमवदधात्यथोपरिष्टादाज्यस्याभिघारयति प्रत्यनक्त्यवदानेऽअतिक्रामत्यतिक्रम्याश्राव्याह वरुणं यजेति वषट्कृते जुहोति ॥३७॥ सव्ये पाणावध्वर्युः । स्रुचौ कृत्वा दक्षिणेन प्रतिप्रस्यातुर्वा सोऽन्वारभ्याह मरुद्भ्योऽनुब्रूहीत्युपस्तृणीतऽआज्यं प्रतिप्रस्यातार्थास्यै मारुत्यै पयस्यायै द्विरवद्यति सोऽन्यतरेणावदानेन सकृ मेषीमवदधात्यथोपरिष्टादाज्यस्याभिघारयति प्रत्यनक्त्यवदानेऽअतिक्रामत्यथाध्वर्युरेवाश्राव्याह मरुतो यजेति वषट्कृते जुहोति ॥३८॥ अथाध्वर्युरेव कायेन । एककपालेन पुरोडाशेन प्रचरति कायेनैककपालेन पुरोडाशेन प्रचर्याध्वर्युरेवाहाग्नये स्विष्टकृतेऽनुब्रूहीति स सर्वेषामेव हविषामध्वर्युः सकृत्सकृदवद्यत्यथैतस्याऽएव पयस्यायै प्रतिप्रस्याता सकृदवद्यत्यथोपरिष्टाद्विराज्यस्याभिघारयत्तस्ताऽउभावेवातिक्रामतोऽतिक्रम्याश्राव्याध्वर्युरेवाहाग्निꣳ स्विष्टकृतं यजेति ताऽउभावेव वषट्कृते जुहुतः ॥३९॥ अथाध्वर्युरेव प्राशित्रमवद्यति । इडाꣳ समवदाय प्रतिप्रस्यात्रेऽतिप्रजिहीते तत्रापि प्रतिप्रस्याता मारुत्यै पयस्यायै द्विरभ्यवद्यत्यथोपरिष्टाद्विराज्यस्याभिघारयत्युपक्रम्य मार्जयन्ते ॥४०॥ अथाध्वर्युरेवाह ब्रह्मन्प्रस्थास्यामि । समिधमाधायाग्निमग्नीत्संमृड्ढीति स स्रुचोरेवाध्वर्युः पृषदाज्यं व्यानयतेऽथ यदि प्रतिप्रस्यातुः पृषदाज्यं भवति तत्स द्वेधा व्यानयतऽउतो तत्र पृषदाज्यं न भवति स यदेवोपभृत्याज्यं तत्स द्वेधा व्यानयते ताऽउभावेवातिक्रामतोऽतिक्रम्याश्राव्याध्वर्युरेवाह देवान्यजेति यज्ञ-यजेति चतुर्थे-चतुर्थेऽनुयाजे समानयमानौ नवभिरनुयाजैश्चरतस्तद्यन्नवप्रयाजं भवति नवानुयाजं तदुभयत एवैतद्वरुणपाशात्प्रजाः प्रमुञ्चतीतश्चोर्ध्वा इतश्चावाचीस्तस्मान्नवप्रयाजं भवति नवानुयाजम् ॥४१॥ ताऽउभावेव सादयित्वा स्रुचो व्यूहतः । स्रुचो व्युह्य परिधीन्त्समह्य परिधिमभिपद्याश्राव्याध्वर्युरेवाहेषिता दैव्या होतारो भद्रवाच्याय प्रेषितो मानुषः सू-

क्तवाकायेति सूक्तवाकꣳ होता प्रतिपद्यतेऽथैताऽउभावेव प्रस्तरौ समुच्छुम्पतऽउभावनुप्रहरत उभौ तूष्णीऽअपगृह्योपासाते यदा होता सूक्तवाकमाह ॥ ४२ ॥ अथाग्नीदाहानुप्रहरेति । ताऽउभावेवानुप्रहरत उभावात्मानाऽउपस्पृशेते ॥ ४३ ॥ अथाह संवदस्वेति । अगानग्नीदुगंह्यावय औषट् स्वगा देव्या होतृभ्यः स्वस्तिर्मानुषेभ्यः शं योर्ब्रूहीत्यध्वर्युरेवैतदाह ताऽउभावेव परिधीननुप्रहरत उभौ स्रुचः सम्प्रगृह्य स्फ्ये सादयतः ॥ ४४ ॥ अथाध्वर्युरेव प्रतिपरेत्य । पत्नीः संयाजयत्युपास्तऽएव प्रतिप्रस्थाता पत्नीः संयाज्योदित्यध्वर्युः ॥ ४५ ॥ त्रीणि समिष्टयजूꣳषि जुहोति । तूष्णीमेव प्रतिप्रस्थाता स्रुचं प्रगृह्णाति तस्ये वैश्वदेवेन यजमानयोर्वाससी परिहिते स्यातां तिऽएवात्रापि स्यातामथास्यै वारुण्यै पयस्यायै क्षामकर्षमिश्रमादायावभृथं यन्ति वरुणं वाऽएतन्निर्वरुणातायै तत्र न साम गीयते न क्वत्र साम्ना किं चन क्रियते तूष्णीमेवेत्याभ्यवेत्योपमार्ष्टि ॥ ४६ ॥ अवभृथ निचुम्पुण । निचेरुरसि निचुम्पुणः । अव देवैर्देवकृतमेनोऽयासिषमव मर्त्यैर्मर्त्यकृतं पुरुराव्णो देव रिषस्पाहीति कामꣳ हरते यस्मै कामयेत तस्मै दद्यान्न हि दीक्षितवसने भवतः स यथाहिस्त्वचो निर्मुच्येतैवꣳ सर्वस्मात्पाप्मनो निर्मुच्यते ॥ ४७ ॥ अथ केशश्मश्रूणि । समारोक्याग्नीऽउदवसायैव क्षेतेन यजते न हि तदवकल्पते यदुत्तरवेदावग्निहोत्रं जुह्वुयात्तस्मादुदवस्यति गृहानित्वा निर्मथ्याग्नी पौर्णमास्यिन यजत ऽउत्सन्नयज्ञ-इव वाऽएष यच्चातुर्मास्यान्यथैष क्लृप्तः प्रतिष्ठितो यज्ञो यत्पौर्णमासं तत्क्लृप्तेनैवैतद्यज्ञेनात्मतः प्रतितिष्ठति तस्मादुदवस्यति ॥ ४८ ॥ ब्राह्मणम् ॥ ३ [५. २.] ॥ ॥

वरुणप्रघासैर्वै प्रजापतिः । प्रजा वरुणपाशात्प्रामुञ्चत्ता स्यानमीवा अकिल्विषाः प्रजाः प्राजायन्ताथैतैः साकमेधैरेतैर्वै देवा वृत्रमघ्नन्नेतैर्वैव व्यजयन्त येयमेषां विजितिस्तां तथोऽएवैष एतैः पाप्मानं द्विषन्तं भ्रातृव्यꣳ हन्ति तथोऽएव

विन्नयते तस्माद्वाऽएष एतैश्चतुर्थे मासि यजते स वै द्यक्तमनूचीनाकं यजते ॥१॥ स पूर्वेद्युः । अग्नयेऽनीकवतेऽष्टाकपालं पुरोडाशं निर्वपत्यग्निꣳ ह वै देवा अनीकं कृत्वोपप्रियुर्वृत्रꣳ हनिष्यन्तः स तेजोऽग्निर्नाव्यथत तथोऽएवैष एतत्पाप्मानं द्विषन्तं भ्रातृव्यꣳ हनिष्यन्नग्निमेवानीकं कृत्वोपैति स तेजोऽग्निर्न व्यथते तस्माद्-अग्नयेऽनीकवते ॥२॥ अथ मरुद्भ्यः सांतपनेभ्यः । मध्यन्दिने चरुं निर्वपति मरुतो ह वै सांतपना मध्यन्दिने वृत्रꣳ संतेपुः स संतप्तोऽनन्नेव प्राणान्परिदीर्णः शिश्ये तथोऽएवैतस्य पाप्मानं द्विषन्तं भ्रातृव्यं मरुतः सांतपनाः संतपन्ति तस्मान्मरुद्भ्यः सांतपनेभ्यः ॥३॥ अथ मरुद्भ्यो गृहमेधिभ्यः । शाखया वत्सानपाकृत्य पवित्रवति संदोह्य तं चरुꣳ श्रपयति चरुरु ह्येव स यत्र ह्र च तण्डुलानावपन्ति तन्मेधो देवा दधिरे प्रातर्वृत्रꣳ हनिष्यन्तस्तथोऽएवैष एतत्पाप्मानं द्विषन्तं भ्रातृव्यꣳ हनिष्यन्मेधो धत्ते तद्यत्क्षीरौदनो भवति मेधो वै पयो मेधस्तण्डुलास्तमुभयं मेधमात्मन्धत्ते तस्मात्क्षीरौदनो भवति ॥४॥ तस्यावृत् । सैव स्तीर्णा वेदिर्भवति या मरुद्भ्यः सांतपनेभ्यस्तस्यामेव स्तीर्णायां वेदौ परिधींश्च शकलांश्चोपनिदधति तथा संदोह्य चरुꣳ श्रपयति श्रपयित्वाभिघार्योद्वासयति ॥५॥ अथ द्वे पिशीले वा पात्र्यौ वा निर्णेनिज्ञति । तयोरेनं द्वेधोद्यन्ति तयोर्मध्ये सर्पिरासेचने कृत्वा सर्पिरासिञ्चति स्रुवं च स्रुचं च संमार्ष्ट्यथैताऽओदनावादायोदेति स्रुवं च स्रुचं चादायोदेति स इमामेव स्तीर्णां वेदिमभिमृश्य परिधीन्परिधाय यावतः शकलान्कामयते तावतोऽभ्यादधात्यथैताऽओदनावासादयति स्रुवं च स्रुचं चासादयत्युपविशति होता होतृषदने स्रुवं च स्रुचं चाददान आह ॥६॥ अग्नयेऽनुब्रूहीति । आग्नेयमाज्यभागꣳ स दक्षिणास्यौदनस्य सर्पिरासेचनाच्चतुराज्यस्यावदायातिक्रामत्यतिक्रम्याश्राव्याहाग्निं यजेति वषट्कृते जुहोति ॥७॥ अथाह सोमायानुब्रूहीति । सौम्यमाज्यभागꣳ स उत्तरस्यौदनस्य सर्पिरासेचनाच्चतुराज्यस्यावदायातिक्रामत्यति-

क्रम्याश्रावयाह सोमं यजेति वषट्कृते जुहोति ॥ ८ ॥ अथाह मरुद्भ्यो गृहमेधिभ्यो ऽनुब्रूहीति । स दक्षिणस्यौदनस्य सर्पिरासेचनात्तत आज्यमुपस्तृणीते तस्य द्विरवद्यत्यथोपरिष्टादाज्यस्याभिघारयत्यतिक्रामत्यतिक्रम्याश्रावयाह मरुतो गृहमेधिनो यजेति वषट्कृते जुहोति ॥ ५ ॥ अथाहाग्नये स्विष्टकृतेऽनुब्रूहीति । स उत्तरस्यौदनस्य सर्पिरासेचनात्तत आज्यमुपस्तृणीते तस्य द्विरवद्यत्यथोपरिष्टादाज्यस्याभिघारयत्यतिक्रामत्यतिक्रम्याश्रावयाहाग्निꣳ स्विष्टकृतं यजेति वषट्कृते जुहोत्यथेडामेवावद्यति न प्राशित्रमुपदधाति मार्जयन्तऽएतन्नैकमयनम् ॥ १० ॥ अथेदं द्वितीयꣳ । सैव स्तीर्णा वेदिर्भवति या मरुद्भ्यः सांतपनेभ्यस्तस्यामेव स्तीर्णायां वेदौ परिधींश्च शकलांश्चोपनिदधति तथा संदोह्य चरुꣳ श्रपयति नेदेव प्रतिविशमाज्यमधिश्रयति श्रपयित्वाभिघार्योद्वास्यानक्ति स्थाल्यामाज्यमुद्वासयति स्रुवं च स्रुचं च समार्ष्ट्यथैतꣳ सोखमेव चरुमादायोदेति स्थाल्यामाज्यमादायोदेति स्रुवं च स्रुचं चादायोदेति स इमामेव स्तीर्णां वेदिमभिमृश्य परिधीन्परिधाय यावतः शकलान्कामयते तावतोऽभ्यादधात्यथैतꣳ सोखमेव चरुमासादयति स्थाल्यामाज्यमासादयति स्रुवं च स्रुचं चासादयत्युपविशति होता होतृषदने स्रुवं च स्रुचं चादद्दान आह ॥ ११ ॥ अग्नयेऽनुब्रूहीति । आग्नेयमाज्यभागꣳ स स्थाल्यै चतुराज्यस्यावदायातिक्रामत्यतिक्रम्याश्रावयाहाग्निं यजेति वषट्कृते जुहोति ॥ १२ ॥ अथाह सोमायानुब्रूहीति । सौम्यमाज्यभागꣳ स स्थाल्याऽएव चतुराज्यस्यावदायातिक्रामत्यतिक्रम्याश्रावयाह सोमं यजेति वषट्कृते जुहोति ॥ १३ ॥ अथाह मरुद्भ्यो गृहमेधिभ्योऽनुब्रूहीति । स उपस्तृणीतऽआज्यमथास्य चरोर्द्विरवद्यत्यथोपरिष्टादाज्यस्याभिघारयति प्रत्यनक्त्यवदानेऽअतिक्रामत्यतिक्रम्याश्रावयाह मरुतो गृहमेधिनो यजेति वषट्कृते जुहोति ॥ १४ ॥ अथाहाग्नये स्विष्टकृतेऽनुब्रूहीति । स उपस्तृणीतऽआज्यमथास्य चरोः सकृदवद्यत्यथोपरिष्टाद्द्विराज्यस्याभिघारयति न प्रत्यन-

क्यवदानमतिक्रामत्यतिक्रम्याऽऽव्याहाग्निꣳ स्विष्टकृतं यजेति वषट्कृते जुहोति ॥ १५ ॥ अथेडामेवावद्यति न प्राशित्रम् । उपक्रम्य प्राश्नन्ति यावन्तो गृह्या ऋविरुच्छिष्टाशाः स्युस्तावन्तः प्राश्नीयुरथोऽअप्यृविजः प्राश्नीयुरथोऽअप्यन्ये ब्राह्मणाः प्राश्नीयुर्यदि बकुरोदन स्यादथैतामनिरशितां कुम्भीमपिधाय निदधति पूर्णादर्वाय मातृभिर्वत्सान्त्समवाजन्ति तद्ध पशवो मेधमात्मन्दधते यवाग्वैताꣳ रात्रिमग्निकोत्र जुहोति निवान्यां प्रातर्हुत्वन्ति पितृयज्ञाय ॥ १६ ॥ अथ प्रातर्हुते वाहुते वा । यतरथा कामयेत सोऽस्याऽअनिरशितायै कुम्भ्यै दर्व्योपहत्य पूर्णा दर्वि परापत सुपूर्णा पुनरापत । वसेव विक्रीणावहाऽइषमूर्जꣳ शतक्रतविति यथा पुरोऽनुवाक्यैवमेवैतयैवैनमेतस्मै भागाय हवयति ॥ १७ ॥ अथर्षभमाह्वयितवै ब्रूयात् । स यदि रुयात्स वषट्कार इत्यु हैकऽआहुस्तस्मिन्वषट्कारे जुहुयादित्यथोऽइन्द्रमेवैतत्स्वेन रूपेण ह्वयति वृत्रस्य बधायैतद्वाऽइन्द्रस्य रूप यदृषभस्तत्स्वेनैवैनमेतद्रूपेण ह्वयति वृत्रस्य बधाय स यदि रुयादा मऽइन्द्रो यज्ञमगन्त्सेन्द्रो मे यज्ञ इति ह विद्याद्यद्यु न रुयाद्ब्राह्मण एव दक्षिणत आसीनो ब्रूयाज्जुहुधीति सैवेन्द्रो वाक् ॥ १८ ॥ स जुहोति । देहि मे ददामि ते नि मे धेहि नि ते दधे । निहारं च हरासि मे निहारं निहराणि ते स्वाहेति ॥ १९ ॥ अथ मरुद्भ्यः क्रीडिभ्यः । सप्तकपालं पुरोडाशं निर्वपति मरुतो ह वै क्रीडिनो वृत्रꣳ हनिष्यन्तमिन्द्रमागतं तमभितः परिचिक्रीडुर्महयन्तस्तथोऽएवैतं पाप्मानं द्विषन्तं भ्रातृव्यꣳ हनिष्यन्तमभितः परिक्रीडन्ते महयन्तस्तस्मान्मरुद्भ्यः क्रीडिभ्योऽथातो महाहविष एव तद्यथा महाहविषस्तथो तस्य ॥ २० ॥ ब्राह्मणम् ॥ ४ [५. ३.] ॥ चतुर्थः प्रपाठकः समाप्तः ॥ कण्डिकासंख्या १०५ ॥ ॥

महाहविषा ह वै देवा वृत्रं जघ्नुः । तेनोऽएव व्यजयन्त येयमेषां विजितिस्तां तथोऽएवैष एतेन पाप्मानं द्विषन्तं भ्रातृव्यꣳ हन्ति तथोऽएव विजयते त-

स्माद्वाऽएष एतेन यजते ॥१॥ तस्यावृत् । उपकिरत्युत्तरवेदिं गृह्णन्ति पृषदाज्यं मन्थत्यग्निं नवप्रयाजं भवति नवानुयाजं त्रीणि समिष्टयजूꣳषि भवत्यथैतान्येव पञ्च हवीꣳषि भवन्ति ॥२॥ स यदाग्नेयोऽष्टाकपालः पुरोडाशो भवति । अग्निना ह वाऽएनं तेजसाघ्नत्स तेजोऽग्निर्नाव्यथत तस्मादाग्नेयो भवति ॥३॥ अथ यत्सौम्यश्चरुर्भवति । सोमेन ह वाऽएनꣳ राज्ञाघ्नत्सोमराजान एव तस्मात्सौम्यश्चरुर्भवति ॥४॥ अथ यत्सावित्रः । द्वादशकपालो वाष्टाकपालो वा पुरोडाशो भवति सविता वै देवानां प्रसविता सवितृप्रसूता हैवैनमघ्नंस्तस्मात्सावित्रो भवति ॥५॥ अथ यत्सारस्वतश्चरुर्भवति । वाग्वै सरस्वती वागु हैवानुममाद प्रहर ऽहोति तस्मात्सारस्वतश्चरुर्भवति ॥६॥ अथ यत्पौष्णश्चरुर्भवति । इयं वै पृथिवी पूषेयꣳ हैवैनं बधाय प्रतिप्रददावनया हैवैनं प्रतिप्रत्तं ऽघ्नुस्तस्मात्पौष्णश्चरुर्भवति ॥७॥ अथैन्द्राग्नो द्वादशकपालः पुरोडाशो भवति । एतेन हैवैनमघ्नंस्तेजो वाऽअग्निरिन्द्रियं वीर्यमिन्द्र एताभ्यामेनमुभाभ्यां वीर्याभ्यामघ्नन्ब्रह्म वाऽअग्निः क्षत्रमिन्द्रस्ते ऽउभे सꣳस्य ब्रह्म च क्षत्रं च सयुजौ कृत्वा ताभ्यामेनमुभाभ्यां वीर्याभ्यामघ्नंस्तस्मादैन्द्राग्नो द्वादशकपालः पुरोडाशो भवति ॥८॥ अथ माहेन्द्रश्चरुर्भवति । इन्द्रो वाऽएष पुरा वृत्रस्य बधादथ वृत्रꣳ हत्वा यथा महाराजो विजिग्यान एवं महेन्द्रोऽभवत्तस्मान्माहेन्द्रश्चरुर्भवति महात्तमु चैवैनमेतत्खलु करोति वृत्रस्य बधाय तस्माद्वेव माहेन्द्रश्चरुर्भवति ॥९॥ अथ वैश्वकर्मणः एककपालः पुरोडाशो भवति । विश्वं वाऽएतत्कर्म कृतꣳ सर्वं जितं देवानामासीत्साकमेधैरीजानानां विजिग्यानानां विश्वमेवैतस्यैतत्कर्म कृतꣳ सर्वं जितं भवति साकमेधैरीजानस्य विजिग्यानस्य तस्माद्वैश्वकर्मणः एककपालः पुरोडाशो भवति ॥१०॥ एतेन वै देवाः । यज्ञेनेष्ट्वा येयं देवानां प्रज्ञातिर्या श्रीरेतद्बभूवुरेताꣳ ह वै प्रज्ञातिं प्रज्ञा-

यतऽएताꣳ श्रियं गच्छति य एवं विद्वानेतेन यज्ञेन यजते तस्माद्वाऽएतेन यजेत ॥ ११ ॥ ब्राह्मणम् ॥ [५. ४.] ॥ अध्यायः ॥ ५ [१४.] ॥ ॥

मक्राक्विषा ह वै देवा वृत्रं जघ्नुः । तेनोऽएव व्यजयन्त येयमेषां विजितिस्तामथ यानेवैषां तस्मिन्त्संग्रामेऽघ्नंस्तान्पितृयज्ञेन समैरयन्त पितरो वै नऽआसंस्तस्मात्पितृयज्ञो नाम ॥ १ ॥ तद्वसन्तो ग्रीष्मो वर्षाः । एते ते ये व्यजयन्त शरद्धेमन्तः शिशिरस्तऽउ ते यान्पुनः समैरयन्त ॥ २ ॥ अथ यदेष एतेन यजते । तन्नाकु न्वेवैतस्य तथा कं चन घ्नन्तीति देवा अकुर्वन्निति न्वेवैष एतत्करोति यमु चैवेभ्यो देवा भागमकल्पयंस्तमु चैवेभ्य एष एतद्भागं करोति यानु चैव देवाः समैरयन्त तानु चैवैतद्वति स्वानु चैवैतत्पितॄंश्चेयाꣳसं लोकमुपोन्नयति यदु चैवास्यात्रात्मनोऽचरणेन क्रन्यते वा मीयते वा तदु चैवास्यैतेन पुनराप्यायते तस्माद्वाऽएष एतेन यजते ॥ ३ ॥ स पितृभ्यः सोमवद्भ्यः । षट्कपाल पुरोडाश निर्वपति सोमाय वा पितृमते षड्वाऽऋतव ऋतवः पितरस्तस्मात्षट्कपालो भवति ॥ ४ ॥ अथ पितृभ्यो बर्हिषद्भ्यः । अन्वाहार्यपचने धानाः कुर्वन्ति ततोऽर्धाः पिꣳषन्त्यर्धा इत्येव धाना अपिष्टा भवन्ति ता धानाः पितृभ्यो बर्हिषद्भ्यः ॥ ५ ॥ अथ पितृभ्योऽग्निष्वात्तेभ्यः । निवान्याये दुग्धे सकृदुपमथित एकशलाकया मन्थो भवति सकृदु ह्येव पराञ्चः पितरस्तस्मात्सकृदुपमथितो भवत्येतानि ह्वीꣳषि भवन्ति ॥ ६ ॥ ॥ शतम् १३०० ॥ ॥ तथ्ये सोमेनेजानाः । ते पितरः सोमवन्तोऽथ ये दत्तेन पक्वेन लोकं जयन्ति ते पितरो बर्हिषदोऽथ ये ततो नान्यतरच्चन यानग्निरिव दक्रुत्स्वदयति ते पितरोऽग्निष्वात्ता एतऽउ ते ये पितरः ॥ ७ ॥ स जघनेन गार्हपत्यम् । प्राचीनावीती भूत्वा दक्षिणासीन एतꣳ षट्कपालं पुरोडाशं गृह्णाति स तत एवोपोत्थायोत्तरेणान्वाहार्यपचनं दक्षिणा तिष्ठन्नवक्रन्ति सकृत्फलीकरोति सकृदु ह्येव पराञ्चः पितरस्तस्मात्सकृत्फलीकरोति ॥ ८ ॥ स दक्षिणैव दृषदुपलेऽउपदधाति ।

दक्षिणार्धे गार्हपत्यस्य षट्पालान्युपदधाति तद्यदेतां दक्षिणां दिशꣳ सचन्तऽएषा हि दिक् पितॄणां तस्मादेतां दक्षिणां दिशꣳ सचते ॥९॥ अथ दक्षिणेनान्वाहार्य-पचनं । चतुःस्रक्तिं वेदिं करोत्यवान्तरदिशोऽनु स्रक्तीः करोति चतस्रो वाऽअ-वान्तरदिशोऽवान्तरदिशो वै पितरस्तस्मादवान्तरदिशोऽनु स्रक्तीः करोति ॥१०॥ तन्मध्येऽग्निꣳ समादधाति । पुरस्ताद्वै देवाः प्रत्यञ्चो मनुष्यानभ्युपावृत्तास्तस्मात्ते-भ्यः प्राङ् तिष्ठन्जक्षोति सर्वतः पितरोऽवान्तरदिशो वै पितरः सर्वत-श्चैव क्षीमा अवान्तरदिशस्तस्मान्मध्येऽग्निꣳ समादधाति ॥११॥ स तत एव प्राक् स्तम्बयजुर्हरति । स्तम्बयजुर्हवयित्येवाग्रे परिगृह्णात्ययेत्ययेति पूर्वेण परिग्रहेण परिगृह्य लिखति हरति यद्वार्य भवति स तथैवोत्तरेण परिग्रहेण परिगृह्णात्युत्तरेण परि-ग्रहेण परिगृह्य प्रतिमृज्याह प्रोक्षणीरासादयेत्यासादयन्ति प्रोक्षणीरिध्मं बर्हिरुप-सादयन्ति स्रुचः संमार्ष्टाज्येनोदेति स यज्ञोपवीती भूत्वाज्यानि गृह्णाति ॥१२॥ तदाहुः । द्विरुपभृति गृह्णीयाद्द्वौ ह्यत्रानुयाजौ भवत इति तद्दृष्टावेव कृत्व ऽपभृ-ति गृह्णीयान्नेयज्ञस्य विधाया अयानीति तस्मादृष्टावेव कृत्व ऽपभृति गृह्णीयादा-ज्यानि गृहीत्वा स पुनः प्राचीनावीती भूत्वा ॥१३॥ प्रोक्षणीरध्वर्युरादत्ते । स इ-ध्ममेवाग्रे प्रोक्षत्यथ वेदिमथास्मै बर्हिः प्रयच्छन्ति तत्पुरस्ताद्धन्त्यासादयति तत्प्रो-क्ष्योपनिनीय विस्रꣳस्य ग्रन्थिं न प्रस्तरं गृह्णाति सकृद्धि ह्येव पराञ्चः पितरस्त-स्मान्न प्रस्तरं गृह्णाति ॥१४॥ अथ संनह्यनमनुविस्रꣳस्य । अपसलवि त्रिः परि-स्तृणन्पर्येति सोऽपसलवि त्रिः परिस्तीर्य यावत्प्रस्तरभाजनं तावत्परिशिनष्ट्यथ पुनः प्रसलवि त्रिः पर्येति यत्पुनः प्रसलवि त्रिः पर्येति तद्यानेवामूꣳस्त्रयान्यित्तॄ-नन्ववागात्तेभ्य एवैतत्पुनरपोदेतीमꣳ स्वं लोकमभि तस्मात्पुनः प्रसलवि त्रिः पर्येति ॥१५॥ स दक्षिणैव परिधीन्परिदधाति । दक्षिणा प्रस्तरꣳ स्तृणाति ना-न्तर्दधाति विधृती सकृद्धि ह्येव पराञ्चः पितरस्तस्मान्नान्तर्दधाति विधृती ॥१६॥ स

तत्र स्रुक्समासादयति । अथ पूर्वामुपभृतमथ ध्रुवामथ पुरोडाशमथ धाना अथ मन्थमासाद्य हवीꣳषि संमृशति ॥ १७ ॥ ते सर्वꣳएव यज्ञोपवीतिनो भूत्वा । इत्याद्यजमानश्च ब्रह्मा च पश्चात्परीतः पुरस्तादग्नीत् ॥ १८ ॥ तेनोपाꣳशु चरन्ति । तिरꣳइव वै पितरस्तिरꣳइवैतद्यदुपाꣳशु तस्मादुपाꣳशु चरन्ति ॥ १९ ॥ परिवृते चरन्ति । तिरꣳइव वै पितरस्तिरꣳइवैतद्यत्परिवृतं तस्मात्परिवृते चरन्ति ॥ २० ॥ अथेध्ममभ्यादधदाह । अग्नये समिध्यमानायानुब्रूहीति स एकामेव होता सामिधेनीं त्रिरन्वाह सकृद्वै क्येव पराञ्चः पितरस्तस्मादेकाꣳ होता सामिधेनीं त्रिरन्वाह ॥ २१ ॥ सोऽन्वाह । उशन्तस्त्वा निधीमह्युशन्तः समिधीमहि । उशन्नुशत आवह पितॄन्हविषेऽअत्तवेऽइत्यथाग्निमावह सोममावह पितृत्सोमवत आवह पितॄन्बर्हिषद आवह पितॄनग्निष्वात्तानावह देवांꣳआज्यपांꣳआवहाग्निꣳ होत्रायावह स्वं महिमानमावहेत्यावाक्योपविशति ॥ २२ ॥ अथाश्राव्य न होतारं प्रवृणीते । पितृयज्ञो वाऽअयं नेद्धोतारं पितृषु दधानीति तस्मान्न होतारं प्रवृणीते सीद होतरित्येवाहोपविशति होता होतृषदनऽउपविश्य प्रसौति प्रसूतोऽध्वर्युः स्रुचावादाय प्रत्यङ्प्रतिक्रामत्यतिक्रम्याश्राव्याह समिधो यजेति सोऽपबर्हिषश्चतुरः प्रयाज्यान्यजति प्रजा वै बर्हिर्नेत्प्रजाः पितृषु दधानीति तस्मादपबर्हिषश्चतुरः प्रयाज्यान्यजत्यथाज्यभागाभ्यां चरत्याज्यभागाभ्यां चरित्वा ॥ २३ ॥ ते सर्वꣳएव प्राचीनावीतिनो भूत्वा । एतैर्वै हविर्भिः प्रचरिष्यन्त इत्याद्यजमानश्च ब्रह्मा च पुरस्तात्परीतः पश्चादग्नीत्तदुताश्रावयत्योꣳ३ स्वधेत्यस्तु स्वधेति प्रत्याश्रावणꣳ स्वधा नम इति वषट्कारः ॥ २४ ॥ तदु होवाचासुरिः । आश्रावयेयुरेव प्रत्याश्रावयेयुर्वषट्कुर्युर्नेद्यज्ञस्य विधाया अयामेति ॥ २५ ॥ अथाह पितृभ्यः सोमवद्भ्योऽनुब्रूहीति । सोमाय वा पितृमते स द्वे पुरोऽनुवाक्येऽअन्वाहैकया वै देवान्प्रच्यावयन्ति द्वाभ्यां पितॄत्सकृद्वै क्येव पराञ्चः पितरस्तस्माद्वे पुरोऽनुवाक्येऽअन्वाह ॥ २६ ॥ स उप-

स्तृणीतऽआज्यम् । अथास्य पुरोडाशस्यावद्यति स तेनैव सकृ धानानां तेन सकृ मन्थस्य तत्सकृद्वदधात्यथोपरिष्टाद्धिराज्यस्याभिघारयति प्रत्यनक्त्यवदानानि नातिक्रामतीत ऋवोपोत्थायाश्रावयाह पितृन्त्सोमवतो यजेति वषट्कृते जुहोति ॥२७॥ अथाह पितृभ्यो बर्हिषद्भ्योऽनुब्रूहीति । स उपस्तृणीतऽआज्यमथासां धानानामवद्यति स तेनैव सकृ मन्थस्य तेन सकृ पुरोडाशस्य तत्सकृद्वदधात्यथोपरिष्टाद्धिराज्यस्याभिघारयति प्रत्यनक्त्यवदानानि नातिक्रामतीत ऋवोपोत्थायाश्रावयाह पितृन्बर्हिषदो यजेति वषट्कृते जुहोति ॥२८॥ अथाह पितृभ्योऽग्निष्वात्तेभ्योऽनुब्रूहीति । स उपस्तृणीतऽआज्यमथास्य मन्थस्यावद्यति स तेनैव सकृ पुरोडाशस्य तेन सकृ धानानां तत्सकृद्वदधात्यथोपरिष्टाद्धिराज्यस्याभिघारयति प्रत्यनक्त्यवदानानि नातिक्रामतीत ऋवोपोत्थायाश्रावयाह पितॄनग्निष्वात्तान्यजेति वषट्कृते जुहोति ॥२९॥ अथाहाग्नये कव्यवाहनायानुब्रूहीति । तत्स्विष्टकृते हव्यवाहनो वै देवानां कव्यवाहनः पितॄणां तस्मादाहाग्नये कव्यवाहनायानुब्रूहीति ॥३०॥ स उपस्तृणीतऽआज्यम् । अथास्य पुरोडाशस्यावद्यति स तेनैव सकृ धानानां तेन सकृ मन्थस्य तत्सकृद्वदधात्यथोपरिष्टाद्धिराज्यस्याभिघारयति न प्रत्यनक्त्यवदानानि नातिक्रामतीत ऋवोपोत्थायाश्रावयाहाग्निं कव्यवाहनं यजेति वषट्कृते जुहोति ॥३१॥ स यन्नातिक्रामति । इत ऋवोपोत्थायं जुहोति सकृद्धि ह्येव पराञ्चः पितरोऽथ यत्सकृत्सकृत्सर्वेषाꣳ हविषाꣳ समवद्यति सकृद्धि ह्येव पराञ्चः पितरोऽथ यद्यतिषङ्गमवदानान्यवद्यत्यृतवो वै पितर ऋतूनेवैतद्यतिषजत्यृतूत्संदधाति तस्माद्यतिषङ्गमवदानान्यवद्यति ॥३२॥ तद्वैके । एतमेव क्रोत्रे मन्थमादधति तꣳ क्रोतोपक्रुयावैव जिघ्रति तं ब्रह्मणे प्रयच्छति तं ब्रह्मावैव जिघ्रति तमग्नीधे प्रयच्छति तमग्नीद्वैव जिघ्रत्येतन्नु वैतत्कुर्वन्ति यथा वै वेतरस्य यज्ञस्येडाप्राशित्रꣳ समवद्यन्त्येवमेवैतस्यापि समवद्येयुस्तामुपक्रुयावैव जिघ्रन्ति न प्राश्नन्ति प्रा-

शितव्यं त्रेव वयं मन्यामहऽइति ह स्माहासुरिर्यस्य कस्य चाग्नौ जुह्वतीति ॥३३॥ अथ यतरो दास्यन्भवति । यद्यध्वर्युर्वा यजमानो वा स उदपात्रमादायापसलवित्रिः परिषिञ्चन्पर्येति स यजमानस्य पितरमवनेनेजयत्यसाववनेनिन्द्वेत्यसाववनेनिन्द्वेति पितामहमसाववनेनिन्द्वेति प्रपितामहं तद्यथाशिष्यतेऽभिषिञ्चेदेवं तत् ॥३४॥ अथास्य पुरोडाशस्यावदाय । सव्ये पाणौ कुरुते धानानामवदाय सव्ये पाणौ कुरुते मन्थस्यावदाय सव्ये पाणौ कुरुते ॥३५॥ स येमामवान्तरदिशमनु स्रक्तिः । तस्यां यजमानस्य पित्रे ददात्यसावेतत्तऽइत्यथ येमामवान्तरदिशमनु स्रक्तिस्तस्यां यजमानस्य पितामहाय ददात्यसावेतत्तऽइत्यथ येमामवान्तरदिशमनु स्रक्तिस्तस्यां यजमानस्य प्रपितामहाय ददात्यसावेतत्तऽइत्यथ येमामवान्तरदिशमनु स्रक्तिस्तस्यां निमृष्टेऽत्र पितरो मादयध्वं यथाभागमावृषायधमिति यथाभागमश्नीतेत्येवैतदाह तद्यदेवं पितृभ्यो ददाति तेनो स्वान्पितॄनेतस्माद्यज्ञान्नान्तरेति ॥३६॥ ते सर्वऽएव यज्ञोपवीतिनो भूत्वा । उदञ्च उपनिष्क्रम्याहवनीयमुपतिष्ठन्ते देवान्वाऽएष उपावर्तते य आहिताग्निर्भवति यो दर्शपूर्णमासाभ्यां यजतेऽथैतत्पितृयज्ञेनेवाचारिषुस्तद्व देवेभ्यो निह्नुवते ॥३७॥ ऐन्द्रीभ्यामाहवनीयमुपतिष्ठन्ते । इन्द्रो क्याहवनीयोऽन्नन्नमीमदन्त क्यव प्रिया अधूषत । अस्तोषत स्वभानवो विप्रा नविष्ठया मती योजा न्विन्द्र ते हरी ॥ सुसंदृशं त्वा वयं मघवन्वन्दिषीमहि । प्र नूनं पूर्णबन्धुर स्तुतो यासि वशांऽअनु योजा न्विन्द्र ते हरीऽइति ॥३८॥ अथ प्रतिपरेत्य गार्हपत्यमुपतिष्ठन्ते । मनो न्वाह्वामहे नाराशꣳसेन स्तोमेन । पितॄणां च मन्मभिः ॥ आ न एतु मनः पुनः क्रत्वे दक्षाय जीवसे । ज्योक्च सूर्यं दृशे ॥ पुनर्नः पितरो मनो ददातु दैव्यो जनः । जीवं व्रातꣳ सचेमहीति पितृयज्ञेनेव वाऽएतदचारिषुस्तद्व खलु पुनर्जीवानपिपद्यन्ते तस्मादाह जीवं व्रातꣳ सचेमहीति ॥३९॥ अथ यतरो ददाति । स पुनः प्राचीनावीती भूत्वाभिप्रपद्य जपत्यमीम-

दत्त पितरो यथाभागमावृषायिषतेति यथाभागमाशिषुरित्येवैतदाह ॥ ४० ॥ अथोदपात्रमादाय । पुनः प्रसलवि त्रिः परिषिञ्चन्पर्येति स यज्ञमानस्य पितरमवनेनेक्त यत्यसाववनेनिद्धवेत्यसाववनेनिद्धवेति पितामहमसाववनेनिद्धवेति प्रपितामहं तद्यथा जानुषेऽभिषिञ्चेदेवं तत्तद्यत्पुनः प्रसलवि त्रिः परिषिञ्चन्पर्येति प्रसलवि न इदं कर्मानुसंतिष्ठताऽइति तस्मात्पुनः प्रसलवि त्रिः परिषिञ्चन्पर्येति ॥ ४१ ॥ अथ नीविमुद्गृह्य नमस्करोति । पितृदेवत्या वै नीविस्तस्मान्नीविमुद्गृह्य नमस्करोति यज्ञो वै नमो यज्ञियानेवैनानेतत्करोति षट् कृत्वो नमस्करोति षड्वाऽऋतव ऋतवः पितरस्तदृतुष्वेवैतद्यज्ञं प्रतिष्ठापयति तस्मात्षट् कृत्वो नमस्करोति गृह्णान्नः पितरो दत्तेति गृह्णाण्ठ ह्व पितर ईशतऽऋषोऽएतस्याशीः कर्मणः ॥ ४२ ॥ ते सर्वऽएव यज्ञोपवीतिनो भूत्वा । अनुयाज्ञाभ्यां प्रचरिष्यन्त इत्याद्यजमानश्च ब्रह्मा च पश्चात्परीतः पुरस्तादग्नीडुपविशति होता होतृषदने ॥ ४३ ॥ अथाह ब्रह्मन्प्रस्थास्यामि । समिधमाधायाग्निमग्नीत्संमृडीति स्रुचावादाय प्रत्यङ्प्रतिक्रामत्यतिक्रम्याश्राव्याह देवान्यजेति सोऽपबर्हिषौ द्वावनुयाजौ यजति प्रजा वै बर्हिर्नेत्प्रजाः पितृषु दधानीति तस्मादपबर्हिषौ द्वावनुयाजौ यजति ॥ ४४ ॥ अथ सादयित्वा स्रुचौ व्यूहति । स्रुचौ व्युह्य परिधीन्त्समञ्य परिधिमभिपद्याश्राव्याहेषिता दैव्या होतारो भद्रवाच्याय प्रेषितो मानुषः सूक्तवाकायेति सूक्तवाकण्ठ होता प्रतिपद्यते नाधर्युः प्रस्तरण्ठ समुच्छुम्पतीत्येवोपास्ते यदा होता सूक्तवाकमाह ॥ ४५ ॥ अथाग्नीदाहानुप्रहरेति । स न किं चनानुप्रहरति तूष्णीमेवात्मानमुपस्पृशति ॥ ४६ ॥ अथाह संवदस्वेति । अगानग्नीदगंस्त्रावय श्रौषट् स्वगा दैव्या होतृभ्यः स्वस्तिर्मानुषेभ्यः शं योर्ब्रूहीत्युपस्पृशत्येव परिधीन्नानुप्रहरत्यथैतद्बर्हिरनुसमस्यति परिधींश्च ॥ ४७ ॥ तद्वैके । हविरुच्छिष्टमनुसमस्यन्ति तदु तथा न कुर्याद्धुतोच्छिष्टं वाऽएतन्नेद्धुतोच्छिष्टमग्नौ जुहवामेति तस्मादपो वैवाभ्यवहरेयुः प्राश्नीयुर्वा ॥ ४८ ॥ ब्राह्मणम् ॥ २ [६. १.] ॥ ॥

महाहविषा ह वै देवा वृत्रं जघ्नुः । तेनोऽएव व्यजयन्त येयमेषां विजितिस्तामथ यानेवैषां तस्मिन्त्संग्रामऽइषव आर्ह्स्तानेतैरेव शल्यान्निरकृन्त तान्व्यवृक्त यत्र्यम्बकैर्यजन्त ॥ १ ॥ अथ यदेष एतैर्यजते । तन्नाकृ त्वैवैतस्य तथा कं चनेषुर्मृक्षतीति देवा अकुर्वन्निति त्वैवैष एतत्करोति याश्च त्वैवास्य प्रजा ज्ञाता याश्चाज्ञातास्ता उभयी रुद्रियात्प्रमुञ्चति ता अस्यानमीवा अकिल्विषाः प्रजाः प्रजायन्ते तस्माद्वाऽएष एतैर्यजते ॥ २ ॥ ते वै रौद्रा भवन्ति । रुद्रस्य ह्येषुस्तस्माद्रौद्रा भवन्त्येककपाला भवन्त्येकदेवत्या असन्निति तस्मादेककपाला भवन्ति ॥ ३ ॥ ते वै प्रतिपुरुषं । यावन्तो गृह्याः स्युस्तावन्त एकेनातिरिक्ता भवन्ति तत्प्रतिपुरुषमेवैतदेकैकेन या अस्य प्रजा ज्ञातास्ता रुद्रियात्प्रमुञ्चत्येकेनातिरिक्ता भवन्ति तथा एवास्य प्रजा अज्ञातास्ता रुद्रियात्प्रमुञ्चति तस्मादेकेनातिरिक्ता भवन्ति ॥ ४ ॥ स जघनेन गार्हपत्यं । यज्ञोपवीती भूत्वोदङ्मुखासीन एतान्गृह्णाति स तत एवोपोत्थायोदङ्मिष्ठन्नवकल्युदीच्यौ दृषदुपलेऽउपदधात्युत्तरार्धे गार्हपत्यस्य कपालान्युपदधाति तद्यदेव तामुत्तरां दिशꣳ सचन्तऽएषा ह्येतस्य देवस्य दिक्तस्मादेतामुत्तरां दिशꣳ सचन्ते ॥ ५ ॥ ते वा अक्ताः स्युः । अक्तꣳ हि ह्विस्तऽउ वाऽअनक्ता एव स्युरभिमानुको ह रुद्रः पशूत्स्याद्यदञ्ज्यात्तस्मादनक्ता एव स्युः ॥ ६ ॥ तात्सार्धं पात्र्याꣳ समुद्वास्य । अन्वाहार्यपचनादुल्मुकमादायोदङ् परेत्य जुहोत्येषा ह्येतस्य देवस्य दिक् पथि जुहोति पथा हि स देवश्चरति चतुष्पथे जुहोत्येतद्ध वाऽअस्य ज्ञांधितं प्रज्ञातमवसानं यच्चतुष्पथं तस्माच्चतुष्पथे जुहोति ॥ ७ ॥ पलाशस्य पलाशेन मध्यमेन जुहोति । ब्रह्म वै पलाशस्य पलाशं ब्रह्मणैवैतज्जुहोति स सर्वेषामेवावद्यत्येकस्यैव नावद्यति य एषोऽतिरिक्तो भवति ॥ ८ ॥ स जुहोति । एष ते रुद्र भागः सह स्वस्राम्बिकया तं जुषस्व स्वाहेत्यम्बिका ह वै नामास्य स्वसा तयास्यैष सह भागस्तद्यदस्यैष स्त्रिया सह भागस्तस्मात्त्र्यम्बका नाम तया अस्य

प्रजा ज्ञातास्ता रुद्रियात्प्रमुच्यति ॥ ९ ॥ अथ य एष एकोऽतिरिक्तो भवति । तमाखूत्करोऽवकिरत्येष ते रुद्र भाग आखुस्ते पशुरिति तदस्माऽआखुमिव पशूनामनुदिशति तेनोऽइतरान्पशून्न हिनस्ति तद्यदवकिरति तिर इव वै गर्भास्तिर इवैतद्यदवकीर्णं तस्माद्वाऽवकिरति तद्या एवास्य प्रजा अज्ञातास्ता रुद्रियात्प्रमुच्यति ॥ १० ॥ अथ पुनरेत्य जपति । अव रुद्रमदीमह्यव देवं त्र्यम्बकम् । यथा नो वस्यसस्करद्यथा नः श्रेयसस्करद्यथा नो व्यवसाययात् ॥ भेषजमसि भेषजं गवेऽश्वाय पुरुषाय भेषजꣳ सुखं मेषाय मेष्याऽइत्याशीरेवैषैतस्य कर्मणः ॥ ११ ॥ अथापसलवि त्रिः परियन्ति । मध्यानूनुपाघ्राना त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम् । उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतादित्याशीरेवैषैतस्य कर्मणा आशिषमेवैतदाशासते तद्धु क्षेव शमिव यो मृत्योर्मुच्यते नामृतात्तस्मादाह मृत्योर्मुक्षीय मामृतादिति ॥ १२ ॥ तद्ध स्मापि कुमार्यः परीयुः । भगस्य भजामहाऽइति या ह वै सा रुद्रस्य स्वसाम्बिका नाम सा ह वै भगस्येष्टे तस्माद्ध स्मापि कुमार्यः परीयुर्भगस्य भजामहाऽइति ॥ १३ ॥ तासामुतासां मध्येऽस्ति । त्र्यम्बकं यजामहे सुगन्धिं पतिवेदनम् । उर्वारुकमिव बन्धनादितो मुक्षीय मामुत इति सा यदित इत्याह ज्ञातिभ्यस्तदाह मामुत इति पतिभ्यस्तदाह पतयो क्षेव स्त्रियै प्रतिष्ठा तस्मादाह मामुत इति ॥ १४ ॥ अथ पुनः प्रसलवि त्रिः परियन्ति । दक्षिणानूनुपाघ्राना एतेनैव मन्त्रेण तद्यत्पुनः प्रसलवि त्रिः परियन्ति प्रसलवि न इदं कर्मानुसंतिष्ठताऽइति तस्मात्पुनः प्रसलवि त्रिः परियन्ति ॥ १५ ॥ अथैतान्यजमानोऽञ्जली समोप्य । ऊर्धानुदस्यति यथा गौर्नोदाप्नुयात्तदात्मभ्य एवैतच्छल्यान्निर्मिमते तान्विलिप्सत उपस्पृशन्ति भेषजमेवैतत्कुर्वते तस्माद्विलिप्सत उपस्पृशन्ति ॥ १६ ॥ तान्द्वयोर्मूतकयोरुपनह्य । वेणुयष्ट्यां वा कुपे वोभयत आबध्योदङ् परेत्य यदि वृक्षं वा स्थाणुं वा वेणुं वा वल्मीकं वा विन्देत्तस्मिन्नासज्जत्येतत्ते

रुद्रावसं तेन परो मूञ्जवतोऽतीक्ष्योत्यवसेन वाऽअधानं यन्ति तदेनꣳ सावसमे-वान्ववार्जति यत्र-यत्रास्य चरणं तदन्वत्र ह्व वाऽअस्य परो मूञ्जवद्धश्चरणं तस्मा-दाह परो मूञ्जवतोऽतीक्ष्योत्यवततधन्वा पिनाकावस इत्यक्षिꣳसन्नः शिवोऽतीक्ष्णो-त्येवैतदाह कृत्तिवासा इति निष्ठापयत्येवैनमेतत्स्वपन्तु हि न कं चन क्षिनस्ति तस्मादाह कृत्तिवासा इति ॥१७॥ अथ दक्षिणान्बाह्वनन्वावर्तन्ते । ते प्रतीक्षं पुनरायन्ति पुनरेत्याप उपस्पृशन्ति रुद्रियेणैव वाऽएतद्चारिषुः शान्तिरापस्तद्रुद्रः शान्त्या शमयन्ते ॥१८॥ अथ केशश्मश्रूणि । समारोक्याग्नाऽउदवसायैव क्षेत्तेन यजते न हि तदवकल्पते यदुत्तरवेदावग्निहोत्रं जुह्वुयात्तस्मादुदवस्यति गृहानित्वा निर्मथ्याग्नौ पौर्णमासेन यजतऽउत्सन्नयज्ञ-इव वाऽएष यच्चातुर्मास्यान्यथैष क्लृप्तः प्रतिष्ठितो यज्ञो यत्पौर्णमासं तत्क्लृप्तेनैवैतद्यज्ञेनाक्षतः प्रतितिष्ठति तस्मादुदवस्य-ति ॥१९॥ ब्राह्मणम् ॥३ [६. २.] ॥ ॥

अक्षय्यꣳ ह्व वै सुकृतं चातुर्मास्ययाजिनो भवति । संवत्सरꣳ हि क्षयति ते-नास्याक्षय्यं भवति तं वै त्रेधा विभज्य यजति त्रेधा विभज्य प्रक्षयति सर्वं वै सं-वत्सरः सर्वं वाऽअक्षय्यमेतेनो ह्यस्याक्षय्यꣳ सुकृतं भवत्यृतुरु ह्वैवैतद्भूत्वा देवान-प्येत्यक्षय्यमु वै देवानामेतेनो ह्वैवास्याक्षय्यꣳ सुकृतं भवत्येतन्तु तद्यस्माच्चातुर्मा-स्यैर्यजते ॥१॥ अथ यस्माकुनासीर्येण यजेत । या वै देवानाꣳ श्रीरासीत्साकमेधै-रीक्षानानां विक्रिग्यानानां तकुनमथ यः संवत्सरस्य प्रक्षितस्य रस आसीत्तत्सीरꣳ सा या चैव देवानाꣳ श्रीरासीत्साकमेधैरीक्षानानां विक्रिग्यानानां य उ च संव-त्सरस्य प्रक्षितस्य रस आसीत्तमेवैतदुभयं परिगृह्यात्मन्कुरुते तस्माकुनासीर्येण य-जते ॥२॥ तस्यावृत् । नोपकिरत्युत्तरवेदिं न गृह्णन्ति पृषदाज्यं न मन्थत्यग्निं पञ्च प्रयाजा भवन्ति त्रयोऽनुयाजा एकꣳ समिष्टयजुः ॥३॥ अथैतान्येव पञ्च ह्व-वीꣳषि भवन्ति । एतैर्वै ह्विर्भिः प्रजापतिः प्रजा असृजतैतैरुभयतो वरुणपाशा-

त्प्रजाः प्रामुञ्चदेतैर्वै देवा वृत्रमघ्नन्नेतैर्वेव व्यजयन्त येयमेषां विज्ञितिस्तां तथोऽए-वैष एतैर्या चैव देवानाꣳ श्रीरासीत्साकमेधैरीजानानां विजिग्यानानां य ऽ च संवत्सरस्य प्रजितस्य रस आसीत्तमेवैतदुभयं परिगृह्यात्मन्कुरुते तस्माद्वाऽएतानि पञ्च हवीꣳषि भवन्ति ॥४॥ अथ शुनासीर्यो द्वादशकपालः पुरोडाशो भवति । स बन्धुः शुनासीर्यस्य यं पूर्वमवोचाम ॥५॥ अथ वायव्यं पयो भवति । पयो ह वै प्रजा ज्ञाता अभिसंज्ञानते विजिग्यानं मा प्रजाः श्रियै यशसेऽन्नाद्यायाभिसंज्ञानात्ताऽइति तस्मात्पयो भवति ॥६॥ तद्वायव्यं भवति । अयं वै वायुर्योऽयं पवतऽएष वाऽइदꣳ सर्वं प्रप्याययति यदिदं किं च वर्षति वृष्टादोषधयो जायन्त ऽओषधीर्जग्धापः पीत्वा तत एतद्भ्योऽधि पयः सम्भवत्येष हि वाऽएतज्जनयति तस्माद्वायव्यं भवति ॥७॥ अथ सौर्य एककपालः पुरोडाशो भवति । एष वै सूर्यो य एष तपत्येष वाऽइदꣳ सर्वमभिगोपायति साधुना वदसाधुना वदेष इदꣳ सर्वं विदधाति साधौ वदसाधौ वदेष मा विजिग्यानं प्रीतः साधुना वदभिगोपायत्साधौ वद्विदधदिति तस्मात्सौर्य एककपालः पुरोडाशो भवति ॥८॥ तस्याश्वः श्वेतो दक्षिणा । तदेतस्य रूपं क्रियते य एष तपति यद्यश्वꣳ श्वेतं न विन्देदपि गौरेव श्वेतः स्यात्तदेतस्य रूपं क्रियते य एष तपति ॥९॥ स यत्रैव साकमेधैर्यजते । तत्रैव शुनासीर्येण यजेत यद्वै त्रिः संवत्सरस्य यजते तेनैव संवत्सरमाप्नोति तस्माद्यदैव कदा चैतेन यजेत ॥१०॥ तद्वैके । रात्रीरापिपयिषन्ति स यदि रात्रीरापिपयिषेद्यददः पुरस्तात्फाल्गुन्यै पौर्णमास्याऽउदूढं तच्छुनासीर्येण यजेत ॥११॥ अथ दीक्षेत । तं नानीजानं पुनः फाल्गुनी पौर्णमास्यभिपर्येयात्पुनःप्रयोगरूप-इव ह स यदेनमनीजानं पुनः फाल्गुनी पौर्णमास्यभिपर्येयात्तस्मादेनं नानीजानं पुनः फाल्गुनी पौर्णमास्यभिपर्येयादिति नूत्सृजमानस्य ॥१२॥ अथ पुनः प्रयुञ्जानस्य । पूर्वेद्युः फाल्गुन्यै पौर्णमास्यै शुनासीर्येण यजेताथ प्रातर्वैश्वदेवेनाथ पौर्णमासेनैतꣳ पुनः प्र-

युञ्जानस्य ॥ १३ ॥ अथातः । परिवर्तनस्यैव सर्वतोमुखो वाऽअसावादित्य एष वा ऽइदꣳ सर्वं निर्धयति यदिदं किं च मुष्यति तेनैष सर्वतोमुखस्तेनान्नादः ॥ १४ ॥ सर्वतोमुखोऽयमग्निः । यतो ह्येव कुतश्चाग्नावभ्यादधति तत एव प्रदहति तेनैष सर्वतोमुखस्तेनान्नादः ॥ १५ ॥ अथायमन्यतोमुखः पुरुषः । स एतत्सर्वतोमुखो भवति यत्परिवर्तयते स एवमेवान्नादो भवति यथैतावेतच्च एवं विद्वान्परिवर्तयते तस्माद्वै परिवर्तयेत ॥ १६ ॥ तदु होवाचासुरिः । किं नु तत्र मुखस्य यदपि सर्वाण्येव लोमानि वपेत यद्वै त्रिः संवत्सरस्य यजते तेनैव सर्वतोमुखस्तेनान्नादस्तस्मान्नाद्रियेत परिवर्तयितुमिति ॥ १७ ॥ ब्राह्मणम् ॥ ४ [६. ३.] ॥ ॥

तच्चदाहुः । साकमेधैर्वै देवा वृत्रमघ्नꣳस्तैर्वैव व्यजयन्त यथमेषां विजितिस्तामिति सर्वैर्ह त्वेव देवाश्चातुर्मास्यैर्वृत्रमघ्नत्सर्वैर्वैव व्यजयन्त यथमेषां विजितिस्ताम् ॥ १ ॥ ते होचुः । केन राज्ञा केनानीकेन योत्स्याम इति स होचुरुवाच मया राज्ञा मयानीकेनेति तेऽग्निना राज्ञाग्निनानीकेन चतुरो मासः प्राजयंस्तान्ब्रह्मणा च त्रय्या च विद्यया पर्यगृह्णन् ॥ २ ॥ ते होचुः । केनैव राज्ञा केनानीकेन योत्स्याम इति स ह वरुण उवाच मया राज्ञा मयानीकेनेति ते वरुणेनैव राज्ञा वरुणेनानीकेनापरांश्चतुरो मासः प्राजयंस्तान्ब्रह्मणा चैव त्रय्या च विद्यया पर्यगृह्णन् ॥ ३ ॥ ते होचुः । केनैव राज्ञा केनानीकेन योत्स्याम इति स होन्द्र उवाच मया राज्ञा मयानीकेनेति तऽइन्द्रेणैव राज्ञेन्द्रेणानीकेनापरांश्चतुरो मासः प्राजयंस्तान्ब्रह्मणा चैव त्रय्या च विद्यया पर्यगृह्णन् ॥ ४ ॥ स यद्वैश्वदेवेन यजते । अग्निनैवैतद्राज्ञाग्निनानीकेन चतुरो मासः प्रजयति तच्छ्येनी शललो भवति लोकꣳ हुरः सा या श्येनी शललो सा त्रय्यै विद्यायै रूपं लोकꣳ हुरो ब्रह्मणो रूपमग्निर्हि ब्रह्म लोहित इव ह्यग्निस्तस्माल्लोकꣳ हुरो भवति तेन परिवर्तयते तद्ब्रह्मणा चैवैनमेतत्त्रय्या च विद्यया परिगृह्णाति ॥ ५ ॥ अथ यद्वरुणप्रघासैर्यजते । वरुणेनैवैतद्रा-

ज्ञा वरुणेनानीकेनापरांश्चतुरो मासः प्रज्ञयति तत्त्वेनी शललो भवति लोकः नुरस्तेन परिवर्तयते तद्ब्रह्मणा चैवैनमेतत्त्वष्ट्या च विष्ण्या परिगृह्णाति ॥६॥ अथ यत्साकमेधैर्यजते । इन्द्रेणैवैतद्राज्ञेन्द्रेणानीकेनापरांश्चतुरो मासः प्रज्ञयति तत्त्वेनी शललो भवति लोकः नुरस्तेन परिवर्तयते तद्ब्रह्मणा चैवैनमेतत्त्वष्ट्या च विष्ण्या परिगृह्णाति ॥७॥ स यद्वैश्वदेवेन यजते । अग्निरेव तर्हि भवत्यग्नेरेव सायुज्यꣳ सलोकतां जयत्यथ यद्वरुणप्रघासैर्यजते वरुण एव तर्हि भवति वरुणस्यैव सायुज्यꣳ सलोकतां जयत्यथ यत्साकमेधैर्यजतऽइन्द्र एव तर्हि भवतीन्द्रस्यैव सायुज्यꣳ सलोकतां जयति ॥८॥ स यस्मिन्हऽर्तावमुं लोकमेति । स एनमृतुः परस्माऽऋतवे प्रयच्छति पर उ परस्माऽऋतवे प्रयच्छति स परमेव स्थानं परमां गतिं गच्छति चातुर्मास्ययाज्ञो तदाहुर्न चातुर्मास्ययाज्ञिन्मनुविन्दन्ति परमꣳ क्वैव खलु स स्थानं परमां गतिं गच्छतीति ॥९॥ ब्राह्मणम् ॥५[६.४.]॥ पञ्चमः प्रपाठकः ॥ कण्डिकासंख्या १०४ ॥ षष्ठोऽध्यायः [१५.] ॥ अस्मिन्काण्डे कण्डिकासंख्या ५४९ ॥ ॥

इति माध्यन्दिनीये शतपथब्राह्मणे एकपादिकानाम द्वितीयं काण्डं समाप्तम् ॥२॥

EXTRACTS MADE FROM THE COMMENTARY OF SÂYAṆÂCÂRYA.

आद्ये काण्डे प्रपञ्चेन पौर्णमासेष्टिरीरिता । सा सम्पूर्णोपदेशत्वादन्यासां प्रकृतिर्मता ॥ पवमानेष्ट्यादिकानां द्वितीये वह्निसिद्धये । आधानं पवमानेष्टिरग्निहोत्रमुपस्थितिः । चातुर्मास्यादिकः सर्वो ह्विर्यज्ञोऽत्र वर्ण्यते ॥ तत्र तावत्सर्वेष्टिप्रकृतित्वेन प्राक् प्रतिपादिताया दर्शपूर्णमासेष्टेर्विधास्यमानानामग्निहोत्रादिकर्मणां च त्रेताग्निसाध्यत्वात्तदुचितभूतमाधानं प्रतिपाद्यते । तत्र चोदकहिरण्यादिसम्भाराणां पञ्चानां सम्भरणं विधित्सुः सम्भारनामनिर्वचनं करोति स यद्वाऽइति । यस्मिन्यस्मिन्पदार्थेऽग्नेः सम्बन्धि तेजो न्यक्तं निलीनं भवति तस्मात्सर्वस्मादपि सम्भरणं कार्यमित्यर्थः ॥१॥ यस्मादाग्नेयं हिरण्यं तस्मादेनेन दत्तात्र (?? तस्माद्दैनं न दत्ता दत्तां Cod.) धावयेत् तथा यदन्यत्किमपि याल्यिहीतं (?) कर्म तदपि तेन न कुर्यात् ॥५॥ ऊषरमिति ऊषसुषिमुष्कमधो र इति [पा° ५. २. १०७.] मत्वर्थीयो रः । अमुतोऽमुष्मादू-

युलोकात् ॥६॥ आखुभिः खननेन विलाद्बहिर्नीताः पांसव आखुकरोषम्। पुरीषकरीषशब्दावत्र समानार्थावित्यर्थः अतः करीषसम्बन्धाद्ग्निः श्रियं प्राप्नोति ॥७॥ मृन्मिश्रिताः सूक्ष्मपाषाणाः शर्कराः। अश्नेलायत् चाश्वत्थ्यं प्राप्नोति ॥८॥ निर्भक्त्यामो निर्भक्तान्भागरहितान्कुर्याम ॥९॥ एवमिमां पृथिवीं शर्कराभिः पर्यबृंहन्त एवं परितः शर्कारास्थापनेन दृढीकृतवन्तः ॥१०॥ तर्हि तथा सत्यृतुषट्के मिथुनत्रयसम्पत्तिः पञ्चके तु तन्मिथुनत्रयमेकेन न्यूनं भवति तच्चाप्रजननसाधनम् अत्र लोकप्रसिद्धिमाह न्यूनादिति स्त्रीपुंसयोर्वीर्यस्य परस्परनृत्वे (?) सति तस्मान्न्यूनान्मिथुनात्स्त्रीपुंसलक्षणान्यपत्यानि ज्ञायन्ते यस्मादेवं लोके तस्मात्पञ्चसम्भारसम्भरणेन यन्मिथुनस्य न्यूनत्वं तद्भूःश्रेयसं श्वः परादिवसे (°स Cod.) श्रेयसो ज्ञानकम् श्वसोऽवसीयःश्रेयस इति [पा° ५. ४. ८०.] अच् समासान्तः तथा उत्तरावत् उत्तरा आगामिन्यभिवृद्धिः (आगामिनाभि° Cod.) तयोपेतमित्यर्थः। एवमृतूनां षट्केऽपि सम्भाराणां पञ्चसंख्याकत्वमुपपाद्याथापि न्यूनत्वं नाम कश्चिन्मन्येतेत्याशङ्क्य (? कश्चिसषे इति त्याश° Cod.) परिहरति यदिति षट्ऋतुत्वं संवत्सरस्य संख्यास्ति तर्ह्येतेषां (? °ख्याचितत्वेमेतषां Cod.) सम्भाराणामाधीयमानोऽग्निरेव षष्ठः षट्संख्यापूरकः ॥१३॥१॥१॥

कर्मणः कालसापेक्षत्वादाधानस्य नक्षत्राणि (°क्षत्रांव Cod.) विधत्ते। अग्नो गार्हपत्याहवनीयौ। सलोम सदृशं योग्यम् ॥१॥ कृत्तिकास्तु षट्संख्याकाधिष्ठानयोगात् भूयिष्ठा बभ्रुतराः ॥३॥ पुर ऋक्षा (पुरर्क्षा Cod.) इति प्रकृतिभावो ह्रस्वश्च। व्यार्ध्यन्त विगतऋद्धिका अभवन्। व्यृद्धिमिव देशभेदोदयेन स्पष्टयति अग्नो होति अग्नो खलु सप्तऋर्षयः उत्तराहि दूरदेशे उत्तरदिग्भागे उद्यन्ति एतास्तु कृत्तिकाः पुरः पूर्वस्यां दिशि अत एवातीवसम्भिन्नदेशावस्थानेन पुरुषसम्भोगविरहान्मिथुनव्यृद्धिः तच्चासमीचीनमित्याह अश्नमिव वै तदिति ॥४॥ उपस्तब्धाः प्रतिबद्धज्ञातयो (°द्धवा° Cod.) विनाशरहिताः पुत्रपौत्रादिरूपेणैकरूपाः अविच्छिन्नप्रवाहाः तस्थुः स्थितवन्तः ताश्च रोहिण्यः स्वर्गादिलोकारोहणसाधना इति स्थिताः ॥६॥ पुरा खलु प्रजापतिः कृष्णमृगरूपमास्थाय मृगीभूतां (ताम्य Cod.) स्वदुहितरमेवोपागमत् (? °रामाबापगमत् Cod.) एतद्वाऽइति एतद्ज्ञात्वा प्रजापतेरकार्यकारिणः शिरश्छेत्तुं देवाः कंचित्क्रोधमयं पुरुषं निर्माय प्रत्यतिष्ठिपन् स चेषुणा तस्य शिरश्चिक्षेद गवशेने (?) इषु[:] शिरश्चेत्येतदुभयमन्तरिक्षमुत्पुत्य नक्षत्रात्मनावस्थितं संदृश्यते (सदृ° Cod.) तथा चैतरेयके [३. ३३.] प्रजापतिर्ह वै स्वां दुहितरमभिदध्यौ (मभ्यिधौ Cod.) इत्युपक्रम्य सोऽएवेषुस्त्रिकाण्डेत्यन्तेनायमर्थः (सोपनोविषु त्रि° Cod.) प्रतिपादितः ईदृशी श्रुत्यन्तरप्रसिद्धिरत्र वैशब्देन द्योत्यते ॥८॥ यस्मिन्समये एनं प्रजापतिं कृष्णमृगरूपं तत्तेन स्वदुहितृगमनरूपेण दोषेण हेतुना देवा अविध्यन् तत्तदानीं पत्रदारुशल्परूपावयवत्रयोपेतेनेषुणा खलु तच्छिरश्छित्त्रमित्याङ्गर्ब्रह्मवादिनः (? तस्थिरः शिशिक्नत्ति निस्पात्याङ्ग° Cod.) स च प्रजापतिस्तदानीमेतच्छरीरं त्यक्तवान्। वास्तु शून्यस्थानम् शरीरं विशारणशालम् ॥१॥ अर्जुन इति हीन्द्रस्य रहस्यं नाम अत एव खलु तत्पुत्रे पाण्डवमध्यमे प्रवृत्तिः। पुरस्तात्क्रतुरिति पूर्वस्मिन्नागामिनि काले (स्मिन्नोगामितिनि कालि Cod.) अग्निष्टोमादिलक्षणः क्रतुः शीघ्रं सिध्यतीत्यर्थः ॥११॥ अनुष्ठ्या अनुष्ठानेन समीचीनम् ॥१२॥ आरुरुक्षां चक्रुरिति आरोढुमिच्छां कृतवन्त इत्यर्थः। अमुमित्यदस्शब्देन पारोक्ष्येण यो लोको निर्दिष्टस्तं विशिनष्टि दिवमेवेति। ततो

ऽनन्तरमसुराः रौहिणमित्येतन्नामकं रोहणस्य साधनमग्निं चिक्ये व्यत्ययेनैकवचनं चिक्यिरे चितवन्तः ॥१३॥ स इन्द्रो ब्राह्मणो भूत्वा (!) असुरहितं ब्रुवाण एव (!) एकामिष्टकां प्रवध्य गृहीत्वा ॥१४॥ आववर्ह उद्ययाम तस्मात्स्थानादचालयत् वृङ्क उद्यमने । सोऽग्निर्व्यवत्ससाद (!) विशीर्णो बभूव । व्यवसेदुः (!) व्यावत्सन्ना (!) शिथिला बभूवुः ॥१६॥ (उपेर्त्सेत्) स्वीकुर्यात् ॥१७॥ तस्मादेव कारणात्सूर्यात्मकऽएव तेजस्विनि नक्षत्रे आधानं स्यात् । अनपराद्धं तेजोवियोगलक्षणापराधरहितम् ॥१९॥२॥१॥

अथाधानस्य वसन्ताद्यृतुविध्यर्थं (°न्ताव्वृ° Cod.) ऋत्वादीनां देवपित्रात्मना द्वेधा विभागमाह वसन्त इति ॥१॥ य एवमृतूनां देवत्वं पितृत्वं च विद्वांस्तानृतून् देवाः पितर इति ह्वयति व्यवहरेत् अस्याह्वातुः देवह्वयं देवाह्वानं प्रति देवा आगच्छन्ति आगताश्च ते स्वसम्बन्धे कर्मणि एनमवन्ति ॥२॥ स सूर्यः ॥३॥ एवमयनविशेषमृतुविशेषं चाभिधाय पक्षान्तरं वक्तुं सर्वेषामप्यृतूनां पापसम्बन्धराहित्यमाह ते वाऽइति । न श्वःश्वमुपासीत श्वः करवाणीत्येवं कालान्तरप्रतीक्षां न कुर्यात् ॥१॥३॥१॥

अग्न्याधेयात्पूर्वस्मिन्नुपवसथदिवसे कर्तव्यं व्रतमुपदिशति यदिति । see १, १, १, ७. ८. ॥१॥ उपवसथदिवसस्य रात्रौ गार्हपत्यागारे कस्यचिदज्ञस्य बन्धनं कार्यमित्येकेषां मतम् । अग्निना सह प्रजापतिमुखज्ञातबादज्ञ आग्नेयः । तथा च का° ४, ८, १. २. ॥३॥ चातुष्प्राश्यं चतुर्भिरध्वर्युब्रह्मादिभिर्ऋत्विग्भिः प्राशितव्यम् । स्यन्द्[प्र]स्रवणे ॥४॥ सर्पिरासिच्यतेऽस्मिन्निति सर्पिरासेचनं घृतधारणार्थमोदनं (वृत° Cod.) निम्नं कृत्वेत्यर्थः । समिद्भ्दयुक्ताभिर्घृतशब्दयुक्ताभिश्चेत्यर्थः ताश्च का° उदाहरति [४. ८. ५.] । शमीगर्भो योऽश्वत्थस्तत्रस्थो योऽग्निः तमेतेनाश्वत्थसमिदाधानेन प्राप्नुम इति ब्रुवाणाः । तस्मात् समिदाधानार्थ एवौदनो, न प्राशनार्थ इति तत् प्राशनं नादरणीयम् ॥५॥ तस्यां रात्रौ यजमानस्य जागरणं विधत्तेऽथ जाग्रतीति व्यत्ययेन बहुवचनं जागर्तीत्यर्थः । सदेवतरः अतिशयेन देवसहितः ॥६॥ ब्रह्मणः सम्बन्धि यद्ब्रह्म तेनाधानं कार्यम् ॥१०॥ भूर्भुव इति द्वाभ्यामेव व्याहृतिभ्यां गार्हपत्यमादध्यात् तिसृभिरपि व्याहृतिभिर्गार्हपत्याधाने आहवनीयाधानस्य मन्त्रो न स्यात् अतः सुवरिति द्वे अक्षरे परिशेषयेत् । आहवनीयाधाने तिसृणां व्याहृतीनां विनियोगमाह सर्वैरिति ॥१४॥ अग्निमन्थनसमये तस्य पुरस्तादश्वस्याधारणं विधित्सुरितिहासं दर्शयति देवानिति ॥१५॥ पूर्वे वयसि वहतीति पूर्ववाट् [पूर्ववयस्कः] ॥१७॥ आहवनीयदेशं प्रत्यग्नेर्हरणसमये ऽश्वस्यापि पुरस्तान्नयनं विधत्ते तमिति ॥१८॥ हरणे विशेषमाह तमिति यथैनं यजमानमेषोऽग्निः प्रत्यङ् उपाचरेत् अभिमुखमुपावर्तेत तमग्निं तथैव हरेयुः आहवनीयायतनस्य पूर्वभागं प्रापयेयुरित्यर्थः । सोऽग्निर्यस्माद्यजमानात्पराङ्मुखो भवति तर्ह्यस्माद्यज्ञोऽपि पराङ्मुख एव भवति तत्र तथा सति यः कश्चिद्द्वेष्य एनं यजमानमनु व्याहरेत् किमिति यज्ञोऽस्मात्पराङ्भूदिति स यजमानस्तथैव भवितुमीश्वरः स्यात् ॥१९॥ एवमग्नेर्हरणप्रकारं प्रतिपाद्यानन्तरकर्तव्यतामाहाथेति आहवनीयायतने सम्भारान्निधाय दक्षिणपूर्वपादेनाश्वमाक्रमयति । आवर्तयति आवृत्य स्थापयति । see का° ४. १. १४. ॥२३॥ आहृतस्याग्नेराधानं विधत्ते तमिति आहवनीयायतने यदश्वस्य पदं तस्मिंस्तमग्निं मन्त्रेण स्थापयति ॥२४॥ अग्रे प्रथममश्वस्य पदमग्निना तूष्णीमुपस्पृशति तमग्निमुद्यम्य पुनरप्युपस्पृशति एवं द्विरुपस्पृश्य तृतीयनापस्पर्श-

नेन व्याहृतिभिस्तमग्निं तस्मिन्पदे स्थापयति । एतत्खल्वाहवनीयाधानस्यैकं विधानम् ॥२५॥ यस्तु भूम्यां प्रतिष्ठाय भारमुद्यच्छति स भारं वोढुं शक्नोति तत्समानमेवैतच्छ्मेः सकृदुपस्पर्शनम् ॥२६॥ आसुरिप्रभृतयस्त्रयो मुनयस्तदेतत् उपस्पृश्योद्यम्य द्वितीयस्पर्शनेनाधानं पश्चेव पश्चाद्भूतमिव दध्रिरे अधारयन् एतावता को दोष इति अग्नेरुपस्पृश्य पुनस्तस्योद्यमनेन तद्व्यतिरिक्तं सर्वमायतनस्थं सम्भारादिकमियसितमियत्तया परिच्छिन्नं व्यक्तमिव भवति अतो ऽग्निमुद्यम्य प्रथमेनैवोद्यमनेन व्याहृतिभिरादध्यात् तथा सति अनियसितमव्यक्तमेव सर्वं भवति उक्तानां पक्षाणामिक्ष्या विकल्पमाह यतमथेति तत्पक्षत्रयमपि सूत्रितम् [का° ४. १. १६.] ॥२७॥ आहितस्याग्नेः पूर्वभागस्थमुल्मुकमन्वारभ्य मन्त्रस्य रूपं विधत्तेऽथेति । आशीः फलप्रार्थनमेव ॥२८॥ सर्पणशीलानां प्राणिनां राज्ञो सर्पराज्ञो तत्सम्बन्धिनोभिस्तद्दृष्टाभिर्ऋग्भिः । तत्सर्वमाप्यते सर्पराज्ञयः सर्वाधिष्ठानभूतत्वात् अत एव तन्नामनिर्वचनमन्यत्राम्नातम् इयं वै सर्पराज्ञी देवा वै सर्पाः तेषामियं राज्ञीति ॥२९॥४॥१॥

आदित आरभ्यैतावत्पर्यन्तं तात्पर्यार्थाभिधानविनियोगादिप्रदर्शनपुरःसरं वाक्ययोजनं कृतम् तत्राध्यायगतानि (? तना° Cod.) यानि वाक्यानि तानि सोमानंघायतया (?) पूर्ववदेव योजयितुं शक्यानीति ग्रन्थविस्तरभयात्केवलं प्रकटार्थकथनं विषमपदविवरणं च क्रियते । एवं गार्हपत्याद्याग्नेषु स्वरूपेण सिद्धेषु (°पेण सद्धेषु Cod.) क्षुधितस्याग्नेः शमनाय पूर्णाहुतिं विधत्तऽउदृत्येति ॥१॥ शश्वत् ध्रुवम् ॥२॥ मन्त्ररहितेन स्वाहाकारमात्रेण होममुपपादयति यामिति पुरा खलु प्रजापतिः पश्वादिसर्वजगत्सर्जनहेतुभूतां (पुराश्वादि° Cod.) प्रथमामाहुतिं स्वाहाकारेणैवाजुहोत् एषापि पूर्णाहुतिः तथा क्रियमाणा (°णो Cod.) [निदानेन] निगदभूतेन कारणेन सो स्वित् सैव प्रजापतिना हुता प्रथमाहुतिः खल्वित्यर्थः ॥४॥ यद्दः प्राणात्रवीर्यधारणं पूर्णाहुत्याग्नौ क्रियते एतत्पोऽहमिव पवमानेष्टिभिस्तत इदमितोव प्रत्यक्षत एव क्रियते पवमानपावकशुचिशब्दैः प्राणात्रवीर्याणां प्रतिपादनात् अतस्ता इष्टयो नियमेन कर्तव्याः ॥१॥ तदेतत्सर्वं पूर्णाहुतिपक्षे सत् विद्यमानमपि विपर्यस्तमिव भवति अतो नासौ पक्षो युक्त इत्यर्थः न केवलमेतावदिष्टीनां (°वदे° Cod.) प्रयोजनं (°याजन Cod.) अपि तु मनुष्यैराधीयमानस्याग्नेः कात्स्न्यमप्याभिः (°याभिः Cod.) सम्पद्यतऽइत्याख्यायिकापुरःसरमाहाग्निरिति । अभ्युपावृतम् अभ्युपागमम् वृतेर्लङ्प्रयुक्तमेकवचने युतादिवा इङ् ॥१३॥ अग्निर्हि मनुष्यान्प्रत्यागमनसमये पवमानपावकशुच्याख्यास्तिस्र आत्मीयास्तनूः पृथिव्यन्तरिक्षद्युलोकेषु यथाक्रमं निधाय न सर्वेण कृत्स्नेनैवात्मना स्वरूपेण अस्मानभिलक्ष्य (?° लक्षा तु Cod.) उपावृतत् उपागमदितीममर्थमृषयोऽबुध्यन्त तस्माऽअग्नये कात्स्न्यसम्पादनाय पवमानहवींषि निरवपन्नित्यर्थः ॥१४॥ ललयेव लीनमिव । अत एते उभे अप्येनां पृथिवीं प्रति उद्यामिनौ स्तां वाधितुमुद्युक्ते भवेतां (भवेत । Cod.) अतः प्रथमं हविः पृथक्तन्त्रं कार्यमुत्तरे समानतन्त्रे कार्ये ॥१६॥ यागान्तरेष्टा हि पुरोऽनुवाक्या गायत्री याज्यात्रिष्टुप् अत्र तु पुरोऽनुवाक्यायाऽआः सर्वा गायत्र्यः कर्तव्याः ॥१७॥ पृथिव्यन्तरिक्षद्युलोकात्मकानि पवमानहवींषि क्रमेण निर्वपंस्तद्द्वारा (°मेणाग्निर्व° Cod.) इमानेव पृथिव्यादिलोकान्सोपानक्रमेण सम्यगारोहन्नस्माल्लोकात्प्रच्यवते अतस्तत्परिहारायादित्येष्टिः कर्तव्येत्यर्थः ॥१८॥ विराजौ संयाड्येऽइति प्रेद्धोऽग्ने [१७. ७६.] इमा अग्न (?) ऽइत्येते स्विष्टकृतो या-

ज्यानुवाक्ये स्यातामित्यर्थः । विराजावित्वेवेति तुशब्देन त्रिष्टुब्जगतीपङ्क्ती व्यावर्त्येते ॥२०॥ एतन्त्वेकमयनमिति पवमानेष्टिं यज्ञतामेतदेकमनुष्ठानस्य विधानम् ॥२१॥ आग्नेयमेवेति न तु पवमानादिविशेषणमादरणीयमित्येवकारार्थः । पवमानादिविशेषणैर्विशेष्यमाणोऽग्निः तत्र वैशिष्ट्यद्वारा पोरोक्ष्यमापद्यते अतस्तत्परिहारेण अञ्जसा ऋजुनैव मार्गेण केवलाग्नये निर्वपन् तं प्रत्यक्षत एव स्वीकरोति ॥२२॥१॥२॥

षड्विंशादिदक्षिणा आधानस्य विधास्यन् तत्रामनिर्वक्तुं प्रस्तौति घ्नन्ति ॥१॥ न दक्षे फलं ज्ञनयितुं न शशाक ॥२॥ एष मात्रेति एतद्दक्षिणानां परिमाणम् इतोऽधिकमपि यथाविभवमिच्छानुसारेण देयमिति विधत्ते दद्यात्त्वेवेति ॥५॥ सम्प्रापिपन् सम्यक् प्रापितवन्तः ॥७॥ आधानस्य भ्रातृव्यज्ञयहेतुत्वं वक्तुमाख्यायिकामाह देवा इति । एषां देवानां मध्ये यमेवासुरा घ्नन्ति तत् तत्र स स्म (? सूर्व Cod.) हत एव भवति ॥८॥ नन्वग्निर्गार्हपत्याख्यायतने (न वग्नि° Cod.) बहिराधीयते (? लार्हिवाधी° Cod.) कथं तस्यान्तर्धारणामिति तत्राह तदिति अभिप्राणितीति मन्थनाज्ज्ञातं तमग्निमभ्युपरि प्राणनं करोति स पुनरपानितीति अग्नेर्ह (? अग्नेहा Cod.) परिश्वासमुत्सृज्य तमेव श्वासं पुनरन्तरनयत् तेन सार्धमग्निरपि अन्तः प्रविशन् यज्ञमानस्य हृदये आहितो भवति ॥१५॥ नियतस्य (? °तस्वा Cod.) बाह्यस्याग्नेरुद्दीपनं समिन्धनं विधत्ते तमिति उद्दीपनं काष्ठप्रक्षेपः समिन्धनं सम्यक् प्रज्वलनम् तदुभयमाक्षाग्नौ दर्शयति इहेति इहास्मिन्बाह्येऽग्नौ यक्ष्ये यागं करिष्ये तत्फलं च सम्पादयिष्यामीति यौ मनोव्यापारौ संकल्पौ तेऽएवान्तराहितस्याग्नेरुद्दीपनसमिन्धने ॥१६॥ एवमन्तरग्निमाद्धानस्य (माद्द्धानाथ Cod.) व्यवायादिदोषोऽपि नास्तीति प्रतिपादयत्यन्तरेणेति अग्नियज्ञमानयोर्मध्ये देवदत्तादिरागतिनवव्यवायादिभिर्व्यवृतत् व्यावृत्तो विमुखो भूदिति यो दोषः सोऽप्यत्र नास्ति । एवं विदुषोऽन्यनुगमनशङ्कापि न कार्येत्याह तस्मादिति ॥१७॥ एतत्सत्यवदनस्याग्निसमिन्धनहेतुत्वमृषिवाक्यसम्बन्धेन दृढयति तदिति । उपवेशो नाम कश्चित्तस्य पुत्रमरुणं तदीया ज्ञातय उक्तवन्तः हे अरुण स्थविरो वृद्धोऽसि अतः आमुष्मिकसिद्धये अग्न्याधानं कुर्विति ॥२०॥२॥२॥

अथ पुनराधेयं विधित्सुः स्वपक्षातिभूतमुक्तमग्न्याधेयं (स्वष° Cod.) प्रकृतिभूतपार्थवादेन राज्ययशोहेतुत्वेन प्रशंसति वरुण इति ॥१॥ निधाने कारणानि वैकल्पिकानि त्रीण्युपन्यस्यति विज्ञेयं वेति । असुरानितुष (?) विज्ञेतुमुपगमनसमये पूर्वसिद्धाग्न्याधानस्यार्थमथनिधानमित्येकः पक्षः (? पूर्वस्मिर्ग्रर्स्मधानस्यान्तमार्थानधा° Cod.) । कामचारस्य कामाय यथेष्टं (यष्टे Cod.) क्रीडितुं संचरणस्य यः कामः तदर्थं वा तन्निधानमिति द्वितीयः । गृहऽएव स्थितानां नोऽस्माकं देवानां मध्ये अयमग्निर्गोपिष्ठो गोपायितृतमो रक्षणकुशलोऽस्मदीयं धनं गोपायत् रक्षितुं शक्नोतीत्यनेनाभिप्रायेण वा तन्निधानमिति तृतीयः पक्षः ॥२॥ ऋतून् चारादिः पर्वतमिव प्रविष्टवान् अन्तर्दधे । अप्यस्मदीयं स्थानं पुनरागच्छाम इत्यनेनाभिप्रायेण तं तिरोभूतमग्निमागच्छन् पूर्वं यस्मिन्स्थाने सोऽग्निः स्थितस्तत्र तमपश्यतां तेषां देवानां विहीनावस्था प्राप ॥३॥ याबाङ्का (!) यावत्प्रकारविशिष्टं (कावत्प्रकाराव्रि° Cod.) वाष्ट्रं रूपमन्याः प्रजा उपतिष्ठन्ते तावत्यो ज्ञायन्तऽइत्यर्थः वीप्सा तु सर्वसंग्रहार्था ॥४॥ प्रथममाहितस्याग्नेर्विधानान्तरेण पुनस्तेषायतनेषु स्थापनं पुनराधेयम् । येयं ग्राम्यारण्योभयप्राप्तिः सा प-

रमता परमत्वं सर्वोत्कृष्टता । किं च अस्मै पुनराधेयं कृतवते सर्वे जनाः स्पृहयन्ति आदियन्ते स्पृहेरोप्सितप्रमितिसम्प्रदानसंज्ञा (°तश्मि° Cod.) । तथा अयमपि लोकं लोकनीयमुत्कर्षं प्राप्य पुष्यति प्रवृद्धो भवति ॥५॥ यस्मै फलायाद्धीत एतत् उक्तविधिफलं खलु तत् ॥६॥ यस्मादेवं वर्षऽर्तुः सर्वात्मकः तस्मात्समुदायात्मकं संवत्सरं वर्षशब्देन लोको व्यबहरतीति दर्शयति अथेति । ग्रीष्मशिशिरधर्मयोः प्रकाशशैत्ययोर्वर्षासु सद्भावात् पृथियोगाच्च (?) वर्षऽर्तोस्तावदुभयात्मकत्वम् ततः ग्रीष्मे वसन्तस्य वर्षासु शरदः शिशिरे हेमन्तस्य समानधर्मतयान्तर्भावात्सर्वऽर्तुरूपत्वं सिद्धम् ॥७॥ एवं प्रत्यक्षविषयं प्रकाशादिधर्मयोगेन सर्वत्वमभिधाय परोऽक्षधर्मवशादपि तत्प्रतिपादयति अथेति । इत्यादयो हि वसन्तादीनां परोऽक्षभूता धर्माः तेषां च वर्षासु सद्भावात्सर्वऽर्तुरूपतेत्यर्थः । यस्मादग्निः प्रागुक्तरीत्या ऋतून्प्राविशत्तस्मादेनं वर्षास्वाधानस्तेभ्य एवऽर्तुभ्यः पुनरुत्पादयति ॥८॥ तच्च पुनराधानमहनि मध्यन्दिने कार्यमिति विधित्सुस्तदर्थमादित्यस्य सर्वऽर्तुरूपतामाह आदित्य इति ॥९॥ प्रकाशात्तेन तन्मध्यन्दिनाधानं प्रशंसति क्रायेयेति । स च [पाप्मा] पुरुषरूपस्य पादयोरधस्तादिव इयस्यते प्रयौति इ गताविति धातुः (!) ॥१०॥ तस्य पुनराधित्सितस्याग्नेर्दर्भैरुद्धरणं कार्यं विधत्ते तमिति । आधानवत्पुनराधानेऽपि दारुभिरुद्धरणे दोषमाह दारुभिः पूर्वमिति उभयोरैक्यरूप्ये जामितादोषः स्यात् । आपो दर्भाः see १. १. ३. ५. ॥११॥ व्रीहियवमययोरपूपयोरर्कपर्णद्वयसंगृहीतयोर्गार्हपत्याहवनीयायतनयोर्निधानं विधत्तेऽर्केति । अत एवोक्तं का° ४. ११. ६-८. ॥१२॥ पूर्वाभ्याम् पूर्वमाहितौ यौ गार्हपत्याहवनीयौ ताभ्याम् । रात्रिभिर्व्येवेति अनुगतयो(:) रात्रिभिरिव व्यवधानात् नापूपव्यवधानेन प्रयोजनमित्यर्थः ॥१३॥ यदग्न्याधेये पवमानादिकार्यं (यवमानेविका° Cod.) तदाग्नेय एव [पञ्च]कपालः करोतीति न पृथक्ता कर्तव्येत्येवकारार्थः ॥१४॥ अस्यां पञ्चकपालेष्टौ आज्यभागादिः सर्वोऽपि यागोऽग्निदेवत्यः कार्यः ॥१५॥ यन्निष्केवल्यम् इतरेभ्यो निष्कृष्य केवलं तदेकभागं कर्तुमिक्कति तिरोहितं परोऽक्षमेव तत्प्रदीयते ॥१६॥ उत्तमं तृतीयम् ॥१७॥ प्रयाजादिषु सर्वाग्नेयकरणं (रस्मं Cod.) प्रतिपादयति स इति । प्रथमप्रयाजे यत्समिधो यजेति प्राकृतं बन्धनं तदाग्नेयं रूपं समिन्धनप्रत्यभिज्ञानात् किं तु तत्परोऽक्षम् अतः समिध इत्येतस्य स्थाने अग्नोन्यजेत्येव ब्रूयात् ॥१८॥ प्रयाजयाज्यास्वपि क्रमेणाग्निविभक्तियोजनं प्रतिपादयति (? °जयत्समिधायति Cod.) स इति । प्रकृतिषु याज्यासु आज्यशब्दात्पूर्वं यथाक्रममग्ने अग्निमग्निना अग्नेरेताश्चतस्रो विभक्तीः सहिता (?) एताभिर्यजेदित्यर्थः । an explanation of वौषक् is not given: I conjecture it to be a transformation of वषट्, the अ being changed into औ (see १. ७. २. २१.), the ष into क, and the ट् (resp. त्) into क् (compare: साविषक् instead of साविषत्) ॥१९॥ पञ्चमप्रयाजानुयाज्यायां विशेषमाहाथेति । प्रकृतिवत्प्रथमामाज्यभागदेवतां [सं]कीर्त्य द्वितीयाज्यभागदेवतायाः सोमस्य स्थानेऽग्निः पवमानोऽग्निरिन्दुमान्वा अध्वर्युप्रयोगानुसारेण विकल्पेन निर्देष्टव्य इत्यर्थः । स्वाहा देवां आज्यपानिति प्रयाजदेवतानिर्देशेऽपि (°जदेवतार्देवतानिदे° Cod.) स्वाहाग्नेनाज्यपानिति प्रयोक्तव्यम् ॥२०॥ प्रथमाज्यभागस्याग्निं स्तोमेन बोधयेति बुधिधातुयुक्तामनुवाक्यां (वुविधा° Cod.) दर्शयित्वा तस्याः पुनराधेयानुकल्पमाह स्वपितीति । समुदोर्ययति समुद्गमयति ॥२१॥ द्वितीयाज्यभागस्य प्रागुक्तपञ्चदा-

ह्वर्याय (? °द्वर्योय Cod.) याज्यानुवाक्ये दर्शयति अथेति । निगदसिद्धोऽर्थः ॥२२॥ एवमु सर्वमिति उक्तरीत्या प्रयाजानामाज्यभागयोः सोग्निसम्बन्धकरणात् (! °योश्चाग्नि° ?) तत्सर्वमाग्नेयं भवतीत्यर्थः ॥२३॥ अधुना स्विष्टकृतोऽप्यग्निसम्बन्ध इति (? °ता स्वग्निसंबंधस्त्वबंध इति Cod.) दर्शयति अथाहेति । प्रथमप्रयाजवत्प्रथमानुयाजेऽपि देवान्यजेत्यस्य स्थानेऽग्नीन्यजेत्यग्निविभक्तिः कार्या ॥२४॥ एवं प्रयाजानुयाजेषु प्राप्तिप्राः (प्राप्ति° Cod.) सम्भूयानूद्य प्रशंसति ता वाऽइति ॥२५॥ तासां विभक्तीनामक्षरसंख्यामुपजीव्य प्रशंसति द्वादशेति । अग्नाउ इत्यत्रान्तिमाक्षरत्यागे सति द्वादशाक्षराणि भवन्ति तेन सह त्रयोदश भवन्तीत्यर्थः । न द्वे चनेति चनशब्दोऽप्यर्थे द्वेऽग्रपि वक्ष्यमाणे न सह प्रयुञ्जीत किमर्थम् अज्ञामितायै ज्ञामितादोषराहित्याय व्यतिरेके तत्सद्भावमाह ज्ञामि हेति के पुनस्ते द्वेऽइति ते विभज्य दर्शयति व्यन्तु वेत्यादिना ॥२७॥ वहेन स्कन्धेन see १. १. २. १. ॥२८॥३॥२॥

एवमाधानपुनराधाने विधाय तन्निष्पन्नानामग्नीनां फलवत्कर्मार्थत्वात्तत्साधनचतुष्टयमग्निहोत्राख्यं (°त्तत्साधंसानरतु° Cod.) कर्म विधित्सुस्तदर्थमाख्यायिकामाह प्रजापतिरिति ॥१॥] काल्वालीकृतेति तर्हि तस्मिन्समये यदन्येव (?) पृथिवी बभूव ॥३॥ व्यात्तेन विवृतेन मुखेन । उदमृष्ट हस्ताभ्यां स्वाङ्गस्योन्मार्जनं कृतवान् । तस्मात् इदं चोभयमपि पाणितलमलोमकं रोमरहितं दृश्यते । उन्मार्जनेन तत्राङ्गतिं विवेद लेभे ॥४॥ तां चाङ्गतिं तस्मिन्नग्नौ व्यौचत् अत्यजत् इदमाङ्गतिद्रव्यमोषं पक्त्वा धय पिबेति एवमग्नौ प्रक्षिप्तात्तस्मादोषधयः पृथिव्यां समभवन् ॥५॥ एवमनयोरुत्पन्नयोः सतोः सोऽग्निरपि प्रजापतिसकाशात् भक्षणाडुपरतः पराङ्मुखः सन्पर्यावृत्तो बभूव ॥६॥ अत्स्यतो भक्षणं करिष्यतः ॥७॥ होमद्रव्यस्य पयस उत्पत्तिं वक्ष्यन्गोरुत्पत्तिमाह तऽउ हेति । तस्य स्तोत्रदेशस्य यत्पश्रियणं स समुद्रोऽभवत् यश्च स्ताव (!) स्तोत्रदेशः सा पृथिवी ज्ञातेत्यर्थः ॥११॥ पुनरागाक्षाम इति स्तोत्रदेशात्प्रागुत्क्रम्य तस्मात्स्तोत्रात्सम्भूतां गां ते देवाः प्राप्नुवन् ॥१२॥ तासां गवां यज्ञस्य च साधारणमेकं नामोपदिश्य प्रशंसति तद्वाऽइति ॥१४॥ इमे यजमानाः नोऽस्माकं मध्ये कस्मै प्रथमाय होष्यन्ति ॥१६॥ अग्निहि अनुष्ठया अनुष्ठानेन प्रयत्नेन स्वकीयं रेतो गवि पयोरूपेण निवेर्तयन् (! वर्तयति ?) । क्षयमानस्य च पयसो यद्व्यश्नुते विष्णुक्रमेति ॥१७॥४॥२॥

सायंप्रातर्होमयोः कालविशेषं विधित्सुरग्निहोत्रं सूर्यात्मना प्रशंसति सूर्य इति ॥१॥ तासां गर्भसाम्यमाह ईलिता होति रात्रौ हि सर्वाः प्रजाः संज्ञानानाः समानमेकविधं ज्ञानं प्राप्ता ईलिता (? प्राप्रहोलि° Cod.) स्तुताः क्लृप्ताः [शेरे] शेरते लोपस्त आत्मनेपदेष्विति तलोपः । पुनरपि गर्भसाम्यमाह अथ यदिति गर्भरूपेणाग्रावस्थितं सूर्यं रात्रिस्तिर एव तिरोहितमाक्षादितं करोति यस्मादेवं तस्मादसौ गभः ॥३॥ यथार्थं यथाप्रयोजनं सर्वाः प्रजा विसृज्यन्ते प्रवर्तन्ते ॥६॥ सायमग्निहोत्रस्याहवनीयविहरणमस्तमयात्प्रागेव कर्तव्यम् । गार्हपत्यादाहवनीयं प्रणीयोद्धरन्ति । अनुद्धृतमाहवनीयमभिलक्ष्य सूर्योऽस्तमगादिति सर्वे निन्दन्ति ॥७॥ आवसत्यस्मिन्नित्याश्रसथमासनम् ॥८॥ यथा गते अतिथौ गृहादपगते सति शून्यं तदावासस्थानं प्रति पंतर्व्याणयात्रयादिकमाहरेत् (?) ॥९॥ एतावेवास्तमितानुदितहोमौ प्रकारान्तरेण प्रशंसति द्वयमिति ॥१०॥ मूल्यमूलोभयनिष्पन्नस्य सर्वप्राणिजीवनहेतोः शारात्मक-

स्य (?) स्सस्य भागं प्रथमं देवेभ्यस्तत्स्वामिभ्यो जुहुयानि पश्चात्तदुपभुक्तशेषैः सर्वे वयमुपजीवाम इत्यनेनाभिप्रायेण पयसाग्निहोत्रं जुहुयात् । अतो होमानन्तरं रात्र्या[ः] काले तदाशितं (यदशि°?) भवति (भवाति Cod.) तत्सर्वज्ञतशिष्टमेवमुक्तं भवति निरवत्तबलीति निष्कृष्यावत्तो बलिर्देवभागो यस्मात्तन्निरवत्तबलि । एवमग्निहोत्रं जुह्वत्पुरुषः ज्ञतोक्तिष्टस्यैव रात्रावशिता भोक्ता भवति ॥११॥ अनुपस्थितः अपरिसमाप्तः सर्वदा तयुक्तः ॥१३॥ शृतमसत् पक्वं भवेत् । कियदवधिः (? वाक Cod.) पाक इत्याशङ्क्य तत्रैकं मतमुपन्यस्यति तदाङ्गरिति । उदक्तं पाकवशादुद्गतान्तं बुद्बुदवत् । रेतःसंस्तुतं श्वेतत्पयः तच्चोपदग्धमप्रज्ञश्चि अप्रज्ञाननशीलं प्रज्ञोत्पादनं न भवति ॥१४॥ कथं तर्हि दग्धव्यमिति (दोतव्य° Cod.) अधिश्रित्यैव अधिश्रयणानन्तरमेव जुहुयात् ॥१५॥ तदवज्योतयतीति ज्वालायुक्तेन (? द्वा° Cod.) मार्गेणावाङ्मुखं (? दमागे° Cod.) प्रकाशयतीत्यर्थः । उदकस्य विन्दुराश्चोतयितव्य आसेक्तव्य इति ब्रूयात् ॥१६॥ चतुर्भ्यः स्तनेभ्यो दुग्धवाच्चतुर्धाविहितत्वम् । समिद्धोमायैवेति समिद्धेऽग्नौ होमार्थमुन्नीतपयस्काय । (? स्काया Cod.) वैकङ्कत्यां स्रुचि एकां समिधमुपरि निधाय गार्हपत्यदेशादाहवनीयं प्रतिसृत्यैव (धृत्यैव Cod.) पूर्वामाज्यतिं जुहुयात् । होष्यन्नुपसादयतीति यदुपसादनं तैत्तिरीयके आम्नातं तदनूद्य तस्यायुक्तातां (तस्य यु° Cod.) दृष्टान्तेनोपपादयति स यदिति । अन्तरा निदध्यादिति भोक्तुमुपविष्टस्य पुरः स्थितं पात्रमप्राप्य मध्योमार्गादिसितमन्नादिकं (! मध्ये मार्गेऽशनमन्ना° ?) निदध्यात् एवं तत् ॥१७॥ देवाः सन्तीति अग्नौ प्रक्षिप्तेनाग्निहोत्रहविषोपचिता[वि]यवाः सन्तः सर्वदा विद्यन्ते ॥१९॥ मनुष्याननु मनुष्याधीनतया तिष्ठन्ति ॥२०॥ अस्याग्निहोत्रस्य याज्ञवल्क्याभिमतं पाकयज्ञत्वमुपन्यस्यति तदु इति । न खल्वग्निहोत्रहोमो दर्शपूर्णमासादियज्ञकेवलयज्ञत्वेन मन्तव्यः अयं खलु पाकयज्ञ-इव भवति । उत्सृप्य (उत्पृष्य Cod.) बहिर्निर्गत्य । पशव्यं पशुभ्यो हितं पशुप्राप्तिसाधनम् ॥२१॥ अमूं विप्रकृष्टां यामाज्यतिं प्रजापतिः सृष्टिकाले प्रथममजुहोत् सैषा एकाग्निहोत्रस्य पूर्वाज्यतिः अनन्तरं च यदतो (यदेतो Cod.) ऽग्निवायुसूर्याः पश्चादिवाध्रियन्त अवस्थिताः ॥२२॥ द्वितीया तु स्विष्टकृत्स्थानीयेत्याह अथ येति ॥२३॥ आशा गोचरं प्राप्तव्यम् ॥२४॥ अनड्वा अप्रत्यन्तम् ॥२५॥ यत्तु स्थाल्यामवशिष्यते तत् नाग्निहोत्रोक्तिष्टं (? तत्तुर्नाग्निहोत्रोक्तिष्टो Cod.) तत्र दृष्टान्तः यथा परिणह (!) इति परितो नद्धं परिवीतं (°श्रेतं Cod.) धान्यपूर्णं शकटस्योपरि स्थानम् यथा तस्माद्धविषो (षे?) निर्वापयितुं तद्गतं धान्यं न शेषः किं तु पुनरपि यागान्तरयोग्यमेवमेव तत्स्थाल्यां (ततत् स्था° Cod.) पयः ॥३१॥१॥३॥

अथाग्न्युपस्थानं. विधित्सुस्तेषामग्नीनां व (?) दैवतरूपतामाह एता इति । योऽस्ति यो यजमानो विद्यते नलो (!) नैषध (!) इति निषिधदेशाधिपतिर्नलः प्रसिद्धो राज्ञा ॥१॥ अन्वाहार्यपचनोऽग्निः एष एव नलो (!) नैषिध इति निर्दिष्टः । निषिधराजस्य च नलस्य (!) दक्षिणाग्नेश्च साम्यमाह तथादिति अग्निहोत्रहोमकाले एतमन्वाहार्यपचनं यत् यस्माद्दक्षिणतः अहरह[राह]रक्ति तस्मादेव नैषदो (!) नलो (!) ऽपि यमस्य राज्ञो दक्षिणत उपगाकृतीति लोकप्रसिद्धिः ॥२॥ भस्मोद्धृत्येति गार्हपत्याहवनीयादिगतं भस्मोद्गृह्य यत्प्रातरावसथे प्रावपन्ति ॥३॥ आहवनीयस्य समीपे यत्स्थानमासनं शयनं वा क्रियते तत्तस्योपस्थानम् । प्रतिपरेत्याहवनीयागारात्प्रतिनिवर्त्य ॥४॥ पल्ययेत परिगमनं करोति ॥५॥ उपवसथेऽहनि ॥७॥

का° ४. १३. ७-१०. ॥८॥ [धूप्यतऽइव] धूमा[यमा]न-इव भवति । अश्वत्थेव वत् अग्नियेणैव एकवारम् ॥१॥ बल्बलोति (वत्येलोवं Cod.) शब्दायते ॥११॥ काष्ठेषु दग्धेषु संशाम्यतोऽग्नेरर्चिः प्रतितरां निकृष्टतरामिव ऊर्ध्वाधोगमन[रहित-इव भवति?] ॥१२॥ सर्वासु ज्वालासु निरूचासु (?) केवलमङ्गारा अत्यर्थं दीप्यन्ते ॥१३॥ एतेषां रूद्राग्यवस्थाविशेषाणां मध्ये एकं सवत्सरपर्यन्तं निरन्तरमनुतिष्ठेत् यदि यजमानः स्वयमेवाग्निहोत्रं जुहुयाद्भवति अन्यो वाध्वर्युर्जुहुयात् उभयोरप्येष संवत्सरनियमः । अपोऽभिलक्ष्य वापीकूपादिकं खनन्नन्यद्व्रीहियवाद्यन्नं सम्पादयन् [वा] सामि अर्धकृते यथा निवर्तेत एवमेव तदन्यथाग्निहोत्रहवनम् (? द्याहवनीयम् Cod.) । सार्धं सह नैरन्तर्येण ॥१४॥ अन्नाद्यमभितृणत्ति उत्पादयति ॥१५॥ भार्याः भर्तव्याः प्रजाः । यत्र खलु भोक्तृणामल्पीयस्त्वं भोग्यसम्पत्तिर्भूयसी तत्खलु समृद्धम् ॥१८॥२॥३॥

अथैतयोर्गार्हपत्याहवनीययोरन्योन्योपस्थानं विधित्सुः प्राग्विहिते आधानाग्निहोत्रे समुच्चित्य क्रमेण स्तौति यत्रेति । दध्रे उद्युक्तो बभूव । इतोदं सर्वं जगदूव्याकुलमभूत् । अतितिक्षमाणः प्रजाभिश्चिकीर्षितं पेषणमसहमानः ॥१॥ तितिक्षे सोढुं शक्नोमि ॥२॥ एवमन्याधानेन जनितस्याग्नेर्भरणं विधाय तस्य भरणात्प्रागुद्वासनं निषेधति तत्रेति । सामि मध्ये ऽपयज्ञाग्निमुद्वासयेत् (?) विसर्ज[यि]त् तर्ह्यस्मै यजमानाय सोऽग्निः सामि अर्धग्लानियुक्तो भवति । तस्मादामरणात्तमग्निर्धार्य इति नियमयति तस्मादिति ॥४॥ ऋषिणा मन्त्रेण [ऋक्सं° १. ८१. १०.] । हे देवाः अत्ति अत्तिके मनुष्याणां समीपे आयुष्ट्वेन परिकल्पिताः शतसंख्याका एव शरदः संवत्सराः खलु यत्र यस्मिन्नायुषि शतसंवत्सरे तनूनां शरीराणां जरसं जरां चक्रा कतरंतस्या (?) यत्र च पुत्रासः सन्तोऽप्यपत्योत्पादनेन पितरो भवन्ति नोऽस्माकं तदायुर्गन्तोर्गमनात्पूर्वं मध्ये (!) मा रीरिषत हिंसत (हिसतं Cod.) प्राक्कृमिति (?) ॥६॥ अग्निहोत्रहोमस्यामृतत्वप्राप्तिसाधनत्वं वक्तुं सूर्यस्य मृत्युरूपतां प्रतिपादयति । सूर्यस्य किरणैः प्राणेषु बद्धा इत्यर्थः । अश्वोऽभिधीयते बध्यतेऽनयेत्यश्वाभिधाना तया अभीशवोऽन्या रज्जवस्ताभिर्वा । प्राणानभिलक्ष्य अवतायन्ते अवसार्यन्ते ॥७॥ यदा तु विद्वानुदीरितरीत्या सूर्यमतिक्रम्य वर्तते तदाहोरात्रे एवातोऽर्वाचीने भवतः तथा चाहोरात्रानाक्रान्तत्वाद्विदुषः सुकृतं न क्षीयते ॥११॥ रथोपस्थे रथस्योत्सङ्गे । पल्यङ्क्यमाने पर्यावर्तमाने । अर्वाचीनोऽवाङ्मुखः ॥१२॥ आहवनीयस्य पुरस्तात्परिक्रम्य गार्हपत्याहवनीययोर्मध्ये गच्छेत् । तथा च सूत्रितं का° ४. १३. १२-१३. ॥१३॥ यदेतद्दक्षिणेन वेति कात्यायनेन विकल्पेनोक्तं तदूदूषयति अथ य इति ॥१४॥ स्वर्ग्यायाः स्वर्गप्राप्तिहेतुभूतायाः । नौमण्डे उभे पार्श्वे भित्ती । नावमज्जति क्षिपति प्रेरयतीति नावाजः ॥१५॥ आरुक्षतेऽनेनेत्यारोहणं प्रवेशद्वारम् ॥१६॥ अथैतदग्निहोत्रं चित्याग्निसम्पत्त्या स्तौति अथ यामिति ॥१७॥ अथ चित्यस्याग्नेः संवत्सररूपतां ब्रुवन् तावत्कालसाध्यस्याग्निहोत्रहोमस्य तत्सम्पत्तिमुपपादयति प्रजापतिरिति । चित्योऽग्निः प्रजापतिना सृष्टत्वात्तदात्मकः प्रजापतिश्च संवत्सरकालात्मकः अतः संवत्सरपर्यन्तमनुष्ठितमग्निहोत्रं (? °त्रं उममितिष्ठतमग्नि° Cod.) चित्येनाग्निना समानं सत् संतिष्ठते समाप्तं भवति तथा च एकैकसंवत्सराग्निहोत्रानुष्ठानेन चित्याग्न्यनुष्ठानं कृतं भवति ॥१८॥ अथैतदग्निहोत्रं महदुक्थसम्पादनेन स्तौति सप्तेति । चित्योऽग्निर्महाव्रतं साम बृहतीसहस्रात्मकं बृहदुक्थं चैतानि त्रीणि सहचरा-

णि तत्र चित्याग्निसम्पत्तिरुक्ता महद्युक्थसम्पत्तिस्त्वेवमवगन्तव्या तत्र हि गायत्रीतृचाशीतिरौष्णिहो तृचाशीतिर्बार्हतो तृचाशीतिरिति तिस्रस्तृचाशीतयो विहिताः । अतश्चैकस्मिन्संवत्सरे अस्य यज्ञमानस्याग्निहोत्रं तृचाशीतित्रयात्मकमहद्युक्थेन सम्पन्नं भवति ॥१९॥२०॥३॥३॥

अथ सायंकालोनमग्न्युपस्थानं विधित्सुस्तदर्थमाख्यायिकामाह अग्नाविति । एतच्च पुनराधानब्राह्मणे [२. ३.] व्याख्यातम् तत्र ऋतुप्रवेशः (त्र्यनुप्र° Cod.) अत्र तु रात्रौ (? त्रि । Cod.) इत्येतावान्विशेषः ॥१॥ कमिति वाक्यप्रतिपूरणे (? °क्यमिति° Cod.) ॥३॥ अग्निरपि उपस्थानेन याच्यमानस्तिरो भवति याचितफलस्याप्रदानेन नैव यज्ञमानं हिनसानि अत एव द्वेष्योऽपि न भवानि ॥४॥ वाचेन वदनोयेन स्तुतिशब्देन कर्मणा वा परिचरणलक्षणेन । यस्तु एवं निष्ठुरं भाषते स एनं ब्राह्मणादिं प्रभुं द्वेष्टेरोश्वरः विद्वेषणं कर्तुं समर्थः स्यात् तथा निर्वेदं मनस्तापं गन्तुमोश्वरः स्यात् निष्ठुरभाषणप्रकारमाह किं न्विति हे देवदत्त यस्त्वं मह्यं न (त Cod.) ददासि स त्वं मम किं चासि न किंचिदपि भवसि त्वया किं प्रयोजनमित्यर्थः । तदुपस्थानं तु फलप्रार्थनरूपत्वेन निष्ठुरभाषणवदपराधहेतुरिति न कर्तव्यमित्याह एतदिति होमसमिन्धनाभ्यामग्निं प्राप्य पुनरुपस्थानेनैव याचते याचनं चायुक्तमित्यनुपस्थानपक्षो ज्यायान् ॥५॥ समस्तं सम्पूर्णम् ॥७॥ उपवत्या उपशब्दयुक्तया ऋचा । योऽयमुपेत्युपसर्गः इयं भूमिरेव सः । द्वयेन द्विप्रकारेणेयं भूमिरुपशब्दवाच्या । न्यृक्षति नितरामार्तिं प्राप्नोति । क्षयरहितेनैव भूम्ना प्रतिपद्यते उपस्थानं प्रारभतऽइत्यर्थः ॥९॥ क्रमेणोपस्थानमन्त्रान्विधित्सुस्तावदुपवतोमृचं विधाय प्रशंसति स आहेति ॥१०॥ अनुधावति अनुसरति प्रशंसतीति यावत् ॥११॥ सनोनां दानानाम् ॥१५॥ समाहार्यम् एकैकामृचं प्रदेशान्तरे पठितां समाहृत्य समुदायोकृतमेतत्षडृचं सूक्तम् । अदो द्युलोक एव प्रथमम् तस्य प्रथमशब्दनामधेयतामुपपादयति यावत्त इति । सनेति निपातः पुरेत्यस्यार्थे । इमे द्यावापृथिव्यावन्तरेण अग्निर्मूर्धेत्यादिमन्त्रप्रतिपाद्याः सर्वे कामा अवस्थिताः ॥१६॥ यतो यज्ञास्त्रिवृत्प्रायणाः त्रिवृत्प्रारम्भाः निर्वापप्रोक्षणसामिधेन्यनुवचनादिषु त्रिरावृत्तिदर्शनात् ॥१७॥ ग्रहनक्षत्रादीनि चित्राणि ॥२२॥ एतेन चित्रावसोऽइति मन्त्रेण रात्रेः पारमवसानं स्वस्ति क्षेमेण (°मेन Cod.) समश्नुवते स्म ते सम्प्राप्नुवन् । एतावन्विति उपप्रयन्त इत्यारभ्य चित्रावसोऽइत्येतावत्पर्यन्तमाहवनीयसमीपे तिष्ठन्जपेत् ॥२३॥ अग्निहोत्रहोमार्थस्य पयसो दोग्ध्री या गौः तामन्ध स्थेति मन्त्रेणाभिगच्छेत् अन्धःशब्दोऽन्नवाचो तेन च तज्जनितं वीर्यं लक्ष्यतऽइति व्याचष्टे यानीति । भक्षीय सम्भजेय ॥२५॥ एवमाहवनीयस्य समन्त्रकमुपस्थानं सम्प्रपन्नं (? °पचं Cod.) विधाय गार्हपत्ये तद्विधत्ते अथेति । अतिक्रमज्जनितापराधनिवृत्तयेऽस्मै गार्हपत्याय नमस्कारमेव करोति इतरथा हि प्रथमाग्निं गार्हपत्यमतिक्रम्याहवनीयस्योपस्थानकरणात्स गार्हपत्यः क्रुद्धः सन् य[थै]नं न हिंस्यात् तथा नमस्कारः क्रियते ॥२८॥ अनेन सोमानमिति तृचस्य जपेन द्यावापृथिव्योर्मध्यवर्तिनोऽन्तरिक्षस्योपस्थानं कृतं भवति । नन्वेतत्तृचं ब्राह्मणास्पत्यम् कथं बार्हस्पत्यमिति नैष दोषः तयोर्भेदाभावात् अत एव दाशतय्यां गणानां त्वेत्यादिषु (ऋक्सं° म° २. २३. १.) ब्राह्मणास्पत्यसूक्तेषु (°क्त्योषु Cod.) तत्र बृहस्पतिः स्तूयते ॥३६॥ एतदपि सूक्तमन्त्राग्नौ तिष्ठन्जपेत् । अस्य तृचस्य प्रयोजनमाह तत्रास्तोति तत्र तस्मिंस्तृचे नाधृषु वारणेष्वित्यस्ति तस्याभिप्रायो वर्ण्यतऽइति शेषः एते ह

वाऽइत्यादि ॥३७॥ स्तरोर्हिंसकः ॥३८॥ अनुसंतनवत् अनुक्रमेण संतनुयात् संततमनवच्छिन्नं कुर्यात् ॥४१॥४॥३॥

एवमग्निहोत्रहोमे महोपस्थानं विधाय लघूपस्थानमत्रापि दर्शयति अथेति । अग्निहो[त्रहो]मानन्तरं भूर्भुवः स्वः सुप्रजा इत्यनेनैव मन्त्रेणाहवनीयमुपतिष्ठेतेत्यर्थः । पूर्वोक्तादुपस्थानमन्त्रगणादस्य (? त्रतातादस्य Cod.) मन्त्रस्यातिशयमाह तत्सत्येनेति सत्यरूपा श्वेता व्याहृतयः त्रयोसारत्वात् एवं च व्याहृतिरूपेण सत्येनैव इमां मन्त्ररूपां वाचं समर्धयति तया च समृद्धया वाचा प्रागुक्तां सर्वामप्याशिषमाशास्ते प्रार्थयते । तदाशासनप्रकारं दर्शयति सुप्रजा इति ॥१॥ प्रागुक्तोपस्थानेनास्य समानकार्यकरणत्वाद्विकल्पमाह यद्वाऽइति । अदः पूर्वोक्तं दीर्घं बङ्गकर्तव्योपेतं बङ्गमन्त्रसाध्यं यदन्युपस्थानं सा आशीः फलप्रार्थनम् तथा भूर्भुवःस्वरिति मन्त्रसाध्यमुपस्थानमिति तादृगाशीर्युक्तम् अत एतावतैवोपस्थानेन तत् प्रागुक्तं सर्वं फलं प्राप्नोति ॥२॥ अथ प्रवासं करिष्यता यजमानेन कर्तव्यमुपस्थानं दर्शयति अथेति ॥३॥ वाहनसहितश्चेदश्वरथादीन्प्रधावयति प्रगमयति । स च गन्तव्यस्मिन्देशे वेलां स्वनिवासग्राममर्यादां मन्यते तत्स्थानप्राप्तिपर्यन्तं वाचंयमो गत्वा तदनन्तरं वाचं विसृजेत् । प्रेष्य प्रवासं कृत्वा पुनरागत्य । वाग्यतस्य यजमानस्याग्न्यागारस्य च मध्ये ॥६॥ समिदाधानं विधत्ते अथेति उपस्थानानन्तरमाहवनीयसमीपे उपविश्य तृणोपलक्षितानि समिदादीनि प्रक्ष्य तस्मिन्नग्नौ प्रक्षिपेत् लुपु छेदने ॥८॥ इत्थं प्रवत्स्यदुपस्थानमागतोपस्थानं च समन्त्रकं विधाय तयोरमन्त्रकपक्षमप्याह स वाऽइति ॥१०॥ परिदां परिदानं रक्षणम् ॥११॥ एवं प्रवासादागतस्य यजमानस्याग्निविषयं कर्तव्यमुपदिश्य गृहविषयमपि (°मतिपद् Cod.) वक्तुं प्रतिज्ञानीतेऽथात इति उपचरणमुपचारः । तस्य यजमानस्य कुलं वंशं विच्छेदाभावः विनष्टं कर्तुमीश्वरः व्यत्ययेनैकवचनं गृहाः समर्था भवन्ति ॥१४॥१॥४॥

अथामावास्यायां पिण्डपितृयज्ञस्य मासि-मासि कर्तव्यतां विधित्सुस्तदर्थमाख्यायिकामाह प्रजापतिमिति ॥१॥ स्वधाकारोऽपि वः । मनस-इव जवो मनोजवः सोऽपि युष्माकम् ॥२॥ प्रावृताः उत्तरवाससा संवृताः केवलवीतवाससो (° लवित Cod.) निर्वीतिन इत्यर्थः ॥३॥ शश्वद्बङ्गकृवः । परेषां दृष्ट्वाऽदकसामर्थ्यं (? दष्ट्वाऽदाद° Cod.) तमः अघटितघटनशक्तिर्माया ॥५॥ मेद्यति स्निह्यति पुष्यति । विक्लृप्तिं अधः पतति । यदपि किंचिद्वाचा व्याहरति भाषते तथैव यथार्थं (? प्रसार्थं Cod.) भवति हि यस्मादसौ एतद्देवसत्यं देवेन प्रजापतिना कल्पितं सत्यं गोपायति रक्षति । एतस्य प्रजापतेरुच्चरितरूपं व्रतं चरितुं यो यजमानः शक्नोति स देवसत्यं गोपायति ॥६॥ जीवतां हि मनुष्याणां सायंप्रातरशनं विहितम् मरणाद्ध्वं वस्वादिरूपपितृभावं (!) प्राप्तेभ्यस्तेभ्यो मासि-मास्येव पितृयज्ञरूपमशनं दातव्यम् स च पितृयज्ञोऽमावास्यायामेव कर्तव्यः यस्मिन्नेव काले इन्दुः (इन्द्रः Cod.) पूर्वस्यां दिशि पश्चिमायामपि न दृश्यते । कलहं कुर्यात् सोमस्य देवानामन्नत्वेन (? देवा अन्नत्वेन Cod.) भोक्तुं देवैरपि संनिधानात् दीयमान विवर्विषयः कलहो भवेत् ॥७॥ गार्हपत्यस्य पश्चिमदेशे व्रीहिपूर्णस्य निर्वापार्थस्य शकटस्य दक्षिणत आसीनः प्राचीनावीती एतं (एवं Cod.) पितृयज्ञार्थं हविर्गृह्णीयात् । ततस्तस्माद्धविर्ग्रहणस्थानात् । ऐष्टिकहविष (ऐष्टि° Cod.) इव फलीकरणस्य त्रिवं प्रसक्तमपवदितुं सकृत्त्वं विधत्ते । हि यस्मात् सकृदेकवा-

रमेव पराञ्चः पराञ्चो गताः प्रेताः पितरोऽभवन् न तेषां पुनरावृत्तिरस्ति अतस्तेषां सकृत्त्व-मसाधारणो धर्मः ॥९॥ सकृत्फलीकृतांस्तपुलान्स्थाल्यां प्रक्षिप्य तं चरुं दक्षिणाग्नौ अपयेदि-त्यर्थः उद्वासनात्प्रागेव तस्मिंश्चरावभिघारणं विधत्ते तस्मिन्निति अधिश्रिते अग्नेरुपरि स्थापिते एतस्मिंश्चरौ पक्वे सत्याज्यं प्रत्यानयति प्रतिक्षिपति । देवेभ्यो यदाज्यं देयं तद्धोमेनैव दीयते मनुष्येभ्यो देयं यत्तत्तेषां पुरस्ताद्विज्ञानपात्रेषूद्धरन्ति उद्धृत्य पुरतः स्थापयन्ति पितॄणां तु एव-मधिश्रितावस्थायामेव चरौ आज्यमवनेयम् (चरो अज्य° Cod.) ॥१०॥ चरुमालोड्य येन का-ष्ठेन गृह्णीवा क्षयते तन्मेक्षणं तदभ्यादानं (? °दभ्रा° Cod.) स्विष्टकृद्विज्ञानं अस्य होमस्य स्विष्टकृत्स्थानीयम् । अथ पिण्डप्रदानाय स्थानविशेषं तत्संस्कारं विधाय प्रशंसति अथेति दक्षिणाग्नेरदूरेण देशे स्रुचेन (स्रुचेन Cod.) सकृदुल्लिखति एकयत्नेन दक्षिणाप्राचीं लेखां कुर्यात् तदुल्लिखितं स्थलं वेदिभाजनं वेदिस्थानीयं तत्कार्यकरमित्यर्थः ॥१२॥ उल्लिखितदेश-स्यान्तेऽग्नेर्निधानं विधत्तेऽथेति परस्तात् परस्मिन्विप्रकृष्टे पर्यन्ते । विमथ्नीरन् अपहरेयुः ॥१४॥ अदःशब्दस्थाने सम्बुद्धान्तं पित्रादीनां यथाक्रमं नाम निर्देष्टव्यम् हे यज्ञशर्मन् मम पितः अवनेनिक्ष्व दास्यमानं पिण्डं भोक्तुमात्मीयौ पाणी शोधयेति । अशिष्यते भोक्ष्यमाणाय ॥१६॥ सकृदाक्तानि एकयत्नेन क्तिन्तानि (?) उपमूलं मूलसमीपे छिन्नानि खण्डितानि बर्हींषि पि-तृयज्ञार्थानि भवन्ति एवंगुणविशिष्टानि बर्हींष्याहर्तव्यानीत्यर्थः ॥१७॥ दक्षिणा दक्षिणत उ-ल्लिखितप्रदेशे तानि बर्हींष्युपस्तृणाति । तत्र तस्मिन्बर्हिषा स्तीर्णे देशे पिण्डान्दद्यात् तत्र प्रकारविशेषमभिनयेन विधत्ते स वाऽङ्गुष्ठतर्जन्योर्मध्येन पि-त्र्येण (? पात्र्यन Cod.) तीर्थेनेत्यर्थः देवमनुष्यसम्प्रदानके दाने तद्वैपरीत्यकथनेनोपपाद-यति इतीव वाऽङ्गुष्ठेति इतीव अनेन खलु प्रकारेण अङ्गुल्यग्रेण देवतीर्थेन (? दैवार्थेन Cod.) देवेभ्यो हवींषि जुह्वति मनुष्येभ्यस्तु(? स्व Cod.)यथायोगं भोक्तव्यमन्नमुद्धरन्ति उद्धृत्य पा-त्रान्तरे स्थापयन्ति न तु तत्र देवपित्रादितीर्थविशेषोऽपेक्षितः ॥१८॥ शाखान्तराभिमतमन्त्रशेष-निरासार्थ एवकारः । पित्रनन्तरभावानां यकृब्दनिर्दिष्टानां तेषां स्वयं पिण्डदाता सहभावी भवति । तथा च एव एषा (येषां?) स्वयं [सह]भावी तेभ्यः पिण्डदाने स्वात्मने पिण्डं दत्तवान्भवति । तथादित इत्यादि अनेन हि क्रमेण पितृत्वं प्राप्ताः प्रथमं प्रपितामहः पश्चा-त्पितामहस्ततः पितेति इमं क्रमं परित्यज्य पिण्डदाने इतः पितृत आरभ्य प्रपितामहान्तं प-राक् पराचीनं पिण्डान्दद्यात् यतस्ते पितरः सकृत्त्वपराक्त्वधर्मयुक्ताः ॥११॥ पराङ्मुखः सन्पि-ण्डाभिमुख्यं विहाय (?) पर्यावर्तेत । पर्यावर्तनकालस्य परिमाणं विधत्ते स वाऽङ्गति याव-न्नमनं ग्लानिर्भवति पश्चान्तरमाह स वाऽङ्गति द्वादशक्षणात्मको यो मुहूर्तसंज्ञकः कालः ए-वकारः पूर्वोक्तपक्षव्यवच्छेदार्थः ॥२१॥ उपपल्ययन्य पिण्डसमीपं परिप्राप्य ॥२२॥ नीविः परि-धानीयस्य वाससो दशा तामुद्धृत्य विस्रंस्य । ऋतवः पितर इति वसन्तायृतुषु प्रमीतस्य त-त्तदनुरूपवप्राप्तेस्तादात्म्यव्यपदेशः तथा चान्यत्र श्रूयते यस्मिन्नृतौ पुरुषः प्रमीयते सोऽस्यामु-ष्मिंल्लोके भवति यदि वसन्ता(!) प्रमीयते वसन्तो भवतीत्यादिना । नमस्कारमन्त्रो निगद-व्याख्यात इत्यभिप्रेत्य तच्छेषमुपादाय व्याचष्टे गृह्णान्त इति । पिण्डशेषस्याघ्राणं विधत्ते अ-थेति अवघ्राणं पिण्डान्पात्रे प्रत्यवधाय प्रतिक्षिप्य कर्तव्यं तच्चावघ्राणं यजमानस्य स्वकीयो

ऽशः । स्तीर्णस्य बर्हिषः प्रतिपत्तिं विधत्ते अग्नाविति अभ्यादधाति प्रक्षिपति । उल्मुकस्यापि संसर्जनं विधत्ते पुनरिति ॥२४॥२॥४॥

अथ विधित्सिताया आग्रयणेष्टेर्मतभेदेन प्रयोजनं दर्शयंस्तावत्कहोलस्य (!) मतमुपन्यस्यति तदु इति । अयं व्रीहियवाद्योषध्यात्मको रसः । अस्य रसस्य कर्मणि षष्ठी इमं रसं देवेभ्यः प्रथमं जुष्ट्वा अथानन्तरं जुष्टशिष्टमिममश्नाम भुनज्मामहै ॥१॥ केवलमनाशनेन (!) ता इमाः सर्वाः प्रजाः पराबभूवुः पराभूता अभवन् । I do not know how to explain the नोत् : all the mss. of the text give it ॥२॥ यज्ञेनैवेति निश्चित्य एषां मनुष्यादीनां यत्कल्पं कल्पनीयं सम्पाद्यमास तत् [अ]कल्पयन् । न केवलं देवा एव ऋषयोऽप्येवमेवाकल्पयन् ॥३॥ आङ्गिरभिर्गन्तव्यावधिभूतः पदार्थः तमज्ञामहै धावाम ॥४॥ पुराणानां पुरातनानां व्रीहीणां सम्बन्धिनं तं वैश्वदेवं चरुं कुर्यात् । नेत् क्षत्रियज्ञातेरुपरि वैश्यज्ञातिं तत्समवेनारोहयाणि आरूढां करवाणि ॥७॥ अथ तस्यामेवाग्रयणेष्टौ तृतीयं द्यावापृथिव्यं हविर्विधातुमाह तऽउ इति । नवधान्यरूपं हविरनयोर्द्यावापृथिव्योः रसः । तस्य इयं भूमिरेव कपालम् ॥८॥ सर्वेषु यागेषु स्विष्टकृद्यागोऽन्वाभक्तोऽनुप्राप्तोऽस्ति शेषात्स्विष्टकृतेऽवद्यतीतोष्टशिष्टप्रतिपत्तिरूपेण तस्य विहितत्वात् अत्रैककपालं पुरोडाशं सर्वज्ञतमेव जुहोति हविरन्नवन्नाप्ने (?) ऽग्नये ना[व]द्यति अतोऽस्यैककपालस्य स्विष्टकृद्यागाभावात्सैव परिचक्षा निन्दा । दोषान्तरमप्याह उतो ज्ञत इति अपि च अग्नौ ज्ञतः सन्नेककपालः पुरोडाशो यदि पर्यावर्तेत ॥९॥ तत्र विषये आङ्गिर्ब्रह्मवादिनः कथयन्ति अयमेककपालः पर्यावृत्तोऽभूत् तेन पर्यावर्तनेन राष्ट्रमेव पर्यावृत्तं मोहिष्यति मूढं भविष्यतीति । आहवनीयो हि सर्वाज्ञतीनामाधारभूतः तत्प्राप्तेः पूर्वं पर्यावर्तने दोषः तदुत्तरकालं तु अपि दश कृत्वो दशवारं पर्यावर्तेत तत्रादरो नैव कर्तव्यः देवतोद्देशेन हविषश्चोदितद्वारे (? धारे Cod.) प्रक्षिप्तत्वात् । तस्मात्स्विष्टकृद्यागाभावकृतैव निन्दा परिशिष्यते तत्परिहाराय पक्षान्तरमाह यदीति यदि चान्ये शाखिनो वदन्ति को नाम तदुक्तदोषसंधानं कर्तुमुपेयादुपगच्छेत् अतो दोषसहित एककपालपक्वः परित्यज्यः किं तर्हि द्यावापृथिव्यस्य यागस्य द्रव्यम् तदाह तस्मादिति यदेतद्ध्रुवास्थमाज्यं (? द्रुवाज्यस्थमाज्यं Cod.) सर्वयज्ञसाधारणं तस्यैव सकाशादादाय द्यावापृथिव्यौ यजेत । आज्यस्य द्रुवावद्रूपयोगात्प्रत्यक्षरसवम् व्रीहियवादेस्तु धान्यस्य काठिन्यपरोक्षत्वम् । मेधेनेति सारभूतेनेत्यर्थः ॥१०॥ आलिशन्न अभक्षयन् लिश अल्पीयोभावे इत्ययं धातुरत्र तृणादेरल्पीभवनहेतौ भक्षणे वर्तते ॥११॥ किल्बिषं रोगनिदानं पापम् ॥१२॥ अग्रियमिवेति अग्रे भवमाग्रियम् अग्राद्घक्षौ चेति (अघाघ्रको वेति Cod.) । ईज्ञानानीज्ञानयोराग्रयणविषयां व्यवस्थां दर्शयति स यदिति यदि स यजमानः ईज्ञानः सोमयागेनेष्टवान्स्यात् केवलं हविर्यज्ञयाजी सन्दर्शपूर्णमासाभ्यामेव यजेत अथानन्तरमेव एतेनाग्रयणेन यजेत न प्रागित्यर्थः [दर्शपूर्णमासायागपक्षे तु to add?] किं तर्हि तदा कुर्यादिति तदाह यद्यु इति यदि तु दर्शपूर्णमासादिभिरनीज्ञानोऽनिष्टवान्स्यात् तदा स यजमानः चातुष्प्राश्यं चतुर्भिर्ब्राह्मणैः प्राशितव्यमोदनमन्त्रं दक्षिणाग्नौ पक्त्वा ब्राह्मणेभ्यो दद्यात् (दक्त्वा Cod.) ब्राह्मणाश्च तं भुञ्जीरन् ॥१३॥ ब्राह्मणभोजनस्यापि यागोत्पादकत्वमुपपादयति द्वया वा इति । तत्तथा सति यथा

वषट्कारेण देवेभ्यो दत्तं स्वाहाकारेण हुतं च भवति एवमेवास्यानोज्ञानस्य यज्ञमानस्य एतदुब्राह्मणभोजनं भवति । यागऽइव भोजनेऽपि दक्षिणादानं विधत्ते तत्रोऽइति । केचित्त्वाग्रयणेष्टावधिकृतस्यानोज्ञानस्य नवधान्येनाग्निहोत्रहोममभिधोयते (!) अत एव सूत्रितं कात्यायनेन (४. ६. ११.) नवैः सायं प्रातरग्निहोत्रहोम इति आपस्तम्बेनाप्युक्तम् अपि वा नवानां यवानां सायं प्रातर्भुञ्ज्यादिति तदत्र निराकरोति नाग्निहोत्रऽइति अग्निहोत्रकर्मणि भवं हविर्न भुञ्ज्यात् यदि भुञ्ज्यादिन्द्वाग्न्यादोनामाग्रयणदेवतानामग्निहोत्रदेवतया (तण Cod.) सह समदं कलहं कुर्यात् ॥ १४ ॥ ३ ॥ ४ ॥

आवृत्तिगुणविकृतो दर्शपूर्णमासया[ग]प्रयोग एव दाक्षायणयज्ञः तं विधित्सुराख्यायिकामाह प्रजापतिरिति ॥ १ ॥ एके शाखिनः । एष एव खलु प्रजापतिर्वसिष्ठो नान्यः (?) सर्वश्रेष्ठत्वात् ॥ २ ॥ श्वैक्नः श्विक्नस्य पुत्रः । स एतमिति (!) एतं प्रतोदर्शं स इति व्यत्ययेनैकवचनम् (!) ते तत्रत्या (?तत्तत्र° Cod.) ज्ञनाः प्रत्यासुः केनचित्कारणेन प्रतिचिक्षिपुः तेन च दाक्षायणयज्ञेनेष्टे सति तेषां ज्ञनानां विवचनं विशिष्टवचनं पक्षपातवचनमेवास अस्मिन्बङ्क्ष्यमानं कृतवत्तः ॥ ३ ॥ सृञ्जयपुत्रः सुप्रा नाम । तत्तस्मात्कारणात् एतत् एतर्हीदानीमपि निर्वचनं निरुक्तवचनमस्ति व्यवहारलोके विद्यते ॥ ४ ॥ श्रुतर्षेः पुत्रो देवभागो नाम ॥ ५ ॥ पर्वतो नाम कश्चित् तस्य पुत्रः पार्वतिः । असपत्नानुपबाधा शत्रुभिरबाधिता ॥ ६ ॥ तप्तं पयो दध्ना संस्कृतं सत्पयस्या भवति ॥ १० ॥ अस्य दाक्षायणयज्ञस्य सोमयागरूपतां प्रतिपादयति अथेति । अमुमुपवसथऽइति सुत्यादिवसात्पूर्वमहरुपवसथः । प्रकरणान्तरे विहितत्वेन विप्रकर्षादमुमिति विप्रकृष्टवाचिना अदःशब्देनाग्नेषोमीयस्य पशोः परामर्शः ॥ ११ ॥ इत्थं दाक्षायणयज्ञस्य सोमयागसाम्यं सम्पाद्य तत एव हेतोः फलसाम्यमाह स पौर्णमासेन चेति ॥ १३ ॥ प्राणापानरूपयोरग्नेषोमयोर्हविषा तृप्तयोर्निष्क्रमणाद्धि वृत्रो मृतः तथा चाम्नायते तस्माद्ऽज्ञश्च्यमानादग्नेषोमौ निरक्रामतां प्राणापानौ वाऽएताविति ॥ १५ ॥ अभिषुणोत्येवैनमिति पूर्वेद्युः कर्तव्याभिषवस्थानोयोऽयमग्नेषोमोययाग इत्यर्थः । तीव्रोकरोति तीव्रमतिशयेन मदकरं करोति ॥ १६ ॥ सांनाय्यभाजना सांनाय्ययागस्य स्थानभूता स्थमावास्या । एनं सोमम् । स एष चन्द्रः प्रतिपदि पश्चाद्दृशे कलारूपेण दृश्यते ॥ २० ॥ तस्य वाजिनहोमस्य कालं विधातुं स्तौति स वाऽइति । यज्ञस्य पश्चाद्भागे प्रस्तरपरिधिप्रहरणोत्तरकालं वाजिनहोमः कर्तव्यः । अध्वर्युरग्रे प्रथमं प्रागेव प्रागपवर्गमल्पं वाजिनं जुहोति अग्नेः वोहोति यदा होतानुवषट्करोति तदा स्विष्टकृत्स्थानोयं वाजिनशेषमुत्तरपूर्वस्यां दिशि जुहोति ॥ २३ ॥ हुतशिष्टेन वाजिनेन दिग्व्याघारणं विधत्तेऽथ दिश इति ॥ २४ ॥ एवं च सति एतद्वाजिनमृत्विजः सोममेव सोमसदृशमेव कुर्वन्ति ॥ २५ ॥ ४ ॥ ४ ॥

अथ चातुर्मास्यानि विधित्सुस्तत्र वैश्वदेवस्य प्रजासृष्टिहेतुतामाख्यायिकया प्रतिपादयति प्रजापतिरिति ॥ १ ॥ यस्मादग्रे एवमासीत् तस्मात्कारणात्तदुक्तमर्थजातमृषिणा मन्त्रेणाभ्यनूक्तं प्रतिपादितम् [ऋक्सं° ८. ३०. १४.] । अत्याममत्ययं विनाशम् । अर्कमर्चनीयमग्निम् ॥ ४ ॥ अथानन्तरमेव यज्ञायते तदेव ज्ञायते अन्यदज्ञायमानं (? °दाज्ञ° Cod.) विपद्यते ॥ ५ ॥ आदयन्ति भाजयन्ति ॥ ६ ॥ आयतनं स्थानम् । मारुतस्तु इति तुशब्दः पयस्यायागस्य न्यायप्राप्तं षष्ठस्थानत्वं व्यावर्तयति मारुतः सप्तकपाल एव षष्ठोऽनुष्ठेय इत्यर्थः । अनिषेधा (!) इव अ-

ानषेधुकः (!) नियन्तृरहिता इव । विमथिष्यामः हिंसिष्यामः ॥१२॥ यदि तु स्वतवोभ्यः प्रतिपादिके याज्यानुवाक्ये न लभते तदा स एव प्रागुक्तः केवलमारुत एव यागो भवति ॥१४॥ दध्ना संस्कृतः पयोविकारः पयस्या असौ चामिक्षाशब्देनान्यत्राप्याम्नायते तन्ने पयसि दध्यानयति सा वैश्वदेव्यामिक्षा वाजिभ्यो वाजिनमिति ॥१५॥ अक्तिमं हविर्विधत्ते अथेति ॥१७॥ तत्र यानि वैशिष्यकाण्यङ्गानि तानीदानीं विधातुं प्रतिज्ञानीते अथात आवृदेवेति आवृच्छब्दः प्रकारवाची चोदकप्राप्तायामितिकर्तव्यतायां प्रकारविशेषः कथ्यते । अग्निमन्थनादेर्वैशिष्यकस्याङ्गस्य विधास्यमानत्वात्तत्सहवाचितमुत्तरवेद्यावपनमपि (? °त्सहवचि° Cod.) प्रसक्तं निषेधति नोपकिरन्तीति सत्यां ह्युत्तरवेदौ तत्रानुष्ठीयमानमेतत्कर्म तया निरुद्धगति स्यात् तदभावे तु तत्कृतनिरोधाभावात्क्रियमाणं कर्म विसृष्टं व्यापनशीलमसद्वेत् अत एव परिक्षेदाभावात्सर्वं कृत्स्नं सम्पूर्णमसत् कात्स्न्यार्द्वैश्वदेवसम्बन्धयोग्यमसत् न ह्यसर्वस्य सर्वदेवसम्बन्धो घटते अतो विसृष्टवादिसिद्धये उत्तरवेदिर्न कार्येत्यभिप्रायः । बर्हिराहरणे विशेषं विधत्ते त्रेधेति त्रेधा त्रिविधं बर्हिः प्रथमं संनह्य तदेव पुनरेकधा एकविधं संनह्यति । तस्मिन्नेव बर्हिषि धर्मविशेषं विधत्ते प्रस्व इति प्रसुवते फलानीति प्रस्वः पुष्पिताङ्कुराः (°शः Cod.)। प्रसूतयुक्तानां कुशानां प्रस्तरत्वेन ग्रहणं विधत्ते तमिति तैः प्रसूभिः कुशैः प्रस्तराख्यं मुष्टिं सम्भरेत् ॥१८॥ प्रकृतितोऽप्राप्तकालविशिष्टमग्निमन्थनं (? °प्तचातकालविशि° Cod.) विधत्ते आसायेति प्रकृतिवद्यावेरासादनान्तं कृत्वाग्निमन्थनं कुर्यात् ॥१९॥ चोदकप्राप्तानां प्रयाजानां संख्यान्तरमाह नवेति ॥२०॥ चोदकप्राप्तस्य समिष्टयजुषोऽपि संख्यान्तरमाह त्रीणीति । तद्धि प्रकृतेर्न्यूनो भवति प्रकृतौ (त्यै Cod.) प्रयाजानां पञ्चत्वादनुयाजानां त्रित्वात्त्वाच्च । यजमानस्य गोष्ठे प्रथमं ज्ञातः प्रथमजः ॥२१॥१॥५॥

विधित्सितस्य वरुणप्रघासाख्यस्य द्वितीयस्य पर्वणो वरुणपाशविमोचनहेतुत्वमाख्यायिकया प्रतिपादयंस्तद्विधिमुपनयति (धिमुन° Cod.) वैश्वदेवेनेति पुरा वैश्वदेवयागेन प्रजापतिना सृष्टाः प्रजाः वरुणसम्बन्धिनो यवान्नत्वुर्भक्षयामासुः तस्माद्वरुणसम्बन्धियवप्रघासनात्प्रजा वरुण्यप्रघासाः तत्पाशगृहीतानां तासां पाशविमोचनाय क्रियमाणा यागा अप्युपचारेण वरुणप्रघासाख्याः संज्ञाताः ॥१॥ वैश्वदेवानन्तरं चतुर्थे मासि सम्पूर्णे सति ॥४॥ वैश्वदेवपर्वण्यादितो यान्याग्नेयादीनि पञ्च हवींषि तान्यत्रापि ॥७॥ अध्वर्युकर्तृकायामुत्तरस्यां वेद्यां प्रतिप्रस्थातृकर्तृकायां दक्षिणस्यां च द्वे पयस्ये हविषी भवतः ॥१॥ उभयोः पयस्ययोः करीराणि प्रक्षिपेत् मधुराः फलविशेषाः करीराणि तानि चोत्तरापथे प्रसिद्धानि । कं सुखम् ॥११॥ शमीपलाशानि शम्याः पर्णानि ॥१२॥ अतुषान् तुषरहितान् । कारम्भपात्राणि पिष्टचूर्णाः (? प्रष्टचचू° Cod.) कारम्भाः तन्मयानि पात्राणि ॥१४॥ यद्यनैलकोरिति (!) एलको (!) मेषः तत्सम्बन्धरहिता अनैलक्य ऊर्णाः कंवलोपादानभूतानि तद्ज्ञातीयरोममयाणि सूत्राणि । प्रणिड्य प्रक्षाल्य । कुशमया एवोर्णाः ॥१५॥ तावध्वर्युप्रतिप्रस्थातारौ उभौ ॥१९॥ प्रतिपरैति निवर्तते पत्नी यत्रास्ते तं देशं प्रति गच्छेत् । केन ज्ञारेण चरसि वर्तसे । अक्तःशल्पा शरीरमध्ये दुश्चरितज्ञानितेन पापरूपेण शल्पेन युक्ता । प्रतिज्ञानीत प्रतिब्रूयात् ॥२०॥ एतयैव मन्त्रतः होष्यमाणं कारम्भपात्रलक्षणं हविर्भोक्तमाक्षयति ॥२१॥ भुक्त्वादिपात्रं विहाय शूर्पेणैव तानि भुञ्जयात् तेन हि शूर्पेण लुनापवनद्वारा (?) अन्नं क्रियते ॥२३॥ सुवाधारहोमादेः (?)

पूर्वभाविवं कारम्भपात्रहोमस्य विधत्ते पुरेति यज्ञो वषट्कारप्रदानो यज्ञतिचोदित आग्नेयादिः आज्ञतयः स्वाहाकारप्रदानाः हुहोतिचोदिताः । अज्ञतं होमसंस्काररहितमदन्ति भक्षयन्ति अज्ञतादः । मरुतां वैश्यजातिवेन । विमेथिरे विलोलयन्ति स्म संश्लेषितवन्तः । पाशविमोचनात्प्रागेव विमथ्नते संविश्लेषयन्ति (!) तस्माद्वरुणपाशविमोचनार्थायज्ञादाज्ञतिभ्यश्च पूर्वमेव कारम्भपात्राणां होमेन मरुतां शमनं युक्तम् ॥२४॥ तेनेन्द्रेण निषिद्धाः निवारिता मरुतो भवेयुः ॥२६॥ हे इन्द्र अत्र एषु पृत्सु नोऽस्मदीयाः प्रजाः मो मा उ हिंसीः हे बलवन्निन्द्र देवैः मरुद्भिः सहितः ते तव अवयाः अवयजमानन्नूपकारम्भपात्रहोमोऽस्ति यव्या यवमयैर्हविर्भिर्हविष्मतो यस्येन्द्रस्य मरुतो देवाः (!) अनुचराः (!) गोः स्तुतिरूपा वाक् वन्दते स्तौति ॥२७॥ हे यजमानस्यामात्या ऋत्विजश्च यूयं यजमानस्य गृहान्पत्न्या सह भवन्तः प्रगकृत अन्यस्मादेशात्पत्न्यासनलक्षणात् ऊढया (!) आहवनीयसमीपं प्रापितया पत्न्या सह खल्विदानीं वर्तन्ते । यज्ञस्यापरभागऽवस्थितां तामेतदेतर्हि प्राचीं प्राग्गकृतीं पूर्वभागसम्बन्धिनीं यज्ञं प्रासोषदत् प्रापिपत् प्रतिप्रस्थाता ॥२८॥ संमृजन्ति एकस्मिन्नप्याग्नीध्रे पूजार्थं बज्ञवचनम् । स्रुच आदायेति अध्वर्युप्रतिप्रस्थात्रोरुभयोरपि प्रत्येकं शुङ्कपभृतौ स्तः तदभिप्रायेण स्रुच इति बज्ञवचनम् ॥३०॥ ध्रौवस्याज्यस्य चतुरवदाय ॥३१॥ उपास्ते उपविशति आ पयस्याप्रचरणकालात् ॥३५॥ कृत्स्नं मेषं स्रुचि अवदधाति ॥३७॥ प्रधानयागानन्तरमनुष्ठेयं स्विष्टकृदादिप्रयोगजातं सर्वमनुक्रमति अध्वर्युरेवाहाग्नयऽइत्यादिना अनुब्रूहोति स्विष्टकृद्यागस्य पुरोऽनुवाक्याप्रैषः अनुष्ठितं प्रधानयागं न्यूनातिरेकदोषपरिहारेण स्विष्टं शोभनयज्ञं करोतीति स्विष्टकृत् ॥३९॥ इडां समवदाय सर्वेभ्यो हविर्भ्यः सम्भूयैकस्मिन्निडापात्रे अवदधित्यर्थः (?) अतिप्रज्ञिहोते उत्तरा वेदिमतिक्रमय्य (? °मेंध्य Cod.) तदिडापात्रं प्रगमयेत् ॥४०॥ अथाध्वर्युरिति इडोपह्वानादिकं प्रकृतिवदेव कृत्वा अनुयाजार्थमभ्यनुज्ञापकमिमं प्रैषमध्वर्युरेव ब्रूयात् । पृषदाज्यं दधिमिश्रमाज्यम् पृषदाज्यधानीगतं पृषदाज्यं शुङ्कामर्धमासिच्य शिष्टमाज्यमुपभृत्यानयेत् । देवान्यजेति प्रथमोऽनुयाजप्रैषः ॥४१॥ समुज्जुम्पतः समुच्क्रिनन्तः । अनुप्रहरतः स्वस्वप्रस्तरमग्नौ प्रक्षिपतः ॥४२॥ प्रतिपरेत्य आहवनीयदेशात्प्रतिनिवृत्य गार्हपत्यसमीपं गत्वा । उपास्ते तूष्णीमुपविशति ॥४५॥ यजमानयोर्यजमानपत्न्योः । क्षामकर्षमिश्रं क्षामोऽतिपाकेन दग्धः पात्रे संसक्तः (? सस° Cod.) कृषि विलिष्यत (?) ऽइति कर्षः क्षामश्चासौ कर्षश्चेति क्षामकर्षः तेन मिश्रं हविरादाय अवभृथमुदकं प्रति यन्ति एतत् [हि] क्षामकर्षमिश्रं हविः वरुण्यम् । सौमिकावभृथवत्प्रसक्तासामगानं निषेधति तत्र न सामेति न क्वत्र वरुणप्रघासे साम्ना किमपि प्रयोजनं क्रियते । अवभृथसमीपमभ्यवेत्य हविरुपमारयति अप्सु प्रक्षिपति ॥४६॥ काममिति स्नानानन्तरमन्ये वाससी परिधापयेत् ॥४७॥ उत्त्वा वापयित्वा । वरुणप्रघासार्थं निमित्तायामुत्तरवेद्यां यदग्निहोत्रहवनं न तद्युज्यते यस्मादेवं तस्मात्कारणात् वरुणप्रघासस्थानाद्गदवसानं [निष्क्रमणं] कर्तव्यम् । दर्शपूर्णमासवच्चातुर्मास्यानामनुष्ठानबाहुल्याभावादुत्सन्नयज्ञवमतस्तेषामप्रतिष्ठितवेन तदनुष्ठाने यजमानस्याप्यप्रतिष्ठा सम्भाव्येत अतस्तस्य प्रतिष्ठायै स्वयंप्रतिष्ठितः पौर्णमासयागः सम्पद्यते ॥४८॥२॥५॥

अथ साकमेधाख्यस्य विधित्सितस्य तृतीयस्य पर्वणः पापक्रूपशत्रुक्षयहेतुवं वक्तुं वृत्तान्तं संकीर्तयति वरुणेति । अनूचीनं नैरुक्तैर्येण वर्तमानमहरनूचीनाह्नम् ॥१॥ मेधः सारम् ।

क्षीरौदन इति पयसि तण्डुलान्प्रक्षिप्य अपणे सति क्षीरेण संस्कृत ओदनो निष्पद्यते । बलकारः सारांशो मेधशब्दार्थः ॥४॥ तस्य गृहमेधीययागस्य आवृत् क्रियाप्रयोगः क्रमोऽभिधीयते । सांतपनोयेष्टी (? °निष्टी Cod.) या वेदिर्बर्हिषा स्तोर्णाभूत् गृहमेधीयस्यापि सैवोपकोति । इध्मस्य स्थाने शकलानेव संमृज्य परिधिभिः सह तान्सादयेत् ॥५॥ पिशोलशब्दः शरावचाचो । एनं चरुं द्वेधा विभज्य तयोनिदध्यात् । पात्रस्थयोस्तयोरोदनयोर्मध्ये सर्पिःपूर्णावटौ कृत्वा ॥६॥ तत्तदानोमेव प्रतिवेशं (श Cod.) समापनार्थं प्रतिनिधिवेन (? धेवेन Cod.) निवेशनस्थानं प्रतिवेशः तत्स्थानोयमाज्यं दक्षिणाग्नावाज्यस्थाल्यामधिश्रयेत् (? तास्तावाज्य° Cod.) । सोक्षमेवेति यस्यां स्थाल्यां चरुः अप्यते तत्सहितमेव ॥११॥ अनिरशितां शेषसहितां कुम्भां पात्रान्तरेणापिधाय । हविषा पूर्णा यस्मिन्कर्मणि तत्पूर्णादर्वम् ॥१६॥ पूर्णदर्वाख्यस्य कर्मणः कालं विधत्ते अथेति प्रातरग्निहोत्रे हुते वाहुते वा कुम्भ्याः सकाशात् दर्व्या आधानेनोपहन्ति गृह्णीयात् ॥१७॥ साकमेधेषु प्रधानभूताया महाहविराख्याया इष्टेरारम्भं प्रतिज्ञानोते अथात इति । वरुणप्रघासतन्त्रं तत्रातिदिशति तथथेति तस्य पूर्वोक्तस्य [महाहविषो] वरुणप्रघासस्य हविषो यथानुष्ठानं तथैव महाहविषो वक्ष्यमाणस्यापि ॥२०॥ ३॥५॥

अथ तस्य महाहविषः प्रयोगक्रमं विधित्सुः प्रागेतेन देवैर्विज्ञितं (? प्रागेतैर्वैर्दिदेवा Cod.) प्रति[पादयति] महाहविषा हेत्यादिना ॥१॥ वरुणप्रघासवत् ॥२॥ ॥११॥४॥५॥

अथ पितृयज्ञं विधित्सुः पितृणामुत्पत्तिमाह महाहविषा हेति । यानेवासुरा अघ्नन् अमारयन् ॥१॥ अत्रास्मिन्कर्मणि अस्य यजमानस्यात्मनः स्वस्य अनुचरणेन (!) अनुगमनेन च यदेव प्राणिजातं हन्यते वा ताड्यते यद्वा मोह्यते मिद् हिंसायाम् ॥३॥ इत्येव एवमेव ॥५॥ तस्याः पयसि प्रक्षिप्तो मथितो धानाचूर्णः एकशलाकया एकयैव शलाकया एकवारमालोलितो हविर्भवति ॥६॥ पक्वेन पाकसंस्कृतेन चरुपुरोडाशादिहविषा देवेभ्यो दत्तेन केवलं हविर्यज्ञयागिन एव सन्तः ॥७॥ चतस्रः कोणा यस्याः सा चतुःस्रक्तिः ॥१०॥ पूर्वस्यां दिशि आहवनीयसमीपे प्रत्यङ्मुखाः सन्तो देवा मनुष्यानभि (°तृतो Cod.) यजमानानभिलक्ष्य उपागता भवन्ति तस्मात्कारणात्तेभ्यो देवेभ्यः प्राङ्मुखस्तिष्ठन्नध्वर्युर्जुहोति ॥११॥ तत एव तस्या वेदेः सकाशादेव सोऽध्वर्युः प्राक् प्राच्यां दिशि स्तम्बयजुर्हरेत् । तस्या वेदेः परिग्रहमभिनयेन (प्रतिग्र° Cod.) दर्शयति अथेत्येवाग्रऽइति अग्रे प्रथममित्येवमेव पश्चाद्भागे दक्षिणापवर्गं स्रुवया परिगृह्णीयात् । हार्यं हरणीयम् ॥१२॥ यावद्बर्हिः प्रस्तरभाजनं प्रस्तरस्य योग्यं पर्याप्तं भवति तावत्परिशिनष्टि अवशेषयेत् । प्रसलवि प्रदक्षिणम् । अन्ववागात् अनुप्राप्नोत् । अपोदेति अपगच्छति ॥१५॥ इत्यादित्यभिनयदर्शनो (°ने ?) अनेन प्रकारेण ब्रह्मयज्ञमानौ आहवनीयस्य पुरतो गत्वा अप्रदक्षिणं पर्यापत्य (!) पितृयज्ञवेदेः पश्चाद्देशं परीतः परिक्रामतः ॥१८॥ परिवृते परिवेष्टिते स्थाने ॥२०॥ अपबर्हिषः बर्हिश्चतुर्थः प्रयाजः तद्वर्जं चतुरः प्रयाजान्यजेत ॥२३॥ व्यतिषङ्गं परस्परसंसृष्टं यथा भवति तथा ॥३२॥ प्राशनपक्षमप्याह प्राशितव्यं वेवेति इडावदानं प्राशित्रावदानं च यज्ञान्तरवदत्रापि प्राशितव्यम् यस्येति इडां प्राश्नन्त ऋत्विजो यस्य कस्यचिदात्मनः सम्बन्धिन्यग्नौ वैश्वानरे तज्ज्ञविर्जुह्वति अतः प्राशने न शेष इत्यनेनाभिप्रायेण ॥३३॥ दास्यन् पिण्डदाता । अपसलवि अप्रदक्षिणम् ॥३४॥

स येमामिति इदंशब्देन उत्तरापरदिशमभिनयेन दर्शयति । हस्तगलेपं निमृष्टे निमृज्जीत ॥३६॥ देवसम्बन्धिनोऽस्य यज्ञमानस्य देवान्परित्यज्य यत्पितृयज्ञाचरणं तेन देवानां मनसि क्रोधोऽभूत् पुनरावृत्याहवनीयोपस्थानेन तदौदासीन्यजनितमपराधं देवेभ्यो निह्नुते शमयति ॥३७॥ अपबर्हिषौ बर्हिः प्रथमोऽनुयाजः तद्बर्हिषौ द्वावनुयाजौ यजति ॥३८॥ एतच्चतुःसक्त्यां वेद्यां स्तीर्णं बर्हिः परिधींश्चादाय युगपदग्नावनुसमस्यति प्रक्षिपति ॥३७॥१॥६॥

अथ विधित्सितानां त्रैयम्बकहविषां शल्पनिर्हरणहेतुबमितिहासेनोपपादयति महाहविषेति । तान्देवान् तस्माच्छल्पात् निरहरन्त वियोजितवन्तः निर्हरणे प्रकारमाह तान्व्यवृहन्नेति वृङ्ग उद्यमने शल्पप्रोतांस्तानस्माच्छल्पादुद्यतवन्तः (°द्धृत° ?) ॥१॥ अक्ताः आज्येनाभिघारिताः । अभिमानुक इति पशुप्रभवेनाज्येन यदि रौद्रान्पुरोडाशानश्नीयात् ततः स रुद्र आज्यसम्बन्धद्वारा (री Cod.) तत्कारणभूतान्पशूनभिमंसुकः (!) अभिमन्तुं बाधितुं शक्तः स्यात् ॥६॥ ज्ञांधितं (ज्ञाथितं Cod.) ज्ञनैः परिकल्पितम् । अत एवोक्तमभियुक्तैः वटे वटे वै-श्रवणः चवरे चवरे शिव (शिप Cod.) इति ॥७॥ पलाशवृक्षस्य पर्णेन ॥८॥ उर्वारुकं कर्मर्कटीफलम् (!) ॥१२॥ भगस्य सौभाग्यस्य ॥१३॥ एतान्पुरोडाशानुत्क्षिपति यथा गौः पृथिवीनामैतत् पृथिवो तान्नोदाम्नुयात् यथा भूमौ न पतन्ति तथान्तरिक्षे पुनरञ्जलिना धारयेत् । निर्मिमते निर्हरन्ति । पुनर्ग्रहणाशक्तौ स्पर्शनं विधत्ते तान्विलिप्सन्त इति लब्धुमिक्षन्तो लिप्सन्तः तद्विपरीता विलिप्सन्तः लब्धुमशक्ताः सन्तः भूमौ पतितांस्तान्पुरोडाशान्पश्चादुपस्पृशन्ति ॥१६॥ यत्र तृणमये आवपने धान्यं वध्यते तन्मूतम् मूतमेव मूतकम् । वेणुमय्यां यष्ट्यामुभयतः बद्ध्वा (? वधा Cod.) यद्वा कूपे उभयतः शिक्याभ्यामाबध्य (? भ्यांमा Cod.) वेणुनिर्मिता भाजनयुक्तो दारुविशेषो वा परपर्यायः क्रुपः (!) तस्मिन्नुभयतः उभयपार्श्वयोर्वेणुबभाजनयोः तान्नोदानाबध्य । मूजवान्नामोदीच्यः पर्वतः । अस्मात्स्थानादन्ववार्जति अनुगमयति यस्मिन्यस्मिन्स्थाने अस्य देवस्य चरणं वर्तनमस्ति तत्स्थानमनुलक्ष्य । अस्य रुद्रस्य अत्रास्मिन्मूजवत्पर्वतसम्बन्धिनि परः परस्ताद्भागे चरणं वर्तनं भवति । नितरां स्वापयत्येनम् कृत्तेर्मृदुत्वेन सुखकारत्वात् ॥१७॥ अप्रतोक्षमप्रतीक्ष्य ॥१८॥२॥६॥

अथ शुनासीरीयं विधित्सुः तस्य शुनासीर्यस्य चतुर्थपर्वणः संवत्सरसत्रक्षणफलसाधनत्वं प्रतिपादयिष्यंस्तावदुपोद्घातत्वेन चातुर्मास्यानामक्षय्यफलसाधनत्वमाह अक्षय्यमिति । एतेन चातुर्मास्ययज्ञेन 'वसन्तायर्तवात्मक एव भूत्वा देवानप्येति चातुर्मास्ययाज्ञो अपिगाकृति ॥१॥ तकुनम् सुखनामैतत् सुखहेतुत्वात्कुनमित्युच्यते । यो रस आसीत् सुखहेतुः सारभूतोंऽशोऽभवत् तत्सीरमित्युच्यते ॥२॥ उक्तं वाक्यशेषमत्राप्यतिदिशति स बन्धुरिति कृत्स्नस्य कर्मणः फलप्रतिपादनसमये पूर्वं यं वाक्यशेषं या वै देवानामित्यादिकमवोचाम उक्तवन्तः स एव अन्यापि शुनासीर्यस्य हविषः स्तावकः उक्तविधयोरेव (°रेवा Cod.) वाच्यादित्यरूपेणावस्थितत्वादिति भावः ॥५॥ अभिलक्ष्य संज्ञानते संज्ञानाना भवन्ति । अतः पयसः संमतिहेतुत्वात् विज्ञिग्यानं साकमेधैर्विज्ञितवन्तमेनं यज्ञमानं श्रियै सर्वाः प्रज्ञाः अभिसंज्ञानान्ति अभिसंज्ञानीरन् अनुमन्यन्तामिति अनेनाभिप्रायेण पयसः करणम् ॥६॥ तत् तदानीं तदनन्तरकालमेव स यज्ञमानः शुनासीर्येण यजेत ॥१०॥ सोमेन यक्ष्यमाणस्य पक्षान्तरमाह तद्वैक इति । तत्र खलु शुनासीर्यानुष्ठाने एके शाखिनो रात्रीरापपयिषन्ति अनेन च (!) यागेन

कतिचिद्रात्रीरासुमिच्छन्ति । आगामिनीभ्यां फाल्गुनीभ्यां युक्ता पौर्णमासी फाल्गुनी षष्ठ्यर्थे चतुर्थी फाल्गुन्याः पौर्णमास्याः पुरस्तात् यत् अदो विप्रकृष्टे उत् ऊर्ध्वं चन्द्रमाः अस्मिन्दृश्यत ऽइत्युद्दृष्टं शुक्लपक्षः तत् तत्र प्रथमाद्यन्यतमस्यां तिथौ शुनासीर्येण यजेत ॥११॥ अथानन्तरमेव सोमयागार्थं दीक्षेत कालविलम्बो न कार्यः । दैवान्मानुषाद्वा विघ्नाद्विलम्बेऽपि तस्यावधिमाह तत्रेति तं तभो (तत्ततो?) नानोज्ञानमपरा फाल्गुनो वर्षतयात् (!) । अयं च पक्षोऽधिकारिविशेषस्यैवेति निगमयति इति न्विति द्विविधो हि चातुर्मास्ययाज्ञिनो सकृदनुष्ठायोत्सृज्ञमानः पुनः प्रयुञ्जानश्च ॥१२॥ चातुर्मास्याङ्गभूतं वपनं मोमांस्यते अथात इति । परिवर्तनस्य परितः केशश्मश्वादीनां वर्तनस्य वपनस्य विकारो (विवारो Cod.) ऽधिक्रियते । निर्धयति रसं निष्कृष्य पिबति ॥१४॥ यत् यस्मात् परितः शिरो वर्तयते केशान्वापयति ॥१६॥३॥६॥

वैश्वदेवादिषु सर्वेषु परिवर्तनं सेतिकर्तव्यताकं विधित्सुस्तेषां वेषां वृत्रबधहेतुवं विज्ञयहेतुवं च समानमिति प्रतिपादयति तदिति । तत् तत्रोक्तविषये साकमेधानामेव वृत्रबधहेतुवं ज्ञयहेतुवं चेति यदाङ्गः कथयन्ति तत्र तथा सर्वेरेव हि चातुर्मास्यैः वृत्रहननं विज्ञयं च प्राप्नवन्तो देवाः ॥१॥ आषाढ्यादीन् ॥३॥ कार्त्तिक्यादीन् ॥४॥ त्र्येनीति त्रिषु स्थानेषु एतं (? एन Cod.) श्वेतं वर्णो यस्याः सा त्र्येनी वर्णादनुदात्तादिति [पा° ४. १. ३९.] एतशब्दात् ङीप् तकारस्य च नकारादेशः । श्वाविन्नामकस्य मृगस्य लोम शलली उत्कलक्षणा सा वक्ष्यमाणपरिवर्तनहेतुवेन स्वीकार्या । लोहितवर्णः ताम्रमयः क्षुरः । शलल्या केशान्विभज्य क्षुरेण परितो वापयेत् (? वापेत् Cod.) ॥५॥ चातुर्मास्येनेष्टवन्तं यजमानमन्विष्यन्तो ज्ञनाः ब्रह्मलोकादवाचीनेषु लोकेषु न विन्दन्ति न लभन्ते ॥१॥४॥६॥ इति सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे माध्यन्दिनशतपथब्राह्मणभाष्ये द्वितीये काण्डे षष्ठोऽध्यायः पञ्चमश्च प्रपाठकः ॥ ॥ समाप्तं द्वितीयं काण्डमेकपादिकानाम ॥ ॥

VARIOUS READINGS.

Adhyâya १. २. ४ पुरऽऋद्धा Sây. - १३ चिक्ये Sây. - १६ °वर्वर्क्°, °वृढा° A., and व्यवत्ससाद (!), व्यवसेदुः Sây. - १९ अनपरार्द्धं A. - ३. ३ भवति दे° A - ५ विहि A. - ४. २ °त्तद्वपि A. - ३ तं ना° A.B.*) - ५ सर्पिरासे° A. - ७ स सदेव°

*) B (Chambers 39) is not accented. — The readings of M (Mill) are marked but occasionally.

A. - ११ प्रत्युड्ड A प्रत्यंड्ड B. - २० तं वै तथैव A. - २५ °तन्वेकं AB. - २६ पु-रः A. —

Adhyâya २.१.१ जनयते यदग्निं A. - २ हवीꣳषि A. - ६ °येतैतथैव A. - १५ तस्माड्ड A. - १६ प्रत्युग्यामिनी A: the printed accent under *pra* is an addition, but I am not certain if I have been right to do so. - २० °ह्नी° A. - २१ तन्वेक° AB. - २.१ यन्वेव and हविर्यज्ञं A. - ३ स स यावानेव. - ५ दग्यान्वेव A. - ६ द्वेधा A. - ८ स्मैष A. स्मैषं B. एषां Sây. - १३ अथैन वयं ने-व A. - २० ऊचु। A., which might be indeed the correct reading. - २० न वदं ज्ञातू A. - ३.४ यावह्नो - यावह्न B. Sây. and second hand in M. I am not certain if I have been right to print यावत्सो; it is indeed maintained by A and M, but there are occurring here in A several instances, where either *ts* is written instead of *ch* (*dutsunâm*) and of *ç* (*âditso*, *puroḍâtsasya*), or in the contrary where *ts* is given by *ch* (*enachaha*) and by *ç* (*âsîçâkamedhair*, *tasmâçaurya*). - ४ उपति° Sây. - ७ वर्षा हि A. - २० ध्रियेर् स्वाहा A °रंस्वाहा B, and °ज्यपां जु° AB. - २२ डुत्सु° A डुस्कु° B. - ४.४ °त्मन्येवा° B. Sây. - ६ योऽयं पवते तत A. - ८ तदृषो A. - ११ स्तावः Sây.

Adhyâya ३.१.३ The ल of ईलित is remarkable enough, as it is else in the Mâdhyandinaçâkhâ regularly given by ड. - १४ °ज्ञाग्नि A. - १५ यन्वे-वि A. - २४ °मेवानु A, and this is the correct reading. २.४ प्रातराह्न° A. - ६ धूय्यत A. - ११ बल्बली° M. बल्वली AB. - ३.६ संत्स्य A. - ८ संम्रियते AB., and यदा यदैव A. (! instead of यदा-यदैव; the accent under the व is wan-

ting by a misprint). - ४.६ यदिंधि A. - १ यन्पृङ् A. - १२ एष तपति A. - २३ नाविन्दन् Sây. - २८ ययेनं न A. - ३१ the Saṃhitâ (३.२६) reads सूम्नाय. - ३१ शुधि A. —

Adhyâya ४.१.६ and १२ तत्स्यत्वा AB. - २.४ अश्नीत Sây. - १३ सद्रुक्रोव A. - ३.१ कल्होल° Sây. - १० व्यदीवंने A यदीवन्ये B. - ११ देवा। A. - १२ तन्नाह्वावोवैतस्य A. - १३ अग्रियं Sây. - १४ वषट्कृतꣳ A (the correct reading is वषट्कृतꣳ). - ४.३ स एतं Sây. स ये तं A prima manu. - ३ विवचनमेव Sây. - ४ निवचनं Sây. - १८ °वैनद्रुद्र A. - २४ आदित्सो A. —

Adhyâya ५.१.५ The *Ṛ*iksaṃhitâ reads बृद्रुद्र. - ५ °प्यपते Sây. - १२ °निषेधा AB. - १६ ज्ञग्निरे A. - २.३ and ७ प्रामुचत् A and this is the correct reading. - ८ नप्यथरत्पुणयं (!) A. - १५ °नैलकीः Sây. - २४ शिश्यिरे A. - २७ निद्विद्धा अस° A. - २८ °वयाः। A. - २९ °ठया सद्रु भवन्ति AB. - ३८ °स्थातुर्वा A. - ४५ °ज्योदेन्याधर्युः A. - ४७ भवतः A. - ३.१ °तैर्व्येव A. - ११ संमार्ष्यथैतꣳ सोषमेव A., and शकलान्वामयते तावतो न्यादधात्यथैतꣳ सोषमेव A. - १२ चपुराज्यस्या° A. - १७ The Saṃhitâ (३.४१) reads परापत. - ४.१ विज्ञिग्यपान् A. - १० एतत्कर्म कृतꣳ A. —

Adhyâya ६.१.१ ज्ञघꣳ। तेनो A. - ३ त्वेवेष AB. - ३ °त्मनोऽचरणेन A.B.M. त्मनोऽनुचरणेन Sây. - ३ मीया A. मीयते B. मीयते Sây. - १८ इहाग्य° A. - २० चरंति A. - २२ देवांꣳआज्यपांꣳआ° A. - २८ पुरोडात्सस्य A. - ३३ तमग्नीद्वैव A. - ३७ निद्रुते Sây. - ३९ वशांꣳअनु A. - २.४ न्वेवेष and न्वेवास्य A, which seems indeed the correct reading, see ६.१.३. - १७ तां द्वयो° AB (Final n standing before any dental is almost regularly

given by anusvâra, whereas final anusvâra in the same case is expressed by n). - १७ आनध्यो° A. - १७ °द्यश्वनृणां! A. - ३.२ श्रीरासीशाकमे° A. - ४ °तिर्व्येव A. - ६ विज्ञिग्यानमेनं Sây. - ८ तस्माशौर्य A. - १२ तन्त्रानी° and °स्मादेतन्त्रानी° A. - ४.१ °स्तिर्व्येव and °र्वैर्व्येव A. - १ खलु A. —

ओम् । देवयज्ञं ज्ञोषयन्ते । स यदेव वर्षिष्ठꣳ स्यात्तज्ज्ञोषयेरन्यदन्यद्धूमेना-
भिशयीतातो वै देवा दिवमुपोदक्रामन्देवान्वाऽएष उपोत्क्रामति यो दीक्षते स
यदेवं देवयज्ञे यजते स यद्धान्यद्धूमेरभिशयीतावरतर इव हेष्टा स्यात्तस्माद्यदेव
वर्षिष्ठꣳ स्यात्तज्ज्ञोषयेरन् ॥ १ ॥ तद्धर्म्म सत्समꣳ स्यात् । समꣳ सद्विभ्रꣳशि स्या-
द्विभ्रꣳशि सत्प्राक्प्रवणꣳ स्यात्प्राची हि देवानां दिगथोऽउदक्प्रवणमुदीची हि
मनुष्याणां दिग्दक्षिणतः प्रत्युङ्खितमिव स्यादेषा वै दिक् पितॄणाꣳ स यद्दक्षिणा-
प्रवणꣳ स्यात्क्षिप्रे ह यजमानोऽमुं लोकमियात्तथो ह यजमानो ह्योग्जीवति त-
स्माद्दक्षिणतः प्रत्युङ्खितमिव स्यात् ॥ २ ॥ न पुरस्ताद्देवयज्ञनमात्रमतिरिच्येत । द्वि-
षन्तꣳ ह्यस्य तद्भ्रातृव्यमभ्यतिरिच्यते कामꣳ ह दक्षिणतः स्यादेवमुत्तरत एतद्ध
त्वेव समृद्धं देवयज्ञनं यस्य देवयज्ञनमात्रं पश्चात्परिशिष्यते क्षिप्रे हैवैनमुत्तरा दे-
वयज्योपनमतीति नु देवयज्ञनस्य ॥ ३ ॥ तदु होवाच याज्ञवल्क्यः । वार्ष्ण्याय दे-
वयज्ञनं ज्ञोषयितुमैम तत्सात्ययज्ञोऽब्रवीत्सर्वा वाऽइयं पृथिवी देवी देवयज्ञनं
यत्र वाऽअस्यै क्व च यजुषैव परिगृह्य याज्ञयेदिति ॥ ४ ॥ ऋत्विजो हैव देवयज्ञ-
नम् । ये ब्राह्मणाः शुश्रुवाꣳसोऽनूचाना विद्वाꣳसो याज्ञयन्ति सैवाक्लैतन्नदिष्ट-
मामिव मन्यामहऽइति ॥ ५ ॥ तद्धालो वा विमितं वा प्राचीनवꣳशं मिन्वन्ति ।
प्राची हि देवानां दिक् पुरस्ताद्धि देवाः प्रत्यञ्चो मनुष्यानुपावृत्तास्तस्मात्तेभ्यः प्रा-
ङ्तिष्ठन्नुहोति ॥ ६ ॥ तस्माद्धु ह न प्रतीचीनशिराः शयीत । नेद्देवानभिप्रसार्य शया-
ऽइति या दक्षिणा दिक् सा पितॄणां या प्रतीची सा सर्पाणां यतो देवा उच्च-

क्रमुः सैषाऽहीना यो॒दीची दिक् सा मनु॒ष्याणां॑ तस्मान्मानुष॑ऽउदी॒चीन॑वꣳशामिव शा॒लां वा विमि॑तं वा मिन्व॒ल्युदी॒ची हि॒ मनु॒ष्याणां॑ दिग्दी॒क्षित॑स्यैव प्राचीनव॑ꣳशा नादी॒क्षित॑स्य ॥७॥ तां वा॑ऽए॒तां प॒रिश्र॑यन्ति । ने॒दभि॒वर्षा॑दिति॒ न्वे॑व वर्षा॑ दे॒वान्वा॑ऽए॒ष उ॒पाव॑र्तते यो दी॒क्षते स॒ दे॒व॒तानामे॒को भवति तिर॒-इ॒व वै॒ देवा॑ मनु॒ष्ये॑भ्यस्तिर॒-इ॒वैत॒द्यत्प॒रिश्रि॑तं॒ तस्मात्प॒रिश्र॑यन्ति ॥८॥ तन्न सर्व॒-इ॒वाभिप्र॑पद्येत । ब्राह्म॒णो वै॒व रा॑ज॒न्यो॑ वा वैश्यो॑ वा ते हि॒ यज्ञि॑याः ॥९॥ स वै न सर्वे॑णेव सं॒वद॑त । दे॒वान्वा॑ऽए॒ष उ॒पाव॑र्तते यो दी॒क्षते स॒ दे॒व॒तानामे॒को भवति न वै दे॒वाः सर्वे॑णेव सं॒वद॑न्ते ब्राह्म॒णेन॑ वै॒व रा॑ज॒न्ये॑न वा वैश्ये॑न वा ते हि॒ यज्ञि॑यास्त॒स्माद्य॒ज्ञेन॑ꣳ शू॒द्रेण॑ संवादो विन्दे॒देते॑षामे॒वैकं ब्रू॒यादि॒मामि॑ति वि॒चक्ष्वे॒मामि॑ति वि॒चक्ष्व॑त्ये॒ष उ॑ तत्र दी॒क्षित॑स्योप॒चारः॑ ॥१०॥ अथा॑रणी पाणौ कृ॒त्वा । शा॒लामध्य॒वस्य॑ति स॒ पूर्वा॒र्ध्यꣳ स्थू॒णाराज॒मभिप्र॑पद्ये॒तद्य॒ज्ञुरा॒क्हेदम॑गन्म दे॒वय॑जनं पृथि॒व्या यत्र दे॒वासो॑ऽअजुषन्त॒ विश्व॑ऽइ॒दिति॒ तद॒स्य विश्वै॑श्च दे॒वैर्जु॒ष्टं भव॑ति॒ ये चे॒मे ब्राह्म॒णाः शुश्रु॑वाꣳसो॑ऽनू॒चाना॒ यद॒हास्य ते॑ऽक्षि॒भ्यामी॒क्षन्ते ब्राह्म॒णाः शुश्रु॑वाꣳसस्त॒द॒हास्य तैर्जु॒ष्टं भव॑ति ॥११॥ यद्वा॒ह । यत्र दे॒वासो॑ऽअजुषन्त॒ विश्व॑ऽइ॒दिति॒ तद॒स्य विश्वै॑र्दे॒वैर्जु॒ष्टं भव॒त्यृक्सामा॑भ्याꣳ संतर॒न्तो य॒जुर्भि॒रित्यृक्सामा॑भ्यां वै॒ यजु॑र्भि॒र्यज्ञ॑स्योदृ॑चं गृह्णन्ति॒ यज्ञ॑स्योदृ॑चं गृह्णानी॒त्येवैत॒दाह॒ रायस्पोषे॑ण स॒मिषा॒ मदे॒मेति॒ भूमा वै रा॒यस्पोषः॒ श्रीर्वै॒ भूमा॑शिषमे॒वैत॒दाशा॑स्ते स॒मिषा॒ मदे॒मेतीषं॒ मद॒तीति॒ वै तमाकु॑र्यः श्रि॒यम॑श्नुते यः॑ पर॒मतां॑ गृह्णति॒ तस्मा॒दाह॒ स॒मिषा॒ मदे॒मेति॒ ॥१२॥ ब्राह्म॒णम् ॥१॥ ॥

अपरा॑ह्णे दीक्षेत । पु॒रा के॒शश्म॑श्रोर्वपना॒द्यत्का॑मये॒त तद॑श्नीया॒द्वा स॒म्पद्ये॑त व्र॒तꣳ क्षे॒वास्यातो॑ऽशनं भवति॒ यद्यु नाशि॑शिषे॒दपि॑ कामं॒ नाश्नी॑यात् ॥१॥ ॥ श॒तं १४०० ॥ ॥ अथो॑त्तरे॒ण शा॒लां प॒रिश्र॑यन्ति । तदु॑दकुम्भ॒मुप॑नि॒दधति॒ तन्नापित॒ उप॑तिष्ठते॒ तत्के॒शश्म॑श्रु च॒ वप॑ते॒ नखा॑नि च नि॒कृ॑न्तते॑ऽस्ति वै पुरु॒षस्या॒मेध्यं॑ य॒-

त्रास्यापो नोपतिष्ठन्ते केशश्मश्रौ च वाऽअस्य नखेषु चापो नोपतिष्ठन्ते तद्यत्के-
शश्मश्रु च वपते नखानि च निकृन्तते मेध्यो भूत्वा दीक्षाऽइति ॥२॥ तद्वै के ।
सर्वऽएव वपन्ते सर्वऽएव मेध्या भूत्वा दीक्षिष्यामहऽइति तदु तथा न कुर्याद्यद्वै
केशश्मश्रु च वपते नखानि च निकृन्तते तदेव मेध्यो भवति तस्मादु केशश्मश्रु
चैव वपेत नखानि च निकृन्तेत ॥३॥ स वै नखान्येवाग्रे निकृन्तते । दक्षिणा-
स्यैवाग्रे सव्यस्य वाऽअग्रे मानुषेऽथैवं देवत्राङ्गुष्ठयोरेवाग्रे कनिष्ठिकयोर्वाऽअग्रे
मानुषेऽथैवं देवत्रा ॥४॥ स दक्षिणामेवाग्रे गोदानं वितारयति । सव्यं वाऽअग्रे
मानुषेऽथैवं देवत्रा ॥५॥ स दक्षिणामेवाग्रे गोदानमभ्युनत्ति । इमा आपः शमु मे
सन्तु देवीरिति स यदाहेमा आपः शमु मे सन्तु देवीरिति वज्रो वाऽआपो वज्रो
हि वाऽआपस्तस्माद्येनैता यन्ति निम्नं कुर्वन्ति यत्रोपतिष्ठन्ते निर्दहन्ति तत्तदेतमे-
वैतद्वज्रꣳ शमयन्ति तथो हैनमेष वज्रः शान्तो न हिनस्ति तस्मादाहेमा आपः श-
मु मे सन्तु देवीरिति ॥६॥ अथ दर्भतरुणकमन्तर्दधाति । ओषधे त्रायस्वेति वज्रो
वै क्षुरस्तथो हैनमेष वज्रः क्षुरो न हिनस्त्यथ क्षुरेणाभिनिदधाति स्वधिते मैनꣳ
हिꣳसीरिति वज्रो वै क्षुरस्तथो हैनमेष वज्रः क्षुरो न हिनस्ति ॥७॥ प्रक्ष्योद-
पात्रे प्रास्यति । तूष्णीमेवोत्तरं गोदानमभ्युनत्ति तूष्णीं दर्भतरुणकमन्तर्दधाति तू-
ष्णीं क्षुरेणाभिनिधाय प्रक्ष्योदपात्रे प्रास्यति ॥८॥ अथ नापिताय क्षुरं प्रयच्छति ।
स केशश्मश्रु वपात स यदा केशश्मश्रु वपति ॥९॥ अथ स्नाति । अमेध्यो वै पु-
रुषो यदनृतं वदति तेन पूतिरन्तरतो मेध्या वाऽआपो मेध्यो भूत्वा दीक्षाऽइति
पवित्रं वाऽआपः पवित्रपूतो दीक्षाऽइति तस्माद्वै स्नाति ॥१०॥ स स्नाति । आ-
पोऽअस्मान्मातरः शुन्धयन्त्वित्येतद्याह शुन्धयन्त्विति घृतेन नो घृतप्वः पुनन्त्विति
तद्वै सपूतं यं घृतेनापुनंस्तस्मादाह घृतेन नो घृतप्वः पुनन्त्विति विश्वꣳ हि रिप्रं
प्रवहन्ति देवीरिति यद्वै विश्वꣳ सर्वं तद्यदमेध्यꣳ रिप्रं तत्सर्वꣳ ह्यस्मादमेध्यं प्रव-

क्रन्ति तस्मादाह विश्वꣳ हि रिप्रं प्रवहन्ति देवीरिति ॥ ११ ॥ अथ प्राङ्विोदङ्-
ङुत्क्रामति । उदिदाभ्यः शुचिरा पूत एमीत्युद्याभ्यः शुचिः पूत एति ॥ १२ ॥ अथ
वासः परिधत्ते । सर्ववायैव स्वामेवास्मिन्नेतद्वचं दधाति या ह वाऽइयं गोस्व-
क्पुरुषे केषाग्ऽआस ॥ १३ ॥ ते देवा अब्रुवन् । गौर्वाऽइदꣳ सर्वं बिभर्ति हन्त
येयं पुरुषे वग्गव्येतां दधाम तयेषा वर्षन्तं तया क्रिमं तया घृणिं तितिक्षिष्यत
ऽइति ॥ १४ ॥ तेऽवह्राय पुरुषम् । गव्येतां वचमदधुस्तयेषा वर्षन्तं तया क्रिमं
तया घृणिं तितिक्षते ॥ १५ ॥ अवक्षितो हि वै पुरुषः । तस्मादस्य यत्रैव क्व च
कुशो वा यद्वा विकृन्तति तत एव लोहितमुत्पतति तस्मिन्नेतां वचमदधुर्वास
एव तस्मान्नान्यः पुरुषाद्वासो बिभर्त्येताꣳ ह्यस्मिंस्त्वचमदधुस्तस्मादु सुवासा एव
बुभूषेत्स्वया वचा समृध्याऽइति तस्माद्प्यशीलꣳ सुवाससं दिदृक्षन्ते स्वया हि व-
चा समृद्धो भवति ॥ १६ ॥ नो हान्ते गोर्नग्नः स्यात् । वेद ह गौरहमस्य वचं
बिभर्मीति सा बिभ्यती त्रसति वचं मऽआदास्यतऽइति तस्मादु गावः सुवाससम-
मेव निश्रयन्ते ॥ १७ ॥ तस्य वाऽएतस्य वाससः । अग्नेः पर्यासो भवति वायोर-
नुहादो नीविः पितॄणाꣳ सर्पाणां प्रघातो विश्वेषां देवानां तन्तव आरोका नक्ष-
त्राणामेवꣳ हि वाऽएतत्सर्वे देवा अन्वायत्तास्तस्मादीक्षितवसनं भवति ॥ १८ ॥
तद्वाऽअकृतꣳ स्यात् । अयातयामतयै तद्वै निष्टेष्टवै ब्रूयाद्यद्देवास्यात्रमेध्या कृ-
णत्ति वा वयति वा तदस्य मेध्यमसदिति यद्युऽअकृतꣳ स्यादद्भिरभ्युन्नेन्मेध्यमस-
दित्यथो यदिदꣳ स्नातवस्यं निक्तिमपल्यूलनकृतं भवति तेनो हापि दीक्षेत
॥ १९ ॥ तत्परिधत्ते । दीक्षातपसोस्तनूरसीत्यदीक्षितस्य वाऽअस्येषाग्रे तनूर्भवत्य-
थात्र दीक्षातपसोस्तस्मादाह दीक्षातपसोस्तनूरसीति तां त्वा शिवाꣳ शग्मां परि-
दधऽइति तां त्वा शिवाꣳ साधीं परिदधऽइत्येवैतदाह भद्रं वर्णं पुष्यन्निति पाप
वाऽएषोऽग्रे वर्णं पुष्यति यममुमदीक्षितोऽथात्र भद्रं तस्मादाह भद्रं वर्णं पुष्य-

न्निति ॥ २० ॥ अथैनꣳ शालां प्रपादयति । स धेन्वै चानड्वाꣳश्च नाश्नीयाद्धेन्वनड्वाहौ वाऽइदꣳ सर्वं बिभृतस्ते देवा अब्रुवन्धेन्वनड्वाहौ वाऽइदꣳ सर्वं बिभृतो ह्न त यदन्येषां वयसां वीर्यं तद्धेन्वनड्वाहयोर्दधामेति स यदन्येषां वयसां वीर्यमासीत्तद्धेन्वनड्वाहयोरदधुस्तस्माद्धेनुश्चैवानड्वाꣳश्च भूयिष्ठं भुङ्क्तस्तद्धैतत्सर्वाश्यमिव यो धेन्वनड्वाहयोरश्नीयादुत्तगतिरिव तꣳ ह्याद्भुतमभिज्ञानितोऽन्यायये गर्भं निरबधीदिति पापमकादिति पापी कीर्तिस्तस्माद्धेन्वनड्वाहयोर्नाश्नीयात्तदु होवाच याज्ञवल्क्यो ऽश्नाम्येवाहमꣳसलं चेद्भवतीति ॥ २१ ॥ ब्राह्मणम् ॥ २ ॥

अपः प्रणीय । आग्नावैष्णवमेकादशकपालं पुरोडाशं निर्वपत्यग्निर्वै सर्वा देवता अग्नौ हि सर्वाभ्यो देवताभ्यो जुह्वत्यग्निर्वै यज्ञस्यावरार्ध्यो विष्णुः परार्ध्यस्तत्सर्वाश्चैवैतद्देवताः परिगृह्य सर्वं च यज्ञं परिगृह्य दीक्षाऽइति तस्मादाग्नावैष्णव एकादशकपालः पुरोडाशो भवति ॥ १ ॥ तद्धैके । आदित्येभ्यश्चरुं निर्वपन्ति तदस्ति पर्युदितमिवाष्टौ पुत्रासोऽअदितेर्ये जातास्तन्वस्परि । देवांꣳउप प्रैत्सप्तभिः परा मार्ताण्डमास्यदिति ॥ २ ॥ अष्टौ ह वै पुत्रा अदितेः । यांस्वेतद्देवा आदित्या इत्याचक्षते सप्त हैव तेऽविकृतꣳ ह्याष्टमं जनयां चकार मार्ताण्डꣳ संदेघो ह्यैवास यावानेवोर्ध्वस्तावांस्तिर्यङ् पुरुषसंमित इत्यु हैकऽआहुः ॥ ३ ॥ तऽउ हैतऽऊचुः । देवा आदित्या यदस्मानन्वजनिमा तदमुयैव भूद्धन्तेमं विकरवामेति तं विचक्रुर्यथायं पुरुषो विकृतस्तस्य यानि माꣳसानि संकृत्य संन्यासुस्ततो ह्स्ती समभवत्तस्माद्ब्राह्मण हस्तिनं प्रतिगृह्णीयात्पुरुषाज्ञानो हि ह्स्तीति यमु ह तद्विचक्रुः स विवस्वानादित्यस्तस्येमाः प्रजाः ॥ ४ ॥ स होवाच । राध्नवान्मे स प्रजायां य एतमादित्येभ्यश्चरुं निर्वपादिति राध्नोति ह्यैव य एतमादित्येभ्यश्चरुं निर्वपत्ययं त्वेवाग्नावैष्णवः प्रज्ञातः ॥ ५ ॥ तस्य सप्तदश सामिधेन्यो भवन्ति । ऽपाꣳसु देवते यजति पञ्च प्रयाजा भवन्ति त्रयोऽनुयाजाः संयाजयन्ति पत्नीः सर्वत्वायैव समिष्टयजुरेव न

ज्रुहोति नेदिदं दीक्षितवसनं परिधाय पुरा यज्ञस्य सꣳस्थाया अन्तं गछानीत्यन्तो हि यज्ञस्य समिष्टयजुः ॥ ६ ॥ अथाग्नेण शालां तिष्ठन्नभ्यङ्क्ते । अरुर्वै पुरुषोऽवह्नितोऽनरुरेवैतद्भवति यदभ्यङ्क्ते गवि वै पुरुषस्य वग्गोर्वाऽएतन्नवनीतं भवति स्वयैवैनमेतद्वचा समर्धयति तस्माद्वाऽअभ्यङ्क्ते ॥ ७ ॥ तद्वै नवनीतं भवति । घृतं वै देवानां फाण्टं मनुष्याणामथैतन्नाह्नैव घृतं नो फाण्टꣳ स्यादेव घृतꣳ स्यात्फाण्टमयातयामतायै तदेनमयातयाम्नैवायातयामानं करोति ॥ ८ ॥ तमभ्यनक्ति । शीर्षतोऽग्रऽआ पादाभ्यामनुलोमं मरुतां पयोऽसीति मरुत्य इति ह वाऽएतासामेकं नाम यद्गवां तासां वाऽएतत्पयो भवति तस्मादाह मरुतां पयोऽसीति वर्चोदा असि वर्चो मे देहीति नात्र तिरोहितमिवास्ति ॥ ९ ॥ अथाद्यावानक्ति । अरुर्वै पुरुषस्याक्षि प्रशान्मसेति ह स्माह याज्ञवल्क्यो डुरक्त-इव ह्यास पूयो ह्येवास्य दूषीका तेऽएवैतदनरुष्करोति यदद्यावानक्ति ॥ १० ॥ यत्र वै देवाः । असुररक्षसानि जघ्नुस्तक्रुष्णो दानवः प्रत्यङ् पतित्वा मनुष्याणामक्षीणि प्रविवेश स एष कनीनकः कुमारक-इव परिभासते तस्माऽएवैतद्यज्ञमुपप्रयन्त्सर्वतोऽश्मपुरां परिदधात्यश्मा क्ष्याञ्जनम् ॥ ११ ॥ त्रैककुदं भवति । यत्र वाऽइन्द्रो वृत्रमहंस्तस्य यद्व्यासीत्तं गिरिं त्रिककुदमकरोत्तद्यत्त्रैककुदं भवति चक्षुष्येवैतच्चक्षुर्दधाति तस्मात्त्रैककुदं भवति यदि त्रैककुदं न विन्देदप्यत्रैककुदमेव स्यात्समानी ह्येवाञ्जनस्य बन्धुता ॥ १२ ॥ शरेषीकयानक्ति । वज्रो वै शरो विरक्षस्तायै सतूला भवत्यमूलं वाऽइदमुभयतः परिक्षिप्तꣳ रक्षोऽन्तरिक्षमनुचरति यथायं पुरुषोऽमूल उभयतः परिक्षिप्तोऽन्तरिक्षमनुचरति तद्यत्सतूला भवति विरक्षस्तायै ॥ १३ ॥ स दक्षिणमेवाग्रऽआनक्ति । सव्यं वाऽग्रे मानुषेऽथैवं देवत्रा ॥ १४ ॥ स आनक्ति । वृत्रस्यासि कनीनक इति वृत्रस्य ह्येष कनीनकश्चक्षुर्दा असि चक्षुर्मे देहीति नात्र तिरोहितमिवास्ति ॥ १५ ॥ स दक्षिणꣳ सकृद्यजुषानक्ति । सकृत्तूष्णीमथोत्तरꣳ स-

कृष्यनुषानक्ति द्विस्तूष्णीं तदुत्तरमेवैतदुत्तरावत्करोति ॥१६॥ तथ्यत्पञ्च कृत्व आनक्ति । संवत्सरसंमितो वै यज्ञः पञ्च वाऽऋतवः संवत्सरस्य तं पञ्चभिराप्नोति तस्मात्पञ्च कृत्व आनक्ति ॥१७॥ अथैनं दर्भपवित्रेण पावयति । अमेध्यो वै पुरुषो यदनृतं वदति तेन पूतिरक्तरतो मेध्या वै दर्भा मेध्यो भूत्वा दीक्षाऽइति पवित्रं वै दर्भाः पवित्रपूतो दीक्षा इति तस्मादेनं दर्भपवित्रेण पावयति ॥१८॥ तद्वाऽएकꣳ स्यात् । एको ह्येवायं पवते तदेतस्यैव रूपेण तस्मादेकꣳ स्यात् ॥१९॥ अथोऽअपि त्रीणि स्युः । एको ह्येवायं पवते सोऽयं पुरुषेऽन्तः प्रविष्टस्त्रेधाविहितः प्राण उदानो व्यान इति तदेतस्यैवानु मात्रां तस्मात्त्रीणि स्युः ॥२०॥ अथोऽअपि सप्त स्युः । सप्त वाऽइमे शीर्षन्प्राणास्तस्मात्सप्त स्युस्त्रिःसप्तान्येव स्युरेकविꣳशतिरेषैव संपत् ॥२१॥ तꣳ सप्तभिः-सप्तभिः पावयति । चित्पतिर्मा पुनात्विति प्रजापतिर्वै चित्पतिः प्रजापतिर्मा पुनात्वित्येवैतदाह वाक्पतिर्मा पुनात्विति प्रजापतिर्वै वाक्पतिः प्रजापतिर्मा पुनात्वित्येवैतदाह देवो मा सविता पुनात्विति तद्वै सुपूतं यं देवः सवितापुनात्तस्मादाह देवो मा सविता पुनात्वित्यच्छिद्रेण पवित्रेणेति यो वाऽअयं पवतऽएषोऽच्छिद्रं पवित्रमेतेनैनतदाह सूर्यस्य रश्मिभिरित्येते वै पवितारो यत्सूर्यस्य रश्मयस्तस्मादाह सूर्यस्य रश्मिभिरिति ॥२२॥ तस्य ते पवित्रपतऽइति । पवित्रपतिर्हि भवति पवित्रपूतस्येति पवित्रपूतो हि भवति यत्कामः पुनेतꣳ केयमिति यज्ञस्योदृचं गछानीत्येवैतदाह ॥२३॥ अथाशिषामारम्भं वाचयति । आ वो देवास ईमहे वामं प्रयत्यध्वरे । आ वो देवास आशिषो यज्ञियासो हवामहऽइति तदस्मै स्वाः सतीरात्मन आशिष आशासते ॥२४॥ अथाञ्जलीन्प्रयचति । स्वाहा यज्ञं मनसऽइति द्वे स्वाहोरोरन्तरिक्षादिति द्वे स्वाहा द्यावापृथिवीभ्यामिति द्वे स्वाहा वातादारभऽइति मुष्टीकरोति न वै यज्ञः प्रत्यक्षमिवारभे यथायं दण्डो वा वासो वा परोऽक्षं वै देवाः परोऽक्षं य-

ज्ञः ॥ २५ ॥ स यदाह । स्वाहा यज्ञं मनसऽइति तन्मनस आरभते स्वाहोरोरन्तरिक्षादिति तदन्तरिक्षादारभते स्वाहा द्यावापृथिवीभ्यामिति तदाभ्यां द्यावापृथिवीभ्यामारभते ययोरिदꣳ सर्वमधि स्वाहा वातादारभऽइति वातो वै यज्ञस्तद्यज्ञं प्रत्यक्षमारभते ॥ २६ ॥ अथ यत्स्वाहा-स्वाहेति करोति । यज्ञो वै स्वाहाकारो यज्ञमेवैतदात्मन्धत्तेऽत्रोऽएव वाचं यच्छति वाग्वै यज्ञो यज्ञमेवैतदात्मन्धत्ते ॥ २७ ॥ अथैनꣳ शालां प्रवादयति । स ज्ञघनेनाहवनीयमित्यग्रेण गार्हपत्यꣳ सोऽस्य संचरो भवत्या सुत्यायै तद्यदस्यैष संचरो भवत्या सुत्यायाऽअग्निर्वै योनिर्यज्ञस्य गर्भो दीक्षितोऽन्तरेण वै योनिं गर्भः संचरति स यत्स तत्रैजति वत्परि वदावर्तते तस्मादिमे गर्भा एजन्ति वत्परि वदावर्तन्ते तस्मादस्यैष सचरो भवत्या सुत्यायै ॥ २८ ॥ ब्राह्मणम् ॥ ३ ॥

सर्वाणि ह वै दीक्षाया यजूꣳष्यौद्भभणानि । उद्भृणीते वाऽएषोऽस्माल्लोकाद्देवलोकमभि यो दीक्षतऽएतैरेव तद्यजुर्भिरुद्भृणीते तस्मादाहुः सर्वाणि दीक्षाया यजूꣳष्यौद्भभणानीति तन एतान्यवान्तरामाचक्षतऽऔद्भभणानीत्याकुतयो ह्येता आकुतिर्हि यज्ञः परोऽक्षं वै यजुर्ज्ञपत्यर्थेष प्रत्यक्षं यज्ञो यदाकुतिस्तदेतेन यज्ञेनोद्भृणीतेऽस्माल्लोकाद्देवलोकमभि ॥ १ ॥ तत्तो यानि त्रीणि स्रुवेण जुहोति । तान्याधीतयजूꣳषीत्याचक्षते सम्पदऽएव कामाय चतुर्थꣳ हूयतेऽथ यत्पञ्चमꣳ स्रुचा जुहोति तदेव प्रत्यन्नमौद्भभणमनुष्टुभा हि तज्जुहोति वाग्घ्यनुष्टुब्वाग्घि यज्ञः ॥ २ ॥ यज्ञेन वै देवाः । इमां जितिं जिग्युर्येषामियं जितिस्ते होचुः कथं न इदं मनुष्यैरनभ्यारोह्यꣳ स्यादिति ते यज्ञस्य रसं धीत्वा यथा मधु मधुकृतो निर्धयेयुर्विदुह्य यज्ञं यूपेन योपयित्वा तिरोऽभवन्नथ यदेनेनायोपयंस्तस्माद्यूपो नाम ॥ ३ ॥ तद्वाऽऋषीणामनुश्रुतमास । ते यज्ञꣳ समभरन्यथायं यज्ञः सम्भृत एवं वाऽएष यज्ञꣳ सम्भरति यदेतानि जुहोति ॥ ४ ॥ तानि वै पञ्च जुहोति । संवत्सरसंमितो

वै यज्ञः पञ्च वाऽऋतवः संवत्सरस्य तं पञ्चभिराप्नोति तस्मात्पञ्च जुहोति ॥५॥ अथातो होमस्यैव । आकूत्यै प्रयुजेऽग्नये स्वाहेत्या वाऽअग्ये कुवते यजेयेति तद्यदेवात्र यज्ञस्य तदेवैतत्संभृत्यात्मन्कुरुते ॥६॥ मेधायै मनसेऽग्नये स्वाहेति । मेधया वै मनसाभिगह्रति यजेयेति तद्यदेवात्र यज्ञस्य तदेवैतत्संभृत्यात्मन्कुरुते ॥७॥ दीक्षायै तपसेऽग्नये स्वाहेति । अन्वेवैतदुच्यते नेत्तु ह्रूयते ॥८॥ सरस्वत्यै पूष्णेऽग्नये स्वाहेति । वाग्वै सरस्वती वाग्यज्ञः पशवो वै पूषा पुष्टिर्वै पूषा पुष्टिः पशवः पशवो हि यज्ञस्तद्यदेवात्र यज्ञस्य तदेवैतत्सम्भृत्यात्मन्कुरुते ॥९॥ तदाहुः । अनड्वैता आहुतयो ह्रूयन्तेऽप्रतिष्ठिता अदेवकास्तत्र नेन्द्रो न सोमो नाग्निरिति ॥१०॥ आकूत्यै प्रयुजेऽग्नये स्वाहेति । नात एकं चनाग्निर्वाऽअड्वेवाग्निः प्रतिष्ठितः स यदग्नौ जुहोति तेनैवैता अड्वेव तेन प्रतिष्ठितास्तस्माद्व सर्वास्वेवाग्नये स्वाहेति जुहोति तत एतान्याधीतयजूꣳषीत्याचक्षते ॥११॥ आकूत्यै प्रयुजेऽग्नये स्वाहेति । आत्मना वाऽअयऽआकुवते यजेयेति तमात्मनऽएव प्रयुङ्क्ते यत्तनुते तेऽअस्यैतेऽआत्मन्देवतेऽआधीते भवत आकूतिश्च प्रयुङ्क्ष ॥१२॥ मेधायै मनसेऽग्नये स्वाहेति । मेधया वै मनसाभिगह्रति यजेयेति तेऽअस्यैतेऽआत्मन्देवतेऽआधीते भवतो मेधा च मनश्च ॥१३॥ सरस्वत्यै पूष्णेऽग्नये स्वाहेति । वाग्वै सरस्वती वाग्यज्ञः सास्यैषात्मन्देवताधीता भवति वाक्पशवो वै पूषा पुष्टिर्वै पूषा पुष्टिः पशवः पशवो हि यज्ञस्तेऽस्यैतऽआत्मन्पशव आधीता भवन्ति तद्यदस्यैता आत्मन्देवता आधीता भवन्ति तस्मादाधीतयजूꣳषि नाम ॥१४॥ अथ चतुर्थीं जुहोति । आपो देवीर्बृहतीर्विश्वशम्भुवो द्यावापृथिवीऽउरोऽअन्तरिक्ष । बृहस्पतये हविषा विधेम स्वाहेत्येषा ह नेदीयो यज्ञस्यापाꣳ हि कीर्तयत्यापो हि यज्ञो द्यावापृथिवीऽउरोऽअन्तरिक्षेति लोकानाꣳ हि कीर्तयति बृहस्पतये हविषा विधेम स्वाहेति ब्रह्म वै बृहस्पतिर्ब्रह्म यज्ञ एतेनो हैषा नेदीयो यज्ञस्य ॥१५॥

अथ यां पञ्चमीꣳ स्रुचा जुहोति । सा खैव प्रत्यक्षं यज्ञोऽनुष्टुभा हि तां जुहोति वाग्घ्यनुष्टुब्वाग्घि यज्ञः ॥१६॥ अथ यदूर्ध्ववायामाज्यं परिशिष्टं भवति । तज्जुह्वामानयति त्रिः स्रुवेणाज्यविलापन्याऽधि जुह्वां गृह्णाति यत्तृतीयं गृह्णाति तत्स्रुवमभिपूरयति ॥१७॥ स जुहोति । विश्वो देवस्य नेतुर्मर्तो वुरीत सख्यम् । विश्वो राय इषुध्यति द्युम्नं वृणीत पुष्यसे स्वाहेति ॥१८॥ सैषा देवताभिः पङ्क्तिर्भवति । विश्वो देवस्येति वैश्वदेवं नेतुरिति सावित्रं मर्तो वुरीतेति मैत्रं द्युम्नं वृणीतेति बार्हस्पत्यं द्युम्नꣳ हि बृहस्पतिः पुष्यसऽइति पौष्णꣳ ॥१९॥ सैषा देवताभिः पङ्क्तिर्भवति । पाङ्क्तो यज्ञः पाङ्क्तः पशुः पञ्चऽर्तवः संवत्सरस्यैतमेवैतयाप्नोति यदेवताभिः पङ्क्तिर्भवति ॥२०॥ तां वाऽअनुष्टुभा जुहोति । वाग्वाऽअनुष्टुब्वाग्यज्ञस्तद्यज्ञं प्रत्यक्षमाप्नोति ॥२१॥ तदाहुः । एतामेवैकां जुहुयाद्यस्मै कामयेतरा क्षुयन्तऽएतयैव तं कामनाप्नोतीति तां वै यद्येकां जुहुयात्पूर्णा जुहुयात्सर्वं वै पूर्णꣳ सर्वमेवैनयैतदाप्नोत्यथ यत्स्रुवमभिपूरयति स्रुचं तदभिपूरयति तां पूर्णां जुहोत्यन्वेवैतदुच्यते सर्वास्त्वेव क्षुयन्ते ॥२२॥ तां वाऽअनुष्टुभा जुहोति । सैषानुष्टुप्सत्येकत्रिꣳशदक्षरा भवति दश पाणया अङ्गुल्यो दश पाद्या दश प्राणा आत्मैकत्रिꣳशो यस्मिन्नेते प्राणाः प्रतिष्ठिता एतावान्वै पुरुषः पुरुषो यज्ञः पुरुषसंमितो यज्ञः स यावानेव यज्ञो यावत्यस्य मात्रा तावत्तमेवैनयैतदाप्नोति यदनुष्टुभैकत्रिꣳशदक्षरया जुहोति ॥२३॥ ब्राह्मणं ॥४॥ अध्यायः ॥१[१६.]॥ ॥

दक्षिणेनाहवनीयं प्राचीनग्रीवे कृष्णाजिनेऽउपस्तृणाति । तयोरेनमधि दीक्षयति यदि द्वे भवतस्तदनयोर्लोकयो रूपं तदेनमनयोर्लोकयोरधि दीक्षयति ॥१॥ संबद्धास्ति भवतः । संबद्धावाविव ह्येमौ लोकौ तर्ह्यसमुते पश्चाद्भवतस्तदिमावेव लोकौ मिथुनीकृत्य तयोरेनमधि दीक्षयति ॥२॥ यद्युऽएक भवति । तदेषां लोकानाꣳ रूपं तदेनमेषु लोकेष्वधि दीक्षयति यानि शुक्लानि तानि दिवो रूपं या-

नि कृष्णानि तान्यस्यै यदि वेतरथा यान्येव कृष्णानि तानि दिवो रूपं यानि शुक्लानि तान्यस्यै यान्येव बभ्रूणीव कुरोणि तान्यन्तरिक्षस्य रूपं तदेनमेषु लोकेष्वधि दीक्षयति ॥३॥ अन्तकमु तर्हि पश्चात्प्रत्यस्येत् । तदिमानेव लोकान्मिथुनीकृत्य तेष्वेनमधि दीक्षयति ॥४॥ अथ जघनेन कृष्णाजिनं पश्चात् प्राङ् जान्वाक्त उपविशति स यत्र शुक्लानां च कृष्णानां च संधिर्भवति तदेवमनिमृश्य जपत्यृक्सामयोः शिल्पे स्थऽइति यद्वै प्रतिरूपं तद्धिल्पमृचां च साम्नां च प्रतिरूपे स्थ इत्येवैतदाह ॥५॥ ते वामारभऽइति । गर्भो वाऽएष भवति यो दीक्षते स कुन्दाभ्रि प्रविशति तस्मान्न्यक्काङ्कुलिरिव भवति न्यक्काङ्कुलय-इव हि गर्भाः ॥६॥ स यदाह । ते वामारभऽइति ते वां प्रविशामीत्येवैतदाह ते मा पातमास्य यज्ञस्योदृच इति ते मा गोपायतमास्य यज्ञस्य सऽस्थाया इत्येवैतदाह ॥७॥ अथ दक्षिणेन जानुनारोहति । शर्मासि शर्म मे यच्छेति चर्म वाऽएतत्कृष्णस्य तदस्य तन्मानुषꣳ शर्म देवत्रा तस्मादाह शर्मासि शर्म मे यच्छेति नमस्तेऽअस्तु मा मा हिꣳसीरिति श्रेयाꣳसं वाऽएष उपाधिरोहति यो यज्ञं यज्ञो हि कृष्णाजिनं तस्माऽएवैतच्छ्रेयसे निष्कृते तथो हैनमेष यज्ञो न हिनस्ति तस्मादाह नमस्तेऽअस्तु मा मा हिꣳसीरिति ॥८॥ स वै जघनार्धऽइवैवाग्रऽआसीत । अथ यद्ग्रऽएव मध्यऽउपविशेत्य एनं तत्रानुष्ठा कुरेद्रुप्स्यति वा प्र वा पतिष्यतीति तथा हैव स्यात्तस्माज्जघनार्धऽइवैवाग्रऽआसीत ॥९॥ अथ मेखलां परिव्ययते । अङ्गिरसो ह वै दीक्षितानबल्यमविन्दन्ते नान्यद्व्रतादशनमवाकल्पयंस्तऽएतामूर्जमपश्यन्त्समाप्तिं तां मध्यत आत्मन ऊर्जमदधत समाप्तिं तया समाप्नुवंस्तथोऽएवैष एतां मध्यत आत्मन ऊर्जं धत्ते समाप्तिं तया समाप्नोति ॥१०॥ सा वै शाणी भवति । मृद्धसदिति न्वेव शाणी यत्र वै प्रजापतिरजायत गर्भो भूवैतस्माद्यज्ञात्तस्य यन्नेदिष्ठमुल्बमासीत्ते शणास्तस्मात्ते पूतयो वान्ति यद्वस्य जरायुरासीत्तद्दीक्षितवसनमन्तरं वाऽउ-

ल्बं जरायुणो भवति तस्मादेषान्तरा वाससो भवति स यथैवातः प्रजापतिरजायत गर्भो भूत्वैतस्माद्यज्ञादेवमेवैषोऽतो जायते गर्भो भूत्वैतस्माद्यज्ञात् ॥११॥ सा वै त्रिवृद्भवति । त्रिवृद्यज्ञं पशवो वज्रं पिता माता यज्जायते तत्तृतीयं तस्मात्त्रिवृद्भवति ॥१२॥ मुञ्जवल्शेनान्वस्ता भवति । वज्रो वै शरो विरजस्तायै स्तुकासर्ग० सृष्टा भवति सा यत्प्रसलवि सृष्टा स्याद्यथेदमन्या रज्जवो मानुषी स्याद्यद्वपसलवि सृष्टा स्यात्पितृदेवत्या स्यात्तस्मात्स्तुकासर्ग० सृष्टा भवति ॥१३॥ तां परिहरते । ऊर्गस्याङ्गिरसीत्यङ्गिरसो वै क्षेतामूर्जमपश्यन्नूर्णाम्रदा ऊर्जं मयि धेहीति नात्र तिरोहितमिवास्ति ॥१४॥ अथ नीविमुद्धरते । सोमस्य नीविरसीत्यदीक्षितस्य वाऽअस्यैषाग्रे नीविर्भवत्यथात्र दीक्षितस्य सोमस्य तस्मादाह सोमस्य नीविरसीति ॥१५॥ अथ प्रोर्णुते । गर्भो वाऽएष भवति यो दीक्षते प्रावृता वै गर्भा उल्बेनेव जरायुणेव तस्माद्वै प्रोर्णुते ॥१६॥ स प्रोर्णुते । विष्णोः शर्मासि शर्म यजमानस्येत्युभयं वाऽएषोऽत्र भवति यो दीक्षते विष्णुश्च यजमानश्च यद्वै दीक्षते तद्विष्णुर्भवति यद्यजते तद्यजमानस्तस्मादाह विष्णोः शर्मासि शर्म यजमानस्येति ॥१७॥ अथ कृष्णविषाणा० सिचि बध्नीते । देवाश्च वाऽअसुराश्चोभये प्राजापत्याः प्रजापतेः पितुर्दायमुपेयुर्मन एव देवा उपायन्वाचमसुरा यज्ञमेव तद्देवा उपायन्वाचमसुरा अमूमेव देवा उपायन्निमामसुराः ॥१८॥ ते देवा यज्ञमब्रुवन् । योषा वाऽइयं वागुपमन्त्रयस्व क्षयिष्यते वै नेति स्वयं वा वैवेक्षत योषा वाऽइयं वागुपमन्त्रये क्षयिष्यते वै मेति तामुपामन्त्रयत सा हास्माऽआरकादिवैवाग्रऽआसूयत्तस्माद्वै स्त्री पुꣳसोपमन्त्रितारकादिवैवाग्रेऽसूयति स होवाचारकादिव वै मऽआसूयीदिति ॥१९॥ ते होचुः । उपैव भगवो मन्त्रयस्व क्षयिष्यते वै नेति तामुपामन्त्रयत सा हास्मै निपलाशमिवोवाद तस्माद्वै स्त्री पुꣳसोपमन्त्रिता निपलाशमिवैव वदति स होवाच निपलाशमिव वै मेऽवादीदिति ॥२०॥ ते होचुः ।

उपैव भगवो मन्त्रयस्व क्वयिष्यते वै वेति तामुपामन्त्रयत सा कैनं जुङ्कव तस्माद्ध स्त्री पुमाꣳसꣳ क्वयतऽएवोत्तमꣳ स क्होवाचाक्वत वै मेति ॥ २१ ॥ ते दत्वा ईक्षां चक्रिरे । योषा वाऽइयं वाग्यदेनं न युवितेरेव मा तिष्ठत्तमभ्येक्षीति ब्रूहि तां तु न आगतां प्रतिप्रब्रूतादिति सा कैनं तदेव तिष्ठत्तमभ्येयाय तस्माद्ध स्त्री पुमाꣳसꣳ सꣳस्कृते तिष्ठत्तमभ्येति ताꣳ कैभ्य आगतां प्रतिप्रोवाचेयं वाऽआगादिति ॥ २२ ॥ तां देवाः । असुरेभ्योऽन्तरायंस्ताꣳ स्वीकृत्याग्नावेव परिगृह्य सर्वकृतमनुक्वुराकृतिर्हि देवानाꣳ स यामेवामूमनुष्टुभानुक्वुस्तदेवैनां तद्देवाः स्व्यकुर्वत ते ऽसुरा आत्तवचसो क्वेऽलवो क्वेऽलव इति वदन्तः पराबभूवुः ॥ २३ ॥ तत्रैनामपि वाचमूदुः । उपनिज्ञास्याꣳ स म्लेक्षस्तस्मान्न ब्राह्मणो म्लेक्षेदसुर्या क्वैषा वा नेवैष द्विषताꣳ सपत्नानामादत्ते वाचं तेऽस्यात्तवचसः पराभवन्ति य एवमेतद्वेद ॥ २४ ॥ सोऽयं यज्ञो वाचमभिदध्यौ । मिथुन्येनया स्यामिति ताꣳ संबभूव ॥ २५ ॥ इन्द्रो ह वाऽईक्षां चक्रे । मक्षद्वाऽइतोऽभूं जनिष्यते यज्ञस्य च मिथुनाद्वाचश्च यन्मा तन्नाभिभवेदिति स इन्द्र एव गर्भो भूत्वैतन्मिथुनं प्रविवेश ॥ २६ ॥ स ह संवत्सरे जायमान ईक्षां चक्रे । मक्षवीर्या वाऽइयं योनिर्या मामदीधरत यद्वै मेतो मक्षदेवाभूं नानुप्रजायेत यन्मा तन्नाभिभवेदिति ॥ २७ ॥ तां प्रतिपरामृश्यावेष्याहिनत् । तां यज्ञस्य शीर्षन्प्रत्यदधाद्यज्ञो हि कृष्णः स यः स यज्ञस्तत्कृष्णाजिनं यो सा योनिः सा कृष्णविषाणाथ यदेनामिन्द्र आवेष्याहिनत्तस्मादावेष्टितेव स यथैवात इन्द्रोऽजायत गर्भो भूत्वैतस्मान्मिथुनादेवमेवैषोऽतो जायते गर्भो भूत्वैतस्मान्मिथुनात् ॥ २८ ॥ तां वाऽउत्तानामिव बध्नाति । उत्तानेव वै योनिर्गर्भं बिभर्त्यथ दक्षिणां भ्रुवमुपर्युपरि ललाटमुपस्पृशतीन्द्रस्य योनिरसीतीन्द्रस्य क्वेषा योनिरतो वा क्वेनां प्रविशन्प्रविशत्यतो वा जायमानो जायते तस्मादाक्वेन्द्रस्य योनिरसीति ॥ २९ ॥ ॥ शतम् १५०० ॥ ॥ अथोल्लिखति । सुसस्याः कृषीस्कृधीति यज्ञमेवै-

तज्ज्ञनयति यदा वै सुषमं भवत्यथालं यज्ञाय भवति यदो दुःषमं भवति न तर्ह्यात्मने चनालं भवति तद्यज्ञमेवैतज्ज्ञनयति ॥ ३० ॥ अथ न दीक्षितः । काष्ठेन वा नखेन वा कण्डूयेत गर्भो वाऽएष भवति यो दीक्षते यो वै गर्भस्य काष्ठेन वा नखेन वा कण्डूयेदपास्यन्म्रियेत्ततो दीक्षितः पामनो भवितोर्दीक्षितं वाऽअनु रेताऽसि ततो रेताऽसि पामनानि जनितोः स्वा वै योनी रेतो न हिनस्त्येषा वाऽएतस्य स्वा योनिर्भवति यत्कृष्णविषाणा तथो हैनमेषा न हिनस्ति तस्माद्दीक्षितः कृष्णविषाणयैव कण्डूयेत नान्येन कृष्णविषाणायाः ॥ ३१ ॥ अथास्मै दण्डं प्रयच्छति । वज्रो वै दण्डो विरक्षस्तायै ॥ ३२ ॥ औदुम्बरो भवति । अन्नं वा ऽऊर्गुदुम्बर ऊर्जैवान्नाद्यस्यावरुद्ध्यै तस्मादौदुम्बरो भवति ॥ ३३ ॥ मुखसंमितो भवति । एतावद्वै वीर्यꣳ स यावदेव वीर्यं तावांस्तद्भवति यन्मुखसंमितः ॥ ३४ ॥ तमुक्षयति । उक्षयस्व वनस्पतऽऊर्ध्वो मा पाह्यꣳहस आस्य यज्ञस्योदृच इत्यूर्ध्वो मा गोपायास्य यज्ञस्य सꣳस्थाया इत्येवैतदाह ॥ ३५ ॥ अत्र केके । अङ्गुलीश्च न्यञ्चन्ति वाचं च यच्छन्त्यतो हि किं च न ज्ञपिष्यन्भवतीति वदन्तस्तदु तथा न कुर्याद्यथा पराञ्चं धावन्तमनुलिप्सेत तं नानुलभेतैवꣳ ह स यज्ञं नानुलभते तस्मादग्रेवाङ्गुलीर्न्यञ्चेदमुत्र वाचं यच्छेत् ॥ ३६ ॥ अथ यद्दीक्षितः । ऋचं वा यजुर्वा साम वाभिव्याहरत्यभिस्थिरमभिस्थिरमेवैतद्यज्ञमारभते तस्मादमुत्रेवाङ्गुलीर्न्यञ्चेदमुत्र वाचं यच्छेत् ॥ ३७ ॥ अथ यदाचं यच्छति । वाग्वै यज्ञो यज्ञमेवैतदात्मन्धत्तेऽथ यदाचंयमो व्याहरति तस्मादु हैष विसृष्टो यज्ञः पराङावर्तते तत्रो वैष्णवीमृचं वा यजुर्वा जपेद्यज्ञो वै विष्णुस्तद्यज्ञं पुनरारभते तस्यो हैषा प्रायश्चित्तिः ॥ ३८ ॥ अथैक उद्वदति । दीक्षितोऽयं ब्राह्मणो दीक्षितोऽयं ब्राह्मण इति निवेदितमेवैनमेतत्सन्तं देवेभ्यो निवेदयत्ययं महावीर्यो यो यज्ञं प्रापदित्ययं युष्माकैकोऽभूत्तं गोपायतेत्येवैतदाह त्रिष्कुव आह त्रिवृद्धि यज्ञः ॥ ३९ ॥ अथ यद्ब्राह्मण इत्याह ।

अनड्वेव वाऽअस्यातः पुरा ज्ञानं भवतीदꣳ ह्याङ्क्ते रक्षाꣳसि योषितमनुसचन्ते तदुत रक्षाꣳस्येव रेत आदधतीत्यथात्राह्मा ज्ञायते यो ब्रह्मणो यो यज्ञाज्ज्ञायते तस्माद्-पि राजन्यं वा वैश्यं वा ब्राह्मण इत्येव ब्रूयाद्ब्रह्मणो हि ज्ञायते यो यज्ञाज्ज्ञायते तस्मादाङ्क्ते सवनकृतꣳ ह्यन्यदिनस्वी ह्येव सवनकृतेति ॥४०॥ ब्राह्मणम् ॥५ [२.१]॥ ॥ प्रथमः प्रपाठकः ॥ कण्डिकासंख्या १२४ ॥ ॥

वाचं यच्छति । स वाचंयम आस्तऽआस्तमयात्त्यद्वाचं यच्छति ॥१॥ यज्ञेन वै देवाः । इमां ज्ञितिं जिग्युर्येषामियं ज्ञितिस्ते ह्येचुः कथं न इदं मनुष्यैरनभ्यारो-ह्यꣳ स्यादिति ते यज्ञस्य रसं धीत्वा यथा मधु मधुकृतो निर्धयेयुर्विदुह्य यज्ञं यूपे-न योपयित्वा तिरोऽभवन्नय यदेनेनायोपयंस्तस्माद्यूपो नाम ॥२॥ तद्वाऽऋषीणा-मनुश्रुतमास । ते यज्ञꣳ समभरन्यथायं यज्ञः सम्भृत एवं वाऽएष यज्ञꣳ सम्भरति यो दीक्षते वाग्वै यज्ञः ॥३॥ तामस्तमिते वाचं विसृजते । संवत्सरो वै प्रजाप-तिः प्रजापतिर्यज्ञोऽहोरात्रे वै संवत्सर एते ह्येनं परिप्लवमाने कुरुतः सोऽहन्न-दीक्षिष्ट स रात्रिं प्रापत्स यावानेव यज्ञो यावत्यस्य मात्रा तावत्तमेवैतदाप्त्वा वाचं विसृजते ॥४॥ तद्वैके । नक्षत्रं दृष्ट्वा वाचं विसर्जयत्यत्रानुष्यास्तमितो भवतीति वदन्तस्तदु तथा न कुर्यात्क्व ते स्युर्यन्मेघः स्यात्तस्माद्यत्रैवानुष्यास्तमितं मन्येत तदेव वाचं विसर्जयेत् ॥५॥ अनेनो वैके वाचं विसर्जयन्ति । भूर्भुवः स्वरिति यज्ञमाप्याययामो यज्ञꣳ संदध्म इति वदन्तस्तदु तथा न कुर्यान्न ह स यज्ञमाप्याय-यति न संदधाति य एतेन वाचं विसर्जयति ॥६॥ अनेनैव वाचं विसर्जयेत् । व्रतं कृणुत व्रतं कृणुताग्निर्ब्रह्माग्निर्यज्ञो वनस्पतिर्यज्ञिय इत्येष ह्यस्यात्र यज्ञो भ-वत्येतद्वविर्यथा पुराग्निहोत्रं तद्यज्ञेनैवैतद्यज्ञꣳ सम्भृत्य यज्ञे यज्ञं प्रतिष्ठापयति य-ज्ञेन यज्ञꣳ संतनोति संततꣳ ह्येवास्यैतद्व्रतं भवत्या सुत्यायै त्रिष्कृत्व आह त्रिवृ-द्धि यज्ञः ॥७॥ अथाग्निमभ्यावृत्य वाचं विसृजते । न ह स यज्ञमाप्याययति न सं-

दधाति योऽतोऽन्येन वाचं विसृजते स प्रथमं व्याकृत्सत्यं वाचोऽभिव्याकृति ॥ ८ ॥ अग्निर्ब्रह्मेति । अग्निर्ह्येव ब्रह्माग्निर्यज्ञ इत्यग्निर्ह्येव यज्ञो वनस्पतिर्यज्ञिय इति वनस्पतयो हि यज्ञिया न हि मनुष्या यज्ञेरन्यद्वनस्पतयो न स्युस्तस्मादाह वनस्पतिर्यज्ञिय इति ॥ ९ ॥ अथास्मै व्रतꣳ अपयन्ति । देवान्वाऽएष उपावर्तते यो दीक्षते स देवतानामेको भवति मृतं वै देवानाꣳ हविर्नामृतं तस्माद्धपयन्ति तदेष एव व्रतयति नाग्नौ जुहोति तद्यदेष एव व्रतयति नाग्नौ जुहोति ॥ १० ॥ यज्ञेन वै देवाः । इमां जितिं जिग्युर्येषामियं जितिस्ते होचुः कथं न इदं मनुष्यैरनभ्यारोक्ष्यꣳ स्यादिति ते यज्ञस्य रसं धीत्वा यथा मधु मधुकृतो निर्धयेयुर्विदुक्ष यज्ञं यूपेन योपयित्वा तिरोऽभवन्नथ यदेनेनायोपयंस्तस्माद्यूपो नाम ॥ ११ ॥ तद्वाऽऋषीणामनुश्रुतमास । ते यज्ञꣳ समभरन्यथायं यज्ञः सम्भृत एष वाऽत्र यज्ञो भवति यो दीक्षतऽएष ह्येनं तनुतऽएष एनं जनयति तद्यदेवात्र यज्ञस्य निर्धीतं यद्विदुग्धं तद्वैतत्पुनराप्याययति यदेष एव व्रतयति नाग्नौ जुहोति न ह्याप्यायेद्यदग्नौ जुहुयाज्जुह्वदु ह्येव मन्येत नाजुह्वत् ॥ १२ ॥ इमे वै प्राणाः । मनोजाता मनोयुजो दक्षक्रतवो वागेवाग्निः प्राणोदानौ मित्रावरुणौ चक्षुरादित्यः श्रोत्रं विश्वे देवा एतासु ह्येवास्यैतद्देवतासु कृतं भवति ॥ १३ ॥ तद्वैके । प्रथमे व्रतऽउभौ व्रीहियवावावपत्युभाभ्याꣳ रसाभ्यां यदेवात्र यज्ञस्य निर्धीतं यद्विदुग्धं तत्पुनराप्याययाम इति वदन्तो यद्यु व्रतदुघा न दुहीत यस्यैवातः कामयेत तस्य व्रतं कुर्यादेतदु ह्येवास्यैताऽउभौ व्रीहियवावन्वारब्धौ भवत इति तदु तथा न कुर्यान्न ह स यज्ञमाप्याययति न संदधाति य उभौ व्रीहियवावावपति तस्मादन्यतरमेवावपेद्धविर्वाऽअस्यैताऽउभौ व्रीहियवौ भवतः स यदेवास्यैतौ हविर्भवतस्तद्देवास्यैतावन्वारब्धौ भवतो यद्यु व्रतदुघा न दुहीत यस्यैवातः कामयेत तस्य व्रतं कुर्यात् ॥ १४ ॥ तद्वैके । प्रथमे व्रते सर्वौषधꣳ सर्वसुरभ्यावपन्ति यदि दीक्षितमार्ति-

र्विन्देय्येनेवातः कामयेत तेन भिषज्येय्यथा व्रतेन भिषज्येदिति तदु तथा न कुर्यान्मानुषꣳ ह्य ते यज्ञे कुर्वन्ति व्यृद्धं वै तद्यज्ञस्य यन्मानुषं नेद्व्यृद्धं यज्ञे करवाणीति यदि दीक्षितमार्तिर्विन्देय्येनेवातः कामयेत तेन भिषज्येत्समाप्तिर्ह्येव पुण्या ॥१५॥ अथास्मै व्रतं प्रयच्छति । अतिनीय मानुषं कालꣳ सायंदुग्धमपररात्रे प्रातर्दुग्धमपराह्णे व्याकृत्याऽएव दैवं चैवैतन्मानुषं च व्याकरोति ॥१६॥ अथास्मै व्रतं प्रदास्यन्नप उपस्पर्शयति । दैवीं धियं मनामहे सुमृडीकामभिष्टये वर्चोधां यज्ञवाहसꣳ सुतीर्था नोऽअसद्वशऽइति मानुषाय वाऽएष पुराशनायावनेनिक्तोऽथात्र दैव्यै धिये तस्मादाह दैवीं धियं मनामहे सुमृडीकामभिष्टये वर्चोधां यज्ञवाहसꣳ सुतीर्था नोऽअसद्वशऽइति स यावत्क्रियच्च व्रतं व्रतयिष्यन्नप उपस्पृशेदेतेनैवोपस्पृशेत् ॥१७॥ अथ व्रतं व्रतयति । ये देवा मनोजाता मनोयुजो दक्षक्रतवस्ते नोऽवन्तु ते नः पान्तु तेभ्यः स्वाकेति तद्यथा वषट्कृतꣳ हुतमेवमस्यैतद्भवति ॥१८॥ अथ व्रतं व्रतयित्वा नाभिमुपस्पृशते । श्यात्राः पीता भवत यूयमापोऽअस्माकमन्तरुदरे सुशेवाः । ता अस्मभ्यमयक्ष्मा अनमीवा अनागसः स्वदन्तु देवीरमृता ऋतावृध इति देवान्वाऽएष उपावर्तते यो दीक्षते स देवतानामेको भवत्यनुत्सिक्तं वै देवानाꣳ हविरेतद्व्रतप्रदो मिथ्ं करोति व्रतमुपोत्सिञ्चन्व्रतं प्रमीणाति तस्यो हैषा प्रायश्चित्तिस्तथो ह्यस्यैतन्न मिथ्याकृतं भवति न व्रतं प्रमीणाति तस्मादाह श्यात्राः पीता भवत यूयमापोऽअस्माकमन्तरुदरे सुशेवाः । ता अस्मभ्यमयक्ष्मा अनमीवा अनागसः स्वदन्तु देवीरमृता ऋतावृध इति स यावत्क्रियच्च व्रतं व्रतयित्वा नाभिमुपस्पृशेदेतेनैवोपस्पृशेत्कस्तद्वेद यद्व्रतप्रदो व्रतमुपोत्सिञ्चेत् ॥१९॥ अथ यत्र मेध्यन्भवति । तत्कृष्णविषाणया लोष्टं वा किंचिद्वोपरुत्तीयं ते यज्ञिया तनूरितीयं वै पृथिवी देवी देवयजनी सा दीक्षितेन नाभिमिक्ष्या तस्या एतदुकृत्वैव यज्ञियां तनूमथायज्ञियꣳ शरीरमभिमेकृत्यपो मुञ्चामि न प्रजामित्युभयं वाऽअत

त्यापश्च रेतश्च स एतदप एव मुञ्चति न प्रजामꣳक्रोमुचः स्वाहाकृता इत्यꣳक्रस इव क्रोता मुञ्चन्ति यदुदरे गुष्टितं भवति तस्मादाहाꣳक्रोमुच इति स्वाहाकृताः पृथिवीमाविशतेत्याकृतयो भूत्वा शान्ताः पृथिवीमाविशतेत्येवैतदाह ॥ २० ॥ अथ पुनर्लोष्टं न्यस्यति । पृथिव्या सम्भवेतीयं वै पृथिवी देवी देवयजनी सा दीक्षितेन नाभिमिक्ष्या तस्या एतदुकृक्षेव यज्ञियां तनूमथायज्ञियꣳ शरीरमभ्यमिक्षत्तामेवास्यामेतत्पुनर्यज्ञियां तनूं दधाति तस्मादाह पृथिव्या सम्भवेति ॥ २१ ॥ अथाग्नये परिदाय स्वपिति । देवान्वाऽएष उपावर्तते यो दीक्षते स देवतानामेको भवति न वै देवाः स्वपन्त्यनवरुद्धो वाऽएतस्यास्वप्नो भवत्यग्निर्वै देवानां व्रतपतिस्तस्माऽएवैतत्परिदाय स्वपित्यग्ने व्रꣳ सु जागृहि वयꣳ सु मन्दिषीमहीत्यग्ने व्रं जागृहि वयꣳ स्वप्स्याम इत्येवैतदाह रक्षा णोऽअप्रयुछन्निति गोपाय नोऽप्रमत्त इत्येवैतदाह प्रबुधे नः पुनस्कृधीति यथेतः सुप्त्वा स्वस्ति प्रबुध्यामहाऽएवं नः कुर्वित्येवैतदाह ॥ २२ ॥ अथ यत्र सुप्त्वा पुनर्नावद्रास्यन्भवति । तद्वाचयति पुनर्मनः पुनरायुर्मऽआगन्पुनः प्राणः पुनरात्मा मऽआगन्पुनश्चक्षुः पुनः श्रोत्रं मऽआगन्निति सर्वे ह वाऽएते स्वपतोऽपक्रामन्ति प्राण एव न तेरेवैतत्सुप्त्वा पुनः संगछते तस्मादाह पुनर्मनः पुनरायुर्मऽआगन्पुनः प्राणः पुनरात्मा मऽआगन्पुनश्चक्षुः पुनः श्रोत्रं मऽआगन् । वैश्वानरोऽअदब्धस्तनूपा अग्निर्नः पातु दुरितादवद्यादिति तद्यदेवात्र स्वप्नेन वा येन वा मिथ्याकर्म तस्मान्नः सर्वस्मादग्निर्गोपायत्वित्येवैतदाह तस्मादाह वैश्वानरो अदब्धस्तनूपा अग्निर्नः पातु दुरितादवद्यादिति ॥ २३ ॥ अथ यदीक्षितः । अव्रत्यं वा व्याहरति क्रुध्यति वा तन्मिथ्याकरोति व्रतं प्रमीणात्यक्रोधो क्रोव दीक्षितस्याग्निर्वै देवानां व्रतपतिस्तमेवैतदुपधावति व्रमग्ने व्रतपा असि देवऽआ मर्त्येष्वा । व्रं यज्ञषीड्यऽइति तस्यो क्रैषा प्रायश्चित्तिस्तथो क्रास्यैतन्न मिथ्याकृतं भवति न व्रतं प्रमीणाति तस्मादाह व्रमग्ने व्रतपा असि देवऽआ म-

र्त्येषा । त्वं यज्ञधीड्य इति ॥ २४ ॥ अथ यद्दीक्षितायाभिकुरुते । तस्मिन्वाचयति रास्वेयत्सोमा भूयो भरेति सोमो ह वाऽअस्माऽएतद्युते यद्दीक्षितायाभिकुरुते स यदाह रास्वेयत्सोमेति रास्व न इयत्सोमेत्येवैतदाहा भूयो भरेत्या नो भूयो ह-रेत्येवैतदाह देवो नः सविता वसोर्दाता वस्वदादिति तथो ह्यस्माऽएतत्सवि-तृप्रसूतमेव दानाय भवति ॥ २५ ॥ पुरास्तमयादाह । दीक्षित वाचं यछेति ताम-स्तमिते वाचं विसृजते पुरोदयादाह दीक्षित वाचं यछेति तामुदिते वाचं विसृ-जते संतत्याऽएवाहरैवैतद्राज्ञा संतनोत्यक्ता रात्रिम् ॥ २६ ॥ नैनमन्यत्र चरन्तम-भ्यस्तमियात् । न स्वपन्तमभ्युदियात्स यदेनमन्यत्र चरन्तमभ्यस्तमियाद्रात्रिरेनं तद-न्तरियाद्यत्स्वपन्तमभ्युदियाद्रात्रिरेनं तदन्तरियान्नात्र प्रायश्चित्तिरस्ति प्रतिगृप्यमेवै-तस्मात् न पुरावभृथाद्पोऽभ्यवेयान्नैनमभिवर्षेदनवक्लृप्तꣳ ह तद्यत्पुरावभृथाद्पो ऽभ्यवेयाद्यद्येनमभिवर्षेदथ परिक्वालं वाचं वदति न मानुषीं प्रसूतां तद्यत्परि-क्वालं वाचं वदति न मानुषीं प्रसूताम् ॥ २७ ॥ यज्ञेन वै देवाः । इमां जितिं जि-ग्युर्यैषामियं जितिस्ते होचुः कथं न इदं मनुष्यैरनभ्यारोक्ष्यꣳ स्यादिति ते यज्ञस्य रसं धीत्वा यथा मधु मधुकृतो निर्धयेयुर्विदुह्य यज्ञं यूपेन योपयित्वा तिरोऽभव-न्नथ यदेनेनायोपयंस्तस्माद्यूपो नाम ॥ २८ ॥ तद्वाऽऋषीणामनुश्रुतमास । ते यज्ञꣳ समभरन्यथायं यज्ञः सम्भृत एवं वाऽएष यज्ञꣳ सम्भरति यो दीक्षते वाग्वै यज्ञ-स्तद्यदेवात्र यज्ञस्य निर्धीतं यद्विदुग्धं तदेवैतत्पुनरापयाययति यत्परिक्वालं वाचं वदति न मानुषी प्रसूतां न ह्यापाययेद्यत्प्रसूतां मानुषीं वाचं वदेत्तस्मात्परिक्वा-लं वाचं वदति न मानुषीं प्रसूताꣳ ॥ २९ ॥ स वै दीक्षते । वाचे हि दीक्षते य-ज्ञाय हि दीक्षते यज्ञो हि वाग्दीक्षितो ह वै नामैतद्यद्दीक्षित इति ॥ ३० ॥ ब्रा-ह्मणम् ॥ १ [२. २] ॥ ॥

आदित्यं चरुं प्रायणीयं निर्वपति । देवा ह वाऽअस्यां यज्ञ तन्वाना इमां य-

ज्ञादन्तरीयुः सा वैषामियं यज्ञं मोक्ष्यां चकार कथं नु मयि यज्ञं तन्वाना मां य-
ज्ञादन्तरीयुरिति तꣳ ह यज्ञं न प्रजज्ञुः ॥ १ ॥ ते होचुः । यन्वस्यामेव यज्ञमतꣳस्म-
हि कथं नु नोऽमुष्कत्कथं न प्रजानीम इति ॥ २ ॥ ते होचुः । अस्यामेव यज्ञं त-
न्वाना इमां यज्ञादन्तरगाम सा न इयमेव यज्ञममूमुष्कदिमामेवोपधावामेति ॥ ३ ॥
ते होचुः । यन्वु ब्रध्येव यज्ञमतꣳस्महि कथं नु नोऽमुष्कत्कथं न प्रजानीम इति
॥ ४ ॥ सा होवाच । मय्येव यज्ञं तन्वाना मां यज्ञादन्तरगात सा वोऽष्केव यज्ञ-
ममूमुष्कं भागं नु मे कल्पयताथ यज्ञं द्रक्ष्यथाथ प्रज्ञास्यथेति ॥ ५ ॥ तथेति देवा
अब्रुवन् । तवैव प्रायणीयस्तवोदयनीय इति तस्मादेष आदित्य एव प्रायणीयो
भवत्यादित्य उदयनीय इयꣳ होवादितिस्ततो यज्ञमपश्यंस्तमतन्वत ॥ ६ ॥ स य-
दादित्यं चरुं प्रायणीयं निर्वपति । यज्ञस्यैव दृष्ट्यै यज्ञं दृष्ट्वा क्रीणानि तं तनवा
ऽइति तस्मादादित्यं चरुं प्रायणीयं निर्वपति तद्वै निरुप्तꣳ हविरासीदनिष्टा देव-
ता ॥ ७ ॥ अथैभ्यः पथ्या स्वस्तिः प्रारोचत । तामयजन्वाग्वै पथ्या स्वस्तिर्वाग्यज्ञ-
स्तद्यज्ञमपश्यंस्तमतन्वत ॥ ८ ॥ अथैभ्योऽग्निः प्रारोचत । तमयजन्त्स यदाग्नेयं यज्ञ-
स्यासीत्तदपश्यन्यद्वै शुष्कं यज्ञस्य तदाग्नेयं तदपश्यंस्तदतन्वत ॥ ९ ॥ अथैभ्यः सोमः
प्रारोचत । तमयजन्त्स यत्सौम्यं यज्ञस्यासीत्तदपश्यन्यदाऽऽर्द्रं यज्ञस्य तत्सौम्यं
तदपश्यंस्तदतन्वत ॥ १० ॥ अथैभ्यः सविता प्रारोचत । तमयजन्पशवो वै सविता
पशवो यज्ञस्तद्यज्ञमपश्यंस्तमतन्वताथ यस्यै देवतायै हविर्निरुप्तमासीत्तामयजन्
॥ ११ ॥ ता वाऽएताः । पञ्च देवता यजति यो वै स यज्ञो मुग्ध आसीत्पाङ्क्तो वै
स आसीत्तमेताभिः पञ्चभिर्देवताभिः प्राजानन् ॥ १२ ॥ ऋतवो मुग्धा आसन्पञ्च ।
तानेताभिरेव पञ्चभिर्देवताभिः प्राजानन् ॥ १३ ॥ दिशो मुग्धा आसन्पञ्च । ता ए-
ताभिरेव पञ्चभिर्देवताभिः प्राजानन् ॥ १४ ॥ उदीचीमेव दिशम् । पथ्यया स्वस्त्या
प्राजानंस्तस्मादुत्तराहि वाग्वदति कुरुपञ्चालत्रा वाग्घ्येषा निदानेनोदीचीꣳ हो-

तया दिशं प्राजानन्नुदीची श्वेतस्यै दिक् ॥ १५ ॥ प्राचीमेव दिशम् । अग्निना प्राजानंस्तस्माद्ग्निं पश्चात्प्राञ्चमुद्धृत्योपासते प्राचीꣳ श्वेतेन दिशं प्राजानन्प्राची श्वेतस्य दिक् ॥ १६ ॥ दक्षिणामेव दिशꣳ । सोमेन प्राजानंस्तस्मात्सोमं क्रीतं दक्षिणा परिवहन्ति तस्मादाङ्गः पितृदेवत्यः सोम इति दक्षिणाꣳ श्वेतेन दिशं प्राजानन्दक्षिणा श्वेतस्य दिक् ॥ १७ ॥ प्रतीचीमेव दिशꣳ । सवित्रा प्राजानन्नेष वै सविता य एष तपति तस्मादेष प्रत्यङेति प्रतीचीꣳ श्वेतेन दिशं प्राजानन्प्रतीची श्वेतस्य दिक् ॥ १८ ॥ ऊर्ध्वामेव दिशम् । अदित्या प्राजानन्नियं वाऽअदितिस्तस्मादस्यामूर्ध्वा ओषधयो जायन्तऽऊर्ध्वा वनस्पतय ऊर्ध्वाꣳ श्वेतया दिशं प्राजानन्नूर्ध्वा श्वेतस्यै दिक् ॥ १९ ॥ शिरो वै यज्ञस्यातिथ्यम् । बाहू प्रायणीयोदयनीयावभितो वै शिरो बाहू भवतस्तस्माद्भित आतिथ्यमेते हविषी भवतः प्रायणीयश्चोदयनीयश्च ॥ २० ॥ तदाङ्गः । यदेव प्रायणीये क्रियेत तदुदयनीये क्रियेत यदेव प्रायणीयस्य बर्हिर्भवति तदुदयनीयस्य बर्हिर्भवतीति तदपोद्धृत्य निदधाति ताꣳ स्थालीꣳ सन्नामकर्षा प्रमृज्य मेक्षणं निदधाति यऽएव प्रायणीयस्यऽर्त्विजो भवन्ति तऽउदयनीयस्यऽर्त्विजो भवन्ति तद्यदेतत्समानं यज्ञे क्रियते तेन बाहू सदृशौ तेन सन्नूपौ ॥ २१ ॥ तदु तथा न कुर्यात् । काममेवैतद्बर्हिरनुप्रहरेदेवं मेक्षणं निर्णिज्य स्थालीं निदध्याद्यऽएव प्रायणीयस्यऽर्त्विजो भवन्ति तऽउदयनीयस्यऽर्त्विजो भवन्ति यद्यु ते विप्रेताः स्युरप्यन्यऽएव स्युः स यद्वै समानीर्देवता यजति समानानि हवीꣳषि भवन्ति तेनैव बाहू सदृशौ तेन सन्नूपौ ॥ २२ ॥ स वै पञ्च प्रायणीये देवता यजति । पञ्चोदयनीये तस्मात्पञ्चेत्यादङ्गुलयः पञ्चेत्याहुर्म्युक्तं भवति न पत्नीः संयाजयन्ति पूर्वार्धं वाऽअन्वात्मनो बाहू पूर्वार्धमेवैतद्यज्ञस्याभिसंस्करोति तस्माद्म्युक्तं भवति न पत्नीः संयाजयन्ति ॥ २३ ॥ ब्राह्मणम् ॥ २ [२. ३.] ॥ ॥

दिवि वै सोम आसीत् । अथेह देवास्ते देवा अकामयन्ता नः सोमो गच्छेत्ते-

नागतेन यज्ञमक्षीति तऽएते मायेऽअसृज्रन्त सुपर्णीं च कद्रूं च तद्विख्यानां ब्राह्मणे व्याख्यायते सौपर्णीकाद्रवं यथा तदास ॥१॥ तेभ्यो गायत्री सोममाहृयतत् । तस्याऽआहरत्यै गन्धर्वो विश्वावसुः पर्यमुष्णात्ते देवा अविदुः प्रच्युतो वै परस्तात्सोमोऽथ नो नागहति गन्धर्वा वै पर्यमोषिषुरिति ॥२॥ ते होचुः । योषित्कामा वै गन्धर्वा वाचमेवैभ्यः प्रहिणवाम सा नः सह सोमेनागमिष्यतीति तेभ्यो वाचं प्राहिणवत्सैनाऽसह सोमेनागहत् ॥३॥ ते गन्धर्वा अन्वागत्याब्रुवन् । सोमो युष्माकं वागेवास्माकमिति तथेति देवा अब्रुवन्निहो चेदागान्मैनामभीषहेव नैष्ट विद्धयामहाऽइति तां व्यद्धयत ॥४॥ तस्यै गन्धर्वाः । वेदानेव प्रोचिरऽइति वै वयं विद्मेति वयं विद्मेति ॥५॥ अथ देवाः । वीणामिव सृष्ट्वा वादयन्तो निगायन्तो निषेदुरिति वै ते वयं गास्याम इति वा प्रमोदयिष्यामहऽइति सा देवानुपावर्तत सा वै सा तन्मोघमुपावर्तत या स्तुवद्भ्यः शꣳसद्भ्यो नृत्तं गीतमुपावर्तत तस्माद्प्येतर्हि मोघसꣳहिता एव योषा एवꣳ हि वागुपावर्तत तासु क्वन्या अनु योषास्तस्माद्य एव नृत्यति यो गायति तस्मिन्नेवैता निमिश्रतमा-इव ॥६॥ तद्वाऽएतदुभयं देवेष्वासीत् । सोमश्च वाक्च स यत्सोमं क्रीणात्यागत्याऽएवागतेन यज्ञाऽइत्यनागतेन ह वै स सोमेन यजते योऽक्रीतेन यजते ॥७॥ अथ यद्ध्रुवायामाज्यं परिशिष्टं भवति । तज्जुह्वां चतुष्कृत्वो विगृह्णाति बर्हिषा हिरण्यं प्रबध्यावधाय जुहोति कृत्स्नेन पयसा जुहवानीति समानज्मन्न वै पयश्चहिरण्यं चोभयꣳ ह्यग्निरेतसꣳ ॥८॥ स हिरण्यमवदधाति । एषा ते शुक्र तनूरेतद्वर्च इति वर्चो वाऽएतद्यद्धिरण्यं तया सम्भव भ्राजं गहेति स यदाह तया सम्भवेति तया सम्पृच्यस्वेत्येवैतदाह भ्राजं गहेति सोमो वै भ्राट् सोमं गहेत्येवैतदाह ॥९॥ तां यथैवादो देवाः । प्राहिणवत्सोममहरेवमेवैनामेष एतत्प्रहिणोति सोममह वाग्वै सोमक्रयणी निदानेन तामेतयाऽऽकूत्या प्रीणाति प्री-

तया सोमं क्रीणानीति ॥१०॥ स जुहोति । ज्रूरसीत्येतद्व वा अस्या एकं नाम यज्ज्रूरसीति धृता मनसेति मनसा वाऽइयं वाग्धृता मनो वाऽइदं पुरस्ताद्वाच इत्थं वद मैतद्वादीरित्यलग्लमिव ह वै वाग्वदेद्यन्मनो न स्यात्तस्मादाह धृता मनसेति ॥११॥ जुष्टा विष्णवऽइति । जुष्टा सोमायेत्येवैतदाह यमहेम इति तस्यास्ते सत्यसवसः प्रसवऽइति सत्यप्रसवा न एधि सोमं नोऽहेहीत्येवैतदाह तन्वो यक्ष्मशीय स्वाहेति स ह वै तन्वो यक्ष्मश्नुते यो यज्ञस्योदृचं गृह्णति यज्ञस्योदृचं गृह्णानीत्येवैतदाह ॥१२॥ अथ हिरण्यमपोद्धरति । तन्मनुष्येषु हिरण्यं करोति स यत्सहिरण्यं जुहुयात्परागु हैवैतन्मनुष्येभ्यो हिरण्यं प्रवृञ्ज्यात्तन्न मनुष्येषु हिरण्यमभिगम्येत ॥१३॥ सोऽपोद्धरति । शुक्रमसि चन्द्रमस्यमृतमसि वैश्वदेवमसीति कृत्स्नेन पयसा जुहुत्वा यदेवैतत्तदाह शुक्रमसीति शुक्रꣳ ह्येतच्चन्द्रमसीति चन्द्रꣳ ह्येतदमृतमसीत्यमृतꣳ ह्येतद्वैश्वदेवमसीति वैश्वदेवꣳ ह्येतत्प्रमुच्य तूष्णीं बर्हिष्यपिसृजति सूत्रेण हिरण्यं प्रबध्नीते ॥१४॥ अथापरं चतुर्गृहीतमाज्यं गृहीत्वा । अन्वारभस्व यजमानेत्याहापोर्णुवन्ति शालायै द्वारे दक्षिणतः सोमक्रयण्युपतिष्ठते तत्प्रकृतामेवैनामेतत्सतीं प्राहैषीद्वाग्वै सोमक्रयणी निदानेन तामेतयाकृत्याप्रैषीत्प्रीतया सोमं क्रीणानीति ॥१५॥ अथोपनिष्क्रम्याभिमन्त्रयते । चिदसि मनासीति चित्तं वाऽइदं मनो वागनुवदति धीरसि दक्षिणेति धिया-धिया ह्येतया मनुष्या जुह्यूषत्यनूक्तेनेव प्रकामोक्थेनेव गाथाभिरिव तस्मादाह धीरसीति दक्षिणेति दक्षिणा ह्येषा क्षत्रियासि यज्ञियासीति क्षत्रिया ह्येषा यज्ञिया ह्येषादितिरस्युभयतःशीर्ष्णीति स यदेनया समानꣳ सद्विपर्यासं वदति यदपरं तत्पूर्वं करोति यत्पूर्वं तदपरं तेनोभयतःशीर्ष्णी तस्मादाहादितिरस्युभयतःशीर्ष्णीति ॥१६॥ सा नः सुप्राची सुप्रतीच्येधीति । सुप्राची न एधि सोमं नोऽहेहीत्येवैतदाह सुप्रतीची त एधि सोमेन नः सह पुनरेहीत्येवैतदाह तस्मादाह सा नः सुप्राची सुप्र-

तीच्येधीति ॥१७॥ मित्रस्त्वा पदि बध्नीतामिति । वरुणया वाऽएषा यद्रज्जुः सा यद्रज्ज्वाभिहिता स्याद्वरुणया स्याद्यद्वनभिहिता स्यादृतेव स्यादितद्वाऽअवरुणं यन्मैत्रꣳ सा यथा रज्ज्वाभिहिता यतैवमस्यै तद्भवति यदाह मित्रस्त्वा पदि बध्नीतामिति ॥१८॥ पूषाधनस्यावितिं । इयं वै पृथिवी पूषा यस्य वाऽइयमधनगोपी भवति तस्य न का चन क्षुला भवति तस्मादाह पूषाधनस्यावितिं ॥१९॥ इन्द्रायाध्यक्षायेति । स्वध्यक्षासदित्येवैतदाह यदाहेन्द्रायाध्यक्षायेत्यनु त्वा माता मन्यतामनु पितानु भ्राता सगर्भ्योऽनु सखा सयूथ्य इति सा यत्ते जन्म तेन नोऽनुमता सोममहेहीत्येवैतदाह सा देवि देवमहेहीति देवी ह्येषा देवमहेति यद्वाक्सोमं तस्मादाह सा देवि देवमहेहीतोन्द्राय सोममितीन्द्रो वै यज्ञस्य देवता तस्मादाहेन्द्राय सोममिति रुद्रस्त्वावर्तयत्वित्यप्रणाशायैतदाह रुद्रꣳ हि नाति पशवः स्वस्ति सोमसखा पुनरेहीति स्वस्ति नः सोमेन सह पुनरेहीत्येवैतदाह ॥२०॥ तां यथैवादो देवाः । प्राक्रिणन्त्सोममह सैनात्सह सोमेनागछदेवमेवैनामेष एतत्प्रक्रिणाति सोममह सैनꣳ सह सोमेनागछति ॥२१॥ तां यथैवादो देवाः । व्यक्षयन्त गन्धर्वैः सा देवानुपावर्ततेवमेवैनामेतद्यजमानो विक्षयते सा यजमानमुपावर्तते तामुदीचीमत्याकुर्वन्त्युदीची हि मनुष्याणां दिक्सोऽएव यजमानस्य तस्मादुदीचीमत्याकुर्वन्ति ॥२२॥ ब्राह्मणम् ॥३ [२.४]॥ द्वितीयोऽध्यायः [१७.]॥ ॥

सप्त पदान्यनुनिक्रामति । वृङ्क्तऽएवैनामेतत्तस्मात्सप्त पदान्यनुनिक्रामति यत्र वै वाचः प्रज्ञातानि छन्दाꣳसि सप्तपदा वै तेषां परार्ध्या शक्वरी तामेवैतत्परस्तादर्वाचीं वृङ्क्ते तस्मात्सप्त पदान्यनुनिक्रामति ॥१॥ स वै वाच एव ह्वयेणानुनिक्रामति । वस्व्यस्यदितिरस्यादित्यासि रुद्रासि चन्द्रासीति वस्वी ह्येषादितिर्ह्येषादित्या ह्येषा रुद्रा ह्येषा चन्द्रा ह्येषा बृहस्पतिष्ट्वा सुम्ने रमणावितिं ब्रह्म वै

बृहस्पतिर्बृहस्पतिष्ट्वा साधुनावर्तयवित्येवैतदाह रुद्रो वसुभिराचक्रऽइत्यप्रणाशायैतदाह रुद्रꣳ हि नाति पशवः ॥२॥ अथ सप्तमं पदं पर्युपविशन्ति । स हिरण्यं पदे निधाय जुहोति न वाऽअनग्नावाकृतिर्हूयतेऽग्निरेतसं वै हिरण्यं तथो हास्यैषाग्निमत्येवाकृतिर्हुता भवति वज्रो वाऽआज्यं वज्रेणैवैतदाज्येन स्पृणुते ताꣳ स्पृत्वा स्वीकुरुते ॥३॥ स जुहोति । अदित्यास्त्वा मूर्धन्नाजिघर्मीतीयं वै पृथिव्यदितिरस्यै हि मूर्धन्जुहोति देवयजने पृथिव्याऽइति देवयजने हि पृथिव्यै जुहोतीडायास्पदमसि घृतवत्स्वाहेति गौर्वाऽइडा गोर्हि पदे जुहोति घृतवत्स्वाहेति घृतवद्ध्येतदभिहुतं भवति ॥४॥ अथ स्फ्यमादाय परिलिखति । वज्रो वै स्फ्यो वज्रेणैवैतत्परिलिखति त्रिष्कृत्वः परिलिखति त्रिवृतैवैतद्वज्रेण समन्तं परिगृह्णात्यनतिक्रमाय ॥५॥ स परिलिखति । अस्मे रमस्वेति यजमाने रमस्वेत्येवैतदाहाथ समुल्लिख्य पदꣳ स्थाल्याꣳ संवपत्यस्मे ते बन्धुरिति यजमाने ते बन्धुरित्येवैतदाह ॥६॥ अथाप उपनिनयति । यत्र वाऽअस्यै खनन्तः क्रूरीकुर्वन्त्यपघ्नन्ति शान्तिरापस्तद्विः शान्त्या शमयति तद्विः संदधाति तस्मादप उपनिनयति ॥७॥ अथ यजमानाय पदं प्रयच्छति । वे राय इति पशवो वै रायस्त्वयि पशव इत्येवैतदाह तद्यजमानः प्रतिगृह्णाति मे राय इति पशवो वै रायो मयि पशव इत्येवैतदाह ॥८॥ अथाध्वर्युरात्मानमुपस्पृशति । मा वयꣳ रायस्पोषेण वियौष्मेति तथो हाध्वर्युः पशुभ्य आत्मान्न नान्तरेति ॥९॥ अथ पत्न्यै पदं प्रतिपराहरन्ति । गृहा वै पत्न्यै प्रतिष्ठा तद्गृहेष्वेवैनामेतत्प्रतिष्ठायां प्रतिष्ठापयति तस्मात्पत्न्यै पदं प्रतिपराहरन्ति ॥१०॥ तां नेष्टा वाचयति । तोतो राय इत्यथैनाꣳ सोमक्रयण्या संख्यापयति वृषा वै सोमो योषा पत्न्येष वाऽअत्र सोमो भवति यत्सोमक्रयणी मिथुनमेवैतत्प्रजननं क्रियते तस्मादेनां सोमक्रयण्या संख्यापयति ॥११॥ स संख्यापयति । समख्ये देव्या धिया सं दक्षिणयोरुचक्षसा । मा मऽआयुः प्रमोषीर्मो

ऽअरं तव वीरं विदेय तव देवि संदृशीत्याशिषमेवैतदाशास्ते पुत्रो वै वीरः पुत्रं विदेय तव संदृशीत्येवैतदाह ॥ १२ ॥ सा या बभ्रुः पिङ्गाक्षी । सा सोमक्रयणी यत्र वाऽइन्द्राविष्णू त्रेधा सकुसं व्यैरयेतां तदेकात्यरिच्यत तां त्रेधा प्राजनयतां तस्माद्योऽप्येतर्हि त्रेधा सकुसं व्याकुर्यादेकैवातिरिच्येत ॥ १३ ॥ सा या बभ्रुः पिङ्गाक्षी । सा सोमक्रयणथ या रोहिणी सा वार्त्रघ्नी यामिदꣳ राजा संग्रामं जिग्येदाकुरुतेऽथ या रोहिणी श्येताक्षी सा पितृदेवत्या यामिदं पितृभ्यो घ्नन्ति ॥ १४ ॥ ॥ शतम् १६०० ॥ ॥ सा या बभ्रुः पिङ्गाक्षी । सा सोमक्रयणी स्याद्यदि बभ्रुं पिङ्गाक्षीं न विन्देदरुणा स्याद्यदरुणां न विन्देद्रोहिणी वार्त्रघ्नी स्याद्रोहिण्यै कृष्णैव श्येताक्ष्याऽआशां नेयात् ॥ १५ ॥ सा स्यादप्रवीता । वाग्वाऽएषा निदानेन यत्सोमक्रयणयातयाम्नी वाऽइयं वागयातयाम्न्यप्रवीता तस्मादप्रवीता स्यात्सा स्यादवणडाकूटाकाणाकर्णालक्षितासप्तशफा सा क्षेकवृषैकवृषा ह्येषा वाक् ॥ १६ ॥ ब्राह्मणम् ॥ ४ [३. १.] ॥ ॥

पदꣳ समुप्य पाणीऽअवनेनिक्ते । तद्यत्पाणीऽअवनेनिक्ते वज्रो वाऽआज्यꣳ रेतः सोमो नेदवज्रेणाज्येन रेतः सोमꣳ क्रिनसानीति तस्मात्पाणीऽअवनेनिक्ते ॥ १ ॥ अथास्याꣳ क्रिरण्यं बध्नीते । द्वयं वाऽइदं न तृतीयमस्ति सत्यं चैवानृतं च सत्यमेव देवा अनृतं मनुष्या अग्निरेतसं वै क्रिरण्यꣳ सत्येनाꣳशूनुपस्पृशानि सत्येन सोमं पराक्रणानीति तस्माद्वाऽअस्याꣳ क्रिरण्य बध्नीते ॥ २ ॥ अथ सम्प्रेष्यति । सोमोपनक्रनमाहर सोमपर्याणक्रनमाहरोष्णीषमाहरेति स यदेव शोभनꣳ तत्सोमोपनक्रनꣳ स्याद्वासो ह्यस्यैतद्भवति शोभनꣳ ह्येतस्य वासः स यो ह्येनꣳ शोभनेनोपचरति शोभते ह्याथ य आह यदेव किं चेति यद्धैव किं च भवति तस्माद्यदेव शोभनं तत्सोमोपनक्रनꣳ स्याद्यदेव किं च सोमपर्याणक्रनम् ॥ ३ ॥ यद्युष्णीषं विन्देत् । उष्णीषः स्याद्यद्युष्णीषं न विन्देत्सोमपर्याणक्रनस्यैव द्यङ्गुलं

वा व्यङ्गुलं वावकृतेऽङ्गीषभाजनमधर्युर्वा यजमानो वा सोमोपनहमाद्दत्ते य एव कश्च सोमपर्याणहनम् ॥ ४ ॥ अथाग्रेण राजानं विचिन्वन्ति । तद्वदकुम्भ उपनिहितो भवति तद्ब्राह्मणा उपास्ते तदभ्यायन्ति प्राञ्चः ॥ ५ ॥ तदायत्सु वाचयति । एष ते गायत्रो भाग इति मे सोमाय ब्रूतादेष ते त्रैष्टुभो भाग इति मे सोमाय ब्रूतादेष ते जागतो भाग इति मे सोमाय ब्रूताच्छन्दोनामानाꣳ साम्राज्यं गच्छेति मे सोमाय ब्रूतादित्येकं वाऽएष क्रीयमाणोऽभिक्रीयते छन्दसामेव राज्याय छन्दसाꣳ साम्राज्याय घ्नन्ति वाऽएनमेतद्यदभिषुण्वन्ति नमेतदाह छन्दसामेव वा राज्याय क्राणामि छन्दसाꣳ साम्राज्याय न बधायत्यथेत्य प्राङुपविशति ॥ ६ ॥ सोऽभिमृशति । आस्माकोऽसीति स्व-इव ह्यस्यैतद्भवति यदागतस्तस्माद्वाहास्माको ऽसीति शुक्रस्ते ग्रह्य इति शुक्रꣳ ह्यस्माद्वह्वं ग्रहीष्यन्भवति विचितस्त्वा विचिन्वन्त्विति सर्वत्वायैतदाह ॥ ७ ॥ अत्र हैके । तृणं वा काष्ठं वा विद्वापास्यन्ति तद्ध तथा न कुर्यात्क्षत्रं वै सोमो विडन्या ओषधयोऽन्नं वै क्षत्रियस्य विट् स यथा ग्रसितमनुहायाहित्य परास्येदेवं तत्तस्माद्भ्येव मृशेद्विचितस्त्वा विचिन्वन्त्विति तद्यऽएवास्य विचेतारस्तऽएनं विचिन्वन्ति ॥ ८ ॥ अथ वासः । द्विगुणं वा चतुर्गुणं वा प्राग्दशं वोदग्दशं वोपस्तृणाति तद्राज्ञानं मिमीते स यद्राज्ञानं मिमीते तस्मान्मात्रा मनुष्येषु मात्रो यो चाप्यन्या मात्रा ॥ ९ ॥ सावित्र्या मिमीते । सविता वै देवानां प्रसविता तयो ह्यस्माऽएष सवितृप्रसूत एव क्रयाय भवति ॥ १० ॥ अतिछन्दसा मिमीते । एषा वै सर्वाणि छन्दाꣳसि यदतिछन्दास्तथा ह्यस्यैष सर्वैरेव छन्दोभिर्मितो भवति तस्मादतिछन्दसा मिमीते ॥ ११ ॥ स मिमीते । अभि त्यं देवꣳ सवितारमोण्योः कविक्रतुमर्चामि सत्यसवꣳ रत्नधामभि प्रियं मतिं कविम् । ऊर्धा यस्यामतिर्भा अदिद्युतत्सवीमनि हिरण्यपाणिरमिमीत सुक्रतुः कृपा स्वरिति ॥ १२ ॥ एतया सर्वाभिः । एतया चतसृभिरेतया तिसृभिरे-

तया द्वाभ्यामेतयैकयैतयैवैकयैतया द्वाभ्यामेतया तिसृभिरेतया चतसृभिरेतया सर्वाभिः समस्याञ्जलिनाध्यावपति ॥ १३ ॥ स वाऽउद्वाचं न्याचं मिमीते । स यदुद्वाचं न्याचं मिमीतऽइमा एवैतदङ्गुलीर्नानाज्ञानाः करोति तस्मादिमा नाना ज्ञायन्तेऽथ यत्सह सर्वाभिर्मिमीते सꣳश्लिष्टा-इव ह्येवेमा ज्ञायेरंस्तस्माद्वाऽउद्वाचं न्याचं मिमीते ॥ १४ ॥ यद्वेवोद्वाचं न्याचं मिमीते । इमा एवैतन्नानावीर्याः करोति तस्मादिमा नानावीर्यास्तस्माद्वाऽउद्वाचं न्याचं मिमीते ॥ १५ ॥ यद्वेवोद्वाचं न्याचं मिमीते । विराजमेवैतदर्वाचीं च पराचीं च युनक्ति पराच्यꣳ हि देवेभ्यो यज्ञं वहत्यर्वाची मनुष्यानवति तस्माद्वाऽउद्वाचं न्याचं मिमीते ॥ १६ ॥ अथ यद्दश कृत्वो मिमीते । दशाक्षरा वै विराड्विराजः सोमस्तस्माद्दश कृत्वो मिमीते ॥ १७ ॥ अथ सोमोपनꣳहनस्य समुत्पार्यान्तान् । उष्णीषेण विग्रथ्नाति प्रजाभ्यस्त्वेति प्रजाभ्यो ह्येनं क्रीणाति स यदेवेदꣳ शिरस्याꣳसौ चान्तरोपेनितमिव तदेवास्यैतत्करोति ॥ १८ ॥ अथ मध्येऽङ्गुल्याकाशं करोति । प्रजास्त्वानुप्राणन्त्विति तमयतीव वाऽएनमेतत्समायꣳहन्नप्राणमिव करोति तस्यैतदत एव मध्यतः प्राणमुत्सृजति तं ततः प्राणन्तं प्रजा अनुप्राणन्ति तस्मादाह प्रजास्त्वानुप्राणन्त्विति तꣳ सोमविक्रयिणे प्रयच्छत्यथातः पणानस्यैव ॥ १९ ॥ ब्राह्मणम् ॥ ५ [३. २.] ॥ ॥

स वै राजानं पणते । स यद्राजानं पणते तस्मादिदꣳ सकृत्सर्वं पण्यꣳ स आह सोमविक्रयिन्क्रय्यस्ते सोमो राजाऽइति क्रय्य इत्याह सोमविक्रयी तं वै ते क्रीणानीति क्रीणीहीत्याह सोमविक्रयी कलया ते क्रीणानीति भूयो वाऽअतः सोमो राजार्हतीत्याह सोमविक्रयी भूय एवातः सोमो राजार्हति महांस्त्वेव गोर्मे क्रिमेत्यधर्युः ॥ १ ॥ गौर्वै प्रतिधुक् । तस्यै घृतं तस्यै शरस्तस्यै दधि तस्यै मस्तु तस्याऽआतञ्चनं तस्यै नवनीतं तस्यै घृतं तस्याऽआमिक्षा तस्यै वाजिनꣳ ॥ २ ॥ शफेन ते क्रीणानीति । भूयो वाऽअतः सोमो राजार्हतीत्याह सोमविक्रयी भूय

एवातः सोमो राज्ञार्हति महांस्त्वेव गोर्मह्मिमेत्यध्वर्युरेतान्येव दश वीर्याण्युदाख्याय
आह पदा तेऽर्धेन ते गवा ते क्रीणामीति क्रीतः सोमो राज्ञेत्याह सोमविक्रयी
वयाꣳसि प्रब्रूहीति ॥३॥ स आह । चन्द्रं ते वस्त्रं ते ह्वागा ते धेनुस्ते मिथुनौ
ते गावौ तिस्रस्तेऽन्या इति स यदर्वाक्पणान्ते परः सम्पादयन्ति तस्मादिदꣳ सकृ-
त्सर्वं पण्यमर्वाक्पणान्ते परः सम्पादयत्यथ यदध्वर्युरेव गोर्वीर्याण्युदाचष्टे न सोम-
स्य सोमविक्रयी महितो वै सोमो देवो हि सोमोऽथैतदध्वर्युर्गा महयति तस्मै
पश्यन्वीर्याणि क्रीणादिति तस्मादध्वर्युरेव गोर्वीर्याण्युदाचष्टे न सोमस्य सोम-
विक्रयी ॥४॥ अथ यत्पञ्च कृत्वः पणते । संवत्सरसंमितो वै यज्ञः पञ्च वाऽऋत-
वः संवत्सरस्य तं पञ्चभिराप्नोति तस्मात्पञ्च कृत्वः पणते ॥५॥ अथ हिरण्ये वा-
चयति । शुक्रं वा शुक्रेण क्रीणामीति शुक्रꣳ ह्येतत्क्रुक्रेण क्रीणाति यत्सोमꣳ हि-
रण्येन चन्द्रं चन्द्रेणेति चन्द्रꣳ ह्येतच्चन्द्रेण क्रीणाति यत्सोमꣳ हिरण्येनामृतममृ
तेनेत्यमृताꣳ ह्येतदमृतेन क्रीणाति यत्सोमꣳ हिरण्येन ॥६॥ अथ सोमविक्रयि-
णमभिप्रकम्पयति । सग्मे ते गोरिति यजमाने ते गौरित्येवैतदाह तद्यजमानम-
भ्याहृत्य न्यस्यत्यस्मे ते चन्द्राणीति स आत्मन्येव वीर्यं धत्ते शरीरमेव सोमवि-
क्रयी कुरुते तत्ततः सोमविक्रय्यादत्ते ॥७॥ अथाज्ञायां प्रतीचीनमुख्यां वाचयति ।
तपसस्तनूरसीति तपसो ह वाऽएषा प्रजापतेः सम्भूता यदज्ञा तस्मादाह तपस-
स्तनूरसीति प्रजापतेर्वर्णा इति सा यत्त्रिः संवत्सरस्य विज्ञायते तेन प्रजापतेर्वर्णाः
परमेण पशुना क्रीयसऽइति सा यत्त्रिः संवत्सरस्य विज्ञायते तेन परमः पशुः स-
हस्रपोषं पुषेयमित्याशिषमेवैतदाशास्ते भूमा वै सहस्रं भूमानं गच्छानीत्येवैतदाह
॥८॥ स वाऽअनेनैवाज्ञां प्रयच्छति । अनेन राज्ञानमादत्तऽआज्ञा ह वै नामैषा
यदज्ञैतया ह्येनमत्तत आज्ञपति तामितत्परोऽक्षमज्ञेत्याचक्षते ॥९॥ अथ राज्ञानमा-
दत्ते । मित्रो न एहि सुमित्रध इति शिवो नः शान्त एहीत्येवैतदाह तं यजमा-

नस्य दक्षिणऽऊरौ प्रत्युक्ष्य वासो निदधातीन्द्रस्योरुमाविश दक्षिणमित्येष वा ऽअत्रेन्द्रो भवति यद्यजमानस्तस्मादाहेन्द्रस्योरुमाविश दक्षिणमित्युशन्नुशन्तमिति प्रियः प्रियमित्येवैतदाह स्योनः स्योनमिति शिवः शिवमित्येवैतदाह ॥१०॥ अथ सोमक्रयणाननुदिशति । स्वान भ्राजाङ्गरे बम्भारे हस्त सुहस्त कृशानवेते वः सोमक्रयणास्तान्रक्षध्वं मा वो दभन्निति धिष्ण्यानां वाऽएते भाजनेनैतानि वै धिष्ण्यानां नामानि तान्येवैभ्य एतद्व्यादिक्षत ॥११॥ अथात्रापोर्णुते । गर्भो वाऽएष भवति यो दीक्षते प्रावृता वै गर्भा उल्बेनैव जरायुणैव तमत्राजीजनत तस्मादपोर्णुतऽएष वाऽअत्र गर्भो भवति तस्मात्परिवृतो भवति परिवृता इव हि गर्भा उल्बेनैव जरायुणैव ॥१२॥ अथ वाचयति । परि माग्ने दुश्चरिताद्बाधस्वा मा सुचरिते भजेत्यासीनं वाऽएनमेष आगच्छति स आगतऽउत्तिष्ठति तन्मिथ्याकरोति व्रतं प्रमीणाति तस्यो हैषा प्रायश्चित्तिस्तथो ह्यस्यैतन्न मिथ्याकृतं भवति न व्रतं प्रमीणाति तस्मादाह परि माग्ने दुश्चरिताद्बाधस्वा मा सुचरिते भजेति ॥१३॥ अथ राजानमादायोत्तिष्ठति । उदायुषा स्वायुषोदस्थाममृतां२॥ऽअन्वित्यमृतं वाऽएषोऽनुत्तिष्ठात यः सोमं क्रीतं तस्मादाहोदायुषा स्वायुषोदस्थाममृतां२॥ऽअन्विति ॥१४॥ अथ राजानमादायारोहणमभिप्रेति । प्रति पन्थामपद्महि स्वस्ति गामनेहसम् । येन विश्वाः परि द्विषो वृणक्ति विन्दते वस्विति ॥१५॥ देवा ह वै यज्ञं तन्वानाः । तेऽसुररक्षसेभ्य आसङ्गाद्बिभयां चक्रुस्तऽएतद्यजुः स्वस्त्ययनं ददृशुस्तऽएतेन यजुषा नाष्ट्रा रक्षाꣳस्यपहत्यैतस्य यजुषोऽभयेऽनाष्ट्रे निवाते स्वस्ति समाश्नुवत तथोऽएवैष एतेन यजुषा नाष्ट्रा रक्षाꣳस्यपहत्यैतस्य यजुषोऽभयेऽनाष्ट्रे निवाते स्वस्ति समश्नुते तस्मादाह प्रति पन्थामपद्महि स्वस्ति गामनेहसम् । येन विश्वाः परि द्विषो वृणक्ति विन्दते वस्विति ॥१६॥ तं वाऽइति हरन्ति । अनसा परिवहन्ति मह्यन्त्येवैनमेतत्तस्माद्धीर्षा वीडꣳ हरन्त्यनसोदावहन्ति ॥१७॥

अथ यदपामन्ते क्रीणाति । रसो वाऽआपः सरसमेवैतत्क्रीणात्यथ यद्धिरण्यं भवति सप्युक्रमेवैतत्क्रीणात्यथ यद्वासो भवति सत्वचसमेवैतत्क्रीणात्यथ यदजा भवति सतपसमेवैतत्क्रीणात्यथ यद्वेनुर्भवति साशिरमेवैतत्क्रीणात्यथ यन्मिथुनौ भवतः समिथुनमेवैतत्क्रीणाति तं वै दशभिरेव क्रीणीयान्नादशभिर्दशाक्षरा वै विराड्विराजः सोमस्तस्माद्दशभिरेव क्रीणीयान्नादशभिः ॥ १८ ॥ ब्राह्मणम् ॥ ६ [३. ३.] ॥ द्वितीयः प्रपाठकः ॥ कण्डिकासंख्या १२८ ॥ ॥

नीडे कृष्णाजिनमास्तृणाति । अदित्यास्त्वगसीति सोऽसावेव बन्धुरथैनमासादयत्यदित्यै सद आसीदितीयं वै पृथिव्यदितिः सेयं प्रतिष्ठा तदस्यामेवैनमेतत्प्रतिष्ठायां प्रतिष्ठापयति तस्मादाहादित्यै सद आसीदेति ॥ १ ॥ अथैवमभिपद्य वाचयति । अस्तभ्नाद्द्यां वृषभोऽअन्तरिक्षमिति देवा ह वै यज्ञं तन्वानास्तेऽसुररक्षसेभ्य आसङ्गाद्बिभयां चक्रुस्तऽएनमेतद्ऽयायाऽसमेव बधाच्चक्रुर्यदाहास्तभ्नाद्द्यां वृषभोऽअन्तरिक्षमिति ॥ २ ॥ अमिमीत वरिमाणं पृथिव्या इति । तदेनेनेमांल्लोकानास्पृणोति तस्य हि न कृत्तास्ति न बधो येनेमे लोका आस्पृतास्तस्मादाहामिमीत वरिमाणं पृथिव्या इति ॥ ३ ॥ आसीदद्विश्वा भुवनानि सम्राडिति । तदेनेनेदꣳ सर्वमास्पृणोति तस्य हि न कृत्तास्ति न बधो येनेदꣳ सर्वमास्पृतं तस्मादाहासीदद्विश्वा भुवनानि सम्राडिति ॥ ४ ॥ विश्वेत्तानि वरुणस्य व्रतानीति । तदस्माऽइदꣳ सर्वमनुवर्त्म करोति यदिदं किं च न कं चन प्रत्युच्यामिनं तस्मादाह विश्वेत्तानि वरुणस्य व्रतानीति ॥ ५ ॥ अथ सोमपर्याणाह्नेन पर्याणाह्यति । नेदेनं नाष्ट्रा रक्षाꣳसि प्रमृशानिति गर्भो वाऽएष भवति तिरऽइव वै गर्भास्तिरऽइवैतत्पर्याणद्धं तिरऽइव वै देवा मनुष्येभ्यस्तिरऽइवैतद्यत्पर्याणद्धं तस्माद्वै पर्याणह्यति ॥ ६ ॥ स पर्याणह्यति । वनेषु व्यन्तरिक्षं ततानेति वनेषु हीदमन्तरिक्षं विततं वृत्राग्रेषु वाजमर्वत्सु पय उस्रियास्विति वीर्यं वै वाजाः पुमाꣳसोऽर्वन्तः

पुरुस्वेवैतद्वीर्यं दधाति पय उस्रियास्विति पयो ह्येदमुस्रियासु हितꣳ रेत्सु क्रतुं वरुणो विद्वयमग्निमिति रेत्सु ह्ययं क्रतुर्मनोजवः प्रविष्टो विद्वयमग्निमिति विन्नु ह्ययं प्रज्ञास्वग्निर्दिवि सूर्यमदधात्सोममद्राविति दिवि ह्यसौ सूर्यो हितः सोममद्राविति गिरिषु हि सोमस्तस्मादाह दिवि सूर्यमदधात्सोममद्राविति ॥७॥ अथ यदि द्वे कृष्णाजिने भवतः । तयोरन्यतरत्प्रत्यानह्यति प्रतीनाहभाजनं यद्युꣳ एकं भवति कृष्णाजिनग्रीवा एवावकृत्य प्रत्यानह्यति प्रतीनाहभाजनꣳ सूयस्य चक्षुरारोहाग्नेरन्नादः कनीनकम् । यत्रैतशेभिरीयसे भ्राजमानो विपश्चितेति सूर्यमेवैतत्पुरस्तात्करोति सूर्यः पुरस्तान्नाष्ट्रा रक्षाꣳस्यपघ्नन्नित्यथाभयेनानाष्ट्रेण परिवह्नन्ति ॥८॥ उद्धते प्रꣳउग्गे फलके भवतः । तदुत्तरेण तिष्ठन्त्सुब्रह्मण्यः प्राजति श्रेयान्वाꣳएषोऽभ्यारोहाद्भवति को ह्येतमर्हत्यभ्यारोहुं तस्मादुत्तरेण तिष्ठन्प्राजति ॥९॥ पलाशशाखया प्राजति । यत्र वै गायत्री सोममहापतत्तदस्याꣳआहरत्याꣳअपादस्ताभ्यायत्य पर्णं प्रचिच्छेद गायत्र्यै वा सोमस्य वा राज्ञस्तत्पतित्वा पर्णोऽभवत्तस्मात्पर्णो नाम तथ्यदेवात्र सोमस्य न्यक्तं तदिहाप्यसदिति तस्मात्पलाशशाखया प्राजति ॥१०॥ अथानड्वाहावाजति । तौ यदि कृष्णौ स्यातामन्यतरो वा कृष्णस्तत्र विद्याद्वर्षिष्यत्येषमः पर्जन्यो वृष्टिमान्भविष्यतीत्येतदु विज्ञानम् ॥११॥ अथ युनक्ति । उस्रावेतं धूर्षाहावित्युस्रौ हि भवतो धूर्षाहाविति धूर्वाहौ हि भवतो युज्येथामनश्रूꣳइति युज्येते ह्यनश्रूꣳइत्यनार्ताविति तद्वीरघ्नावित्यपापकृताविति तद्ब्रह्मचोदनाविति ब्रह्मचोदनौ हि भवतः स्वस्ति यजमानस्य गृहान्गच्छतमिति यथैनावुत्तरा नाष्ट्रा रक्षाꣳसि न हिꣳस्युरेवमेतदाह ॥१२॥ अथ पश्चात्यरिक्रम्य । अपालम्बमभिपद्याह सोमाय क्रीतायानुब्रूहीति सोमाय पर्युह्यमाणायेति वातो यतरुथा कामयेत ॥१३॥ अथ वाचयति । भद्रो मेऽसि प्रच्यवस्व भुवस्यतꣳइति भद्रो ह्यस्येष भवति तस्मान्नान्यमाद्रियतेऽप्यस्य राजानः सभागा आ-

गह्न्ति पूर्वो राज्ञोऽभिवदति भद्रो हि भवति तस्मादाह भद्रो मेऽसीति प्रच्यवस्व भुवस्पतऽइति भुवनानाꣳ क्षेष पतिर्विश्वान्यभि धामानीत्यङ्गानि वै विश्वानि धामान्यङ्गान्येवैतद्भ्याह मा वा परिपरिणो विदन्मा वा परिपन्थिनो विदन्मा वा वृका अघायवो विदन्निति यथैनमन्तरा नाष्ट्रा रक्षाꣳसि न विन्देयुरेवमेतदाह ॥१४॥ श्येनो भूत्वा परापतेति । वय एवैनमेतद्भूतं प्रपातयति यद्वाऽउग्रं तन्नाष्ट्रा रक्षाꣳसि नान्ववयल्येतद्वै वयसामोजिष्ठं बलिष्ठं यद्येनस्तमेवैतद्भूतं प्रपातयति यदाह श्येनो भूत्वा परापतेति ॥१५॥ अथ शरीरमेवान्ववक्ति । यज्ञमानस्य गृह्यान्गाह तन्नौ सꣳस्कृतमिति नात्र तिरोहितमिवास्ति ॥१६॥ अथ सुब्रह्मण्यामाह्वयति । यथा येभ्यः पद्यस्स्यात्तान्ब्रूयादित्यह्वे वः पक्तास्मीत्येवमेवैतद्देवेभ्यो यज्ञं निवेदयति सुब्रह्मण्योऽꣳ सुब्रह्मण्योऽमिति ब्रह्म हि देवान्प्रच्यावयति त्रिष्कृत्व आह त्रिवृद्धि यज्ञः ॥१७॥ इन्द्रागहेति । इन्द्रो वै यज्ञस्य देवता तस्मादाहेन्द्रागहेति हरिव आगह मेधातिथेर्मेष वृषणश्वस्य मेने । गौरावस्कन्दिन्नह्ल्यायै जारेति तयान्येवास्य चरणानि तैरेवैनमेतत्प्रमुमोदयिषति ॥१८॥ कौशिक ब्राह्मण गौतम ब्रुवाणेति । शश्वद्वैतदारुणिनाधुनोपन्नातं यद्गौतम ब्रुवाणेति स यदि कामयेत ब्रूयादेतद्यद्यु कामयेतापि नाद्रियेतेत्यह्वे सुत्यामिति यावदह्वे सुत्या भवति ॥१९॥ देवा ब्रह्माण आगह्नेति । तद्देवांश्च ब्राह्मणांश्चाहैतैर्व्यत्रोभयैरर्थो भवति यद्दैवैश्च ब्राह्मणैश्च ॥२०॥ अथ प्रतिप्रस्थाता । अग्रेण शालामग्नीषोमीयेण पशुना प्रत्युपतिष्ठतेऽग्नीषोमौ वाऽएतमन्तर्ज्ञम्भऽआदधाते यो दीक्षत ऽआग्नावैष्णवꣳ ह्यदो दीक्षणीयꣳ हविर्भवति यो वै विष्णुः सोमः स हविर्वाऽएष भवति यो दीक्षते तदेनमन्तर्ज्ञम्भऽआदधाति तत्पशुनात्मानं निष्क्रीणीते ॥२१॥ तद्वैके । आहवनीयादुल्मुकमाहरत्ययमग्निरयꣳ सोमस्ताभ्याꣳ सह सद्यां निष्क्रेष्यामहऽइति वदन्तस्तद्धु तथा न कुर्यादत्र वाऽएतौ क्व च तत्सहैव ॥२२॥ स

वै द्विरूपो भवति । द्विदेवत्यो हि भवति देवतयोरसमदे कृष्णसारंग स्यादित्याङ्करेतद्धेनयो रूपतममिवेति यदि कृष्णसारंगं न विन्देद्यो ऽपि लोहितसारंग स्यात् ॥ २३ ॥ तस्मिन्वाचयति । नमो मित्रस्य वरुणस्य चक्षसे महो देवाय तदृतꣳ सपर्यत । दूरे दृशे देवजाताय केतवे दिवस्पुत्राय सूर्याय शꣳसतेति नम एवास्माऽएतत्करोति मित्रधेयमेवैनेनैतत्कुरुते ॥ २४ ॥ अथाधर्युरारोहणं विमुञ्चति । वरुणस्योत्तम्भनमसीत्युपस्तम्भनेनोपस्तभ्नाति वरुणस्य स्कम्भसर्जनी स्थ इति शम्येऽउद्गृह्णति स यदाह वरुणस्य स्कम्भसर्जनी स्थ इति वरुणयो ह्येष एतर्हि भवति यत्सोमः क्रीतः ॥ २५ ॥ अथ चत्वारो राजासन्दीमाददते । द्वौ वाऽअस्मै मानुषाय राज्ञऽआददातेऽअथैतां चत्वारो योऽस्य सकृत्सर्वस्येष्टे ॥ २६ ॥ औदुम्बरी भवति । अन्नं वाऽऊर्गुदुम्बर ऊर्जैवान्नाद्यस्यावरुद्ध्यै तस्मादौदुम्बरी भवति ॥ २७ ॥ नाभिदग्ना भवति । अत्र वाऽअन्नं प्रतितिष्ठत्यन्नꣳ सोमस्तस्मान्नाभिदग्ना भवत्यत्रो ऽएव रेतस आशयो रेतः सोमस्तस्माद्रेतदग्ना भवति ॥ २८ ॥ तामभिमृशति । वरुणस्यऽऋतसदन्यसीत्यथ कृष्णाजिनमास्तृणाति वरुणस्यऽऋतसदनमसीत्यथैनमासादयति वरुणस्यऽऋतसदनमासीदेति स यदाह वरुणस्यऽऋतसदनमासीदेति वरुणयो ह्येष एतर्हि भवति ॥ २९ ॥ अथैनꣳ शालां प्रपादयति । स प्रपादयन्वाचयति या ते धामानि हविषा यजन्ति ता ते विश्वा परिभूरस्तु यज्ञम् । गयस्फानः प्रतरणः सुवीरोऽवीरहा प्रचरा सोम दुर्यानिति गृहा वै दुर्या गृहान्नः शिवः शान्तोऽपापकृत्प्रचरेत्येवैतदाह ॥ ३० ॥ अत्र केचिद । उदपात्रमुपनिनयन्ति यथा राज्ञऽआगतायोदकमाहरेदेवमेतदिति वदन्तस्तद्धु तथा न कुर्यान्मानुषꣳ ह ते यज्ञे कुर्वन्ति व्यृद्धं वै तद्यज्ञस्य यन्मानुषं नेद्व्यृद्धं यज्ञे करवाणीति तस्मान्नोपनिनयेत् ॥ ३१ ॥ ब्राह्मणम् ॥ १ [३. ४] ॥ तृतीयोऽध्यायः [१८] ॥ ॥

शिरो वै यज्ञस्यातिथ्यं बाहू प्रायणीयोदयनीयौ । अभितो वै शिरो बाहू भ-

वतस्तस्मादभित आतिथ्यमेते ऋत्विषौ भवतः प्रायणीयश्चोदयनीयश्च ॥१॥ अथ यस्मादातिथ्यं नाम । अतिथिर्वाऽएष एतस्यागच्छति यत्सोमः क्रीतस्तस्माऽएतद्यथा राज्ञे वा ब्राह्मणाय वा महोक्षं वा महाजं वा पचेत्तद्ध मानुषꣳ ऋत्विर्देवानामेवमस्माऽएतदातिथ्यं करोति ॥२॥ तदाहुः । पूर्वोऽतीत्य गृह्णीयादिति यत्र वाऽअर्कस्तमागतं नापचायन्ति क्रुध्यति वै स तत्र तथा ह्यपचितो भवति ॥३॥ तद्वाऽअन्यतर एव विमुक्तः स्यात् । अन्यतरोऽविमुक्तोऽथ गृह्णीयात्स यदन्यतरो विमुक्तस्तेनागतो यदन्यतरोऽविमुक्तस्तेनापचितः ॥४॥ तदु तथा न कुर्यात् । विमुच्यैव प्रपाद्य गृह्णीयाद्यथा वै देवानां चरणं तद्वाऽअनु मनुष्याणां तस्मान्मानुषे यावन्न विमुच्यते नैवास्मै तावदुदकꣳ हरन्ति नापचितिं कुर्वन्त्यनागतो हि स तावद्भवत्यथ यदैव विमुच्यतेऽथास्माऽउदकꣳ हरन्त्यथापचितिं कुर्वन्ति तर्हि हि स आगतो भवति तस्माद्विमुच्यैव प्रपाद्य गृह्णीयात् ॥५॥ स वै संवत्सराणऽइव गृह्णीयात् । तथा ह्यपचितो भवति तत्पल्यन्वारभते पर्युह्यमाणं वै यज्ञमानोऽन्वारभतेऽथात्र पल्युभयत एवैतन्मिथुनेनान्वारभते यत्र वाऽअर्कन्नागच्छति सर्वगृह्या-ऽइव वै तत्र चेष्टन्ति तथा ह्यपचितो भवति ॥६॥ स वाऽअन्येनैव ततो यजुषा गृह्णीयात् । येनो चान्यानि ऋवीꣳष्येकं वाऽएष भागं क्रीयमाणोऽभिक्रीयते छन्दसामेव राज्याय छन्दसाꣳ साम्राज्याय तस्य छन्दाꣳस्यभितः साचयानि यथा राज्ञोऽराजानो राजकृतः सूतग्रामण्य एवमस्य छन्दाꣳस्यभितः साचयानि ॥७॥ न वै तदवकल्पते । यच्छन्दोभ्य इति केवलं गृह्णीयाद्यत्र वाऽअर्कन्ते पचन्ति तदभितः साचयोऽन्वाभक्ता भवत्यराजानो राजकृतः सूतग्रामण्यस्तस्माद्यत्रैवैतस्यै गृह्णीयात्तदेव छन्दाꣳस्यन्वाभजेत् ॥८॥ स गृह्णाति । अग्नेस्तनूरसि विष्णवे त्वेत्यग्निर्वै गायत्री तद्गायत्रीमन्वाभजति ॥९॥ सोमस्य तनूरसि विष्णवे त्वेति । क्षत्रं वै सोमः क्षत्रं त्रिष्टुप्क्षत्त्रिष्टुभमन्वाभजति ॥१०॥ अतिथेरातिथ्यमसि विष्णवे त्वेति ।

सोऽस्योद्धारो यथा श्रेष्ठस्योद्धार एवमस्यैषऽऋते छन्दोभ्यः ॥ ११ ॥ श्येनाय त्वा सोमभृते विष्णवे त्वेति । तद्गायत्रीमन्वाभजति सा यद्गायत्री श्येनो भूत्वा दिवः सोममाहरत्तेन सा श्येनः सोमभृत्तेनैवैनामेतद्वीर्येण द्वितीयमन्वाभजति ॥ १२ ॥ अग्नये त्वा रायस्पोषदे विष्णवे त्वेति । पशवो वै रायस्पोषः पशवो जगती तज्जगतीमन्वाभजति ॥ १३ ॥ अथ यत्पञ्च कृत्वो गृह्णाति । संवत्सरसंमितो वै यज्ञः पञ्च वाऽऋतवः संवत्सरस्य तं पञ्चभिराप्नोति तस्मात्पञ्च कृत्वो गृह्णात्यथ यद्विष्णवे त्वा विष्णवे त्वेति गृह्णाति विष्णवे हि गृह्णाति यो यज्ञाय गृह्णाति ॥ १४ ॥ नवकपालः पुरोडाशो भवति । शिरो वै यज्ञस्यातिथ्यं नवाक्षरा वै गायत्र्यष्टौ तानि यान्यन्वाह प्रणवो नवमः पूर्वार्धो वै यज्ञस्य गायत्री पूर्वार्ध एष यज्ञस्य तस्मान्नवकपालः पुरोडाशो भवति ॥ १५ ॥ कार्ष्मर्यमयाः परिधयः । देवा ह वा ऽएतं वनस्पतिषु राज्ञोग्रं ददृशुर्यत्कार्ष्मर्यः शिरो वै यज्ञस्यातिथ्यं नेद्धिरो यज्ञस्य नाष्ट्रा रक्षाऽसि घ्निसन्निति तस्मात्कार्ष्मर्यमयाः परिधयो भवन्ति ॥ १६ ॥ आश्ववालः प्रस्तरः । यज्ञो ह देवेभ्योऽपचक्राम सोऽश्वो भूत्वा पराङावर्तत तस्य देवा अनुहाय वालानभिपेदुस्तानालुलुपुस्तानालुप्य सार्धं संन्यासुस्तत एता ओषधयः समभवन्यदश्ववालाः शिरो वै यज्ञस्यातिथ्यं जघनार्धो वाला उभयत एवैतद्यज्ञं परिगृह्णाति यदाश्ववालः प्रस्तरो भवति ॥ १७ ॥ ऐन्द्रव्यौ विधृती । नेद्धर्हिश्च प्रस्तरश्च संलुभ्यात इत्यथोत्पूयाज्यं सर्वाण्येव चतुर्गृहीतान्याज्यानि गृह्णाति न क्यत्रानुयाजा भवन्ति ॥ १८ ॥ आसाद्य कृष्णमग्निं मन्थति । शिरो वै यज्ञस्यातिथ्यं जनयन्ति वाऽएनमेतद्यन्मन्थन्ति शीर्षतो वाऽग्रे जायमानो जायते शीर्षत एवैतदग्रे यज्ञं जनयत्यग्निर्वै सर्वा देवता अग्नौ हि सर्वाभ्यो देवताभ्यो जुह्वति शिरो वै यज्ञस्यातिथ्यं शीर्षत एवैतद्यज्ञं सर्वाभिर्देवताभिः समर्धयति तस्मादग्निं मन्थति ॥ १९ ॥ सोऽधिमन्थनं शकलमादत्ते । अग्नेर्जनित्रमसीत्यत्र वा अग्निर्जायते

तस्मादाहाग्नेर्जनित्रमसीति ॥ २० ॥ अथ दर्भतरुणके निदधाति । वृषणौ स्थ इति तथावेवैमौ स्त्रियै साकंजावेतावेवैतौ ॥ २१ ॥ अथाधरारणिं निदधाति । उर्वश्यसीत्यथोत्तरारण्याज्यविलापनीमुपस्पृशत्यायुरसीति तामभिनिदधाति पुरूरवा असीत्युर्वशी वाऽअप्सराः पुरूरवाः पतिरथ यत्तस्मान्मिथुनादजायत तदायुरेवमेवैष एतस्मान्मिथुनान्मथ्यꣳ जनयत्यथाहाग्नये मथ्यमानायानुब्रूहीति ॥ २२ ॥ स मन्थति । गायत्रेण त्वा छन्दसा मन्थामि त्रैष्टुभेन त्वा छन्दसा मन्थामि जागतेन त्वा छन्दसा मन्थामीति तं वै छन्दोभिरेव मन्थति छन्दाꣳसि मथ्यमानायान्वाह छन्दाꣳस्येवैतन्मथ्यꣳ मन्वायातयति यथामुमादित्यꣳ रश्मयो जातायानुब्रूहीत्याह यदा जायते प्रक्रियमाणायेत्यनुप्रकरन् ॥ २३ ॥ सोऽनुप्रकरति । भवतं नः समनसौ सचेतसावरेपसौ । मा यज्ञꣳ हिꣳसिष्टं मा यज्ञपतिं जातवेदसौ शिवौ भवतमद्य न इति शान्तिमेवाभ्यमितद्वदति यथा नान्योऽन्यꣳ हिꣳस्याताम् ॥ २४ ॥ अथ स्रुवेणोपकृत्याज्यम् । अग्निमभिजुहोत्यग्नावग्निश्चरति प्रविष्ट ऋषीणां पुत्रोऽअभिशस्तिपावा । स नः स्योनः सुयजा यजेह देवेभ्यो हव्यꣳ सदमप्रयुछन्त्स्वाहेत्याहुत्यै वाऽएतमग्नीजनत तमेतयाहुत्याप्रेषीत्तस्मादेवमभिजुहोति ॥ २५ ॥ तदिडान्तं भवति । नानुयाजान्यजन्ति शिरो वै यज्ञस्यातिथ्यं पूर्वार्धो वै शिरः पूर्वार्धमेवैतद्यज्ञस्याभिसꣳस्करोति स यद्धानुयाजान्यजेद्यथा शीर्षतः पर्याकृत्य पादौ प्रतिदध्यादेवं तत्तस्मादिडान्तं भवति नानुयाजान्यजन्ति ॥ २६ ॥ ब्राह्मणम् ॥ २ [४. १] ॥ ॥

आतिथ्येन वै देवा इष्ट्वा । तान्त्समदविन्दन्ते चतुर्धा व्यद्रवन्नन्योऽन्यस्य श्रियाऽअतिष्ठमाना अग्निर्वसुभिः सोमो रुद्रैर्वरुण आदित्यैरिन्द्रो मरुद्भिर्बृहस्पतिर्विश्वैर्देवैरित्यु हैकऽआहुरेते वै वेव ते विश्वे देवा ये ते चतुर्धा व्यद्रवंस्तान्विदुस्तानसुररक्षसान्यनुव्यवेयुः ॥ १ ॥ तेऽविदुः । पापीयाꣳसो वै भवामोऽसुररक्षसानि वै नोऽनुव्यवागुर्द्विषद्भ्यो वै रध्यामो हन्त संज्ञानामहाऽएकस्य श्रिये तिष्ठामहा

ऽइति तऽइन्द्रस्य श्रियाऽअतिष्ठन्त तस्मादाहुरिन्द्रः सर्वा देवता इन्द्रश्रेष्ठा देवा इति ॥२॥ तस्माद्वु ह न स्वा ऋतीयेरन् । य एषां परस्तरामिव भवति स एनाननुव्यवैति ते प्रियं द्विषतां कुर्वन्ति द्विषन्तो ध्यन्ति तस्मान्नऽर्तीयेरन्स यो ह वै विद्वान्नऽर्तीयतेऽप्रियं द्विषतां करोति न द्विषन्तो ध्यति तस्मान्नऽर्तीयेत ॥३॥ ते होचुः । हन्तेदं तथा करवामहै यथा न इदमाप्रदिवमेवाजर्यमसदिति ॥४॥ ॥ शतम् १७०० ॥ ॥ ते देवाः । जुष्टास्तनूः प्रियाणि धामानि सार्धꣳ समवदधिरे ते होचुरेतेन नः स नानासदेतेन विषड्भो न एतदतिक्रामादिति कस्योपद्रष्टुरिति तनूनपुरेव शाङ्कारस्येति यो वाऽअयं पवतऽएष तनूनपाच्छाङ्कारः सोऽयं प्रजानामुपद्रष्टा प्रविष्टस्ताविमौ प्राणोदानौ ॥५॥ तस्मादाहुः । मनो देवा मनुष्यस्याजानन्तीति मनसा संकल्पयति तत्प्राणमपियन्ति प्राणो वातं वातो देवेभ्य आचष्टे यथा पुरुषस्य मनः ॥६॥ तस्मादेतदृषिणाभ्यनूक्तम् । मनसा संकल्पयति तद्वातमपिगच्छति । वातो देवेभ्य आचष्टे यथा पुरुष ते मन इति ॥७॥ ते देवाः । जुष्टास्तनूः प्रियाणि धामानि सार्धꣳ समवदधिरे ते होचुरेतेन नः स नानासदेतेन विषड्भो न एतदतिक्रामादिति तदेत्रा अप्येतर्हि नातिक्रामन्ति के हि स्युर्यदतिक्रामेयुरनृतꣳ हि वदेयुरेकꣳ ह वै देवा व्रतं चरन्ति सत्यमेव तस्मादेषां ज्ञितमनपज्ञय्यं तस्माद्यश एवꣳ ह वाऽअस्य ज्ञितमनपज्ञय्यमेवं यशो भवति य एवं विद्वान्त्सत्यं वदति तदेतत्तानूनप्तृं निदानेन ॥८॥ ते देवाः । जुष्टास्तनूः प्रियाणि धामानि सार्धꣳ समवदधिरेऽथैतऽआज्यान्येव गृह्णाना जुष्टास्तनूः प्रियाणि धामानि सार्धꣳ समवद्यन्ते तस्माद्वु ह न सर्वेणैव समभ्यवेयान्नेन्मे जुष्टास्तन्वः प्रियाणि धामानि सार्धꣳ समभ्यवायानिन्नि येनो ह समभ्यवेयान्नास्मै दुक्खेदिदꣳ क्याऊर्न सतानुनस्रिणो द्रोग्धव्यमिति ॥९॥ अथातो गृह्णात्येव । आपतये वा परिपतये गृह्णामीति यो वाऽअयं पवतऽएष आ च पतति परि च प-

तत्येतस्माऽउ हि गृह्णाति तस्मादाहापतये वा परिपतये गृह्णामीति ॥ १० ॥ तनूनप्त्रे शाक्वरायेति । यो वाऽअयं पवतऽएष तनूनप्ता शाक्वर एतस्माऽउ हि गृह्णाति तस्मादाह तनूनप्त्रे शाक्वरायेति ॥ ११ ॥ शक्वनऽओजिष्ठायेति । एष वै शक्वौजिष्ठ एतस्माऽउ हि गृह्णाति तस्मादाह शक्वनऽओजिष्ठायेति ॥ १२ ॥ अथातः समवमृशत्येव । एतद्ध देवा भूयः समामिरऽइत्थं नः सोऽमुथासद्यो न एतदतिक्रामादिति तथोऽएवैतऽएतत्सममन्तऽइत्थं नः सोऽमुथासद्यो न एतदतिक्रामादिति ॥ १३ ॥ ते समवमृशन्ति । अनाधृष्टमस्यनाधृष्यं देवानामोज इत्यनाधृष्टा हि देवा आसन्ननाधृष्याः सह सन्तः समानं वदन्तः समानं दधाणा देवानामोज इति देवानां वै जुष्टास्तन्वः प्रियाणि धामान्यनभिशस्त्यभिशस्तिपा अनभिशस्तेन्यमिति सर्वाꣳ हि देवा अभिशस्तिं तीर्णा अञ्जसा सत्यमुपगेषमिति सत्यं वदानि मेदमतिक्रमिषमित्येवैतदाह स्विते मा धा इति स्विते हि तद्देवा आत्मानमदधत यत्सत्यमवदन्यत्सत्यमकुर्वंस्तस्मादाह स्विते मा धा इति ॥ १४ ॥ अथ यास्तद्देवाः । जुष्टास्तनूः प्रियाणि धामानि सार्धꣳ समवददिरे तदिन्द्रे संन्यदधतैष वाऽइन्द्रो य एष तपति न ह वाऽएषोऽग्रे तताप यथा ह्येवेदमन्यत्कृष्णमेवꣳ ह्येवास तेनैवैतद्वीर्येण तपति तस्माद्यदि बह्वयो दीक्षेरन्गृह्णीयुरेव व्रतमभ्युत्सिच्य प्रयच्छेयुः स हि तेषामिन्द्रभाजनं भवति यद्यु दक्षिणावता दीक्षेत यजमानायैव व्रतमभ्युत्सिच्य प्रयच्छेयुरिदꣳ ह्याक्रुरिन्द्रो यजमान इति ॥ १५ ॥ अथ यास्तद्देवाः । जुष्टास्तनूः प्रियाणि धामानि सार्धꣳ समवददिरे तत्सार्धꣳ संन्यग्रे तत्सामाभवत्तस्मादाहुः सत्यꣳ साम देवजꣳ सामेति ॥ १६ ॥ ब्राह्मणम् ॥ ३ [४. २] ॥ ॥

आतिथ्येन वै देवा इष्ट्वा । तात्समदविन्दन्ते तानूनप्त्रेः समशाम्यंस्तऽएतस्य प्रायश्चित्तिमैक्षन्यदन्योऽन्यं पापमवदन्नाह पुरावभृथात्पु दीक्षामवाकल्पयंस्तऽएतामवान्तरां दीक्षामपश्यन् ॥ १ ॥ तेऽग्निनैव व्रतं विपल्याङ्गयन्त । तपो वाऽअ-

ग्निस्तपो दीक्षा तद्वात्तरां दीक्षामुपायंस्तद्यद्वात्तरां दीक्षामुपायंस्तस्माद्वात्तरदीक्षा संतरामङ्गुलीराच्चत्त संतरां मेखलां पर्यस्तामेवैनामेतत्सतीं पर्यास्यत्त तथो ऽएवैष एतद्यदृतः प्राचीनमव्रत्यं वा करोत्यव्रत्यं वा वदति तस्यैवैतत्प्रायश्चित्तिं कुरुते ॥२॥ सोऽग्निनैव व्वचं विपल्यङ्क्यते । तपो वाऽअग्निस्तपो दीक्षा तद्वात्तरां दीक्षामुपैति संतरामङ्गुलीरुचते संतरां मेखलां पर्यस्तामिवैनामेतत्सतीं पर्यस्यते प्रज्ञामु हैव तद्देवा ऽउपायन् ॥३॥ तेऽग्निनैव व्वच विपल्याङ्क्यत्त । अग्निर्वै मिथुनस्य कर्ता प्रजनयिता तत्प्रज्ञामुपायत्संतरामङ्गुलीराच्चत्त संतरां मेखलां तत्प्रज्ञामात्मन्नकुर्वत तथोऽएवैष एतत्प्रज्ञामेवोपैति ॥४॥ सोऽग्निनैव व्वचं विपल्यङ्क्यते । अग्निर्वै मिथुनस्य कर्ता प्रजनयिता तत्प्रज्ञामुपैति संतरामङ्गुलीरुचते संतरां मेखलां तत्प्रज्ञामात्मन्कुरुते ॥५॥ देवानामु ह स्म दीक्षितानाम् । यः समिद्धारो वा स्वाध्यायं वा विसृजते तꣳ ह स्मेतरस्यैवेतरꣳ व्रूपेणेतरस्येतरमसुरक्षसानि जिघाꣳसन्ति ते ह पापं वदत्त ऽउपसमेयुरिति वै मां व्वमचिकीर्षीरिति माजिघाꣳसीरित्यग्निर्ह्येव तथा नान्यमुवादाग्निं तथा नान्यः ॥६॥ ते होचुः । अपीत्थं व्वामग्नेऽवादिषूꣳरिति नैवाहमन्यं न मामन्य इति ॥७॥ तेऽविदुः । अयं वै नो विरक्षस्तमोऽस्यैव व्रूपमसाम तेन रक्षाꣳस्यतिमोद्यामहे तेन स्वर्गं लोकꣳ समश्नुविष्यामहꣳइति तेऽग्नेरेव व्रूपमभवंस्तेन रक्षाꣳस्यत्यमुच्यत्त तेन स्वर्गं लोकꣳ समाश्नुवत तथोऽएवैष एतदग्नेरेव व्रूपं भवति तेन रक्षाꣳस्यतिमुच्यते तेन स्वर्गं लोकꣳ समश्नुते स वै समिधमेवाभ्यादधद्वात्तरदीक्षामुपैति ॥८॥ स समिधमभ्यादधाति । अग्ने व्रतपास्त्वे व्रतपा इत्यग्निर्हि देवानां व्रतपतिस्तस्मादाहाग्ने व्रतपास्त्वे व्रतपा इति या तव तनूरियꣳ सा मयि यो मम तनूरेषा सा व्वयि । सह नौ व्रतपते व्रतानीति तदग्निना व्वचं विपल्यङ्क्यतेऽनु मे दीक्षां दीक्षापतिर्मन्यतामनु तपस्तपस्पतिरिति तद्वात्तरां दीक्षामुपैति संतरामङ्गुलीरुचते संतरां मे-

खलां पर्यस्तामेवैतत्सतीं पर्यस्यते ॥ ९ ॥ अथैनमतो मद्क्तीभिरुपचरन्ति । तपो वाऽअग्निस्तपो मद्क्त्यस्तस्मादेनं मद्क्तीभिरुपचरन्ति ॥ १० ॥ अथ मद्क्तीभिरुपस्पृश्य । राज्ञानमाप्याययन्ति तद्यन्मद्क्तीरुपस्पृश्य राज्ञानमाप्याययन्ति वज्रो वाऽआज्यꣳ रेतः सोमो नेदꣳ रेणाऽज्येन रेतः सोमꣳ क्रिनसामेति तस्मान्मद्क्तीरुपस्पृश्य राज्ञानमाप्याययन्ति ॥ ११ ॥ तदाहुः । यस्माऽएतदाप्यायनं क्रियतऽआतिथ्यꣳ सोमाय तमेवाग्रऽआप्याययेयुरथावान्तरदीक्षामथ तानून्नयाणीति तदु तथा न कुर्याद्यज्ञस्य वाऽएवं कर्मात्र वाऽएनाक्समदविन्दत्ते सꣳशममेव पूर्वमुपायन्नथावान्तरदीक्षामथाप्यायनम् ॥ १२ ॥ तद्यदाप्याययन्ति । देवो वै सोमो दिवि हि सोमो वृत्रो वै सोम आसीत्तस्यैतद्धरीरं यद्धरयो यदृश्मानस्तदेषोशाना नामौषधिर्ज्ञायतऽइति ह स्माह श्वेतकेतुरौद्दालकिस्तामेतदाहृत्याभिषुण्वन्ति तां दीक्षोपसद्भिस्तानून्नयैराप्यायनेन सोमं कुर्वन्तीति तथोऽएवैनामिष एतद्दीक्षोपसद्भिस्तानून्नयैराप्यायनेन सोमं करोति ॥ १३ ॥ मधु सारघमिति वाऽआहुः । यज्ञो ह वै मधु सारघमथैतऽएव सरघो मधुकृतो यद्वित्रस्तद्यथा मधु मधुकृत आप्याययेयुरेवमेवैतद्यज्ञमाप्याययन्ति ॥ १४ ॥ यज्ञेन वै देवाः । इमां ज्ञितिं ज्ञिग्युर्येषामियं ज्ञितिस्ते होचुः कथं न इदं मनुष्यैरनभ्यारोक्यꣳ स्यादिति ते यज्ञस्य रसं धीत्वा यथा मधु मधुकृतो निर्धयेयुर्विदुस्य यज्ञं यूपेन योपयित्वा तिरोऽभवन्नथ यदेनेनायोपयंस्तस्माद्यूपो नाम ॥ १५ ॥ तद्वाऽऋषीणामनुश्रुतमास । ते यज्ञꣳ समभरन्यथायं यज्ञः सम्भृत एवं वाऽएष यज्ञꣳ सम्भरति यो दीक्षते वाग्वै यज्ञस्तद्यदेवात्र यज्ञस्य निर्धीतं यद्विदुग्धं तदेवैतत्पुनराप्याययति ॥ १६ ॥ ते वै षड्भूत्वाप्याययन्ति । षड्वाऽऋतव ऋतव एवैतद्भूत्वाप्याययन्ति ॥ १७ ॥ तऽआप्याययन्ति । अꣳशुरꣳशुष्टे देव सोमाप्यायतामिति तदस्याꣳशुमꣳशुमेवाप्याययन्तीन्द्रायैकधनविदऽइतीन्द्रो वै यज्ञस्य देवता तस्मादाहेन्द्रायेत्येकधनविदऽइति शतꣳ-शतꣳ ह स्म वाऽएष दे-

वान्प्रत्येकैक एवाऽशुरेकधनानाप्यायते दश-दश वा तुभ्यमिन्द्रः प्यायतामा त्वमिन्द्राय प्यायस्वेतीन्द्रो वै यज्ञस्य देवता सा यैव यज्ञस्य देवता तामेवैतदाप्याययत्या त्वमिन्द्राय प्यायस्वेति तदेतस्मिन्नाप्यायनं दधात्याप्याययास्मान्त्सखीत्सन्या मेधयेति स यत्सनोति तत्तदाह यत्सन्येत्यथ यदनुब्रूते तदु तदाह यन्मघयेति स्वस्ति ते देव सोम सुत्यामशीयेत्येका वाऽएतेषामाशीर्भवत्यृत्विजां च यजमानस्य च यज्ञस्योदृचं गछेमेति यज्ञस्योदृचं गछानीत्येवैतदाह ॥ १८ ॥ अथ प्रस्तरे निह्नुवते । उत्तरतऽउपचारो वै यज्ञोऽथैतद्विष्णेवान्वित्याप्याययत्यग्निर्वै यज्ञस्तद्यज्ञं पृष्ठतः कुर्वन्ति तन्मिथ्याकुर्वन्ति देवेभ्य आवृश्चते यज्ञो वै प्रस्तरस्तद्यज्ञं पुनरारभते तस्यो कैषा प्रायश्चित्तिस्तथो कैषामेतन्न मिथ्याकृतं भवति न देवेभ्य आवृश्चते तस्मात्प्रस्तरे निह्नुवते ॥ १९ ॥ तदाहुः । अक्ते निह्नुवीराऽननक्ताऽऽइत्यनक्ते कैव निह्नुवीरन्ननुप्रकृरणꣳ क्वेवाक्तस्य ॥ २० ॥ ते निह्नुवते । दृष्टा रायः प्रेषे भगायऽऋतमृतवादिभ्य इति सत्यꣳ सत्यवादिभ्य इत्येवैतदाह नमो द्यावापृथिवीभ्यामिति तदाभ्यां द्यावापृथिवीभ्यां निह्नुवते ययोरिदꣳ सर्वमधि ॥ २१ ॥ अथाह समुछ्रुष्य प्रस्तरम् । अग्नीन्मदन्त्यापाऽइति मदन्तीत्यग्नीदाह ताभिरेक्षीत्युपर्युपर्यग्निमतिकरति स यन्नानुप्रकृरत्येतेन क्यत ऊर्ध्वान्यकानि प्रचरिष्यन्भवत्यथ यदुपर्युपर्यग्निमतिकरति तदेवास्यानुप्रकृतभाजनं भवति तमग्नीधे प्रयछति तमग्नीन्निदधाति ॥ २२ ॥ ब्राह्मणम् ॥ ४ [४. ३.] ॥ ॥

ग्रीवा वै यज्ञस्योपसदः शिरः प्रवर्ग्यः । तस्माद्यदि प्रवर्ग्यवान्भवति प्रवर्ग्येण प्रचर्याथोपसद्भिः प्रचरन्ति तद्ग्रीवाः प्रतिदधति ॥ १ ॥ तस्याः पूर्वाह्णेऽनुवाक्या भवन्ति । ता अपराह्णे याज्या या याज्यास्ता अनुवाक्यास्तद्व्यतिषजति तस्मादिमानि ग्रीवाणां पर्वाणि व्यतिषक्तानीमान्यस्थीनि ॥ २ ॥ देवाश्च वाऽअसुराश्च । उभये प्राजापत्याः पस्पृधिरे ततोऽसुरा एषु लोकेषु पुरश्चक्रिरेऽयस्मयीमेवास्मिंल्लोके

रजतामत्तरिक्षे कृरिणीं दिवि ॥३॥ तद्वै देवा अस्पृणवत । तऽएताभिरुपसद्भिरुपासीदंस्तद्यदुपासीदंस्तस्मादुपसदो नाम ते पुरः प्राभिन्दन्निमांल्लोकान्प्राजयंस्तस्मादाहुरुपसदा पुरं जयन्तीति यदेनोपासते तेनेमां मानुषीं पुरं जयन्ति ॥४॥ एताभिर्वै देवा ऽउपसद्भिः । पुरः प्राभिन्दन्निमांल्लोकान्प्राजयंस्तथोऽएवैष एतन्नाकृत्वास्माऽअस्मिंल्लोके कञ्चन पुरः कुरुतऽइमानेवैतल्लोकान्प्रभिनत्तीमांल्लोकान्प्रजयति तस्मादुपसद्भिर्यजते ॥५॥ ता वाऽआज्यकृविषो भवन्ति । वज्रो वाऽआज्येनैन वै देवा वज्रेणाज्येन पुरः प्राभिन्दन्निमांल्लोकान्प्राजयंस्तथोऽएवैष एतेन वज्रेणाज्येनेमांल्लोकान्प्रभिनत्तीमांल्लोकान्प्रजयति तस्मादाज्यकृविषो भवन्ति ॥६॥ स वाऽअष्टौ कृत्वो जुहूं गृह्णाति । चतुरुपभृत्यथोऽइतरथाकुश्चतुरेव कृत्वो जुहूं गृह्णीयादष्टौ कृत्व उपभृतीति ॥७॥ स वाऽअष्टावेव कृत्वो जुहूं गृह्णाति । चतुरुपभृति तद्ब्रह्मभिभारं करोति तेन वज्रेणाभिभारेणेमांल्लोकान्प्रभिनत्तीमांल्लोकान्प्रजयति ॥८॥ अग्नीषोमौ वै देवानाꣳ सयुजौ । ताभ्याꣳ सार्धं गृह्णाति विष्णव ऽएकाकिनेऽन्यतरमेवाधारमाधारयति यꣳ स्रुवेण प्रतिक्रामति वाऽउत्तरमाधारमाधार्याभिजित्याऽअभिजयानीति तस्मादन्यतरमेवाधारमाधारयति यꣳ स्रुवेण ॥९॥ अथाश्राव्य न होतारं प्रवृणीते । सीद होतरित्येवाहोपविशति होता होतृषदनऽउपविश्य प्रसौति प्रसूतोऽध्वर्युः स्रुचावादत्ते ॥१०॥ स आहातिक्रामन्नग्नेयऽनुब्रूहीति । आश्राव्याहाग्निं यजेति वषट्कृते जुहोति ॥११॥ अथाह सोमायानुब्रूहीति । आश्राव्याह सोमं यजेति वषट्कृते जुहोति ॥१२॥ अथ यदुपभृत्याज्यं भवति । तत्समानयमान आह विष्णवेऽनुब्रूहीत्याश्राव्याह विष्णुं यजेति वषट्कृते जुहोति ॥१३॥ स यत्समानत्र तिष्ठन्जुहोति । न यथेदं प्रचरत्संचरत्यभिजित्याऽअभिजयानीत्यथ यदेता देवता यजति वज्रमेवैतत्सꣳस्करोत्यग्निमनीकꣳ सोमꣳ शल्यं विष्णुं कुल्मलꣳ ॥१४॥ संवत्सरो हि वज्रः । अग्निर्वाऽअक्षः सोमो रा-

त्रिरथ यदुत्तरेण तद्विष्णुरेतद्वै परिप्लवमानꣳ संवत्सरं करोति ॥१५॥ संवत्सरो वज्रः । एतेन वै देवाः संवत्सरेण वज्रेण पुरः प्राभिन्दन्निमांल्लोकान्प्राजयंस्तथो ऽएवैष एतेन संवत्सरेण वज्रेणेमांल्लोकान्प्रभिनत्तीमांल्लोकान्प्रजयति तस्मादेता देवता यजति ॥१६॥ स वै तिस्र उपसद उपेयात् । त्रयो वाऽऋतवः संवत्सरस्य संवत्सरस्यैवैतद्रूपं क्रियते संवत्सरमेवैतत्सꣳस्करोति द्विरेकया प्रचरति द्विरेकया ॥१७॥ ताः षट्सम्पद्यन्ते । षड्वाऽऋतवः संवत्सरस्य संवत्सरस्यैवैतद्रूपं क्रियते संवत्सरमेवैतत्सꣳस्करोति ॥१८॥ यद्यु द्वादशोपसद उपेयात् । द्वादश वै मासाः संवत्सरस्य संवत्सरस्यैवैतद्रूपं क्रियते संवत्सरमेवैतत्सꣳस्करोति द्विरेकया प्रचरति द्विरेकया ॥१९॥ ताश्चतुर्विꣳशतिः सम्पद्यन्ते । चतुर्विꣳशतिर्वै संवत्सरस्यार्धमासाः संवत्सरस्यैवैतद्रूपं क्रियते संवत्सरमेवैतत्सꣳस्करोति ॥२०॥ स यत्सायम्प्रातः प्रचरति । तथा क्वेव सम्पत्सम्पद्यते स यत्पूर्वाह्णे प्रचरति तज्जयत्यथ यदपराह्णे प्रचरति सुजितमसदित्यथ यज्जुहोतीदं वै पुरं युध्यन्ति तां जित्वा स्वाꣳ सतीं प्रपद्यन्ते ॥२१॥ स यत्प्रचरति । तद्युध्यत्यथ यत्संतिष्ठते तज्जयत्यथ यज्जुहोति स्वामेवैतत्सतीं प्रपद्यते ॥२२॥ स जुहोति । यया द्विरेकस्याङ्गः प्रचरिष्यन्भवति या तेऽग्नेऽयःशया तनूर्वर्षिष्ठा गह्वरेष्ठा । ऊर्ग्वचोऽपावधीत्वेषं वचोऽपावधीत्स्वाहेत्येवꣳरूपा हि सासीदयस्मयी हि सासीत् ॥२३॥ अथ जुहोति । यया द्विरेकस्याङ्गः प्रचरिष्यन्भवति या तेऽग्ने रजःशया तनूर्वर्षिष्ठा गह्वरेष्ठा । ऊर्ग्वचोऽपावधीत्वेषं वचोऽपावधीत्स्वाहेत्येवꣳरूपा हि सासीद्रजता हि सासीत् ॥२४॥ अथ जुहोति । यया द्विरेकस्याङ्गः प्रचरिष्यन्भवति या तेऽग्ने हरिशया तनूर्वर्षिष्ठा गह्वरेष्ठा । ऊर्ग्वचो अपावधीत्वेषं वचोऽपावधीत्स्वाहेत्येवꣳरूपा हि सासीद्धरिणी हि सासीद्यद्यु द्वादशोपसद उपेयाच्चतुरवमेकया प्रचरेच्चतुरवमेकया ॥२५॥ अथातो व्रतोपसदामेव । परुर्वोर्वाऽन्या उपसदः परोऽक्षीर-

न्याः स यासामेकं प्रथमाꣳ दोग्ध्यथ द्वावथ त्रींस्ताः परऽवीरिथ यासां त्रीन्प्रथमाꣳ दोग्ध्यथ द्वावथैकं ताः परोऽक्षीर्या वै परोऽक्षीस्ताः परऽवीर्याः परऽवीस्ताः परोऽक्षीः ॥२६॥ तपसा वै लोकं जयन्ति । तदस्यैतत्परः-पर एव वरीयस्तपो भवति परः-परः श्रेयाꣳसं लोकं जयति वसीयानु ह्येवास्मिंल्लोके भवति य एवं विद्वान्परोऽक्षीरुपसद उपैति तस्मादु परोऽक्षीरेवोपसद उपेयाद्यद्यु द्वादशोपसद उपेयात्त्रींश्चतुरहं दोहयेद्द्वौ चतुरहमेकं चतुरहम् ॥२७॥ ब्राह्मणम् ॥५[४.४]॥ तृतीयः प्रपाठकः ॥ कण्डिकासंख्या १२१ ॥ ॥ चतुर्थोऽध्यायः [११] ॥—॥

तद्य एष पूर्वार्धो वर्षिष्ठ स्थूणाराजो भवति । तस्मात्प्राङ् प्रक्रामति त्रीन्विक्रमांस्तहꣳ निहन्ति सोऽन्तःपातः ॥१॥ तस्मान्मध्यमाहꣳः । दक्षिणा पञ्चदश विक्रमान्प्रक्रामति तहꣳ निहन्ति सा दक्षिणा श्रोणिः ॥२॥ तस्मान्मध्यमाहꣳः । उदङ् पञ्चदश विक्रमान्प्रक्रामति तहꣳ निहन्ति सोत्तरा श्रोणिः ॥३॥ तस्मान्मध्यमाहꣳः । प्राङ् षट्त्रिꣳशतं विक्रमान्प्रक्रामति तहꣳ निहन्ति स पूर्वार्धः ॥४॥ तस्मान्मध्यमाहꣳः । दक्षिणा द्वादश विक्रमान्प्रक्रामति तहꣳ निहन्ति स दक्षिणोऽꣳसः ॥५॥ तस्मान्मध्यमाहꣳः । उदङ् द्वादश विक्रमान्प्रक्रामति तहꣳ निहन्ति स उत्तरोऽꣳस एषा मात्रा वेदः ॥६॥ अथ यत्त्रिꣳशद्विक्रमा पश्चाद्भवति । त्रिꣳशदक्षरा वै विराड्विराजा वै देवा अस्मिंल्लोके प्रत्यतिष्ठंस्तथोऽएवैष एतद्विराजैवास्मिंल्लोके प्रतितिष्ठति ॥७॥ अथोऽअपि त्रयस्त्रिꣳशत्स्युः । त्रयस्त्रिꣳशदक्षरा वै विराड्विराजैवास्मिंल्लोके प्रतितिष्ठति ॥८॥ अथ यत्षट्त्रिꣳशद्विक्रमा प्राची भवति । षट्त्रिꣳशदक्षरा वै बृहती बृहत्या वै देवाः स्वर्गं लोकꣳ समाश्नुवत तथोऽएवैष एतद्बृहत्यैव स्वर्गं लोकꣳ समश्नुते सोऽस्य दिव्याहवनीयो भवति ॥९॥ अथ यच्चतुर्विꣳशतिविक्रमा पुरस्ताद्भवति । चतुर्विꣳशत्यक्षरा वै गायत्री पूर्वार्धो वै यज्ञस्य गायत्री पूर्वार्धं एष यज्ञस्य तस्माच्चतुर्विꣳशतिविक्रमा पुरस्ताद्भव-

त्येषा मात्रा वेदेः ॥ १० ॥ अथ यत्पश्चाद्वरीयसी भवति । पश्चाद्वरीयसी पृथुश्रोणिरिति वै योषां प्रशंसन्ति यद्वेव पश्चाद्वरीयसी भवति पश्चाद्वैवैतद्वरीयः प्रजननं करोति तस्मात्पश्चाद्वरीयसः प्रजननादिमाः प्रजाः प्रजायन्ते ॥ ११ ॥ नासिका ह वा ऽएषा यज्ञस्य यदुत्तरवेदिः । अथ यदेनामुत्तरां वेदिरुपकिरति तस्मादुत्तरवेदिर्नाम ॥ १२ ॥ द्व्यो ह वाऽइदमग्रे प्रजा आसुः । आदित्याश्चैवाङ्गिरसश्च ततोऽङ्गिरसः पूर्वे यज्ञꣳ समभरंस्ते यज्ञꣳ सम्भृत्योचुरग्निमिमां नः श्वःसुत्यामादित्येभ्यः प्रब्रूह्यनेन नो यज्ञेन याजयतेति ॥ १३ ॥ ते हादित्या ऊचुः । उपजानीत यथास्मानेवाङ्गिरसो याजयान्न वयमङ्गिरस इति ॥ १४ ॥ ते होचुः । न वाऽअन्येन यज्ञादपक्रमणमस्त्यन्तरामेव सुत्यां ध्रियामहाऽइति ते यज्ञꣳ संजह्रुस्ते यज्ञꣳ सम्भृत्योचुः श्वःसुत्यां वै त्वमस्मभ्यमग्ने प्रावोचोऽथ वयमद्यसुत्यामेव तुभ्यं प्रब्रूमोऽङ्गिरोभ्यश्च तेषां नस्त्वꣳ होतासीति ॥ १५ ॥ तेऽन्यमेव प्रतिप्रेषुः । अङ्गिरसोऽह ते ह्याप्यङ्गिरसोऽग्नेऽन्वागत्य चुक्रुधुरिव कथं नु नो दूतश्चरन्न प्रत्यादृथा इति ॥ १६ ॥ स होवाच । अनिन्द्या वै मावृषत सोऽनिन्द्यैर्वृतो नाशकमपक्रमितुमिति तस्मादु हानिन्द्यस्य वृतो नापक्रामेत्तऽएतेन सद्यःक्रियाङ्गिरस आदित्यानयाजयत्स सद्यःक्रीः ॥ १७ ॥ तेभ्यो वाचं दक्षिणामानयन् । तां न प्रत्यगृह्णन्ह्यास्यामहे यदि प्रतिग्रहीष्यामइति तदु तद्यज्ञस्य कर्म न व्यमुच्यत यद्दक्षिणामासीत् ॥ १८ ॥ अथेभ्यः सूर्यं दक्षिणामानयन् । तं प्रत्यगृह्णंस्तस्मादु ह स्माऽऊरङ्गिरसो वयं वाऽआर्त्विजीनाः स्मो वयं दक्षिणीया अपि वाऽअस्माभिरेष प्रतिगृहीतो य एष तपतीति तस्मात्सद्यःक्रियोऽश्वः श्वेतो दक्षिणा ॥ १९ ॥ तस्य रुक्मः पुरस्ताद्भवति । तदेतस्य रूपं क्रियते य एष तपति यद्यश्वं श्वेतं न विन्देदपि गौरेव श्वेतः स्यात्तस्य रुक्मः पुरस्ताद्भवति तदेतस्य रूपं क्रियते य एष तपति ॥ २० ॥ तेभ्यो ह वाक्रुक्रोध । केन मदेष श्रेयान्बन्धुनाऽ केनाऽ यदेतं प्रत्यग्रहीष्ट न मामिति सा हैभ्योऽपचक्रा-

म् सोभयानन्तरेण देवासुरास्संयत्तास्सिꣳह्वी भूत्वाददाना चचार तामुपैव देवा अ-
मन्त्रयन्तोपासुरा अग्निरेव देवानां द्रूत आस सहुरश्चा इत्यसुररक्षसमसुराणाꣳ ॥२१॥
सा देवानुपावर्त्स्यन्त्युवाच । यद्व उषाबर्मेय किं मे ततः स्यादिति पूर्वामेव वाग्ने-
राकृतिः प्राप्स्यतीत्यथ हैषा देवानुवाच यां मया कां चाशिषमाशासिष्यधे सा वः
सर्वा समर्धिष्यतꣳइति सैवं देवानुपाववर्त ॥२२॥ स यद्वार्यमाणोऽग्नौ । उत्तरवे-
दिं व्याघारयति यदेवैनामदो देवा अब्रुवन्पूर्वा वाग्नेराकृतिः प्राप्स्यतीति तदेवै-
नामेतत्पूर्वामग्नेराकृतिः प्राप्नोति वाग्घ्येषा निदानेनाथ यदुत्तरवेदिमुपकिरति य-
ज्ञस्यैव सर्वत्वाय वाग्घि यज्ञो वागु ह्येषा ॥२३॥ तां वै युगशम्येन विमिमीते ।
युगेन यत्र हरन्ति शम्यया यतो हरन्ति युगशम्येन वै योग्यं युञ्जन्ति सा यदेवादः
सिꣳह्वी भूत्वाशान्तेवाचरत्तदेवैनामेतद्यज्ञे युनक्ति ॥२४॥ तस्मान्निवृत्तदक्षिणां न
प्रतिगृह्णीयात् । सिꣳह्वी ह्येनं भूत्वा क्षिणोति नो ह्यामाकुर्वीति सिꣳह्वी ह्यैवैनं भू-
त्वा क्षिणोति नो ह्यन्यस्मै दद्याद्यज्ञं तदन्यत्रात्मनः कुर्वीति तस्माद्योऽस्यापि पा-
प-इव समानबन्धुः स्यात्तस्माऽएनां दद्यात्स यद्ददाति तदेनꣳ सिꣳह्वी भूत्वा न
क्षिणोति यदु समानबन्धवे ददाति तदु नान्यत्रात्मनः कुरुतऽएषो निवृत्तदक्षि-
णायै प्रतिष्ठा ॥२५॥ अथ शम्यां च स्फ्यं चादत्ते । तद्य एष पूर्वार्धः उत्तरार्धः
शङ्कुर्भवति तस्मात्प्रत्यङ् प्रक्रामति त्रीन्विक्रमांस्तच्चात्वालं परिलिखति सा चात्वा-
लस्य मात्रा नात्र मात्रास्ति यत्रैव स्वयं मनसा मन्येताग्रेणोत्करं तच्चात्वालं प-
रिलिखेत् ॥२६॥ स वेद्यन्तात् । उदीचीꣳ शम्यां निदधाति स परिलिखति त-
प्तायनी मेऽसीतीमामेवैतदाहास्याꣳ हि तप्त एति ॥२७॥ अथ पुरस्तात् । उदीचीꣳ
शम्यां निदधाति स परिलिखति वित्तायनी मेऽसीतीमामेवैतदाहास्याꣳ हि वि-
विदान एति ॥२८॥ अथानुवेद्यन्तम् । प्राचीꣳ शम्यां निदधाति स परिलिखन्य-
वतान्मा नाथितादितीमामेवैतदाह यत्र नाथितन्मावतादिति ॥२९॥ अथोत्तरतः ।

प्राचीꣳ शम्यां निदधाति स परिलिखत्यव्रतान्मा व्यथितादितीमामेवैतदाह यत्र व्यथेतन्मावतादिति ॥३०॥ अथ हरति । यत्र हरति तदग्नीडुपसोदति स वाऽअग्नीनामेव नामानि गृह्णन्हरति यान्वाऽअमून्देवा अग्नेऽग्नीन्होत्राय प्रावृणत ते प्राधन्वंस्तऽइमा एव पृथिवीरुपासर्पन्निमामेव द्वेऽअस्याः परे तेनैवैतान्नेदानेन हरति ॥३१॥ स प्रहरति । विद्दग्निर्नभो नामाग्नेऽअङ्गिर आयुना नाम्नेहीति स यत्प्राधन्वंस्तदायुर्दधाति तत्समीरयति योऽस्यां पृथिव्यामसीति योऽस्यां पृथिव्यामसीति ह्वा निदधाति यत्तेऽनाधृष्टं नाम यज्ञियं तेन त्वादधऽइति यत्तेऽनाधृष्टꣳ रक्षोभिर्नाम यज्ञियं तेन त्वादधऽइत्येवैतदाहानु त्वा देववीतयऽइति चतुर्थꣳ हरति देवेभ्यस्त्वा जुष्टꣳ हरामीत्येवैतदाह तां वै चतुःस्रक्तेश्चात्वालाद्धरति चतस्रो वै दिशः सर्वाभ्य एवैनामेतद्दिग्भ्यो हरति ॥३२॥ अथानुव्यूहति । सिꣳह्यसि सपत्नसाही देवेभ्यः कल्पस्वेति सा यदेवादः सिꣳही भूत्वाशान्तेवाचरत्तदेवैनामेतदाह सिꣳह्यसीति सपत्नसाहीति त्वया वयꣳ सपत्नान्पापीयसः क्रियास्मेत्येवैतदाह देवेभ्यः कल्पस्वेति योषा वाऽउत्तरवेदिस्तामेवैतद्देवेभ्यः कल्पयति ॥३३॥ तां वै युगमात्रीं वा सर्वतः करोति । यज्ञमानस्य वा दश-दश पदानि दशाक्षरा वै विराड्विराडन्नं विराड्विराड्यज्ञो मध्ये नाभिकामिव करोति समानत्रासीनो व्याघारयाणीति ॥३४॥ तामद्भिरभ्युक्षति । सा यदेवादः सिꣳही भूत्वाशान्तेवाचरद्धान्तिरापस्तामद्भिः शमयति योषा वाऽउत्तरवेदिस्तामेवैतद्देवेभ्यो क्लिन्दति तस्मादद्भिरभ्युक्षति ॥३५॥ सोऽभ्युक्षति । सिꣳह्यसि सपत्नसाही देवेभ्यः प्रुष्वस्वेत्यथ सिकताभिरनुविकिरत्यलंकारो न्वेव सिकता भ्राजन्तऽइव हि सिकता अग्नेर्वाऽएतद्वैश्वानरस्य भस्म यत्सिकता अग्निं वाऽअस्यामाधास्यन्भवति तथो हैनामग्निर्न क्लिनत्ति तस्मात्सिकताभिरनुविकिरति सोऽनुविकिरति सिꣳह्यसि सपत्नसाही देवेभ्यः प्रुष्वस्वेत्यथैनां छादयति सा क्लृप्ताꣳ रात्रिं वसति ॥३६॥ ब्राह्मणम् ॥ १ [५.१] ॥ ॥

इध्ममभ्यादधति । उपयमनीरुपकल्पयत्याज्यमधिश्रयति स्रुवं च स्रुचं च संमार्ष्ट्यथोत्पूयाज्यं पञ्चगृहीतं गृह्णीते यदा प्रदीप्त इध्मो भवति ॥ १ ॥ अथोपकृत्तीध्मम् । उपयकृल्लुपयमनीरथाहाग्नये प्रक्रियमाणायानुब्रूह्येकस्फ्यायानूदेहीत्यनूदेति प्रतिप्रस्थातैकस्फ्ययैतस्मान्मध्यमाद्दक्षोर्य एष वेदेर्दघनार्धे भवति तस्यदेवात्रात्तःपातेन गार्हपत्यस्य वेदेर्व्यवच्छिन्नं भवति तदेवैतदनुसंतनोति ॥ २ ॥ तद्वैके । श्रोत्तरवेदेरनूदायन्ति तदु तथा न कुर्यादेवैतस्मान्मध्यमाद्दक्षोरनूदियात्तश्चायल्यागकृत्युत्तरवेदिम् ॥ ३ ॥ ॥ शतम् १८०० ॥ ॥ प्रोक्षणीरध्वर्युरादत्ते । स पुरस्तादेवाग्ने प्रोक्षत्युदङ् तिष्ठन्निन्द्रघोषस्त्वा वसुभिः पुरस्तात्पावितीन्द्रघोषस्त्वा वसुभिः पुरस्ताद्गोपायवित्येवैतदाह ॥ ४ ॥ अथ पश्चात्प्रोक्षति । प्रचेतास्त्वा रुद्रैः पश्चात्पावितिप्रचेतास्त्वा रुद्रैः पश्चाद्गोपायवित्येवैतदाह ॥ ५ ॥ अथ दक्षिणतः प्रोक्षति । मनोजवास्त्वा पितृभिर्दक्षिणतः पावितिमनोजवास्त्वा पितृभिर्दक्षिणतो गोपायवित्येवैतदाह ॥ ६ ॥ अथोत्तरतः प्रोक्षति । विश्वकर्मा त्वादित्यैरुत्तरतः पावितिविश्वकर्मा त्वादित्यैरुत्तरतो गोपायवित्येवैतदाह ॥ ७ ॥ अथ याः प्रोक्षणीः परिशिष्यन्ते । तश्येऽते पूर्वे स्रुक्ती तयोर्या दक्षिणा ता न्यक्तेन बर्हिर्वेदि निनयतीदमहं तप्तं वार्बर्हिर्धा यज्ञान्निःसृजामीति सा यदेवादः सिक्ती भूत्वाशान्तेवाचरत्तामेवास्या एतद्रुचं बर्हिर्धा यज्ञान्निःसृजति यदि नाभिचरेन्मयुश्चाभिचरेदादिशेदिदमहं तप्तं वारमुमभि निःसृजामीति तमेतया शुचा विध्यति स शोचन्नेवामुं लोकमेति ॥ ८ ॥ स यद्वार्यमाणेऽग्नौ । उत्तरवेदिं व्याधारयति यदेवैनामदो देवा अब्रुवन्पूर्वा त्वाग्नेराकृतिः प्राप्स्यतीति तदेवैनामेतत्पूर्वामग्नेराकृतिः प्राप्नोति यद्वेषा देवानब्रवीच्चां मया कां चाशिषमाशासिष्यधे सा वः सर्वा समर्धिष्यतश्इति तामिनयात्र श्र्त्विजो यजमानायाशिषमाशासते सास्मै सर्वा समृध्यते ॥ ९ ॥ तद्वाऽएतदेकं कुर्वन्नयं करोति । यदुत्तरवेदिं व्याधारयत्यथ यैषां मध्ये नाभिकेव भवति तस्यै ये

पूर्वे स्रक्की तयोर्या दक्षिणा ॥१०॥ तस्यामाघारयति । सिꣳक्यसि स्वाक्रेत्यथापरयोरुत्तरस्याꣳ सिꣳक्यस्यादित्यवनिः स्वाक्रेत्यथापरयोर्दक्षिणस्याꣳ सिꣳक्यसि ब्रह्मवनिः क्षत्रवनिः स्वाक्रेति ब्रह्मो वै यज्ञुःघाशीस्तद्ब्रह्म च क्षत्रं चाशास्तऽउभे वीर्ये ॥११॥ अथ पूर्वयोरुत्तरस्याꣳ । सिꣳक्यसि सुप्रजावनी रायस्पोषवनिः स्वाक्रेति तत्प्रजामाशास्ते यदाह सुप्रजावनिरिति रायस्पोषवनिरिति भूमा वै रायस्पोषस्तद्भूमानमाशास्ते ॥१२॥ अथ मध्यऽआघारयति । सिꣳक्यस्यावह देवान्यज्ञमानाय स्वाक्रेति तद्देवान्यज्ञमानायावाक्रयत्यथ स्रुचमुद्यच्छति भूतेभ्यस्त्वेति प्रजा वै भूतानि प्रजाभ्यस्त्वेत्येवैतदाह ॥१३॥ अथ परिधीन्परिदधाति । ध्रुवोऽसि पृथिवीं दृꣳक्रेति मध्यं ध्रुवक्षितिदस्यन्तरिक्षं दृꣳक्रेति दक्षिणमच्युतक्षितिदसि दिवं दृꣳक्रेत्युत्तरमग्नेः पुरीषमसीति सम्भारानुपनिवपति तद्यत्सम्भारा भवन्त्यग्नेरेव सर्वत्वाय ॥१४॥ शरीरꣳ क्रैवास्य पीतुदारु । तद्यत्पैतुदारवाः परिधयो भवन्ति शरीरेणैवैनमेतत्समर्धयति कृत्स्नं करोति ॥१५॥ माꣳसꣳ क्रैवास्य गुल्गुलु । तद्यद्गुल्गुलु भवति माꣳसेनैवैनमेतत्समर्धयति कृत्स्नं करोति ॥१६॥ गन्धो क्रैवास्य सुगन्धितेजनम् । तद्यत्सुगन्धितेजनं भवति गन्धेनैवैनमेतत्समर्धयति कृत्स्नं करोति ॥१७॥ अथ यद्वृक्षे स्तुका भवति । वृक्षेर्ह वै विषाणेऽअन्तरेणाग्निरेकाꣳ रात्रिमुवास तद्देवात्राग्नेर्न्यक्तं तदिक्ष्यसदिति तस्माद्वृक्षे स्तुका भवति तस्माद्या शीर्ष्णो नेदिष्ठꣳ स्यात्तामाहित्याक्रेरेयुः तां न विन्देदपि यामेव कां चाक्रेत्तद्यत्परिधयो भवन्ति गुप्त्याऽएव दूरऽइव क्येनमुत्तरे परिधय आगच्छन्ति ॥१८॥ ब्राह्मणम् ॥२[५.२]॥ ॥

पुरुषो वै यज्ञः । पुरुषस्तेन यज्ञो यदेनं पुरुषस्तनुतऽएष वै तायमानो यावानेव पुरुषस्तावान्विधीयते तस्मात्पुरुषो यज्ञः ॥१॥ शिर एवास्य क्रविर्धानम् । वैष्णवं देवतयाथ यदस्मिन्सोमो भवति क्रविर्वै देवानाꣳ सोमस्तस्माद्धविर्धानं नाम ॥२॥ मुखमेवास्याक्रवनीयः । स यदाक्रवनीये जुक्रोति यथा मुखऽआसि-

स्वेदेवं तत् ॥३॥ स्तुप एवास्य यूपः । बाहूऽएवास्याग्नीध्रीयश्च मार्जालीयश्च ॥४॥ उदरमेवास्य सदः । तस्मात्सदसि भक्षयन्ति यद्धीदं किं चाश्नत्युदरऽएवैदꣳ सर्वं प्रतितिष्ठत्यथ यदस्मिन्विश्वे देवा असीदंस्तस्मात्सदो नाम तऽऽएवास्मिन्नेते ब्राह्मणा विश्वगोत्राः सीदन्ति ॥५॥ अथ यावेतौ जघनेनाग्नी । पादावेवास्यैतावेष वै तायमानो यावानेव पुरुषस्तावान्विधीयते तस्मात्पुरुषो यज्ञः ॥६॥ उभयतोद्वारꣳ हविर्धानं भवति । उभयतोद्वारꣳ सदस्तस्मादयं पुरुष आत्तः संनृषाः प्राणिति हविर्धानेऽउपतिष्ठते ॥७॥ ते समवर्तयन्ति । दक्षिणेनैव दक्षिणामुत्तरेणोत्तरं यद्वर्षीयस्तद्दक्षिणꣳ स्यात् ॥८॥ तयोः समववृत्तयोः । हृदिरधिनिदधति यदि हृदिर्न विन्देयुश्चृदिःसंमितां भित्तिं प्रत्यानक्षन्ति रराट्यां परिश्रयन्त्युच्छ्रायीभ्यां हृदिः पश्चादधिनिदधति हृदिःसंमितां वा भित्तिम् ॥९॥ अथ पुनः प्रपद्य । चतुर्गृहीतमाज्यं गृहीत्वा सावित्रं प्रसवाय जुहोति सविता वै देवानां प्रसविता सवितृप्रसूताय यज्ञं तनवामहाऽइति तस्मात्सावित्रं जुहोति ॥१०॥ स जुहोति । युञ्जते मन उत युञ्जते धिय इति मनसा च वै वाचा च यज्ञं तन्वते स यदाह युञ्जते मन इति तन्मनो युनक्त्युत युञ्जते धिय इति तद्वाचं युनक्ति धिया-धिय इत्येतया मनुष्या जुह्वूषन्त्यनूक्तेनेव प्रकामोक्थेनेव गाथाभिरिव ताभ्यां युक्ताभ्यां यज्ञं तन्वते ॥११॥ विप्रा विप्रस्य बृहतो विपश्चित इति । ये वै ब्राह्मणाः शुश्रुवाꣳसोऽनूचानास्ते विप्रास्तानेवैतदभ्याह बृहतो विपश्चित इति यज्ञो वै बृहन्विपश्चिद्यज्ञमेवैतदभ्याह वि होत्रा दधे वयुनाविदेक इदिति वि हि होत्रा दधते यज्ञं तन्वाना महो देवस्य सवितुः परिष्टुतिः स्वाहेति तत्सावित्रं प्रसवाय जुहोति ॥१२॥ अथापरं चतुर्गृहीतमाज्यं गृहीत्वा । उपनिष्क्रामति दक्षिणाया द्वारा पत्नीं निष्क्रामयन्ति स दक्षिणस्य हविर्धानस्य दक्षिणायां वर्तन्याꣳ हिरण्यं निधाय जुहोतीदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् । समूढमस्य पाꣳसुरे स्वाहेति

सꣳस्रवं पत्न्यै पाणावानयति सान्नस्य संतापमुपानक्ति देवश्रुतौ देवेघाघोषतमिति प्रयक्षति प्रतिप्रस्थात्रे स्रुचं चाज्यविलापनीं च पर्याणायन्ति पत्नीमुभौ ज्रघनेनाग्नी ॥ १३ ॥ चतुर्गृहीतमाज्यं गृह्णीत्वा । प्रतिप्रस्थातोत्तरस्य हविर्धानस्य दक्षिणायां वर्तन्याꣳ हिरण्यं निधाय जुहोतीरावती धेनुमती हि भूतꣳ सूयवसिनी मनवे दशस्या । व्यस्कभ्ना रोदसी विष्णवेते दाधर्थ पृथिवीमभितो मयूखैः स्वाहेति सꣳस्रवं पत्न्यै पाणावानयति सान्नस्य संतापमुपानक्ति देवश्रुतौ देवेघाघोषतमिति तयदेवं जुहोति ॥ १४ ॥ देवा ह वै यज्ञं तन्वानाः । तेऽसुररक्षसेभ्य आसङ्गाद्भियां चक्रुर्वज्रो वाऽआज्य तऽएतेन वज्रेणाज्येन दक्षिणातो नाष्ट्रा रक्षाꣳस्यवाघ्नꣳस्तथैषां नियानं नान्ववायंस्तथोऽएवैष एतेन वज्रेणाज्येन दक्षिणातो नाष्ट्रा रक्षाꣳस्यवहन्ति तथास्य नियानं नान्ववयन्ति तयद्ध्रुवाभ्यामृग्भ्यां जुहोति वैष्णवꣳ हि हविर्धानम् ॥ १५ ॥ अथ यत्पत्न्यक्षस्य संतापमुपानक्ति । प्रजननमेवैतत्क्रियते यदा वै स्त्रियै च पुꣳसश्च संतप्यतेऽथ रेतः सिच्यते तत्ततः प्रजायते परागुपानक्ति पराग्घ्येव रेतः सिच्यतेऽथाह हविर्धानाभ्यां प्रवर्त्यमानाभ्यामनुब्रूहीति ॥ १६ ॥ अथ वाचयति । प्राची प्रेतमधरं कल्पयन्तीऽइत्यधरो वै यज्ञः प्राची प्रेतं यज्ञं कल्पयन्तीऽइत्येवैतदाहोर्ध्वं यज्ञं नयतं मा जिह्वरतमित्यूर्ध्वमिमं यज्ञं देवलोकं नयतमित्येवैतदाह मा जिह्वरतमिति तदेतस्माऽअक्षलामाशास्ते समुद्भ्येव प्रवर्तयेयुर्यथा नोत्सर्जेतामसुर्या वाऽएषा वाग्यान्ने नेद्धासुर्या वाग्वदादिति यद्युत्सर्जेताम् ॥ १७ ॥ एतद्वाचयेत् । स्वं गोष्ठमावदतं देवी दुर्ये आयुर्मा निर्वादिष्टं प्रजां मा निर्वादिष्टमिति तस्यो ह्वैषा प्रायश्चित्तिः ॥ १८ ॥ तदाहुः । उत्तरवेदेः प्रत्यङ् प्रक्रामेत्त्रीन्विक्रमांस्तद्धविर्धाने स्थापयेत्सा हविर्धानयोर्मात्रेति नात्र मात्रास्ति यत्रैव स्वयं मनसा मन्येत नाह्वैव सत्रात्यन्तिके नो दूरे तत्स्थापयेत् ॥ १९ ॥ तेऽभिमन्त्रयते । अत्र रमेथां वर्ष्मन्पृथिव्याऽइति वर्ष्म ह्येतत्पृथिव्यै भवति दि-

वि क्षस्याक्ष्वनीयो भवति नभ्यस्थं करोति तद्धि नेमस्य रूपम् ॥ २० ॥ अथोत्तरेण पर्येत्याधर्युः । दक्षिणꣳ क्ष्विर्धानमुपस्तभ्नाति विष्णोर्नु कं वीर्याणि प्रवोचं यः पार्थिवानि विममे रजाꣳसि । योऽअस्कभायदुत्तरꣳ सधस्थं विचक्रमाणस्त्रेधोरुगायो विष्णवे त्वेति मेथीमुपनिक्त्तीतरतस्ततो यदु च मानुषे ॥ २१ ॥ अथ प्रतिप्रस्थाता । उत्तरꣳ क्ष्विर्धानमुपस्तभ्नाति दिवो वा विष्णऽउत वा पृथिव्या महो वा विष्णऽउरोरन्तरिक्षात् । उभा हि हस्ता वसुना पृणस्वा प्रयच्छ दक्षिणादोत सव्याद्विष्णवे त्वेति मेथीमुपनिक्त्तीतरतस्ततो यदु च मानुषे तच्चैष्णवैर्यजुर्भिरुपचरन्ति वैष्णवꣳ हि क्ष्विर्धानम् ॥ २२ ॥ अथ मध्यं क्षद्रिरुपस्पृश्य वाचयति । प्र तद्विष्णु स्तवते वीर्येण मृगो न भीमः कुचरो गिरिष्ठाः । यस्योरुषु त्रिषु विक्रमणेष्वधिक्षियन्ति भुवनानि विश्वेतीदꣳ क्ष्वास्यैतच्छीर्षकपालं यदिदमुपरिष्टादधीव क्ष्वेतत्क्षियत्यन्यानि शीर्षकपालानि तस्मादाक्षाधिक्षियन्तीति ॥ २३ ॥ अथ ललाट्यामुपस्पृश्य वाचयति । विष्णो ललाटमसीति ललाटꣳ क्ष्वास्यैतदथोक्ष्ण्याऽउपस्पृश्य वाचयति विष्णोः श्नप्त्रे स्थ इति स्नक्वे क्ष्वास्यैतेऽअथ यदिदं पश्चाच्छ्दिर्भवतीदꣳ क्ष्वास्यैतच्छीर्षकपालं यदिदं पश्चात् ॥ २४ ॥ अथ स्रुस्पूञ्जन्या स्पन्यया प्रसीव्यति । विष्णोः स्यूरसीत्यथ ग्रन्थिं करोति विष्णोर्ध्रुवोऽसीति नेद्धवपद्याताऽइति तं प्रकृते कर्मन्विष्यति तथो क्षाधर्युं वा यजमानं वा ग्राहो न विन्दति तन्निष्टितमभिमृशति वैष्णवमसीति वैष्णवꣳ हि क्ष्विर्धानम् ॥ २५ ॥ ब्राह्मणम् ॥ ३ [५. ३] ॥ ॥

द्वयं वाऽअभ्युपरवाः खायन्ते । शिरो वै यज्ञस्य क्ष्विर्धानं तच्चऽइमे शीर्षञ्छ्वारः कूपा इमावꣳ क्ष द्वाविमौ द्वौ तानेवैतत्करोति तस्मादुपरवान्खनति ॥ १ ॥ देवाश्च वाऽअसुराश्च । उभये प्राजापत्याः पस्पृधिरे । ततोऽसुरा एषु लोकेषु कृत्यां वलगामिचख्नुस्तेवं चिद्देवानभिभवेमेति ॥ २ ॥ तꣳ देवा अस्पृणवत । तऽएतैः कृत्या वलगानुदखनन्यदा वै कृत्यामुत्खनत्यथ सालसा मोघा भवति तथोऽएतै-

वैष एतद्यद्यस्माऽअत्र कश्चिद्द्विषन्भ्रातृव्यः कृत्यां वलगान्निखनति तानेवैतदुत्किरति तस्मादुपरवान्खनति स दक्षिणस्य कृविर्धानस्याधोऽधः प्रङ्ङं खनति ॥३॥ सोऽश्रिमादत्ते । देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामाददे नार्यसीति समान एतस्य यजुषो बन्धुर्योषो वाऽएषा यदश्रिस्तस्मादाह नार्यसीति ॥४॥ तान्प्रादेशमात्रं त्रिना परिलिखति । इदमहꣳ रक्षसां ग्रीवा अपिकृन्तामीति वज्रो वाऽअश्रिर्वज्रेणैवैतन्नाष्ट्राणाꣳ रक्षसां ग्रीवा अपिकृन्तति ॥५॥ तयावेतौ पूर्वौ । तयोर्दक्षिणमेवाग्रे परिलिखेदथापरयोरुत्तरमथापरयोर्दक्षिणमथ पूर्वयोरुत्तरम् ॥६॥ अथोऽइतरथाङ्कः । अपरयोरेवाग्रऽउत्तरं परिलिखेदथ पूर्वयोर्दक्षिणमथापरयोर्दक्षिणमथ पूर्वयोरुत्तरमित्यथोऽअपि समीच एव परिलिखेदेतं वेवोत्तमं परिलिखेद्य एष पूर्वयोरुत्तरो भवति ॥७॥ तान्यथापरिलिखितमेव यथापूर्वं खनति । बृहन्नसि बृहद्वा इत्युपस्तौत्येवैनानेतन्मह्यत्येव यदाह बृहन्नसि बृहद्वा इति बृहतीमिन्द्राय वाचं वदेतीन्द्रो वै यज्ञस्य देवता वैष्णवꣳ कृविर्धानं तत्सेन्द्रं करोति तस्मादाह बृहतीमिन्द्राय वाचं वदेति ॥८॥ रक्षोहणं वलगहनमिति । रक्षसाꣳ ह्येते वलगानां बधाय खायन्ते वैष्णवीमिति वैष्णवी हि कृविर्धाने वाक् ॥८॥ तान्यथाखातमेवोत्किरति । इदमहं तं वलगमुत्किरामि यं मे निष्ठो यममात्यो निचखानेति निष्ठो वा वाऽअमात्यो वा कृत्यां वलगान्निखनति तानेवैतदुत्किरति ॥९॥ इदमहं तं वलगमुत्किरामि । यं मे समानो यमसमानो निचखानेति समानो वा वाऽअसमानो वा कृत्यां वलगान्निखनति तानेवैतदुत्किरति ॥१०॥ इदमहं तं वलगमुत्किरामि । यं मे सबन्धुर्यमसबन्धुर्निचखानेति सबन्धुर्वा वाऽअसबन्धुर्वा कृत्यां वलगान्निखनति तानेवैतदुत्किरति ॥११॥ इदमहं तं वलगमुत्किरामि । यं मे सजातो यमसजातो निचखानेति सजातो वा वाऽअसजातो वा कृत्यां वलगान्निखनति तानेवैतदु-

त्किरत्युत्कृत्यां किरामीत्यन्तत उद्वपति तत्कृत्यामुत्किरति ॥ १२ ॥ तान्बाङ्गमात्रान्खनेत् । अन्तो वाऽएषोऽन्तेनैवैतत्कृत्यां मोक्षयति तानक्षणया संतृन्दन्ति यक्षणया न शक्नुयादपि समीचस्तस्मादिमे प्राणाः परः संतृण्णाः ॥ १३ ॥ तान्यथाखातमेवावमर्शयति । स्वराडसि सपत्नक्षा सत्यराडस्यभिमातिक्षा जनराडसि रक्षोक्षा सर्वराडस्यमित्रक्षेत्याशीरेवैषैतस्य कर्मण आशिषमेवैतदाशास्ते ॥ १४ ॥ अथाधर्युश्च यजमानश्च संमृशेते । पूर्वयोर्दक्षिणोऽधर्युर्भवत्यपरयोरुत्तरे यजमानः सोऽधर्युः पृच्छति यजमान किमत्रेति भद्रमित्याह तन्नौ सक्षेत्युपाꣳश्वधर्युः ॥ १५ ॥ अथापरयोर्दक्षिणोऽधर्युर्भवति । पूर्वयोरुत्तरे यजमानः स यजमानः पृच्छत्यधर्यो किमत्रेति भद्रमित्याह तन्म इति यजमानस्तच्चदेवꣳ संमृशेते प्राणानेवैतत्सयुजः कुरुतस्तस्मादिमे प्राणाः परः संविद्रेऽथ यत्पृष्टो भद्रमिति प्रत्याह कल्याणमेवैतन्मानुष्ये वाचो वदति तस्मात्पृष्टो भद्रमिति प्रत्याहाथ प्रोक्षत्येको वै प्रोक्षणस्य बन्धुर्मेध्यानेवैतत्करोति ॥ १७ ॥ स प्रोक्षति । रक्षोक्षणो वो वलगक्षन इति रक्षोक्षणो क्षेते वलगक्षनो क्षेते प्रोक्षामि वैष्णवानिति वैष्णवा क्षेते ॥ १८ ॥ अथ याः प्रोक्षणयः परिशिष्यन्ते । ता अवटेष्ववनयति तच्चा इमाः प्राणेष्वापस्ता एवैतद्दधाति तस्मादेषु प्राणेष्विमा आपः ॥ १९ ॥ सोऽवनयति । रक्षोक्षणो वो वलगक्षनोऽवनयामि वैष्णवानित्यथ बर्हींषि प्राचीनाग्राणि चोदीचीनाग्राणि चावस्तृणाति तच्चानीमानि प्राणेषु लोमानि तान्येवैतद्दधाति तस्मादेषु प्राणेष्विमानि लोमानि ॥ २० ॥ सोऽवस्तृणाति । रक्षोक्षणो वो वलगक्षनोऽवस्तृणामि वैष्णवानित्यथ बर्हींषि तनूनपोपरिष्टात्प्रच्छादयति केशा वै क्षेवास्यैते ॥ २१ ॥ अथाधिषवणे फलकेऽउपदधाति । रक्षोक्षणौ वां वलगक्षनाऽउपदधामि वैष्णवीऽइति क्षनू वै क्षेवास्यैतेऽअथ पर्यूक्षति रक्षोक्षणौ वां वलगक्षनौ पर्यूक्षामि वैष्णवीऽइति दृꣳक्षत्येवैनेऽएतद्दृशिथिले करोति ॥ २२ ॥ अथाधिषवणं परिकृत्तं भवति । सर्वरोक्षितं

ञिक्ष्वा क्रैवास्येषा तन्यत्सर्वरोहितं भवति लोहिनीव क्रीयं ञिक्ष्वा तन्निदधाति वैष्णवमसीति वैष्णवꣳ क्षेतन् ॥२३॥ अथ ग्रावणा उपावकरति । दत्ता क्रैवास्य ग्रावाणास्तन्यद्भावभिरभिषुण्वन्ति यथा दद्भिः प्सायदेवं तत्तान्निदधाति वैष्णवा स्थेति वैष्णवा क्षेतऽएतद्वै यज्ञस्य शिरः सꣳस्कृतम् ॥२४॥ ब्राह्मणम् ॥ ४ [५. ४] ॥ ॥ पञ्चमोऽध्यायः [२०] ॥ ॥

उदरमेवास्य सदः । तस्मात्सदसि भक्षयन्ति यद्धीदं किं चाश्नल्युदरऽएवेदꣳ सर्वं प्रतितिष्ठत्यथ यदस्मिन्विश्वे देवा असीदंस्तस्मात्सदो नाम तऽऽएवास्मिन्नेते ब्राह्मणा विश्वगोत्राः सीदन्त्यैन्द्रं देवतया ॥ १ ॥ तन्मध्यऽऔदुम्बरीं मिनोति । अन्नं वाऽऊर्गुदुम्बर ऊदरमेवास्य सदस्तन्मध्यतोऽन्नाद्यं दधाति तस्मान्मध्यऽऔदुम्बरीं मिनोति ॥ २ ॥ अथ य एष मध्यमः शङ्कुर्भवति । वेदेर्जघनार्धे तस्मात्प्राङ् प्रक्रामति षड्विक्रमान्दक्षिणा सप्तममपक्रामति सम्पदः कामाय तदवटं परिलिखति ॥ ३ ॥ सोऽग्निमादत्ते । देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामाददे नार्यसीति समानꣳ एतस्य यजुषो बन्धुर्योषो वाऽएषा यदग्निस्तस्मादाह नार्यसीति ॥ ४ ॥ अथावटं परिलिखति । इदमहꣳ रक्षसां ग्रीवा अपिकृन्तामीति वज्रो वाऽअग्निर्वज्रेणैवैतन्नाष्ट्राणाꣳ रक्षसां ग्रीवा अपिकृन्तति ॥ ५ ॥ अथ खनति । प्राञ्चमुत्करमुत्किरति यजमानेन संमायौदुम्बरीं परिवासयति तामग्रेण प्राचीं निदधात्येतावन्मात्राणि बर्हींष्युपरिष्टादधिनिदधाति ॥ ६ ॥ अथ यवमत्यः प्रोक्षण्यो भवन्ति । आपो ह वाऽओषधीनाꣳ रसस्तस्मादोषधयः केवल्यः खादिता न धिन्वत्योषधय उ ह्यापाꣳ रसस्तस्मादापः पीताः केवल्यो न धिन्वन्ति यद्वोभ्यः सꣳसृष्टा भवत्ययैव धिन्वन्ति तर्हि हि सरसा भवन्ति सरसाभिः प्रोक्षणीति ॥ ७ ॥ देवाश्च वाऽअसुराश्च । उभये प्राजापत्याः पस्पृधिरे ततो देवेभ्यः सर्वा एवौषधय ईयुर्यवा क्रैवेभ्यो नेयुः ॥ ८ ॥ तद्धै देवा अस्पृण्वत । तऽएतैः सर्वाः सपत्नानामो-

षधीरयुवत यद्युवत तस्माद्यवा नाम ॥ १ ॥ ते होचुः । हन्त यः सर्वासामोषधीनाꣳ रसस्तं यवेषु दधामेति स यः सर्वासामोषधीनाꣳ रस आसीत्तं यवेष्वदधुस्तस्माद्यत्रान्या ओषधयो म्लायन्ति तदेते मोदमाना वर्धन्तऽएवꣳ ह्येषु रसमदधुस्तथोऽएवैष एतैः सर्वाः सपत्नानामोषधीर्युते तस्माद्यवमत्यः प्रोक्षणयो भवन्ति ॥ १० ॥ स यवानावपति । यवोऽसि यवयास्मद्द्वेषो यवयारातीरिति नात्र तिरोहितमिवास्त्यथ प्रोक्षत्येको वै प्रोक्षणस्य बन्धुर्मेध्यामेवैतत्करोति ॥ ११ ॥ स प्रोक्षति । दिवे वान्तरिक्षाय वा पृथिव्यै वेतीमानेवैतल्लोकान्ऊर्जा रसेन भाजयत्येषु लोकेषूर्जꣳ रसं दधाति ॥ १२ ॥ अथ याः प्रोक्षणयः परिशिष्यन्ते । ता अवटेऽवनयति शुन्धन्तां लोकाः पितृषदना इति पितृदेवत्यो वै कूपः खातस्तमेवैतन्मेध्यं करोति ॥ १३ ॥ अथ बर्हीꣳषि । प्राचीनाग्राणि चोदीचीनाग्राणि चावस्तृणाति पितृषदनमसीति पितृदेवत्य वाऽअस्याऽएतद्भवति यन्निखातꣳ सा यथानिखातौषधिषु मिता स्यादेवमेतास्वोषधिषु मिता भवति ॥ १४ ॥ तामुक्षयति । उद्दिवꣳ स्तभानान्तरिक्षं पृण दृꣳहस्व पृथिव्यामितीमानेवैतल्लोकान्ऊर्जा रसेन भाजयत्येषु लोकेषूर्जꣳ रसं दधाति ॥ १५ ॥ अथ मिनोति । द्युतानस्त्वा मारुतो मिनोत्विति यो वा ऽअयं पवतऽएष द्युतानो मारुतस्तदेनामेतेन मिनोति मित्रावरुणौ ध्रुवेण धर्मणेति प्राणोदानौ वै मित्रावरुणौ तदेनां प्राणोदानाभ्यां मिनोति ॥ १६ ॥ अथ पर्यूहति । ब्रह्मवनि त्वा क्षत्रवनि रायस्पोषवनि पर्यूहामीति ब्रह्म वै यजुःघाशीस्तद्ब्रह्म च क्षत्रं चाशास्तऽउभे वीर्ये रायस्पोषवनीति भूमा वै रायस्पोषस्तद्भूमानमाशास्ते ॥ १७ ॥ अथ पर्यूषति । ब्रह्म दृꣳह क्षत्रं दृꣳहायुर्दृꣳह प्रजां दृꣳहेत्याशीरेवैषैतस्य कर्मण आशिषमेवैतदाशास्ते समम्भूमि पर्यूषणं करोति गर्तस्य वाऽउपरिभूम्यथैवं देवत्रा तथा होगर्तमिद्भवति ॥ १८ ॥ अथाप उपनिनयति । यत्र वाऽअस्यै खनन्तः क्रूरीकुर्वन्त्यपघ्नन्ति शान्तिरापस्तद्विः शान्त्या शमयति तद्विः

संदधाति तस्माद्प उपनिनयति ॥ ११ ॥ अथैवमभिपद्य वाचयति । ध्रुवासि ध्रुवो ऽयं यज्ञमानोऽस्मिन्नायतने प्रजया भूयादिति पशुभिरिति वैवं यं कामं कामयते सोऽस्मै कामः समृध्यते ॥ २० ॥ अथ स्रुवेणोपकृत्याज्यम् । विष्टपमभि जुहोति घृतेन द्यावापृथिवी पूर्येथामिति तदिमे द्यावापृथिवीऽऊर्जा रसेन भाजयत्यनयोर्वूर्जꣳ रसं दधाति ते रसवत्याऽउपजीवनीये इमाः प्रजा उपजीवन्ति ॥ २१ ॥ अथ ह्रदिरधिनिदधाति । इन्द्रस्य ह्रदिरसीत्यैन्द्रꣳ हि सदो विश्वजनस्य छायेति विश्वगोत्रा ह्यस्मिन्ब्राह्मणा आसते तदुभयतश्छदिषोऽउपदधात्युत्तरतस्त्रीणि परस्त्रीणि तानि नव भवन्ति त्रिवृद्वै यज्ञो नव वै त्रिवृत्तस्मान्नव भवन्ति ॥ २२ ॥ तदुदीचीनवꣳशꣳ सदो भवति । प्राचीनवꣳशꣳ ह्यविर्धानमेतद्वै देवानां निष्केवल्यं यद्धविर्धानं तस्मात्तत्र नाश्नन्ति न भक्षयन्ति निष्केवल्यꣳ ह्येतद्देवानाꣳ स यो ह तत्राश्नीयाद्वा भक्षयेद्वा मूर्धा ह्यस्य विपतेद्यैते मिथ्रे यदाग्नीध्रं च सदश्च तस्मात्तयोरश्नन्ति तस्माद्भक्षयन्ति मिथ्रे ह्येतेऽउदीचो वै मनुष्याणां दिक्तस्मादुदीचीनवꣳशꣳ सदो भवति ॥ २३ ॥ तत्परिश्रयन्ति । परि त्वा गिर्वणो गिर इमा भवन्तु विश्वतः । वृद्धायुमनु वृद्धयो जुष्टा भवन्तु जुष्टयऽइतीन्द्रो वै गिर्वा विशो गिरो विशैवैतत्क्षत्रं परिबृꣳहति तदिदं क्षत्रमुभयतो विशा परिबृꣳहम् ॥ २४ ॥ अथ स्रुस्पूजन्या स्रुन्न्यया प्रसीव्यति । इन्द्रस्य स्यूरसीत्यथ ग्रन्थिं करोतीन्द्रस्य ध्रुवोऽसीति नेद्यवपद्यताऽइति प्रकृते कर्मन्विष्यति तथो ह्याधर्यु वा यज्ञमानं वा ग्राहो न विन्दति तन्निष्ठितमभिमृशत्यैन्द्रमसीत्यैन्द्रꣳ हि सदः ॥ २५ ॥ अथ ह्रविर्धानयोः । ज्ञघनार्धꣳ समन्वीद्योत्तरेणाग्नीध्रं मिनोति तस्यार्धमत्तर्वेदि स्यादर्धं बर्हिर्वेद्यथोऽअपि भूयोऽर्धादत्तर्वेदि स्यात्कनीयो बर्हिर्वेद्यथोऽअपि सर्वमेवात्तर्वेदि स्यात्तन्निष्ठितमभिमृशति वैश्वदेवमसीति द्वयेनैतद्वैश्वदेवं यदस्मिन्पूर्वेद्युर्विश्वे देवा वसतीवरीषूपवसन्ति तेन वैश्वदेवम् ॥ २६ ॥ देवा ह वै यज्ञं तन्वानाः । तेऽसुररक्षसे-

भ्य आसङ्गाद्भिषां चक्रुस्तान्दक्षिणतोऽसुरक्षसान्यासेनुस्तात्सदसो ऽग्नियुस्तेषामे-तान्धिष्ण्यानुद्वापयां चक्रुर्यऽएतेऽग्नयःसदसꣳ ॥२७॥ सर्वे ह स्म वाऽएते पुरा ज्वलन्ति । यथायमाहवनीयो यथा गार्हपत्यो यथाग्नीध्रीयस्तस्मात एनानुद्वापयंस्तत एवैतन्न ज्वलन्ति तानाग्नीध्रमभि सꣳरुरुधुस्तानप्यर्धमाग्नीध्रस्य ऽग्नियुस्ततो विश्वे देवा अमृतत्वमपाजयंस्तस्माद्विश्वदेवम् ॥२८॥ तान्देवाः प्रतिसमैन्धत । यथा प्रत्यवस्येत्तस्मादेनात्सवने-सवनऽएव प्रतिसमिन्धते तस्माद्यः समृद्धः स आग्नीध्रं कुर्याद्यो वै ज्ञातोऽनूचानः स समृद्धस्तस्मादग्नीधे प्रथमाय दक्षिणां नयत्यतो हि विश्वे देवा अमृतत्वमपाजयंस्तस्माद्यं दीक्षितानामबल्यं विन्देदाग्नीध्रमेनं नयतेति ब्रूयात्तदनार्तं तन्नारिष्यतीति तद्यदतो विश्वे देवा अमृतत्वमपाजयंस्तस्माद्विश्वदेवम् ॥२९॥ ब्राह्मणम् ॥५[६.१]॥ चतुर्थः प्रपाठकः ॥ कण्डिकासंख्या १३२ ॥ ॥

विज्ञायानो ह्येवास्य धिष्ण्याः । इमे समङ्धा ये वै समङ्कास्ते विज्ञायान एतऽउ ह्येवास्यैतऽआत्मनः ॥१॥ दिवि वै सोम आसीत् । अथेहꣳ देवास्ते देवा अकामयन्ता नः सोमो गच्छेत्तेनागतेन यज्ञमक्षीति तऽएते मायेऽअसृजन्त सुपर्णीं च कद्रुं च वागेव सुपर्णीयं कद्रूस्ताभ्याꣳ समदं चक्रुः ॥२॥ ते हऽऊतीयमानेऽऊचतुः । यतरा नौ द्वयोः परापश्यादात्मानं नौ सा जयादिति तथेति सा ह कद्रूरुवाच परेत्तस्वेति ॥३॥ सा ह सुपर्ण्युवाच । अस्य सलिलस्य पारेऽश्वः श्वेत स्थाणौ सेवते तमहꣳ पश्यामीति तमेव त्वं पश्यसीति तꣳ होत्यथ ह कद्रूरुवाच तस्य वालो न्यषङ्गि तममुं वातो धूनोति तमहꣳ पश्यामीति ॥४॥ सा यत्सुपर्ण्युवाच । अस्य सलिलस्य पारऽइति वेदिर्वै सलिलं वेदिमेव सा तदुवाचाश्वः श्वेत स्थाणौ सेवतऽइत्यग्निर्वाऽअश्वः श्वेतो यूप स्थाणुरथ यत्कद्रूरुवाच तस्य वालो न्यषङ्गि तममुं वातो धूनोति तमहꣳ पश्यामीति रशना ह्येव सा ॥५॥ सा ह सुपर्ण्युवाच । एहीदं पतावेदितुं यतरा नौ जयतीति सा ह कद्रूरुवाच त्वमेव पत त्वं

वै न आख्यास्यसि यतरा नौ ज्ञयतीति ॥ ६ ॥ सा ह सुपर्णी पपात । तद्ध तथैवास यथा कद्रूरुवाच तामागतामभ्युवाद त्वमज्ञैषीरहाऽमिति त्वमिति होवाचैतद्व्याख्यानꣳ सौपर्णिकाद्रवमिति ॥ ७ ॥ ॥ शतम् ११०० ॥ ॥ सा ह कद्रूरुवाच । आत्मानं वै त्वाज्ञिषं दिव्यसौ सोमस्तं देवेभ्य आहर तेन देवेभ्य आत्मानं निष्क्रीणीष्वेति तथेति सा छन्दाꣳसि ससृज्ञे सा गायत्री दिवः सोममाहरत् ॥ ८ ॥ क्विरण्मय्योर्ह कुश्योरन्तरवक्षित आस । ते ह स्म नुरुपवी निमेषं-निमेषमभिसंधत्तो दीक्षातपसौ हैव तेऽआसतुस्तमेते गन्धर्वाः सोमरक्षा ज्ञुगुपुरिमे धिष्ण्या इमा होत्राः ॥ ९ ॥ तयोरन्यतरां कुशीमाचिच्छेद । तां देवेभ्यः प्रददौ सा दीक्षा तया देवा अदीक्षन्त ॥ १० ॥ अथ द्वितीयां कुशीमाचिच्छेद । तां देवेभ्यः प्रददौ तत्तपस्तया देवास्तप उपायन्नुपसदस्तपो व्युपसदः ॥ ११ ॥ खदिरेण ह सोममाचखाद । तस्मात्खदिरो यदेनेनाखिदत्तस्मात्खादिरो यूपो भवति खादिर स्फ्योऽङ्कावाकस्य हैनं गोपनायां ज्ञहार सोऽङ्कावाकोऽहीयत ॥ १२ ॥ तमिन्द्राग्नीऽअनुसमतनुताम् । प्रज्ञानां प्रज्ञात्यै तस्मादैन्द्राग्नोऽङ्कावाकः ॥ १३ ॥ तस्माद्दीक्षिता राज्ञानं गोपायन्ति । नेन्नोऽपकरानिति तस्मात्तत्र सुगुप्तं चिकीर्षेण्यस्य ह गोपनायामपकरन्ति हीयते ह ॥ १४ ॥ तस्माद्ब्रह्मचारिण आचार्यं गोपायन्ति । गृहान्यभूत्रिन्नोऽपकरानिति तस्मात्तत्र सुगुप्तं चिकीर्षेण्यस्य ह गोपनायामपकरन्ति हीयते ह तेनैतेन सुपर्णी देवेभ्य आत्मानं निरक्रीणीत तस्मादाङ्कः पुण्यलोक ईज्ञान इति ॥ १५ ॥ ऋणꣳ ह वै पुरुषो ज्ञायमान एव । मृत्योरात्मना ज्ञायते स यज्ञते यथैव तत्सुपर्णी देवेभ्य आत्मानं निरक्रीणीतैवमेवैष एतन्मृत्योरात्मानं निष्क्रीणीते ॥ १६ ॥ तेन देवा अयज्ञत । तमेते गन्धर्वाः सोमरक्षा अन्वाज्ञग्मुस्तेऽब्रुवन्ननु नो यज्ञेऽआभज्ञत मा नो यज्ञादन्तर्गातास्त्वेव नोऽपि यज्ञे भाग इति ॥ १७ ॥ ते होचुः । किं नस्ततः स्यादिति यथैवास्यामुत्र गोप्तारोऽभूमैवमेवास्या-

पीकृ गोप्तारो भविष्याम इति ॥१८॥ तथेति देवा अब्रुवन् । सोमक्रयणा व इति तानेभ्य एतत्सोमक्रयणाननुदिशत्यथैनानब्रुवंस्तृतीयसवने वो घृत्याकृतिः प्राप्स्यति न सौम्यापकृतो हि युष्मत्सोमपीथस्तेन सोमाकृतिं नार्हथेति सैनानेषा तृतीयसवनऽएव घृत्याकृतिः प्राप्नोति न सौम्या यद्धालाकैर्धिष्ण्यान्व्याघारयति ॥१९॥ अथ यदग्नौ क्रोष्यन्ति । तद्वोऽविष्यतीति स यदग्नौ जुह्वति तदेनानवत्यथ यदः सोमं बिभ्रत उपर्युपरि चरिष्यन्ति तद्वोऽविष्यतीति स यदेनात्सोमं बिभ्रत उपर्युपरि चरन्ति तदेनानवति तस्माद्धर्युः समया धिष्ण्यान्नातीयाद्धर्युर्हि सोमं बिभर्ति तमेते व्यात्तेन प्रत्यासते स एतेषां व्यात्तमापद्येत तमग्निर्वाभिद्रुह्येद्वायं देवः पशूनामीष्टे स वा कैनमभिमन्येत तस्माद्यद्धर्योः शालायामर्धः स्यादुत्तरेणैवाग्नीध्रीयꣳ संचरेत् ॥२०॥ ते वाऽएते । सोमस्यैव गुप्त्यै न्युप्यन्तऽआहवनीयः पुरस्तान्मार्जालीयो दक्षिणत आग्नीध्रीय उत्तरतोऽथ ये सदसि ते पश्चात् ॥२१॥ तेषां वाऽअर्धानुपकिरन्ति । अर्धाननुदिशन्त्येतऽउ कैवैतद्बधिरेऽर्धान्न उपकिरन्त्वर्धाननुदिशन्तु तथा यस्माल्लोकादागताः स्मो दिवस्तथा तं लोकं प्रतिप्रज्ञास्यामस्तथा न जिह्मा एष्याम इति ॥२२॥ स यानुपकिरन्ति । तेनास्मिंल्लोके प्रत्यङ्ङं भवत्यथ याननुदिशन्ति तेनामुष्मिंल्लोके प्रत्यङ्ङं भवन्ति ॥२३॥ ते वै द्विनामानो भवन्ति । एतऽउ कैवैतद्बधिरे न वाऽएभिर्नामभिररात्स्म येषां नः सोममपाहार्षुरुत्त द्वितीयानि नामानि कुरुवामहाऽइति ते द्वितीयानि नामान्यकुर्वत तेरराधुवन्यानपकृतसोमपीथात्सतोऽथ यज्ञऽआभज्यंस्तस्माद्विनामानस्तस्माद्ब्राह्मणोऽनृध्यमाने द्वितीयं नाम कुर्वीत राध्नोति कैव य एवं विद्वान्द्वितीयं नाम कुरुते ॥२४॥ स यदग्नौ जुह्वति । तद्देवेषु जुह्वति तस्माद्देवाः सन्त्यथ यत्सदसि भक्षयन्ति तन्मनुष्येषु जुह्वति तस्मान्मनुष्याः सन्त्यथ यद्धविर्धानयोर्नाराशꣳसाः सीदन्ति तत्पितृषु जुह्वति तस्मात्पितरः सन्ति ॥२५॥ या वै प्रज्ञा यज्ञेऽनन्वाभ-

क्ताः । पराभूता वै ता एवमेवैतया इमाः प्रजा अपराभूतास्ता यज्ञऽआभजति मनुष्याननु पशवो देवाननु वयाऽस्योषधयो वनस्पतयो यदिदं किं चैवमु तत्सर्वं यज्ञऽआभक्तं ते ह स्मैतऽउभये देवमनुष्याः पितरः सम्पिबन्ति सैषा सम्पा ते ह स्म दृश्यमाना एव पुरा सम्पिबन्तऽउतैतर्ह्यदृश्यमानाः ॥२६॥ ब्राह्मणम् ॥१[६. २.]॥ ॥

सर्वं वाऽएषोऽभि दीक्षते । यो दीक्षते यज्ञꣳ क्वभि दीक्षते यज्ञꣳ क्वेवेदꣳ सर्वमनु तं यज्ञꣳ सम्भृत्य यमिममभि दीक्षते सर्वमिदं विसृजते ॥१॥ यद्वैसर्जिनानि जुहोति । स यदिदꣳ सर्वं विसृजते तस्माद्वैसर्जिनानि नाम तस्माद्योऽपिव्रतः स्यात्सोऽन्वारभेत यद्युऽअन्यत्र चरेन्नाद्रियेत यद्वै जुहोति तदेवेदꣳ सर्वं विसृजते ॥२॥ यद्वेव वैसर्जिनानि जुहोति । यज्ञो वै विष्णुः स देवेभ्य इमां विक्रान्तिं विचक्रमे यैषामियं विक्रान्तिरिदमेव प्रथमेन पदेन पस्पाराथेदमन्तरिक्षं द्वितीयेन दिवमुत्तमेनैनाम्वेवैष एतस्मै विष्णुर्यज्ञो विक्रान्तिं विक्रमते यज्जुहोति तस्माद्वैसर्जिनानि जुहोति ॥३॥ सोऽपराह्णे वेदिꣳ स्तीर्त्वा । अर्धव्रतं प्रदाय सम्प्रपद्यतऽइध्ममभ्यादधत्युपयमनीरुपकल्पयत्याज्यमधिश्रयति स्रुचः संमार्ष्ट्युपस्थे राजानं यजमानः कुरुतेऽथ सोमक्रयणे पदं जघनेन गार्हपत्यं परिकिरति पदा वै प्रतितिष्ठति प्रतिष्ठित्याऽएव ॥४॥ तद्वैके । चतुर्धा कुर्वन्ति यत्राक्लृप्तनीयमुद्धरन्ति तासूपयमनीषु चतुर्भागमन्नं चतुर्भागेणोपाञ्जन्त्येतासूपयमनीषु चतुर्भागं जघनेन गार्हपत्यं चतुर्भागं परिकिरति ॥५॥ तदु तथा न कुर्यात् । सार्धमेव परिकिरेज्जघनेन गार्हपत्यमथोत्पूयाज्यं चतुर्गृहीते जुह्वां चोपभृति च गृह्णाति पञ्चगृहीतं पृषदाज्यं ज्योतिरसि विश्वरूपं विश्वेषां देवानाꣳ समिदिति वैश्वदेवꣳ हि पृषदाज्यं धारयन्ति स्रुचो यदा प्रदीप्त इध्मो भवति ॥६॥ अथ जुहोति । वꣳ सोम तनूकृद्भ्यो द्वेषोभ्योऽन्यकृतेभ्य ऽरु यन्तासि वरूथꣳ स्वाहेति तदेतेनैवास्यां पृथिव्यां प्र-

तिष्ठायां प्रतितिष्ठत्येतेनेमं लोकꣳ स्पृणुति ॥७॥ अथाप्नवे द्वितीयामाकूतिं जुहोति । जुषाणोऽअप्तुराज्यस्य वेतु स्वाहेत्येष उ हैवैतदुवाच रक्षोभ्यो वै बिभेमि यथा मात्तरा नाष्ट्रा रक्षाꣳसि न हिनसन्नेवं मा कनीयाꣳसमेव बधात्कृत्वातिनयत स्तोकमेव स्तोको क्ष्यतुरिति तमेतत्कनीयाꣳसमेव बधात्कृत्वात्यनयत्स्तोकमेव स्तोको क्ष्यतू रक्षोभ्यो भीषा तस्माद्दप्नवे द्वितीयामाकूतिं जुहोति ॥८॥ उप्यङ्कृन्तीध्मम् । उपयङ्कृत्युपयमनीरथाङ्गाग्नये प्रक्रियमाणायानुब्रूहि सोमाय प्रणीयमानायेति वाग्नये प्रक्रियमाणायानुब्रूहीति ह्येव ब्रूयात् ॥९॥ आददते ग्रावाणः । द्रोणकलशं वायव्यानीध्मं कार्ष्मर्यमयान्परिधीनाश्वत्थं प्रस्तरमैन्द्रव्यौ विधृती तद्बर्हिरुपसंनद्धं भवति वपाश्रपण्यौ स्रुशनेऽअरणीऽअधिमन्थनः शकलो वृषणौ तत्समादाय प्राञ्च आयन्ति स एष ऊर्ध्वो यज्ञ एति ॥१०॥ तदायत्सु वाचयति । अग्ने नय सुपथा रायऽअस्मान्विश्वानि देव वयुनानि विद्वान् । युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नमउक्तिं विधेमेत्यग्निमेवैतत्पुरस्तात्करोत्यग्निः पुरस्तान्नाष्ट्रा रक्षाꣳस्यपघ्नन्नेत्यथाभयेनानाष्ट्रेण हरन्ति तऽआयन्त्यागहन्त्याग्नीध्रं तमाग्नीध्रे निदधाति ॥११॥ स निहिते जुहोति । अयं नोऽअग्निर्वरिवस्कृणोत्वयं मृधः पुर एतु प्रभिन्दन् । अयं वाजान्जयतु वाजसातावयꣳ शत्रून्जयतु जर्हृषाणः स्वाहेति तदेतेनैवैतस्मिन्नन्तरिक्षे प्रतिष्ठायां प्रतितिष्ठत्येतेनेतं लोकꣳ स्पृणुते ॥१२॥ तदेव निदधति ग्रावाणः । द्रोणकलशं वायव्यान्यथेतरमादायायन्ति तदुत्तरेणाहवनीयमुपसादयन्ति ॥१३॥ प्रोक्षणीरध्वर्युरादत्ते । स इध्ममेवाग्ने प्रोक्षत्यथ वेदिमथास्मै बर्हिः प्रयच्छन्ति तत्पुरस्ताद्धन्त्यासादयति तत्प्रोक्ष्योपनिनीय विस्रꣳस्य ग्रन्थिमाश्वत्थवालः प्रस्तर उपसंनद्धो भवति तं गृह्णाति गृहीत्वा प्रस्तरमेकवृद्बर्हिः स्तृणाति स्तीर्त्वा बर्हिः कार्ष्मर्यमयान्परिधीन्परिदधाति परिधाय परिधीत्समिधावभ्यादधात्यभ्याधाय समिधौ ॥१४॥ अथ जुहोति । उरु विष्णो विक्रमस्वोरु क्षयाय न-

स्कृधि । घृतं घृतयोने पिब प्र-प्र यज्ञपतिं तिर स्वाकृति तदेतेनैवैतस्यां दिवि प्रतिष्ठायां प्रतितिष्ठत्येतेनैतं लोकꣳ स्पृणुत यदेतया जुहोति ॥ १५ ॥ यद्वेव वैष्णव्यर्चा जुहोति । कनीयाꣳस वाऽएनमेतद्धात्कृत्वात्यनैषु स्तोकमेव स्तोको ह्यस्तुस्तमेतदुभय प्राप्य य एवैष तं करोति यज्ञमेव यज्ञो हि विष्णुस्तस्माद्वैष्णव्यर्चा जुहोति ॥ १६ ॥ अथासाद्य स्रुचः । अप उपस्पृश्य राजान प्रपादयति तस्यदासाद्य स्रुचोऽप उपस्पृश्य राजानं प्रपादयति वज्रो वाऽआज्यꣳ रेतः सोमो नेद्धेणाज्येन रेतः सोमꣳ हिनसानीति तस्मादासाद्य स्रुचोऽप उपस्पृश्य राजान प्रपादयति ॥ १७ ॥ स दक्षिणास्य कविर्धानस्य नीडे कृष्णाजिनमास्तृणाति । तदेनमासादयति देव सवितरेष ते सोमस्तꣳ रक्षस्व मा वा दभन्निति तदेनं देवायैव सवित्रे परिददाति गुप्त्यै ॥ १८ ॥ अथानुसृज्योपतिष्ठते । एतत्वं देव सोम देवो देवांꣳ२॥ऽउपागा इदमकꣳ मनुष्यात्सकꣳ रायस्पोषेणेत्यग्नीषोमौ वाऽएतमन्तर्दम्भऽआदधाते यो दीक्षतऽआग्नावैष्णवꣳ क्यदो दीक्षणीयꣳ कविर्भवति यो वै विष्णुः सोमः स कविर्वाऽएष देवानां भवति यो दीक्षते तदेनमन्तर्दम्भऽआदधाति तत्प्रत्यक्षꣳ सोमान्निर्मुच्यते यदाहैतत्वं देव सोम देवो देवांꣳ२॥ऽउपागा इदमकꣳ मनुष्यात्सकꣳ रायस्पोषेणेति भूमा वै रायस्पोषः सकꣳ भूम्नेत्येवैतदाह ॥ १९ ॥ अथोपनिष्क्रामति । स्वाहा निर्वरुणस्य पाशान्मुच्यऽइति वरुणपाशो वाऽएषोऽन्तर्भवति योऽन्यस्यासंस्तत्प्रत्यक्षं वरुणपाशान्निर्मुच्यते यदाह स्वाहा निर्वरुणस्य पाशान्मच्यऽइति ॥ २० ॥ अथेत्याहवनीये समिधमभ्यादधाति । अग्ने व्रतपास्त्वे व्रतपा इत्यग्निर्हि देवानां व्रतपतिस्तस्मादाहाग्ने व्रतपास्त्वे व्रतपा इति या तव तनूर्मय्यभूदेषा सा त्वयि यो मम तनूस्त्वय्यभूदियꣳ सा मयि । यथायथं नौ व्रतपते व्रतान्यनु मे दीक्षां दीक्षापतिरमꣳस्तानु तपस्तपस्पतिरिति तत्प्रत्यक्षमग्नेर्निर्मुच्यते स स्वेन सतात्मना यजते तस्मादस्यात्राश्नन्ति मानुषो हि भवति तस्मादस्यात्र नाम गृह्णन्ति

मानुषो हि भवत्यथ यत्पुरा नाश्नन्ति यथा हविषोऽकृतस्य नाश्नीयादेवं तत्तस्मादीक्षितस्य नाश्नीयाद्यात्राङ्गुलीर्विसृजते ॥ २१ ॥ ब्राह्मणम् ॥ २ [६. ३] ॥ ॥

यूपं व्रश्चन्वैष्णव्यर्चा जुहोति । वैष्णवो हि यूपस्तस्माद्वैष्णव्यर्चा जुहोति ॥ १ ॥ यद्वेव वैष्णव्या जुहोति । यज्ञो वै विष्णुर्यज्ञेनैवैतद्यूपमर्हति तस्माद्वैष्णव्यर्चा जुहोति ॥ २ ॥ स यदि स्रुचा जुहोति । चतुर्गृहीतमाज्यं गृहीत्वा जुहोति यद्यु स्रुवेण स्रुवेणैवोपकृत्य जुहोत्युरु विष्णो विक्रमस्वोरु क्षयाय नस्कृधि । घृतं घृतयोने पिब प्र प्र यज्ञपतिं तिर स्वाहेति ॥ ३ ॥ यदाज्यं परिशिष्टं भवति । तदादत्ते यत्तद्वसाः शस्त्रं भवति तत्तद्वादत्ते तऽआयन्ति स यं यूपं जोषयते ॥ ४ ॥ तमेवमभिमृश्य जपति । पश्चाद्वेव प्राङ् तिष्ठन्नभिमन्त्रयतेऽत्यन्यां२॥ऽअगां नान्यां२॥ऽउपागामित्यति क्रान्यानेति नान्यानुपेति तस्मादाहात्यन्यां२॥ऽअगां नान्यां२॥ऽउपागामिति ॥ ५ ॥ अर्वाक्का परेभ्योऽविदं परोऽवरेभ्य इति । अर्वाग्घेनं परेभ्यो वृश्चति यऽएतस्मान्पराञ्चो भवन्ति परोऽवरेभ्य इति परो ह्येनमवरेभ्यो वृश्चति यऽएतस्मादर्वाञ्चो भवन्ति तस्मादाहार्वाक्का परेभ्योऽविदं परोऽवरेभ्य इति ॥ ६ ॥ तं त्वा जुषामहे देव वनस्पते देवयज्यायाऽइति । तद्यथा ब्रह्मनां मध्यात्साधवे कर्मणे जुषेत स रातमनास्तस्मै कर्मणे स्यादेवमेवैनमेतद्ब्रह्मनां मध्यात्साधवे कर्मणे जुषते स रातमना व्रश्चनाय भवति ॥ ७ ॥ देवास्त्वा देवयज्यायै जुषन्तामिति । तद्वै समृद्धं यं देवाः साधवे कर्मणे जुषान्ते तस्मादाह देवास्त्वा देवयज्यायै जुषन्तामिति ॥ ८ ॥ अथ स्रुवेणोपस्पृशति । विष्णवे त्वेति वैष्णवो हि यूपो यज्ञो वै विष्णुर्यज्ञाय ह्येनं वृश्चति तस्मादाह विष्णवे त्वेति ॥ ९ ॥ अथ दर्भतरुणकमन्तर्दधाति । ओषधे त्रायस्वेति वज्रो वै परश्वस्तथो ह्येनमेष वज्रः परश्वर्न हिनस्त्यथ परश्वना प्रहरति स्वधिते मैनꣳ हिꣳसीरिति वज्रो वै परश्वस्तथो ह्येनमेष वज्रः परश्वर्न हिनस्ति ॥ १० ॥ स यं प्रथमꣳ शकलमपहिनत्ति । तमादत्ते

तं वाऽग्रनक्षस्तम्भं वृश्चेदुत क्वेनमनसा वदन्ति तथानो न प्रतिबाधते ॥११॥ तं प्राञ्चं पातयेत्। प्राची हि देवानां दिगथोऽउदञ्चमुदीची हि मनुष्याणां दिगथो प्रत्यञ्चं दक्षिणायै त्वैवैनं दिशः परिबिबाधिषेतैषा वै दिक् पितॄणां तस्मादिनं दक्षिणायै दिशः परिबिबाधिषेत ॥१२॥ तं प्रच्यवमानमनुमन्त्रयते। द्यां मा लेखीरन्तरिक्षं मा हिꣳसीः पृथिव्या सम्भवेति वज्र। वाऽएष भवति यं यूपाय वृश्चन्ति तस्माद्वज्रात्प्रच्यवमानादिमे लोकाः सꣳरेजन्ते तदेभ्य एवैनमेतल्लोकेभ्यः शमयति तथेमांल्लोकाꣳह्यान्तो न हिनस्ति ॥१३॥ स यदाह। द्यां मा लेखीरिति दिवं मा हिꣳसीरित्येवैतदाहान्तरिक्षं मा हिꣳसीरिति नात्र तिरोहितमिवास्ति पृथिव्या सम्भवेति पृथिव्या संज्ञानीष्वेत्येवैतदाहायꣳ हि वा स्वधितिस्तेतिज्ञानः प्रणिनाय महते सौभगायेत्येष क्वेनꣳ स्वधितिस्तेऽज्ञमानः प्रणयति ॥१४॥ अथाव्रश्चनमभिजुहोति। नेदतो नाष्ट्रा रक्षाꣳस्यनूत्तिष्ठानिति वज्रो वाऽआज्यं तद्वज्रेणैवैतन्नाष्ट्रा रक्षाꣳस्यवबाधते तथातो नाष्ट्रा रक्षाꣳसि नानूत्तिष्ठत्यथो रेतो वाऽआज्यं तद्वनस्पतिष्वेवैतद्रेतो दधाति तस्माद्रेतस आव्रश्चनाद्वनस्पतयोऽनु प्रजायन्ते ॥१५॥ स जुहोति। अतस्त्वं देव वनस्पते शतवल्शो विरोह सहस्रवल्शा वि वयꣳ रुहेमेति नात्र तिरोहितमिवास्ति ॥१६॥ तं परिवासयति। स यावत्तमेवाग्ने परिवासयेत्तावान्त्स्यात् ॥१७॥ पञ्चारत्निं परिवासयेत्। पाङ्क्तो यज्ञः पाङ्क्तः पशुः पञ्चर्तवः संवत्सरस्य तस्मात्पञ्चारत्निं परिवासयेत् ॥१८॥ षडरत्निं परिवासयेत्। षड्वाऽऋतवः संवत्सरस्य संवत्सरो वज्रो वज्रो यूपस्तस्मात्षडरत्निं परिवासयेत् ॥१९॥ अष्टारत्निं परिवासयेत्। अष्टाक्षरा वै गायत्री पूर्वार्धो वै यज्ञस्य गायत्री पूर्वार्ध एष यज्ञस्य तस्मादष्टारत्निं परिवासयेत् ॥२०॥ नवारत्निं परिवासयेत्। त्रिवृद्वै यज्ञो नव वै त्रिवृत्तस्मान्नवारत्निं परिवासयेत् ॥२१॥ एकादशारत्निं परिवासयेत्। एकादशाक्षरा वै त्रिष्टुब्वज्रस्त्रिष्टुब्वज्रो यूपस्तस्मादेकाद-

शारत्निं परिवासयेत् ॥२२॥ द्वादशारत्निं परिवासयेत् । द्वादश वै मासाः संवत्सरस्य संवत्सरो वज्रो वज्रो यूपस्तस्माद्द्वादशारत्निं परिवासयेत् ॥२३॥ त्रयोदशारत्निं परिवासयेत् । त्रयोदश वै मासाः संवत्सरस्य संवत्सरो वज्रो वज्रो यूपस्तस्मात्त्रयोदशारत्निं परिवासयेत् ॥२४॥ पञ्चदशारत्निं परिवासयेत् । पञ्चदशो वै वज्रो वज्रो यूपस्तस्मात्पञ्चदशारत्निं परिवासयेत् ॥२५॥ सप्तादशारत्निर्वाजपेययूपः । अपरिमित एव स्यादपरिमितेन वाऽएतेन वज्रेण देवा अपरिमितमजयंस्तथोऽएवैष एतेन वज्रेणापरिमितेनैवापरिमितं जयति तस्मादपरिमित एव स्यात् ॥२६॥ स वाऽअष्टाश्रिर्भवति । अष्टाक्षरा वै गायत्री पूर्वार्धो वै यज्ञस्य गायत्री पूर्वार्ध एष यज्ञस्य तस्मादष्टाश्रिर्भवति ॥२७॥ ब्राह्मणम् ॥३ [६.४]॥ षष्ठोऽध्यायः [२१.] ॥ ॥

अभ्रिमादत्ते । देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामादद्दे नार्यसीति समानं एतस्य यजुषो बन्धुर्योषो वाऽएषा यदभ्रिस्तस्मादाह नार्यसीति ॥१॥ अथावटं परिलिखति । इदमहꣳ रक्षसां ग्रीवा अपिकृन्तामीति वज्रो वाऽअभ्रिर्वज्रेणैवैतन्नाष्ट्राणाꣳ रक्षसां ग्रीवा अपिकृन्तति ॥२॥ अथ खनति । प्राञ्चमुत्करमुत्किरत्युपरेण संमायावटं खनति तद्ग्रेण प्राञ्चं यूपं निदधात्येतावन्मात्राणि बर्हींष्युपरिष्टादधिनिदधाति तदेवोपरिष्टाद्यूपशकलमधिनिदधाति पुरस्तात्पार्श्वतश्चषालमुपनिदधात्यथ यवमत्यः प्रोक्षणयो भवन्ति सोऽसावेव बन्धुः ॥३॥ स यवानावपति । यवोऽसि यवयास्मद्द्वेषो यवयारातीरिति नात्र तिरोहितमिवास्त्यथ प्रोक्षत्येको वै प्रोक्षणस्य बन्धुर्मेध्यमेवैतत्करोति ॥४॥ स प्रोक्षति । दिवे त्वान्तरिक्षाय त्वा पृथिव्यै त्वेति वज्रो वै यूप एषां लोकानामभिगुप्त्याऽएषां त्वा लोकानामभिगुप्त्यै प्रोक्षामीत्येवैतदाह ॥५॥ अथ याः प्रोक्षण्यः परिशिष्यन्ते । ता अवटेऽवनयति स्रुन्धन्तां लोकाः पितृषदना इति पितृदेवत्यो वै कूपः खा-

तस्त्तमेवैतन्मेध्यं करोति ॥ ६ ॥ अथ बर्हीँषि । प्राचीनाग्राणि चोदीचीनाग्राणि चावस्तृणाति पितृषदनमसीति पितृदेवत्यं वाऽअस्यैतद्भवति यन्निखातꣳ स यथा-निखात ओषधिषु मितः स्यादेवमेतास्वोषधिषु मितो भवति ॥ ७ ॥ अथ यूपश-कलं प्रास्यति । तेजो ह वाऽएतद्वनस्पतीनां यद्बाह्याशकलस्तस्माद्यदा बाह्या-शकलमपतद्दृणुवन्त्यथ शुष्यन्ति तेजो ह्येषामेतत्तद्यद्यूपशकलं प्रास्यति सतेजसं मिनवानीति तद्यदेष एव भवति नान्य एष हि यज्ञकृतो मेध्यस्तस्माद्यूपशकलं प्रास्यति ॥ ८ ॥ स प्रास्यति । अग्नेणीरसि स्वावेश उन्नेतॄणामिति पुरस्ताद्वाऽअ-स्मादेषोऽपक्रिष्यते तस्मादाहाग्नेणीरसि स्वावेश उन्नेतॄणामित्येतस्य वित्ताद्धि वा स्थास्यतीत्यधि ह्येनं तिष्ठति तस्मादाहैतस्य वित्ताद्धि वा स्थास्यतीति ॥ ९ ॥ अ-थ स्रुवेणोपहत्याज्यम् । अवटमभिजुहोति नेदधस्तान्नाष्ट्रा रक्षाꣳस्युपोत्तिष्ठानिति वज्रो वाऽआज्यं तद्वज्रेणैवैतन्नाष्ट्रा रक्षाꣳस्यवबाधते तथाधस्तान्नाष्ट्रा रक्षाꣳसि नो-पोत्तिष्ठन्त्यथ पुरस्तात्परीत्योदङ्ङासीनो यूपमनक्ति स आह यूपायाज्यमानायानुब्रू-हीति ॥ १० ॥ सोऽनक्ति । देवस्त्वा सविता मधानक्त्विति सविता वै देवानां प्र-सविता यजमानो वाऽएष निदानेन यद्यूपः सर्वं वाऽइदं मधु यदिदं किं च तदे-नमनेन सर्वेण सꣳस्पर्शयति तदस्मै सविता प्रसविता प्रसौतीति तस्मादाह देवस्त्वा सविता मधानक्त्विति ॥ ११ ॥ अथ चषालमुभयतः प्रत्यञ्च प्रतिमुञ्चति । सुपिप्प-लाभ्यस्त्वौषधीभ्य इति पिप्पलꣳ ह्येवास्यैतद्यन्मध्ये संगृहीतमिव भवति तिर्यग्वा ऽइदं वृक्षे पिप्पलमाहृतꣳ स यदेवेदꣳ संबन्धनं चान्तरोपेनितमिव तदेवैतत्करो-ति तस्मान्मध्ये संगृहीतमिव भवति ॥ १२ ॥ आत्तमग्निष्टामनक्ति । यजमानो वा ऽअग्निष्टा रसः आज्यꣳ रसेनैवैतद्यजमानमनक्ति तस्मादात्तमग्निष्टामनक्त्यथ परिव्य-यणं प्रतिसमक्तं परिमृशत्यथाहोक्ष्रीयमाणायानुब्रूहीति ॥ १३ ॥ स उक्ष्यति । द्या-मग्रेणास्पृक्ष आन्तरिक्षं मध्येनाप्राः पृथिवीमुपरेणादꣳहीरिति वज्रो वै यूप एषां

लोकानामभिजित्यै तेन वज्रेणेमांल्लोकान्त्स्पृणुतऽएभ्यो लोकेभ्यः सपत्नान्निर्भजति ॥१४॥ अथ मिनोति । या ते धामान्युश्मसि गमध्यै यत्र गावो भूरिशृङ्गा अयासः । अत्राह तदुरुगायस्य विष्णोः परमं पदमवभारि भूरीत्येतया त्रिष्टुभा मिनोति वज्रस्त्रिष्टुब्वज्रो यूपस्तस्मात्त्रिष्टुभा मिनोति ॥१५॥ सम्प्रत्यग्निमग्निष्टां मिनोति । यज्ञमानो वाऽअग्निष्टाग्निरु वै यज्ञः स यदग्नेरग्निष्टाꣳ ह्वलयेद्ध्वलेद्ध यज्ञाय्यजमानस्तस्मात्सम्प्रत्यग्निमग्निष्टां मिनोत्यथ पर्यूहत्यथ पर्यूषत्यथाप उपनिनयति ॥१६॥ अथैवमभिपद्य वाचयति । विष्णोः कर्माणि पश्यत यतो व्रतानि पस्पशे । इन्द्रस्य युज्यः सखेति वज्रं वाऽएष प्राहार्षीद्यो यूपमुदशिश्रियद्विष्णोर्विजितिं पश्यतेत्येवैतदाह यदाह विष्णोः कर्माणि पश्यत यतो व्रतानि पस्पशे । इन्द्रस्य युज्यः सखेतीन्द्रो वै यज्ञस्य देवता वैष्णवो यूपस्तꣳ सेन्द्रं करोति तस्मादाहेन्द्रस्य युज्यः सखेति ॥१७॥ अथ चषालमुदीचते । तद्विष्णोः परमं पदꣳ सदा पश्यन्ति सूरयः । दिवीव चक्षुराततमिति वज्रं वाऽएष प्राहार्षीद्यो यूपमुदशिश्रियत्तां विष्णोर्विजितिं पश्यतेत्येवैतदाह यदाह तद्विष्णोः परमं पदꣳ सदा पश्यन्ति सूरयः । दिवीव चक्षुराततमिति ॥१८॥ अथ परिव्ययति । अनग्नतायै न्वेव परिह्णयति तस्मात्त्रेव परिव्ययत्यत्रेव ह्येदं वासो भवत्यन्नाद्यमेवास्मिन्नेतद्दधात्यत्रेव ह्येदमन्नं प्रतितिष्ठति तस्मात्त्रेव परिव्ययति ॥१९॥ त्रिवृता परिव्ययति । त्रिवृद्वा अन्नं पशवो ह्यन्नं पिता माता यज्ञायते तत्तृतीयं तस्मात्त्रिवृता परिव्ययति ॥२०॥ स परिव्ययति । परिवीरसि परि त्वा दैवीर्विशो व्ययन्तां परीमं यजमानꣳ रायो मनुष्याणामिति तद्यजमानायाशिषमाशास्ते यदाह परीमं यजमानꣳ रायो मनुष्याणामिति ॥२१॥ अथ यूपशकलमवगूहति । दिवः सूनुरसीति प्रजा वै वास्यैषा तस्माद्यदि यूपैकादशिनी स्यात्स्वꣳ-स्वमेवावगूहेद्विपर्यासं तस्य वैषामुग्धानुव्रता प्रजा जायतेऽथ यो विपर्यासमवगूहति न स्वꣳ-स्वं तस्य वैषा मुग्धाननुव्रता प्रजा

ज्ञायते तस्माद् स्व॰-स्वमेवावगूहेद्विपर्यासꣳ ॥ २२ ॥ स्वर्गस्यो ह्येष लोकस्य समारोहणः क्रियते । यद्यूपशकलꣳ स्यꣳ रशना रशनायै यूपशकलो यूपशकलाच्चषालं चषालात्स्वर्गं लोकꣳ समश्नुते ॥ २३ ॥ अथ यस्मात्स्वरुर्नाम । एतस्माद्वा ऽएषोऽपाक्ष्यते तस्यैतत्स्वमेवारुर्भवति तस्मात्स्वरुर्नाम ॥ २४ ॥ तस्य यन्निखातम् । तेन पितृलोकं जयत्यथ यदूर्ध्वं निखातादा रशनायै तेन मनुष्यलोकं जयत्यथ यदूर्ध्वꣳ रशनाया आ चषालात्तेन देवलोकं जयत्यथ यदूर्ध्वं चषालाद्व्यङ्गुलं वा ऋङ्गुलं वा साध्या इति देवास्तेन तेषां लोकं जयति सलोको वै साध्यैर्देवैर्भवति य एवमेतद्वेद ॥ २५ ॥ तं वै पूर्वार्धे मिनोति । वज्रो वै यूपो वज्रो दण्डः पूर्वार्धं वै दण्डस्याभिपद्य प्रहरति पूर्वार्धं एष यज्ञस्य तस्मात्पूर्वार्धे मिनोति ॥ २६ ॥ यज्ञेन वै देवाः । इमां जितिं जिग्युर्यैषामियं जितिस्ते ह्रोचुः कथं न इदं मनुष्येरनभ्यारोक्ष्यꣳ स्यादिति ते यज्ञस्य रसं धीत्वा यथा मधु मधुकृतो निर्धयेयुर्विदुक्ष्य यज्ञं यूपेन योपयित्वा तिरोऽभवन्नथ यदेनेनायोपयंस्तस्माद्यूपो नाम पुरस्ताद्वै प्रज्ञा पुरस्तान्मनोऽवस्तस्मात्पूर्वार्धे मिनोति ॥ २७ ॥ स वाऽअष्टाश्रिर्भवति । अष्टाक्षरा वै गायत्री पूर्वार्धो वै यज्ञस्य गायत्री पूर्वार्धं एष यज्ञस्य तस्मादष्टाश्रिर्भवति ॥ २८ ॥ तꣳ ह स्मैतं देवा अनुप्रहरन्ति । यथेदमप्येतर्ह्येकेऽनुप्रहरन्तीति देवा अकुर्वन्निति ततो रक्षाꣳसि यज्ञमनूदपिबन्त ॥ २९ ॥ ते देवा अध्वर्युमब्रुवन् । यूपशकलमेव जुहुधि तद्ह्येष स्वगाकृतो भविष्यति तथो रक्षाꣳसि यज्ञं नानूत्यास्यन्तेऽयं वै वज्र ऽद्यत इति ॥ ३० ॥ सोऽध्वर्युः । यूपशकलमेवाजुहोत्तद्ह्येष स्वगाकृत आसीत्तथो रक्षाꣳसि यज्ञं नानूदपिबन्तायं वै वज्र ऽद्यत इति ॥ ३१ ॥ तथोऽएवैष एतत् । यूपशकलमेव जुहोति तद्ह्येष स्वगाकृतो भवति तथो रक्षाꣳसि यज्ञं नानूत्पिबन्तेऽयं वै वज्र ऽद्यत इति स जुहोति दिवं ते धूमो गच्छतु स्वर्ज्योतिः पृथिवीं भस्मनापृण स्वाहेति ॥ ३२ ॥ ब्राह्मणम् ॥ ४ [७. १.] ॥

यावतो वै वेदिस्तावती पृथिवी । वज्रो वै यूपास्तदिमामेवैतत्पृथिवीमेतैर्वज्रै स्तृणुतेऽस्यै सपत्नान्निर्भजति तस्माद्यूपैकादशिनी भवति द्वादश उपशयो भवति वितष्टस्तं दक्षिणत उपनिदधाति तद्यद्द्वादश उपशयो भवति ॥१॥ ॥ शतम् २००० ॥ ॥ देवा ह वै यज्ञं तन्वानाः । तेऽसुररक्षसेभ्य आसङ्गाद्भियां चक्रुस्तस्य ऽएतऽङ्क्रिता यथेषुरस्ता तया वै स्तृणुते वा न वा स्तृणुते यथा दण्डः प्रकृतस्तेन वै स्तृणुते वा न वा स्तृणुतेऽथ य एष द्वादश उपशयो भवति यथेषुरायतानस्ता यथोद्यतमप्रकृतमेवमेष वज्र उद्यतो दक्षिणतो नाष्ट्राणाꣳ रक्षसामपकृत्यै तस्माद्द्वादश उपशयो भवति ॥२॥ तं निदधाति । एष ते पृथिव्यां लोक आरण्यस्ते पशुरिति पशुश्च वै यूपश्च तदस्माऽआरण्यमेव पशूनामनुदिशति तेनोऽएष पशुमान्भवति तद्वयं यूपैकादशिन्यै संमयनमाहुः श्वःसुत्यायै ह्न्वेवैके संमिन्वन्ति प्रकुब्रतायै चैव श्वःसुत्यायै यूपं मिन्वन्तीत्यु च ॥३॥ तदु तथा न कुर्यात् । अग्निष्ठमेवोङ्क्रयेदिदं वै यूपमुङ्क्रित्याध्वर्युरा परिव्ययणान्नान्वर्जत्यपरिवीता वाऽएतऽएताꣳ रात्रिं वसन्ति सा न्वेव परिचक्षा पशवे वै यूपमुङ्क्रयन्ति प्रातर्वै पशूनालभन्ते तस्मादु प्रातरेवोङ्क्रयेत् ॥४॥ स य उत्तरोऽग्निष्ठात्स्यात् । तमेवाग्र ऽउङ्क्रयेदथ दक्षिणमथोत्तरं दक्षिणार्ध्यमुत्तमं तथोदीची भवति ॥५॥ अथोऽइतरथाहुः । दक्षिणमेवाग्रेऽग्निष्ठादुङ्क्रयेदथोत्तरमथ दक्षिणमुत्तरार्ध्यमुत्तमं तथो ह्यस्योदगेव कर्मानुसंतिष्ठतऽइति ॥६॥ स यो वर्षिष्ठः स दक्षिणार्ध्यः स्यात् । अथ क्रुसीयानथ क्रुसीयानुत्तरार्ध्यो क्रुसिष्ठस्तथोदीची भवति ॥७॥ अथ पत्नीभ्यः पत्नीयूपमुङ्क्रयन्ति । सर्ववायु न्वेव पत्नीयूप उङ्क्रायते तत्त्वाष्ट्रं पशुमालभते त्वष्टा वै सिक्तꣳ रेतो विकरोति तदेष एवैतत्सिक्तꣳ रेतो विकरोति मुष्करो भवत्येष वै प्रजनायता यन्मुष्करस्तस्मान्मुष्करो भवति तं न सꣳस्थापयेत्पर्यग्निकृतमेवोत्सृ-

ज्ञेत्स यत्सꣳस्थापयेत्प्रजायै क्रूरमियात्तत्प्रजामुत्सृजति तस्मान्न सꣳस्थापयेत्पर्यग्निकृतमेवोत्सृजेत् ॥ ८॥ ब्राह्मणम् ॥ ५ [७. २]॥ ॥

पशुश्च वै यूपश्च । न वाऽऋते यूपात्पशुमालभन्ते कदा चन तद्यत्तथा न क्रियेत वाऽएतस्माऽअग्रे पशवश्चन्नमिरे यदन्नमभविष्यन्यथेदमन्नं भूता यथा क्रैवायं द्विपात्पुरुष ऽक्रित एवꣳ क्रैव द्विपाद ऽक्रिताश्चेरुः ॥ १॥ ततो देवा एतं वज्रं ददृशुः । यद्यूपं तमुद्धिरण्यियुस्तस्माद्वीषा प्रावृतीयत्त ततश्चतुष्पादा अभवंस्ततोऽन्नमभवन्यथेदमन्नं भूता एतस्मै हि वाऽएतेऽतिष्ठन्त तस्माद्यूपऽएव पशुमालभन्ते नऽर्ते यूपात्कदा चन ॥ २॥ अथोपाकृत्य पशुम् । अग्निं मथित्वा निर्युनक्ति तद्यत्तथा न क्रियेत वाऽएतस्माऽअग्रे पशवश्चन्नमिरे यद्धविरभविष्यन्यथैनानिदꣳ हविर्भूतानग्नौ जुह्वति तान्देवा उपनिरुरुधुस्तऽउपनिरुद्धा नोपावेयुः ॥ ३॥ ते क्रोचुः । न वाऽइमेऽस्य यामं विद्मो यदग्नौ हविर्जुह्वति नैतां प्रतिष्ठामुपरुरुध्मेव पशूनग्निं मथित्वाग्नावग्निं जुहवाम ते वेदिष्यन्त्येष वै किल हविषो याम एषा प्रतिष्ठाग्नौ वै किल हविर्जुह्वतीति ततोऽभ्यवैष्यन्ति ततो रातमनस आलम्भाय भविष्यन्तीति ॥ ४॥ त ऽउपरुरुध्मेव पशून् । अग्निं मथित्वाग्नावग्निमजुह्वुस्तेऽविदुरेष वै किल हविषो याम एषा प्रतिष्ठाग्नौ वै किल हविर्जुह्वतीति ततोऽभ्यवायंस्ततो रातमनस आलम्भायाभवन् ॥ ५॥ तथोऽएवैष एतत् । उपरुरुध्मेव पशुमग्निं मथित्वाग्नावग्निं जुहोति स वेदैष वै किल हविषो याम एषा प्रतिष्ठाग्नौ वै किल हविर्जुह्वतीति ततोऽभ्यवैति ततो रातमना आलम्भाय भवति तस्मादुपाकृत्य पशुमग्निं मथित्वा निर्युनक्ति ॥ ६॥ तदाहुः । नोपाकुर्यान्नाग्निं मन्थेद्भ्रशनामिवादायाज्ञसोपपरेत्याभिधाय निर्युज्यादिति तदु तथा न कुर्याद्यथाधर्मं तिरश्चथा चिकीर्षेद्देवं तत्तस्मादेतदेवानुपरीयात् ॥ ७॥ अथ तृणमादायोपाकरोति । द्वितीयवान्निरुणाधाऽइति द्वितीयवान्हि वीर्यवान् ॥ ८॥ स तृणमादत्ते । उपावीरसीत्युप हि द्वितीयोऽवति

तस्मादाहोपावीरसीत्युप देवान्दैवीर्विशः प्रागुरिति दैव्यो वाऽएता विशो यत्पशवोऽस्थिषत देवेभ्य इत्येवैतदाह यदाहोप देवान्दैवीर्विशः प्रागुरिति ॥ ९ ॥ उशिजो वक्ष्यतमानिति । विद्वाꣳसो हि देवास्तस्मादाहोशिजो वक्ष्यतमानिति ॥ १० ॥ देव त्वष्टर्वसु रमेति । त्वष्टा वै पशूनामीष्टे पशवो वसु तानेतद्देवा अतिष्ठमानांस्त्वष्टारमब्रुवन्नुपनिमदेति यदाह देव त्वष्टर्वसु रमेति ॥ ११ ॥ कव्या ते स्वदतामिति । यदा वाऽएतऽएतस्माऽअध्रियत यद्धविरभविष्यंस्तस्मादाह कव्या ते स्वदतामिति ॥ १२ ॥ रेवती रमध्वमिति । रेवन्तो हि पशवस्तस्मादाह रेवती रमध्वमिति बृहस्पते धारया वसूनीति ब्रह्म वै बृहस्पतिः पशवो वसु तानेतद्देवा अतिष्ठमानान्ब्रह्मणैव परस्तात्पर्यदधुस्तन्नात्यायंस्तथोऽएवैनानेष एतद्ब्रह्मणैव परस्तात्परिदधाति तन्नातियन्ति तस्मादाह बृहस्पते धारया वसूनीति पाशं कृत्वा प्रतिमुञ्चत्यथातो नियोजनस्यैव ॥ १३ ॥ ब्राह्मणम् ॥ ६ [७. ३] ॥ ॥ पञ्चमः प्रपाठकः ॥ कण्डिकासंख्या १२७ ॥ ॥

पाशं कृत्वा प्रतिमुञ्चति । ऋतस्य त्वा देवहविः पाशेन प्रतिमुञ्चामीति वरुण्या वाऽएषा यद्रज्जुस्तदेनमेतदृतस्यैव पाशेन प्रतिमुञ्चति तथो हैनमेषा वरुण्या रज्जुर्न हिनस्ति ॥ १ ॥ धर्षा मानुष इति । न वाऽएतमग्रे मनुष्योऽधृक्षोत्स यदेवऽर्तस्य पाशैनेतद्देवहविः प्रतिमुञ्चत्यथैनं मनुष्यो धृक्षोति तस्मादाह धर्षा मानुष इति ॥ २ ॥ अथ नियुनक्ति । देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामग्नीषोमाभ्यां जुष्टं नियुनज्मीति तथ्यथैवादो देवतायै हविर्गृह्णन्नादिशत्येवमेवैतद्देवताभ्यामादिशत्यथ प्रोक्षत्येको वै प्रोक्षणास्य बन्धुर्मेध्यमेवैतत्करोति ॥ ३ ॥ स प्रोक्षति । अद्भ्यस्त्वौषधीभ्य इति तथ्यत एव सम्भवति तत एवैतन्मेध्यं करोतीदꣳ हि यदा वर्षत्यथौषधयो जायन्तऽओषधीर्जग्धापः पीत्वा तत एष रसः सम्भवति रसाद्रेतो रेतसः पशवस्तथ्यत एव सम्भवति यतश्च जायते तत एवैत-

न्मेध्यं करोति ॥४॥ अनु त्वा माता मन्यतामनु पितेति । स हि मातुश्चाधि पितुश्च जायते तद्यत एव जायते तत एवैतन्मेध्यं करोत्यनु भ्राता सगर्भ्योऽनु सखा सयूथ्य इति स यत्ते जन्म तेन त्वानुमतमारभऽइत्येवैतदाहाग्नीषोमाभ्यां त्वा जुष्टं प्रोक्षामीति तद्याभ्यां देवताभ्यामारभते ताभ्यां मेध्यं करोति ॥५॥ अथोपगृह्णाति । अपां पेरुरसीति तदेनमन्तरतो मेध्यं करोत्यथाधस्तादुपोक्षत्यापो देवीः स्वदन्तु स्वात्तं चित्सदेवहविरिति तदेनꣳ सर्वतो मेध्यं करोति ॥६॥ अथाहाग्नये समिध्यमानायानुब्रूहीति । स उत्तरमाधारमाधार्यासꣳस्पर्शयत्स्रुचौ पर्येत्य जुह्वा पशुꣳ समनक्ति शिरो वै यज्ञस्योत्तर आधारः एष वाऽअत्र यज्ञो भवति यत्पशुस्तद्यज्ञऽएवैतच्छिरः प्रतिदधाति तस्माज्जुह्वा पशुꣳ समनक्ति ॥७॥ स ललाटे समनक्ति । सं ते प्राणो वातेन गच्छतामिति समङ्गानि यज्ञैरित्यꣳसयोः सं यज्ञपतिराशिषेति श्रोण्योः स यस्मै कामाय पशुमालभते तत्प्राप्नुहीत्येवैतदाह ॥८॥ इदं वै पशोः संज्ञप्यमानस्य । प्राणो वातमपिपद्यते तत्प्राप्नुहि यत्ते प्राणो वातमपिपद्याता ऽइत्येवैतदाह समङ्गानि यज्ञैरित्यङ्गैर्वाऽअस्य यजन्ते तत्प्राप्नुहि यत्तेऽङ्गैर्यज्ञात्ता ऽइत्येवैतदाह स यज्ञपतिराशिषेति यजमानाय वाऽएतेनाशिषमाशासते 'तत्प्राप्नुहि यत्तव या यजमानायाशिषमाशासात्ताऽइत्येवैतदाह सादयति स्रुचावथ प्रवरायाश्रावयति सोऽसावेव बन्धुः ॥९॥ अथ द्वितीयमाश्रावयति । द्वौ ह्यत्र होतारौ भवतः स मैत्रावरुणायाहैवाश्रावयति यजमानं वेव प्रवृणीतेऽग्निर्ह दैवीनां विशां पुरएतेत्यग्निर्हि देवतानां मुखं तस्मादाहाग्निर्ह दैवीनां विशां पुरएतेत्ययं यजमानो मनुष्याणामिति तꣳ हि सोऽन्वर्धो भवति यस्मिन्नर्धे यजते तस्मादाहायं यजमानो मनुष्याणामिति तयोरस्थूरि गार्हपत्यं दीदयद्धतꣳ हिमा द्यूऽइति तयोरनार्तानि गार्हपत्यानि शतं वर्षाणि सन्त्वित्येवैतदाह ॥१०॥ राधाꣳसीत्सम्पृच्चानावसम्पृच्चानौ तन्व इति । राधाꣳस्येव सम्पृच्चाथां मापि तनूरित्येवैतदाह तौ

क्ष यत्तनूरपि सम्पृञ्चीयातां प्राग्निर्यजमानं दहेत्स यदग्नौ जुहोति तदेषोऽग्नये प्रयक्त्यथ यामेवात्रर्त्विजो यजमानायाशिषमाशासते तामस्मै सर्वामग्निः समर्धयति तद्राधाऽस्येव सम्पृञ्चाते नापि तनूस्तस्मादाह राधाऽसीत्सम्पृञ्चानावसम्पृञ्चानौ तन्व इति ॥ ११ ॥ ब्राह्मणम् ॥ १ [७. ४.] ॥ सप्तमोऽध्यायः [२२.] ॥ ॥

तद्यत्रैतत्प्रवृतो होता होतृषदनऽउपविशति । तदुपविश्य प्रसौति प्रसूतोऽध्वर्युः स्रुचावादत्ते ॥ १ ॥ अथाप्रीभिश्चरन्ति । तद्यदाप्रीभिश्चरन्ति सर्वेणैव वाऽएष मनसा सर्वेणैवात्मना यज्ञꣳ सम्भरति सं च जिह्रीर्षति यो दीक्षते तस्य रिरिचान इवात्मा भवति तमेताभिराप्रीभिराप्याययन्ति तद्याप्याययन्ति तस्मादाप्रियो नाम तस्मादाप्रीभिश्चरन्ति ॥ २ ॥ ते वाऽएतऽएकादश प्रयाजा भवन्ति । दश वाऽइमे पुरुषे प्राणा आत्मैकादशो यस्मिन्नेते प्राणाः प्रतिष्ठिता एतावान्वै पुरुषस्तदस्य सर्वमात्मानमाप्याययन्ति तस्मादेकादश प्रयाजा भवन्ति ॥ ३ ॥ स आश्राव्याह । समिधः प्रेष्येति प्रेष्य-प्रेष्येति चतुर्थे-चतुर्थे प्रयाजे समानयमानो दशभिः प्रयाजैश्चरति दश प्रयाजानिष्ट्वाह शासमाहरेत्यसिं वै शास इत्याचक्षते ॥ ४ ॥ अथ यूपशकलमादत्ते । तावग्ने जुहूा अक्ता पशोर्ललाटमुपस्पृशति घृतेनाक्तौ पशूꣳस्त्रायेथामिति वज्रो वै यूपशकलो वज्रः शासो वज्र आज्यं तमेवैतत्कृत्स्नं वज्रꣳ सम्भृत्य तमस्याभिगोप्तारं करोति नेदेनं नाष्ट्रा रक्षाꣳसि हिꣳसन्निति पुनर्यूपशकलमवगूहत्येषा ते प्रज्ञाताश्चिरस्त्वित्याह शासं प्रयक्त्साद्यति स्रुचौ ॥ ५ ॥ अथाह पर्यग्नेऽनुब्रूहीति । उल्मुकमादायाग्नीत्पर्यग्निं करोति तद्यत्पर्यग्निं करोत्यक्षिन्नमेवैनमेतदग्निना परिगृह्णाति नेदेनं नाष्ट्रा रक्षाꣳसि प्रमृशानित्यग्निर्हि रक्षसामपहन्ता तस्मात्पर्यग्निं करोति तद्यत्रैनꣳ श्रपयन्ति तदभिपरिहरति ॥ ६ ॥ तदाहुः । पुनरेतदुल्मुकꣳ हरेदथात्रान्यमेवाग्निं निर्मथ्य तस्मिन्नेनꣳ श्रपयेयुराहवनीयो वाऽएष न वाऽएष तस्मै यदस्मिन्नश्रृतꣳ श्रपयेयुस्तस्मै वाऽएष यदस्मिञ्छृतं

ञ्जुक्युरिति ॥७॥ तदु तथा न कुर्यात् । यथा वै ग्रसितमेवमस्यैतद्भवति यदेनेन पर्यग्निं करोति स यथा ग्रसितमनुक्षायाक्ष्य तदन्यस्मै प्रयच्छेदेवं तत्तस्मादेतस्यै-वोल्मुकस्याङ्गारान्निमृज्य तस्मिन्नेनं श्रपयेयुः ॥८॥ अथोल्मुकमादायाग्नीत्पुरस्तात्प्र-तिपद्यते । अग्निमेवैतत्पुरस्तात्करोत्यग्निः पुरस्तान्नाष्ट्रा रक्षाꣳस्यपघ्नन्नेत्यथाभयेना-नाष्ट्रेणा पशुं नयन्ति तं वपाश्रपणीभ्यां प्रतिप्रस्थातान्वारभते प्रतिप्रस्थातारमध्वर्यु-रध्वर्यु यजमानः ॥९॥ तदाहुः । नैष यजमानेनान्वारभ्यो मृत्यवे क्षेतं नयन्ति त-स्मान्नान्वारभेतेति तदन्वेवारभेत न वाऽएतं मृत्यवे नयन्ति यं यज्ञाय नयन्ति तस्मादन्वेवारभेत यज्ञादु क्षैवात्मानमन्तरियाद्यन्नान्वारभेत तस्मादन्वेवारभेत त-त्परोऽक्षमन्वारब्धं भवति वपाश्रपणीभ्यां प्रतिप्रस्थाता प्रतिप्रस्थातारमध्वर्युरध्वर्यु यजमान एतदु परोऽक्षमन्वारब्धं भवति ॥१०॥ अथ स्तीर्णाग्नौ वेदेः । द्वे तृणे ऽअध्वर्युरादत्ते स आश्राव्याक्षोपप्रेष्य क्षोतर्क्ष्या देवेभ्य इत्येतदु वैश्वदेवं पशौ ॥११॥ अथ वाचयति । रेवति यजमानऽइति वाग्वै रेवती सा यद्वाग्बक्षु वदति तेन वाग्रेवती प्रियं धा आविशेत्यनार्तिमाविशेत्येवैतदाक्षोरोरन्तरिक्षात्सन्नूर्दे-वेन वातेनेत्यन्तरिक्षं वाऽअनु रक्षश्चरत्यमूलमुभयतः परिक्षिन्नं यथायं पुरुषोऽमू-ल उभयतः परिक्षिन्नोऽन्तरिक्षमनुचरति तद्वातेनैनꣳ संविदानान्तरिक्षाक्षोपायेत्ये-वैतदाक्ष यदाक्षोरोरन्तरिक्षात्सन्नूर्देवेन वातेनेति ॥१२॥ अस्य क्षविषस्त्मना यजे-ति । वाचमेवैतदाक्षानार्तस्यास्य क्षविष आत्मना यजेति समस्य तन्वा भवेति वाचमेवैतदाक्षानार्तस्यास्य क्षविषस्तन्वा सम्भवेति ॥१३॥ तग्यत्रैनं विशसन्ति । तत्पुरस्तात्तृणमुपास्यति वर्षो वर्षीयसि यज्ञे यज्ञपतिं धा इति बर्हिरेवास्माऽए-तत्तृणात्यस्कन्नꣳ क्षविरसदिति तग्यदेवास्यात्र विशस्यमानस्य किंचित्स्कन्दति तदेतस्मिन्प्रतितिष्ठति तथा नामुया भवति ॥१४॥ अथ पुनरेत्याक्षवनीयमभ्यावृ-त्यासते । नेदस्य संज्ञप्यमानस्याध्यक्षा असामेति तस्य न कूटेन प्रघ्नन्ति मानुषꣳ

हि तन्नोऽएव पश्चात्कर्णं पितृदेवत्यꣳ हि तदपिगृह्य वैव मुखं तमयन्ति वेष्कं वा कुर्वन्ति तन्नाह ह्यहि मारयेति मानुषꣳ हि तत्संज्ञपयान्वगन्निति तद्धि देवत्रा स यदाहान्वगन्नित्येतर्हि ह्येष देवाननुगच्छति तस्मादाहान्वगन्निति ॥ १५ ॥ तथ्य-त्रैनं निविध्यन्ति । तत्पुरा संज्ञपनाज्जुहोति स्वाहा देवेभ्य इत्यथ यदा प्राह संज्ञप्तः पशुरित्यथ जुहोति देवेभ्यः स्वाहेति पुरस्तात्स्वाहाकृतयो वाऽअन्ये देवा उपरिष्टात्स्वाहाकृतयोऽन्ये तानेवैतत्प्रीणाति तऽएनमुभये देवाः प्रीताः स्वर्गं लोकमभिवहन्ति ते वाऽएते परिपशव्येऽइत्याहुती स यदि कामयेत जुहुयादेते यद्यु कामयेतापि नाद्रियेत ॥ १६ ॥ ब्राह्मणम् ॥ २ [८. १.] ॥ ॥

यदा प्राह संज्ञप्तः पशुरिति । अथाध्वर्युराह नेष्टः पत्नीमुदानयेत्युदानयति नेष्टा पत्नीं पात्रेजनं बिभ्रतीम् ॥ १ ॥ तां वाचयति । नमस्तऽआतानेति यज्ञो वाऽआतानो यज्ञꣳ हि तन्वते तेन यज्ञ आतानो ह्यघनार्धो वाऽएष यज्ञस्य यत्पत्नी तामेतत्प्राचीं यज्ञं प्रसादयिष्यन्भवति तस्माऽएवैतद्यज्ञाय निह्नुते तथो ह्येनामेष यज्ञो न हिनस्ति तस्मादाह नमस्तऽआतानेति ॥ २ ॥ अनर्वा प्रेहीति । असपत्नेन प्रेहीत्येवैतदाह घृतस्य कुल्या उपऽऋतस्य पथ्या अन्विति साधूपेत्येवैतदाह देवीरापः शुद्धा वोऽꣳ सुपरिविष्टा देवेषु सुपरिविष्टा वयं परिवेष्टारो भूयास्मेत्यप एवैतत्पावयति ॥ ३ ॥ अथ पशोः प्राणानद्भिः पत्न्युपस्पृशति । तद्यदद्भिः प्राणानुपस्पृशति । जीवं वै देवानाꣳ हविरमृतममृतानामथैतत्पशुं प्रयन्ति यत्संज्ञपयन्ति यद्विशासत्यापो वै प्राणास्तदस्मिन्नेतान्प्राणान्दधाति तथैतज्जीवमेव देवानाꣳ हविर्भवत्यमृतममृतानाम् ॥ ४ ॥ अथ यत्पत्न्युपस्पृशति । योषा वै पत्नी योषायै वाऽइमाः प्रजाः प्रजायन्ते तदेनमेतस्यै योषायै प्रजनयति तस्मात्पत्न्युपस्पृशति ॥ ५ ॥ सोपस्पृशति । वाचं ते शुन्धामीति मुखं प्राणं ते शुन्धामीति नासिके चक्षुस्ते शुन्धामीत्यद्यौ श्रोत्रं ते शुन्धामीति कर्णौ नाभिं ते शुन्धामीति योऽयम-

निरुक्तः प्राणो मेढ्रं ते शुन्धामीति वा पायुं ते शुन्धामीति योऽयं पश्चात्प्राणास्तत्प्राणान्दधाति तत्समीरयत्यथ सꣳकृत्य पदश्चरित्रांस्ते शुन्धामीति पद्भिर्वै प्रतितिष्ठति प्रतिष्ठित्याऽएव तदेनं प्रतिष्ठापयति ॥ ६ ॥ अथ या आपः परिशिष्यन्ते । अर्धा वा यावत्यो वा ताभिरेनं यज्ञमानश्च शीर्षतोऽग्रेऽनुषिञ्चतस्तत्प्राणांश्चैवास्मिंस्तत्तौ धत्तस्तच्चैनमतः समीरयतः ॥ ७ ॥ तद्यत्क्रूरीकुर्वन्ति । यदास्थापयन्ति शान्तिरापस्तद्भिः शान्त्या शमयतस्तद्भिः संधत्तः ॥ ८ ॥ तावनुषिञ्चतः । मनस्तऽआप्यायतां वाक्तऽआप्यायतां प्राणास्तऽआप्यायतां चक्षुस्तऽआप्यायताꣳ श्रोत्रं तऽआप्यायतामिति तत्प्राणान्धत्तस्तत्समीरयतो यत्ते क्रूरं यदास्थितं तत्तऽआप्यायतां निष्यायतामिति ॥ ९ ॥ तद्यत्क्रूरीकुर्वन्ति । यदास्थापयन्ति शान्तिरापस्तद्भिः शान्त्या शमयतस्तद्भिः संधत्तस्तत्ते शुध्यतिति तन्मेध्यं कुरुतः शमलꣳह्यऽइति जघनेन पशुं निनयतः ॥ १० ॥ तद्यत्क्रूरीकुर्वन्ति । यदास्थापयन्ति नेदेतदन्वशान्तान्यहोरात्राण्यसन्निति तस्माद्रमलꣳह्यऽइति जघनेन पशुं निनयतः ॥ ११ ॥ अथोत्तानं पशुं पर्यस्यन्ति । स तृणमन्तर्दधात्योषधे त्रायस्वेति वज्रो वाऽअसिस्तथो हैनमेष वज्रोऽसिर्न हिनस्त्यथासिनाभिनिदधाति स्वधिते मैनꣳ हिꣳसीरिति वज्रो वाऽअसिस्तथो हैनमेष वज्रोऽसिर्न हिनस्ति ॥ १२ ॥ सा या प्रज्ञाताग्निः । तयाभिनिदधाति सा हि यज्ञकृता मेध्या तद्यद्य तृणास्य तत्सव्ये पाणौ कुरुतेऽथ यद्बुध्नं तद्दक्षिणेनादत्ते ॥ १३ ॥ स यत्राह्यति । यत एतल्लोहितमुत्पतति तदुभयतोऽनक्ति रक्षसां भागोऽसीति रक्षसाꣳ ह्येष भागो यदसृक् ॥ १४ ॥ तदुपास्याभितिष्ठति । इदमहꣳ रक्षोऽभितिष्ठामीदमहꣳ रक्षोऽवबाधऽइदमहꣳ रक्षोऽधमं तमो नयामीति तद्यज्ञेनैवैतन्नाष्ट्रा रक्षाꣳस्यवबाधते तद्यदमूलमुभयतः परिक्षिन्नं भवत्यमूलं वाऽइदमुभयतः परिक्षिन्नꣳ रक्षोऽन्तरिक्षमनुचरति यथायं पुरुषोऽमूल उभयतः परिक्षिन्नोऽन्तरिक्षमनुचरति तस्मादमूलमुभयतः परिक्षिन्नं भवति ॥ १५ ॥ अथ वपामु-

त्खिदन्ति । तया वपाश्रपण्यौ प्रोर्णौति घृतेन द्यावापृथिवी प्रोर्णुवाथामिति तद्दिमे द्यावापृथिवीऽऊर्जा रसेन भाजयत्यनयोर्वूर्जꣳ रसं दधाति ते रसवत्याऽउपजीवनीयेऽइमाः प्रजा उपजीवन्ति ॥१६॥ कार्ष्मर्यमय्यौ वपाश्रपण्यौ भवतः । यत्र वै देवा अग्रे पशुमालेभिरे तदुदीचः कृष्यमाणस्यावाञ्चेधः पपात स एष वनस्पतिरजायत तद्यत्कृष्यमाणस्यावाऽपतत्तस्मात्कार्ष्मर्यस्तेनैवैनमेतन्मेधेन समर्धयति कृत्स्नं करोति तस्मात्कार्ष्मर्यमय्यौ वपाश्रपण्यौ भवतः ॥१७॥ तां परिवासयति । तां पशुश्रपणे प्रतपति तथो ह्यस्यात्रापि मृता भवति पुनरुत्सुकमग्नीदादत्ते ते ऽघनेन चावालं यन्ति तऽआयन्त्यागहृत्याहवनीयꣳ स एतत्तृणमधर्युराहवनीये प्रास्यति वायो वे स्तोकानामिति स्तोकानाꣳ ह्वैषा समित् ॥१८॥ अथोत्तरतस्तिष्ठन्वपां प्रतपति । अत्येष्यन्वाऽएषोऽग्निं भवति दक्षिणतः परीत्य अपयिष्यंस्तस्माऽएवैतन्निह्नुते तथो ह्वैनमेषोऽतियन्तमग्निर्न ह्विनस्ति तस्मादुत्तरतस्तिष्ठन्वपां प्रतपति ॥१९॥ तामन्तरेण यूपं चाग्निं च हरन्ति । तद्यत्समया न हरन्ति येनान्यानि हवीꣳषि हरन्ति नेदमृतया समया यज्ञं प्रसज्जामेति यदु बाह्येन न हरन्त्यग्रेण यूपं बर्हिर्धा यज्ञात्कुर्युस्तस्मादन्तरेण यूपं चाग्निं च हरन्ति दक्षिणतः परीत्य प्रतिप्रस्थाता अपयति ॥२०॥ अथ स्रुवेणोपहत्याज्यम् । अधर्युर्वपामभिजुहोत्यग्निराज्यस्य वेतु स्वाहेति तथो ह्यस्यैते स्तोकाः मृताः स्वाहाकृता आहुतयो भूत्वाग्निं प्राप्नुवन्ति ॥२१॥ अथाह स्तोकेभ्योऽनुब्रूहीति । स आग्नेयी स्तोकेभ्योऽन्वाह तद्यदाग्नेयी स्तोकेभ्योऽन्वाहेतःप्रदाना वै वृष्टिरितो ह्यग्निर्वृष्टिं वनुते स एते स्तोकैरेतास्तोकान्वनुते तऽएते स्तोका वर्षन्ति तस्मादाग्नेयी स्तोकेभ्योऽन्वाह यदा मृता भवति ॥२२॥ अथाह प्रतिप्रस्थाता मृता प्रचरेति । स्रुचावादायाधर्युरतिक्रम्याश्राव्याह स्वाहाकृतिभ्यः प्रेष्येति वषट्कृते जुहोति ॥२३॥ हुत्वा वपामेवाग्नेऽभिघारयति । अथ पृषदाज्यं तदु ह चरकाधर्यवः पृषदाज्यमे-

वाग्रेऽभिघारयन्ति प्राणः पृषदाज्यमिति वदन्तस्तद्वै तद्याज्ञवल्क्यं चरकाधर्युरनुव्याजहारैवं कुर्वन्तं प्राणं वाऽअयमन्तरगादध्वर्युः प्राण एनꣳ हास्यतीति ॥ २४॥ स ह स्म बाह्वꣳअन्ववेक्ष्याह । इमौ पलितौ बाह्वꣳ क्व स्विद्ब्राह्मणस्य वचो बभूवेति न तदाद्रियेतोत्तमो वाऽएष प्रयाजो भवतीदं वै हविर्यज्ञ उत्तमे प्रयाजे ध्रुवामेवाग्रेऽभिघारयति तस्यै हि प्रथमावाज्यभागौ होष्यन्भवति वपां वाऽअत्र प्रथमाꣳ होष्यन्भवति तस्माद्वपामेवाग्रेऽभिघारयेदथ पृषदाज्यमथ यत्पशुं नाभिघारयति नेदमृतमभिघारयाणीत्येतद्वास्य सर्वः पशुरभिघारितो भवति यद्वपामभिघारयति तस्माद्वपामेवाग्रेऽभिघारयेदथ पृषदाज्यम् ॥ २५॥ अथाज्यमुपस्तृणीते । अथ हिरण्यशकलमवद्धात्यथ वपामवद्यन्नाहाग्नीषोमाभ्यां छागस्य वपायै मेदसोऽनुब्रूहीत्यथ हिरण्यशकलमवद्धात्यथोपरिष्टाद्धिराज्यस्याभिघारयति ॥ २६॥ तद्यद्धिरण्यशकलावभितो भवतः । घ्नन्ति वाऽएतत्पशुं यदग्नौ जुह्वत्यमृतमायुर्हिरण्यं तदमृतऽआयुषि प्रतितिष्ठति तथात ऊर्दति तथा संजीवति तस्माद्धिरण्यशकलावभितो भवत आश्रावयाहाग्नीषोमाभ्यां छागस्य वपां मेदः प्रेष्येति न प्रस्थितमित्याह प्रसुते प्रस्थितमिति वषट्कृते जुहोति ॥ २७॥ हुत्वा वपाꣳ समीच्यौ । वपाश्रपण्यौ कृत्वानुप्रास्यति स्वाहाकृतेऽऊर्धनभसं मारुतं गच्छतमिति नेदमेऽअमुया सतो याभ्यां वपामशिश्रपामेति ॥ २८॥ तद्यद्वपया चरन्ति । यस्यै वै देवतायै पशुमालभन्ते तामेवैतद्देवतामेतेन मेधेन प्रीणाति सैषा देवतैतेन मेधेन प्रीता शान्तोत्तराणि हवींꣳषि श्रप्यमाणान्युपरमति तस्माद्वपया चरन्ति ॥ २९॥ अथ चात्वाले मार्जयन्ते । क्रूरी वाऽएतत्कुर्वन्ति यत्संज्ञपयन्ति यद्विशासति शान्तिरापस्तद्दृढिः शान्त्या शमयन्ते तद्दृढिः संदधते तस्माच्चात्वाले मार्जयन्ते ॥ ३०॥ ब्राह्मणम् ॥ ३ [८. २.] ॥ ॥

यद्देवत्यः पशुर्भवति । तद्देवत्यं पुरोडाशमनुनिर्वपति तद्यत्पुरोडाशमनुनिर्व

पति सर्वेषां वाऽएष पशूनां मेधो यद्वोक्थियवौ तेनैवैनमेतन्मेधेन समर्धयति कृत्स्नं करोति तस्मात्पुरोडाशमनुनिर्वपति ॥ १ ॥ अथ यद्वपया प्रचर्य । एतेन पुरोडाशेन प्रचरति मध्यतो वाऽइमां वयामुत्खिदन्ति मध्यत एवैनमेतेन मेधेन समर्धयति कृत्स्नं करोति तस्माद्वपया प्रचर्यैतेन पुरोडाशेन प्रचरत्येष न्वेवैतस्य बन्धुर्यत्र क्व चैष पशुं पुरोडाशोऽनुनिरुप्यते ॥ २ ॥ अथ पशुं विशास्ति । त्रिः प्रच्यावयतात्त्रिःप्रच्युतस्य हृदयमुत्तमं कुरुतादिति त्रिवृद्धि यज्ञः ॥ ३ ॥ अथ शमितारꣳ सꣳशास्ति । यद्वा पृह्याकूतꣳ हविः शमिताऽरिति भृतमित्येव ब्रूतान्न भृतं भगवो न भृतꣳ हीति ॥ ४ ॥ अथ स्रुक्वा पृषदाज्यस्योपहत्य । अध्वर्युरुपनिष्क्रम्य पृच्छति भृतꣳ हविः शमिताऽरिति भृतमित्याह तद्देवानामित्युपाꣳशध्वर्युः ॥ ५ ॥ तद्यत्पृच्छति । भृतं वै देवानाꣳ हविर्नाभृतꣳ शमिता वै तद्वेद यदि भृतं वा भवत्यभृतं वा ॥ ६ ॥ तद्यत्पृच्छति । भृतेन प्रचराणीति तद्यद्यभृतं भवति भृतमेव देवानाꣳ हविर्भवति भृतं यजमानस्यानेना अध्वर्युर्भवति शमितरि तदेनो भवति त्रिष्कृत्वः पृच्छति त्रिवृद्धि यज्ञोऽथ यदाह तद्देवानामिति तद्धि देवानां यकृतं तस्मादाह तद्देवानामिति ॥ ७ ॥ स हृदयमेवाग्रेऽभिघारयति । आत्मा वै मनो हृदयं प्राणः पृषदाज्यमात्मन्येवैतन्मनसि प्राणं दधाति तथैतज्जीवमेव देवानाꣳ हविर्भवत्यमृतममृतानाꣳ ॥ ८ ॥ सोऽभिघारयति । सं ते मनो मनसा सं प्राणः प्राणेन गृह्तामिति न स्वाहाकरोति न ह्येषाकृतिरुद्वासयन्ति पशुम् ॥ ९ ॥ तं ज्ञघनेन चावत्तमत्तरेण यूपं चाग्निं च हरन्ति । तद्यत्समया न हरन्ति येनान्यानि हवीꣳषि हरन्ति भृतꣳ सन्तं नेदङ्गशो विकृत्तेन क्रूरीकृतेन समया यज्ञं प्रसङ्गामिति यदु बाह्येन न हरन्त्यग्रेण यूपं बहिर्धा हि यज्ञात्कुर्युस्तस्मादुत्तरेण यूपं चाग्निं च हरन्ति दक्षिणतो निधाय प्रतिप्रस्थातावस्यति प्लक्षशाखा उत्तरबर्हिर्भवन्ति ता अध्यवस्यति तद्यत्प्लक्षशाखा उत्तरबर्हिर्भवन्ति ॥ १० ॥ यत्र वै देवाः । अग्रे प-

शुमालेभिरे तं त्वष्टा शीर्षतोऽग्रेऽभ्युवामोतैवं चिन्नालभेरन्निति त्वष्टुर्हि पशवः स एष शीर्षन्मस्तिष्कोऽनूक्यश्च मज्जा तस्मात्स वान्त-इव त्वष्टा क्रौतमभ्यवमत्त-स्मात्तं नाश्नीयात्त्वष्टुर्क्रौतदभिवान्तम् ॥ ११॥ तस्यावाङ् मेधः पपात । स एष वन-स्पतिरजायत तं देवाः प्रापश्यंस्तस्मात्प्रख्यः प्रख्यो ह वै नामैतद्यत्प्लक्ष इति ते-नैवैनमेतन्मेधेन समर्धयति कृत्स्नं करोति तस्मात्प्लक्षशाखा उत्तरबर्हिर्भवन्ति ॥१२॥ अथाज्यमुपस्तृणीते । स्रुचां चोपभृति च वसाहोमहवन्याऽ समवत्तधान्यामथ हि-रण्यशकलाववदधाति स्रुचां चोपभृति च ॥ १३॥ अथ मनोतायै हविषोऽनुवाच आह । तद्यन्मनोतायै हविषोऽनुवाच आह सर्वा ह वै देवताः पशुमालभ्यमा-नमुपसंगच्छन्ते मम नाम ग्रहीष्यति मम नाम ग्रहीष्यतीति सर्वासाऽ हि देवता-नाऽ हविः पशुस्तासाऽ सर्वासां देवतानां पशौ मनाऽस्योतानि भवन्ति तान्येवै-तत्प्रीणाति तथो कामोघाय देवतानां मनाऽस्युपसंगतानि भवन्ति तस्मान्मनो-तायै हविषोऽनुवाच आह ॥ १४॥ स हृदयस्यैवाग्रेऽवद्यति । तद्यन्मध्यतः सतो हृदयस्याग्रेऽवद्यति प्राणो वै हृदयमतो खल्वयमूर्ध्वः प्राणः संचरति प्राणो वै पशु-र्यावद्धेव प्राणेन प्राणिति तावत्पशुरथ यदास्मात्प्राणोऽपक्रामति दार्वेव तर्हि भूतोऽनर्थ्यः शेते ॥ १५॥ हृदयमु वै पशुः । तदस्यात्मन एवाग्रेऽवद्यति तस्मा-द्यदि किंचिदवदानऽ हीयेत न तदाद्रियेत सर्वस्य ह्येवास्य तत्पशोरवत्तं भवति यद्धृदयस्याग्रेऽवद्यति तस्मान्मध्यतः सतो हृदयस्यैवाग्रेऽवद्यत्यथ यथापूर्वम् ॥ १६॥ अथ जिह्वायै । सा हीयं पूर्वार्धात्प्रतिष्ठत्यथ वक्षसस्तद्धि ततोऽथैकचरस्य दोष्णो ऽथ पार्श्वयोरथ तनिम्नोऽथ वृक्कयोः ॥ १७॥ गुदं त्रेधा करोति । स्थविमोपयड्ढ्यो मध्यं स्रुचां द्वेधा कृत्वावद्यत्यणिम ऋङ्मेधयैकचरायै श्रोणेरेतावन्तु स्रुचामवद्यति ॥ १८॥ अथोपभृति । ऋङ्म्यस्य दोष्णो गुदं द्वेधा कृत्वावद्यति ऋङ्म्यायै श्रोणेरथ हिरण्यशकलावदधात्यथोपरिष्टादाज्यस्याभिघारयति ॥ १९॥ अथ वसाहोमं गृ-

ह्णाति । रेडसीति लेलयेव हि यूस्तस्मादाह रेडसीत्यग्निष्ट्वा श्रीणात्वित्यग्निर्व्रतं-
ऋपयति तस्मादाहाग्निष्ट्वा श्रीणात्वित्यापस्त्वा समरिणन्नित्यापो व्रतमृभ्यो रसꣳ
सम्भरन्ति तस्मादाहापस्त्वा समरिणन्निति ॥२०॥ वातस्य त्वा ध्राड्याऽइति । अन्त-
रिक्षं वाऽअयमनुपवते योऽयं पवतेऽन्तरिक्षाय वै गृह्णाति तस्मादाह वातस्य त्वा
ध्राड्याऽइति ॥२१॥ पूष्णा रꣳह्याऽइति । एष वै पूष्णो रꣳहिरेतस्माऽउ हि गृ-
ह्णाति तस्मादाह पूष्णो रꣳह्याऽइति ॥२२॥ ऊष्मणो व्यथिषदिति । एष वाऽऊ-
ष्मैतस्माऽउ हि गृह्णाति तस्मादाहोष्मणो व्यथिषदित्यथोपरिष्टाद्धिराण्यस्याभिघा-
रयति ॥२३॥ ॥ शतम् २१०० ॥ ॥ अथ पार्श्वेन वासिना वा प्रयौति । प्रयुतं द्वे-
ष इति तन्नाष्ट्रा एवैतद्रक्षाꣳस्यतोऽपहन्ति ॥२४॥ अथ यत्पूष्णः परिशिष्यते । तत्स-
मवत्तधान्यामानयति तद्वृतं प्रास्यति जिह्वां वत्तस्तनिम मतस्ने वनिष्ठुमथोपरि-
ष्टाद्धिराण्यस्याभिघारयति ॥२५॥ तद्यद्धिरण्यशकलावभितो भवतः । घ्नन्ति वाऽए-
तत्पशुं यदग्नौ जुह्वत्यमृतमायुर्हिरण्यं तदमृतऽआयुषि प्रतितिष्ठति तथात ऽदेति
तथा संजीवति तस्माद्धिरण्यशकलावभितो भवतः ॥२६॥ अथ यद्दक्षिणायाव्यति ।
सव्यस्य च दोष्णो दक्षिणायाश्च श्रोणेर्दक्षिणस्य च दोष्णः सव्यायाश्च श्रोणेस्तस्मा-
दयं पशुरदक्षिणया पदो हरत्यथ यत्सम्यगवद्येत्समीचो ह्येवायं पशुः पदो हरेत्तस्मा-
दक्षिणायाव्यत्यथ यन्न शीर्ष्णोऽवद्यति नाꣳसयोर्नानूकस्य नापरसक्थयोः ॥२७॥
असुरा ह वाऽअग्रे पशुमालेभिरे । तद्देवा भीषा नोपावियुस्तान्ह्येयं पृथिव्युवाच
मैतदादृढमहं व एतस्याध्यक्षा भविष्यामि यथा-यथैतऽएतेन चरिष्यन्तीति ॥२८॥
सा होवाच । अन्यतरामेवाकृतिमहौषुरन्यतरां पर्यशिषन्निति स यां पर्यशिष्यं-
स्तानीमान्यवदानानि ततो देवाः स्विष्टकृते त्र्यङ्गाण्यपाभजंस्तस्मात्त्र्यङ्गाण्यथासुरा
अवाद्यञ्छीर्ष्णोऽꣳसयोरनूकस्यापरसक्थयोस्तस्मात्तेषां नावद्येद्यत्त्वेव त्वष्टानूकमभ्य-
वमत्तस्मादनूकस्य नावद्येद्यदाहाग्नीषोमाभ्यां छागस्य हविषोऽनुब्रूहीत्याश्राव्या-

क्राग्नीषोमाभ्यां क्रागस्य क्रविः प्रेष्येति न प्रस्थितमित्याक्र प्रसुते प्रस्थितमिति ॥ २१ ॥ अन्तरेणार्धर्चौ याज्यायै वसाक्रोमं जुक्रोति । इतो वाऽअयमूर्ध्वो मेध उत्थितो यमस्या इमꣳ रसं प्रजा उपजीवन्त्यर्वाचीनं दिवो रसो वै वसाक्रोमो रसो मेधो रसेनैवैतद्रसं तीव्रीकरोति तस्मादयꣳ रसोऽद्यमानो न क्षीयते ॥ ३० ॥ तद्यदन्तरेण । अर्धर्चौ याज्यायै वसाक्रोमं जुक्रोतीयं वाऽअर्धर्चोऽसौ द्यौरर्धर्चो ऽन्तरा वै द्यावापृथिवीऽअन्तरिक्षमन्तरिक्षाय वै जुक्रोति तस्मादन्तरेणार्धर्चौ याज्यायै वसाक्रोमं जुक्रोति ॥ ३१ ॥ स जुक्रोति । घृतं घृतपावानः पिबत वसां वसापावानः पिबतान्तरिक्षस्य क्रविरसि स्वाक्रेत्येतेन वैश्वदेवेन यजुषा जुक्रोति वैश्वदेवं वाऽअन्तरिक्षं तद्यदेनेनेमाः प्रजाः प्राणत्यश्नोदानत्यश्चान्तरिक्षमनुचरन्ति तेन वैश्वदेवं वषट्कृते जुक्रोति यानि जुह्वामवदानानि भवन्ति ॥ ३२ ॥ अथ जुह्वा पृषदाज्यस्योपघ्नन्नाक्र । वनस्पतयेऽनुब्रूक्रीत्याश्रावयाक्र वनस्पतये प्रेष्येति वषट्कृते जुक्रोति तद्वनस्पतये जुक्रोत्येतमेवैतद्वज्रं यूपं भागिनं करोति सोमो वै वनस्पतिः पशुमेवैतत्सोमं करोति तद्यदन्तरेणोभेऽआकुती जुक्रोति तयोभयं व्याप्नोति तस्मादन्तरेणोभेऽआकुती जुक्रोति ॥ ३३ ॥ अथ यान्युपभृत्यवदानानि भवन्ति । तानि समानयमान आक्राग्नये स्विष्टकृतेऽनुब्रूक्रीत्याश्रावयाक्राग्नये स्विष्टकृते प्रेष्येति वषट्कृते जुक्रोति ॥ ३४ ॥ अथ यद्वसाक्रोमस्य परिशिष्यते । तेन दिशो व्याघारयति दिशः प्रदिश आदिशो विदिश उद्दिशो दिग्भ्यः स्वाक्रेति रसो वै वसाक्रोमः सर्वास्वेवैतद्दिक्षु रसं दधाति तस्मादयं दिशि दिशि रसोऽभिगम्यते ॥ ३५ ॥ अथ पशुं संमृशति । एतर्हि संमर्शनस्य कालोऽथ यत्पुरा समृशति यऽइमऽउपतिष्ठन्ते ते विमथिष्यन्तऽइति शङ्कमानो यद्यु विमाथान्न शङ्कितात्रैव संमृशेत् ॥ ३६ ॥ ऐन्द्रः प्राणः । अङ्गेऽअङ्गे निदीध्यदिन्द्र उदानोऽअङ्गेऽअङ्गे निधीत इति यदङ्गशो विकृत्तो भवति तत्प्राणोदानाभ्याꣳ संदधाति देव त्वष्टर्भूरि ते सꣳ-

समेतु सलक्ष्मा यद्विषुरूपं भवातीति कृत्स्नवृतमेवैतत्करोति देवत्रा यन्तमवसे सखायोऽनु त्वा मातापितरो मदन्त्विति तद्यत्रैनमकौषीत्तदेनं कृत्स्नं कृत्वानुसमस्यति सोऽस्य कृत्स्नोऽमुष्मिंल्लोकेऽआत्मा भवति ॥ ३७ ॥ ब्राह्मणम् ॥ ४ [८. ३] ॥ ॥

त्रीणि ह वै पशोरेकादशानि । एकादश प्रयाजा एकादशानुयाजा एकादशोपयजो दश पाणया अङ्गुलयो दश पाद्या दश प्राणाः प्राण उदानो व्यान इत्येतावान्वै पुरुषो यः परार्ध्यः पशूनां यच्च सर्वेऽनु पशवः ॥ १ ॥ तदाहुः । किं तद्यज्ञे क्रियते येन प्राणाः सर्वेभ्योऽङ्गेभ्यः शिव इति ॥ २ ॥ यदेव गुदं त्रेधा करोति । प्राणो वै गुदः सोऽयं प्राङातनतस्तमयं प्राणोऽनुसंचरति ॥ ३ ॥ स यदेव गुदं त्रेधा करोति । तृतीयमुपयड्भ्यस्तृतीयं जुह्वां तृतीयमुपभृति तेन प्राणः सर्वेभ्योऽङ्गेभ्यः शिवः ॥ ४ ॥ स ह वेव पशुमालभेत । य एनं मेधमुपनयेद्यदि कृशः स्याद्यदुदर्यस्य मेदसः परिशिष्यत तदुदे न्यृषेत्प्राणो वै गुदः सोऽयं प्राङातनतस्तमयं प्राणोऽनुसंचरति प्राणो वै पशुर्यावद्धेव प्राणेन प्राणिति तावत्पशुरथ यदास्मात्प्राणोऽपक्रामति दार्वेव तर्हि भूतोऽनर्ध्यः शेते ॥ ५ ॥ गुदो वै पशुः । मेदो वै मेधस्तदेनं मेधमुपनयति यद्युऽश्वसलो भवति स्वयमुपेत एव तर्हि मेधं भवति ॥ ६ ॥ अथ पृषदाज्यं गृह्णाति । द्वयं वाऽइदꣳ सर्पिश्चैव दधि च द्वन्द्वं वै मिथुनं प्रजननं मिथुनमेवैतत्प्रजननं क्रियते ॥ ७ ॥ तेनानुयाजेषु चरति । पशवो वाऽअनुयाजाः पयः पृषदाज्यं तत्पशुष्वेवैतत्पयो दधाति तदिदं पशुषु पयो हितं प्राणो हि पृषदाज्यमन्नꣳ हि पृषदाज्यमन्नꣳ हि प्राणः ॥ ८ ॥ तेन पुरस्तादनुयाजेषु चरति । स योऽयं पुरस्तात्प्राणस्तमेवैतद्दधाति तेन पश्चादुपयजति स योऽयं पश्चात्प्राणस्तमेवैतद्दधाति ताविमाऽउभयतः प्राणौ हितौ यश्चायमुपरिष्टाद्यश्चाधस्तात् ॥ ९ ॥ तदाऽएतदेको द्वाभ्यां वषट्करोति । अध्वर्यवे च यश्चैष उपयजत्यथ यद्यजत्तमुपयजति तस्मादुपयजो नामाथ यदुपयजति प्रैवैतज्ज्ञनयति पश्चाद्युपयज-

ति पश्चाद्वि योषायै प्रजाः प्रजायन्ते ॥१०॥ स उपयजति । समुद्रं गच्छ स्वाहेत्या-पो वै समुद्र आपो रेतो रेत एवैतत्सिञ्चति ॥११॥ अन्तरिक्षं गच्छ स्वाहेति । अन्तरिक्षं वाऽअनु प्रजाः प्रजायन्तेऽन्तरिक्षमेवैतदनु प्रजनयति ॥१२॥ देवꣳ सवि-तारं गच्छ स्वाहेति सविता वै देवानां प्रसविता सवितृप्रसूत एवैतत्प्रजनयति ॥१३॥ मित्रावरुणौ गच्छ स्वाहेति । प्राणोदानौ वै मित्रावरुणौ प्राणोदानावेवै-तत्प्रजासु दधाति ॥१४॥ अहोरात्रे गच्छ स्वाहेति । अहोरात्रे वाऽअनु प्रजाः प्र-जायन्तेऽहोरात्रेऽएवैतदनु प्रजनयति ॥१५॥ छन्दाꣳसि गच्छ स्वाहेति । सप्त वै छन्दाꣳसि सप्त ग्राम्याः पशवः सप्तारण्यास्तानेवैतदुभयान्प्रजनयति ॥१६॥ द्यावा-पृथिवी गच्छ स्वाहेति । प्रजापतिर्वै प्रजाः सृष्ट्वा ता द्यावापृथिवीभ्यां पर्यगृह्णात्ता इमा द्यावापृथिवीभ्यां परिगृहीतास्तथोऽएवैष एतत्प्रजाः सृष्ट्वा ता द्यावापृथिवी-भ्यां परिगृह्णाति ॥१७॥ अथात्युपयजति । स यन्नात्युपयजेद्यावत्यो ह्येवाग्रे प्रजाः सृष्टास्तावत्यो ह्येव स्युर्न प्रजायेरन्नथ यदत्युपयजति प्रैवैतज्जनयति तस्मादिमाः प्रजाः पुनरभ्यावर्तं प्रजायन्ते ॥१८॥ ब्राह्मणम् ॥५[८.४]॥ ॥ षष्ठः प्रपाठकः ॥ कण्डिकासंख्या ११२ ॥ ॥

सोऽत्युपयजति । यज्ञं गच्छ स्वाहेत्यापो वै यज्ञ आपो रेतो रेत एवैतत्सि-ञ्चति ॥१॥ सोमं गच्छ स्वाहेति । रेतो वै सोमो रेत एवैतत्सिञ्चति ॥२॥ दिव्यं नभो गच्छ स्वाहेति । आपो वै दिव्यं नभ आपो रेतो रेत एवैतत्सिञ्चति ॥३॥ अग्निं वैश्वानरं गच्छ स्वाहेति । इयं वै पृथिव्यग्निर्वैश्वानरः सेयं प्रतिष्ठामाभैवैतत्प्र-तिष्ठामभिप्रजनयति ॥४॥ अथ मुखं विमृष्टे । मनो मे हार्दि यच्छेति तथो ह्येव-यष्टात्मानं नानुप्रवृणक्ति ॥५॥ अथ जाघन्या पत्नीः संयाजयन्ति । जघनार्धो वै जाघनी जघनार्धाद्वै योषायै प्रजाः प्रजायन्ते तत्प्रैवैतज्जनयति यज्जाघन्या पत्नीः सं-याजयन्ति ॥६॥ अन्तरतो देवानां पत्नीभ्योऽवद्यति । अन्तरतो वै योषायै प्रजाः

प्रजायत्तऽउपरिष्टादग्नये गृहपतयऽउपरिष्टाद्वै वृषा योषामधिद्रवति ॥७॥ अथ हृदयशूलेनावभृथं यन्ति । पशोर्हृ वाऽआलभ्यमानस्य हृदयꣳ शुक्समभ्यैवैति हृदयाद्धृदयशूलमथ यकृतस्य परितृन्दन्ति तद्लंनुषं तस्माद्ु परितृण्ण्वैव शूलाकुर्यात्तत्त्रिःप्रच्युते पशौ हृदयं प्रवृह्योत्तमं प्रत्यवदधाति ॥८॥ अथ हृदयशूलं प्रयच्छति । तन्न पृथिव्यां परास्येन्नाप्सु स यत्पृथिव्यां परास्येदोषधीश्च वनस्पतींश्चैषा शुक्प्रविशेद्यदप्सु परास्येदप एषा शुक्प्रविशेत्तस्मान्न पृथिव्यां नाप्सु ॥९॥ अप एवाभ्यवेत्य । यत्र शुष्कस्य चार्द्रस्य च संधिः स्यात्तदुपगूहेद्यद्युऽअभ्यवायनाय ग्लायेद्ग्रेण यूपमुदपात्रं निनीय यत्र शुष्कस्य चार्द्रस्य च संधिर्भवति तदुपगूहति मापो मौषधीर्हिꣳसीरिति तथा नापो मौषधीर्हिनस्ति धाम्नो-धाम्नो राजंस्ततो वरुण नो मुञ्च । यदाकुरण्या इति वरुणेति शपामहे ततो वरुण नो मुञ्चेति तदेनꣳ सर्वस्माद्वरुणपाशात्सर्वस्माद्वरुण्यात्प्रमुञ्चति ॥१०॥ अथाभिमन्त्रयते । सुमित्रिया न आप ओषधयः सन्तु दुर्मित्रियास्तस्मै सन्तु योऽस्मान्द्वेष्टि यं च वयं द्विष्म इति यत्र वाऽएतेन प्रचरन्त्यापश्च ह वाऽअस्मात्तावदोषधयश्चापक्रम्येव तिष्ठन्ति तदु ताभिर्मित्रधेयं कुरुते तथो हैनं ताः पुनः प्रविशन्त्येषो तत्र प्रायश्चित्तिः क्रियते स वै नाग्नीषोमीयस्य पशोः करोति नाग्नेयस्य वशायाऽएवानूबन्ध्यायै ताꣳ हि सर्वोऽनु यज्ञः संतिष्ठतऽएतदु ह्यस्याग्नीषोमीयस्य च पशोराग्नेयस्य च हृदयशूलेन चरितं भवति यद्वशायाश्चरन्ति ॥११॥ ब्राह्मणम् ॥१[८.५.]॥ अष्टमोऽध्यायः [२३.] ॥ ॥

प्रजापतिर्वै प्रजाः ससृजानो रिरिचान-इवामन्यत । तस्मात्पराच्यः प्रजा आसुर्नास्य प्रजाः श्रियेऽन्नाद्याय तस्थिरे ॥१॥ स ऐक्षतारिꣳयकम् । अस्माऽउ कामायासृक्षि न मे स कामः समर्धि पराच्यो मत्प्रजा अभूवन्न मे प्रजाः श्रियेऽन्नाद्यायास्थिषतेति ॥२॥ स ऐक्षत प्रजापतेः । कथं नु पुनरात्मानमाप्यायेयेयोप मा

प्रजाः समावर्तेरंस्तिष्ठेरन्ने प्रजाः श्रियेऽन्नाद्यायेति ॥३॥ सोऽर्चञ्छ्राम्यंश्चचार प्रजाकामः । स एतामेकादशिनीमपश्यत्स एकादशिन्येष्ट्वा प्रजापतिः पुनरात्मानमाप्याययतोपैनं प्रजाः समावर्तन्तातिष्ठन्तास्य प्रजाः श्रियेऽन्नाद्याय स वसीयानेवेष्ट्वा भवत् ॥४॥ तस्मै कमेकादशिन्या यजेत । एवꣳ ह्येव प्रजया पशुभिराप्यायतेऽउपैनं प्रजाः समावर्तन्ते तिष्ठन्तेऽस्य प्रजाः श्रियेऽन्नाद्याय स वसीयानेवेष्ट्वा भवत्येतस्मै कमेकादशिन्या यजते ॥५॥ स आग्नेयं प्रथमं पशुमालभते । अग्निव देवतानां मुखं प्रजननयिता स प्रजापतिः स ऽएव यजमानस्तस्मादाग्नेयो भवति ॥६॥ अथ सारस्वतम् । वाग्वै सरस्वती वाचैव तत्प्रजापतिः पुनरात्मानमाप्याययत वागेनमुपसमावर्तत वाचमनुकामात्मनोऽकुरुत वाचोऽएवैष एतदाप्यायते वागेनमुपसमावर्तते वाचमनुकामात्मनः कुरुते ॥७॥ अथ सौम्यम् । अन्नं वै सोमोऽन्नेनैव तत्प्रजापतिः पुनरात्मानमाप्याययतान्नमेनमुपसमावर्ततान्नमनुकमात्मनोऽकुरुतान्नोऽएवैष एतदाप्यायतेऽन्नमेनमुपसमावर्ततेऽन्नमनुकमात्मनः कुरुते ॥८॥ तद्यत्सारस्वतमनु भवति । वाग्वै सरस्वत्यन्नꣳ सोमस्तस्माद्यो वाचा प्रसाम्यन्नादो ह्येव भवति ॥९॥ अथ पौ ष्णम् । पशवो वै पूषा पशुभिरेव तत्प्रजापतिः पुनरात्मानमाप्याययत पशव एनमुपसमावर्तन्त पशूननुकानात्मनोऽकुरुत पशुभिर्वैवैष एतदाप्यायते पशव एनमुपसमावर्तन्ते पशूननुकानात्मनः कुरुते ॥१०॥ अथ बार्हस्पत्यम् । ब्रह्म वै बृहस्पतिर्ब्रह्मणैवैतत्प्रजापतिः पुनरात्मानमाप्याययत ब्रह्मैनमुपसमावर्तत ब्रह्मानुकमात्मनोऽकुरुत ब्रह्मणोऽएवैष एतदाप्यायते ब्रह्मैनमुपसमावर्तते ब्रह्मानुकमात्मनः कुरुते ॥११॥ तद्यत्पौष्णमनु भवति । पशवो वै पूषा ब्रह्म बृहस्पतिस्तस्माद्ब्राह्मणाः पशूनभिधृष्णुतमः पुराहिता ह्यस्य भवन्ति मुखꣳ ह्येतास्तस्माद्ध तत्सर्वं दृत्वाजिनवासी चरति ॥१२॥ अथ वैश्वदेवꣳ । सर्वं वै विश्वे देवाः सर्वेणैव तत्प्रजापतिः पुनरात्मानमाप्याययत सर्वमेनमुपसमावर्त-

त सर्वमनुकमात्मनोऽकुरुत सर्वेणोऽएवैष एतदाप्यायते सर्वमेनमुपसमावर्तते सर्वमनुकमात्मनः कुरुते ॥ १३ ॥ तद्यद्बार्हस्पत्यमनु भवति । ब्रह्म वै बृहस्पतिः सर्वमिदं विश्वे देवा अस्यैवैतत्सर्वस्य ब्रह्म मुखं करोति तस्मादस्य सर्वस्य ब्राह्मणो मुखम् ॥ १४ ॥ अथेन्द्रम् । इन्द्रियं वै वीर्यमिन्द्र इन्द्रियेणैव तद्वीर्येण प्रजापतिः पुनरात्मानमाप्याययतेन्द्रियमेनं वीर्यमुपसमावर्ततेन्द्रियं वीर्यमनुकमात्मनोऽकुरुतेन्द्रियेणोऽएवैष एतद्वीर्येणाप्यायतऽइन्द्रियमेनं वीर्यमुपसमावर्ततऽइन्द्रियं वीर्यमनुकमात्मनः कुरुते ॥ १५ ॥ तद्यद्वैश्वदेवमनु भवति । क्षत्रं वाऽइन्द्रो विशो विश्वे देवा अन्नाद्यमेवास्माऽएतत्पुरस्तात्करोति ॥ १६ ॥ अथ मारुतम् । विशो वै मरुतो भूमो वै विड्भूम्नैव तत्प्रजापतिः पुनरात्मानमाप्याययत भूमैनमुपसमावर्तत भूमानमनुकमात्मनोऽकुरुत भूम्नोऽएवैष एतदाप्यायते भूमैनमुपसमावर्तते भूमानमनुकमात्मनः कुरुते ॥ १७ ॥ तद्यदैन्द्रमनु भवति । क्षत्रं वाऽइन्द्रो विशो विश्वे देवा विशो वै मरुतो विशैवैतत्क्षत्रं परिबृंहति तदिदं क्षत्रमुभयतो विशा परिबृढम् ॥ १८ ॥ अथेन्द्राग्नम् । तेजो वाऽअग्निरिन्द्रियं वीर्यमिन्द्र उभाभ्यामेव तद्वीर्याभ्यां प्रजापतिः पुनरात्मानमाप्याययतोभेऽएनं वीर्येऽउपसमावर्तेतामुभे वीर्येऽअनुकेऽआत्मनोऽकुरुतोभाभ्यामेवैष एतद्वीर्याभ्यामाप्यायतऽउभेऽएनं वीर्येऽउपसमावर्तेतेऽउभे वीर्येऽअनुकेऽआत्मनः कुरुते ॥ १९ ॥ अथ सावित्रम् । सविता वै देवानां प्रसविता तथो ह्यस्माऽएते सवितृप्रसूता एव सर्वे कामाः समृध्यन्ते ॥ २० ॥ अथ वारुणमन्तत आलभते । तदेनꣳ सर्वस्माद्वरुणपाशात्सर्वस्माद्वरुण्यात्प्रमुञ्चति ॥ २१ ॥ तस्माद्यदि यूपैकादशिनी स्यात् । आग्नेयमेवाग्निष्ठे नियुञ्ज्यादथेतरान्व्युपनयेयुर्यथापूर्वम् ॥ २२ ॥ यद्यु पञ्चैकादशिनी स्यात् । आग्नेयमेव यूपऽआलभेरन्नथेतरान्यथापूर्वम् ॥ २३ ॥ तान्यत्रोदीचो नयन्ति । आग्नेयमेव प्रथमं नयन्त्यथेतरान्यथापूर्वम् ॥ २४ ॥ तान्यत्र निविध्यन्ति । आग्नेयमेव प्रथमं दक्षिणार्ध्यं

निविध्यत्यथेतरानुदीचोऽतिनीय यथापूर्वम् ॥२५॥ तेषां यत्र वपाभिः प्रचरन्ति । आग्नेयस्यैव प्रथमस्य वपया प्रचरत्यथेतरेषां यथापूर्वम् ॥२६॥ तैर्यत्र प्रचरन्ति । आग्नेयेनैव प्रथमेन प्रचरत्यथेतरैर्यथापूर्वम् ॥२७॥ ब्राह्मणम् ॥२[१.१.]॥ ॥

यत्र वै यज्ञस्य शिरोऽछिद्यत । तस्य रसो द्रुवापः प्रविवेश तेनैवैतद्रसेनापः स्यन्दन्ते तमेवैतद्रसꣳ स्यन्दमानं मन्यन्ते ॥१॥ स यद्वसतीवरीरह्नेति । तमेवैतद्रसमाकृत्य यज्ञे दधाति रसवन्तं यज्ञं करोति तस्माद्वसतीवरीरह्नेति ॥२॥ ता वै सर्वेषु सवनेषु विभजति । सर्वेष्वेवैतत्सवनेषु रसं दधाति सर्वाणि सवनानि रसवन्ति करोति तस्मात्सर्वेषु सवनेषु विभजति ॥३॥ ता वै स्यन्दमानानां गृह्णीयात् । ऐड्ढि स यज्ञस्य रसस्तस्मात्स्यन्दमानानां गृह्णीयात् ॥४॥ गोपीथाय वा ऽएता गृह्यन्ते । सर्वं वाऽइदमन्यदिलयति यदिदं किं चापि योऽयं पवतेऽथैता एव नेलयन्ति तस्मात्स्यन्दमानानां गृह्णीयात् ॥५॥ दिवा गृह्णीयात् । पश्यन्यज्ञस्य रसं गृह्णातीति तस्माद्दिवा गृह्णीयादेतस्मै वै गृह्णाति य एष तपति विश्वेभ्यो ह्येना देवेभ्यो गृह्णाति रश्मयो ह्यस्य विश्वे देवास्तस्माद्दिवा गृह्णीयाद्दिवेव वा ऽएष तस्माद्दिव दिवा गृह्णीयात् ॥६॥ एतद्ध वै विश्वे देवाः । यजमानस्य गृहानागच्छन्ति स यः पुरादित्यस्यास्तमयाद्वसतीवरीर्गृह्णाति यथा श्रेयस्यागमिष्यत्यावसथेनोपक्लृप्तेनोपासीतैवं तत्तऽएतद्विविः प्रविशति तऽएतासु वसतीवरीषूपवसन्ति स उपवसथः ॥७॥ स यस्यागृहीता अभ्यस्तमियात् । तत्र प्रायश्चित्तिः क्रियते यदि पुरेज्ञानः स्यान्निनाक्ष्याद्गृह्णीयाद्दिवा हि तस्य ताः पुरा गृहीता भवन्ति यद्युऽअनीज्ञानः स्याद्य एनमीज्ञान उपावसितो वा पर्यवसितो वा स्यात्तस्य निनाक्ष्याद्गृह्णीयाद्दिवा हि तस्य ताः पुरा गृहीता भवन्ति ॥८॥ यद्युऽएतदुभयं न विन्देत् । उल्कुषीमेवादायोपपरेयात्तामुपर्युपरि धारयन्गृह्णीयाद्धिरण्यं वोपर्युपरि धारयन्गृह्णीयात्तदेतस्य द्रूपं क्रियते य एष तपति ॥९॥ अथातो गृह्णात्येव । ह-

विष्मतीरिमा आप इति यज्ञस्य ह्यासु रसः प्राविशत्तस्मादाह हविष्मतीरिमा आप इति हविष्मां२॥ऽआविवासतीति हविष्मान्ह्येना यज्ञमान आविवासति तस्मादाह हविष्मां२॥ऽआविवासतीति ॥ १०॥ हविष्मान्देवोऽअधर इति । अधरो वै यज्ञस्तस्मै यज्ञाय गृह्णाति तꣳ हविष्मन्तं करोति तस्मादाह हविष्मान्देवोऽअधर इति ॥ ११॥ हविष्मा२॥ऽअस्तु सूर्य इति । एतस्मै वै गृह्णाति य एष तपति विश्वेभ्यो ह्येना देवेभ्यो गृह्णाति रश्मयो ह्यस्य विश्वे देवास्तस्मादाह हविष्मां२॥ऽअस्तु सूर्य इति ॥ १२॥ ता आहृत्य ज्ञघनेन गार्हपत्यꣳ सादयति । अग्नेर्वोऽपन्नगृहस्य सदसि सादयामीत्यग्नेर्वोऽनार्तगृहस्य सदसि सादयामीत्येवैतदाहाथ यदाग्नीषोमीयः पशुः संतिष्ठतेऽथ परिहरति व्युत्क्रामतेत्याहाग्रेण हविर्धानि यज्ञमान आस्ते ता आदत्ते ॥ १३॥ स दक्षिणेन निष्क्रामति । ता दक्षिणायाꣳ श्रोणी सादयतीन्द्राग्न्योर्भागधेयी स्थेति विश्वेभ्यो ह्येना देवेभ्यो गृह्णातीन्द्राग्नी हि विश्वे देवास्ताः पुनराहृत्याग्रेण पत्नीꣳ सादयति स ज्ञघनेन पत्नीं पर्येत्य ता आदत्ते ॥ १४॥ स उत्तरेण निष्क्रामति । ता उत्तरायाꣳ श्रोणी सादयति मित्रावरुणयोर्भागधेयी स्थेति नैवꣳ सादयेदतिरिक्तमेतन्नैवꣳ सम्पत्सम्पद्यतऽइन्द्राग्न्योर्भागधेयी स्थेत्येव ब्रूयात्तदेवानतिरिक्तं तथा सम्पत्सम्पद्यते ॥ १५॥ गुप्त्यै वाऽएताः परिक्रियन्ते । अग्निः पुरस्तादेताः समन्तं पल्यङ्ग्यन्ते नाष्ट्रा रक्षाꣳस्यपघ्नत्यस्ता आग्नीध्रे सादयति विश्वेषां देवानां भागधेयी स्थेति तदासु विश्वान्देवान्त्संवेशयत्येते वै वसतां वरं तस्माद्वसतीवर्यो नाम वसताꣳ ह वै वरं भवति य एवमेतद्वेद ॥ १६॥ तानि वाऽएतानि सप्त यज्ूꣳषि भवन्ति । चतुर्भिर्गृह्णात्येकेन ज्ञघनेन गार्हपत्यꣳ सादयत्येकेन परिहरत्येकेनाग्नीध्रे तानि सप्त यत्र वै वाचः प्रज्ञातानि छन्दाꣳसि सप्तपदा वै तेषां परार्ध्या शक्वर्येतामभिसम्पदं तस्मात्सप्त यज्ूꣳषि भवन्ति ॥ १७॥ ब्राह्मणम् ॥ ३ [१. २.] ॥ ॥

तान्त्सम्प्रबोधयन्ति । तेऽप उपस्पृश्याग्नीध्रमुपसमायन्ति तऽआज्यानि गृह्णते गृह्णीवाज्यान्यायत्यासाद्याज्यानि ॥१॥ अथ राजानमुपावहरति । इयं वै प्रतिष्ठा ज्ञानूरासां प्रजानामिमामेवैतत्प्रतिष्ठामभ्युपावहरति तमस्यै तनुते तमस्यै जनयति ॥२॥ अन्तरेणोषेऽउपावहरति । यज्ञो वाऽअनस्तन्नैव यज्ञान्न बहिर्धा करोति ग्रावसु संमुखेष्वधिनिदधाति क्षत्रं वै सोमो विशो ग्रावाणः क्षत्रमेवैतद्विश्यधूहति तद्यत्संमुखा भवन्ति विशमेवैतत्संमुखां क्षत्रियमभ्यविवादिनीं करोति तस्मात्संमुखा भवन्ति ॥३॥ स उपावहरति । हृदे त्वा मनसे त्वेति यजमानस्यैतत्कामायाह हृदयेन हि मनसा यजमानस्तं कामं कामयते यत्काम्या यजते तस्मादाह हृदे त्वा मनसे त्वेति ॥४॥ दिवे त्वा सूर्याय त्वेति । देवलोकाय त्वेत्येवैतदाह यदाह दिवे त्वेति सूर्याय त्वेति देवेभ्यस्त्वेत्येवैतदाहोर्ध्वमिममधरं दिवि देवेषु होत्रा यक्ष्यधरो वै यज्ञ ऊर्ध्वमिमं यज्ञं दिवि देवेषु धेहीत्येवैतदाह ॥५॥ सोम राजन्विश्वास्त्वं प्रजा उपावरोहेति । तदेनमासां प्रजानामाधिपत्याय राज्यायोपावहरति ॥६॥ अथानुसृज्योपतिष्ठते । विश्वास्त्वां प्रजा उपावरोहन्त्वित्ययथायथमिव वाऽएतत्करोति यदाह विश्वास्त्वं प्रजा उपावरोहेति क्षत्रं वै सोमस्तत्यापवस्यसं करोति तद्वेदमनु पापवस्यसं क्रियतेऽथात्र यथायथं करोति यथापूर्वं यदाह विश्वास्त्वां प्रजा उपावरोहन्त्विति तदेनमाभिः प्रजाभिः प्रत्यवरोहयति तस्माद्राजन्यमायत्तमिमाः प्रजा विशः प्रत्यवरोहन्ति तमधस्तादुपासतऽउपसन्नो होता प्रातरनुवाकमनुवक्ष्यन्भवति ॥७॥ अथ समिधमभ्यादधदाह । देवेभ्यः प्रातर्यावभ्योऽनुब्रूहीति छन्दाꣳसि वै देवाः प्रातर्यावाणश्छन्दाꣳस्यनुयाजा देवेभ्यः प्रेष्य देवान्यजेति वाऽअनुयाजैश्चरन्ति ॥८॥ तद्वै केऽआहुः । देवेभ्योऽनुब्रूहीति तद्वै तथा न ब्रूयाच्छन्दाꣳसि वै देवाः प्रातर्यावाणश्छन्दाꣳस्यनुयाजा देवेभ्यः प्रेष्य देवान्यजेति वाऽअनुयाजैश्चरन्ति तस्माद्वै ब्रूयाद्देवेभ्यः प्रातर्यावभ्योऽनुब्रूहीत्येव ॥९॥

अथ यत्समिधमभ्यादधाति । छन्दाꣳस्येवैतत्समिन्द्धेऽथ यद्धोता प्रातरनुवाकमन्वाह छन्दाꣳस्येवैतत्पुनराप्याययत्ययातयामानि करोति यातयामानि वै देवैश्छन्दाꣳसि छन्दोभिर्हि देवाः स्वर्गं लोकꣳ समाश्नुवत न वाऽत्र स्तुवते न शꣳसन्ति तच्छन्दाꣳस्येवैतत्पुनराप्याययत्ययातयामानि करोति तैरयातयामैर्यज्ञं तन्वते तस्माद्धोता प्रातरनुवाकमन्वाह ॥ १० ॥ तदाहुः । कः प्रातरनुवाकस्य प्रतिगर इति ज्ञाय्यद्धैवाध्वर्युरुपासीत स यन्निमिषति स ह्येवास्य प्रतिगरस्तदु तथा न कुर्याद्यदि निद्रायादपि कामꣳ स्वप्यात्स यत्र होता प्रातरनुवाकं परिदधाति तत्प्रचरणीति सुभवति तस्यां चतुर्गृहीतमाज्यं गृहीत्वा जुहोति ॥ ११ ॥ यत्र वै यज्ञस्य शिरोऽच्छिद्यत । तस्य रसो द्रुवापः प्रविवेश तमदः पूर्वेद्युर्वसतीवरीभिराहरत्यथ योऽत्र यज्ञस्य रसः परिशिष्टस्तमेवैतदाहुति ॥ १२ ॥ यद्धैवामाहुतिं जुहोति । एतमेवैतद्यज्ञस्य रसमभिप्रस्तृणीते तमारुन्धे याभ्य उ चैवैतां देवताभ्य आहुतिं जुहोति ता एवैतत्प्रीणाति ता अस्मै तृप्ताः प्रीता एतं यज्ञस्य रसꣳ संनमन्ति ॥ १३ ॥ ॥ शतम् २२०० ॥ ॥ स जुहोति । शृणोत्वग्निः समिधा हवं मऽइति शृणोतु मऽइदमग्निरनु मे जानात्वित्येवैतदाह शृण्वन्त्वापो धिषणाश्च देवीरिति शृण्वन्तु मऽइदमापोऽनु मे जानन्त्वित्येवैतदाह श्रोता ग्रावाणो विदुषो न यज्ञमिति शृण्वन्तु मऽइदं ग्रावाणोऽनु मे जानन्त्वित्येवैतदाह विदुषो न यज्ञमिति विद्वाꣳसो हि ग्रावाणः शृणोतु देवः सविता हवं मे स्वाहेति शृणोतु मऽइदं देवः सवितानु मे जानात्वित्येवैतदाह सविता वै देवानां प्रसविता तत्सवितृप्रसूत एवैतद्यज्ञस्य रसमहरति ॥ १४ ॥ अथापरं चतुर्गृहीतमाज्यं गृहीत्वा । उदङ् प्रयन्नाहाप इष्य होतरित्यप इह होतरित्येवैतदाह तद्यदुतो होतान्वाहैतमेवैतद्यज्ञस्य रसमभिप्रस्तृणीते तमारुन्धऽएतानु चैवैतदनुतिष्ठते नेदेनानन्तरा नाष्ट्रा रक्षाꣳसि हिनसन्निति ॥ १५ ॥ अथ सम्प्रेष्यति । मैत्रावरुणस्य चमसाधर्यवेहि नेत

ष्टः प्रत्नीरुदानयेत्कधनिन एताग्नीध्रावाले वसतीवरीभिः प्रत्युपतिष्ठासे होतृचमसेन चेति सम्प्रैष एवैषः ॥१६॥ तऽउद्वो निष्क्रामति । जघनेन चावालमग्नेणाग्नीध्र७ स यस्यां ततो दिश्यापो भवन्ति तद्यन्ति ते वै सह पत्नीभिर्यन्ति तद्यत्सह पत्नीभिर्यन्ति ॥१७॥ यत्र वै यज्ञस्य शिरोऽच्छिद्यत । तस्य रसो दुद्रावापः प्रविवेश तमेते गन्धर्वाः सोमरक्षा जुगुपुः ॥१८॥ ते ह देवा ऊचुः । इयमु न्वेवेह नाष्ट्रा यदिमे गन्धर्वाः कथं न्विममभ्येऽनाष्ट्रे यज्ञस्य रसमाहरेमेति ॥१९॥ ते होचुः । योषित्कामा वै गन्धर्वाः सह पत्नीभिरयाम ते पत्नीष्वेव गन्धर्वा गर्धिष्यन्त्येतमभ्येऽनाष्ट्रे यज्ञस्य रसमाहरिष्याम इति ॥२०॥ ते सह पत्नीभिरीयुः । ते पत्नीष्वेव गन्धर्वा जगृधुरेतमभ्येऽनाष्ट्रे यज्ञस्य रसमाजह्रुः ॥२१॥ तथोऽएवैष एतत् । सकृत्व पत्नीभिरेति ते पत्नीष्वेव गन्धर्वा गृध्यन्त्येतमभ्येऽनाष्ट्रे यज्ञस्य रसमाहरति ॥२२॥ सोऽपोऽभिजुहोति । एता७ ह वाऽआकुति७ जुतामेष यज्ञस्य रस उपसनेति तां प्रत्युत्तिष्ठति तमेवैतदाविष्कृत्य गृह्णाति ॥२३॥ यद्वैवैतामाकुतिं जुहोति । एतमेवैतद्यज्ञस्य रसमभिप्रस्तृणीते तमारुन्धे तमपो याचति याभ्य उ चैवैनां देवताभ्य आकुतिं जुहोति ता एवैतत्प्रीणाति ता अस्मै तृप्ताः प्रीता एतं यज्ञस्य रस७ सनमन्ति ॥२४॥ स जुहोति । देवीरापोऽअपांनपादिति देव्यो ह्यापस्तस्मादाह देवीरापोऽअपांनपादिति यो व ऊर्मिर्हविष्य इति यो व ऊर्मिर्यज्ञिय इत्येवैतदाहेन्द्रियावान्मदिन्तम इति वीर्यवानित्येवैतदाह यदाहेन्द्रियावानिति मदिन्तम इति स्वादिष्ठ इत्येवैतदाह तं देवेभ्यो देवत्रा दत्तेत्येतदेना अयाचिष्ट यदाह तं देवेभ्यो देवत्रा दत्तेति शुक्रपेभ्य इति सत्यं वै शुक्र७ सत्यपेभ्य इत्येवैतदाह येषां भाग स्थ स्वाहेति तेषामु ह्येष भागः ॥२५॥ अथ मैत्रावरुणचमसेनैतामाकुतिमपप्लावयति । कार्षिरसीति यथा वाऽअङ्गारोऽग्निना प्लातः स्यादेवमेषाकुतिरेतया देवतया प्लाता भवति राजानं वाऽएताभिरद्भिरुप-

स्रुच्यन्भवति या एता मैत्रावरुणाचमसे वज्रो वाऽआज्यꣳ रेतः सोमो नेदꣳ ब्रेणाज्येन रेतः सोमꣳ क्रिनसानीति तस्माद्वाऽअपप्लावयति ॥ २६ ॥ अथ गृह्णाति । समुद्रस्य त्वाक्षित्याऽउन्नयामीत्यापो वै समुद्रोऽप्स्वेवैतद्क्षितिं दधाति तस्मादाप एतावति भोगे भुज्यमाने न क्षीयन्ते तदन्वेकधनानुन्नयन्ति तदनु पात्रेऽनान् ॥२७॥ तद्यन्मैत्रावरुणाचमसेन गृह्णाति । यत्र वै देवेभ्यो यज्ञोऽपाक्रामत्तमेतद्देवाः प्रैषैरेव प्रैषमैछन्पुरोरुग्भिः प्रारोचयन्निविद्भिर्न्यवेदयंस्तस्मान्मैत्रावरुणाचमसेन गृह्णाति ॥ २८ ॥ तऽआयन्ति । प्रत्युपतिष्ठतेऽग्नीध्रावाले वसतीवरीभिश्च क्रोतृचमसेन च सꣳ उपर्युपरि चावालꣳ सꣳस्पर्शयति वसतीवरीश्च मैत्रावरुणाचमसं च समापोऽअद्भिरग्मत समोषधीभिरोषधीरिति यश्चासौ पूर्वेद्युराकृतो यज्ञस्य रसो यश्चाद्याकृतस्तमेवैतदुभयꣳ सꣳसृजति ॥ २९ ॥ तद्ऽकेऽ । एव मैत्रावरुणाचमसे वसतीवरीर्नयत्या मैत्रवरुणाचमसाद्वसतीवरीषु यश्चासौ पूर्वेद्युराकृतो यज्ञस्य रसो यश्चाद्याकृतस्तमेवैतदुभयꣳ सꣳसृजाम इति वदन्तस्तु तथा न कुर्याद्यद्वाऽआधवनीये समवनयति तदेवैष उभयो यज्ञस्य रसः सꣳसृज्यतेऽथ क्रोतृचमसे वसतीवरीर्गृह्णाति निग्राभ्याभ्यस्तद्यदुपर्युपरि चावालꣳ सꣳस्पर्शयत्यतो वै देवा दिवमुपोदक्रामंस्तद्यज्ञमानमेवैतत्स्वर्ग्यं पन्थानमनुसंख्यापयति ॥ ३० ॥ तऽआयन्ति । तꣳ क्रोता पृच्छत्यध्वर्योऽवेरपाꣳ३ऽइत्यविदोऽपाꣳ३ऽइत्येवैतदाह तं प्रत्याक्रोतेव नंनमुरित्यविदमथो मेऽनꣳसतेत्येवैतदाह ॥ ३१ ॥ स यद्यग्निष्टोमः स्यात् । यदि प्रचरण्याꣳ सꣳस्रवः परिशिष्टोऽलꣳ क्रोमाय स्यात्तं जुहुयाद्यद्यु नालꣳ क्रोमाय स्यादपरं चतुर्गृहीतमाज्यं गृहीत्वा जुहोति यमग्ने पृत्सु मर्त्यमवा वाजेषु यं जुनाः । स यन्ता शश्वतीरिषः स्वाहेत्याग्नेय्या जुहोत्यग्निर्वाऽअग्निष्टोमस्तदग्नावग्निष्टोमं प्रतिष्ठापयति मर्तवत्या पुरुषसंमितो वाऽअग्निष्टोम एवं जुहुयाद्यद्यग्निष्टोमः स्यात् ॥ ३२ ॥ यद्युक्थ्यः स्यात् । मध्यमं परिधिमुपस्पृशेत्त्रयः परिधयस्त्रीण्युक्थान्येतेरु हि तर्हि य-

ज्ञः प्रतितिष्ठति यद्युऽअतिरात्रो वा षोडशी वा स्यान्नैव जुहुयान्न मध्यं परिधिमुपस्पृशेत्समूह्यैव तूष्णीमेत्य प्रपद्येत तद्यथायथं यज्ञक्रतून्व्यावर्तयति ॥ ३३ ॥ अयुङ्गा-अयुङ्गा एकधना भवन्ति । त्रयो वा पञ्च वा पञ्च वा सप्त वा सप्त वा नव वा नव वैकादश वैकादश वा त्रयोदश वा त्रयोदश वा पञ्चदश वा द्वन्द्वमेकमिथुनं प्रजननमथ य एष एकोऽतिरिच्यते स यजमानस्य श्रियमभ्यतिरिच्यते स वाऽएषा सधनं यो यजमानस्य श्रियमभ्यतिरिच्यते तद्यदेषा सधनं तस्मादेकधना नाम ॥ ३४ ॥ ब्राह्मणम् ॥ ४ [१. ३] ॥ ॥

अथाधिषवणे पर्युपविशन्ति । अथास्या हिरण्यं बध्नीते द्वयं वाऽइदं न तृतीयमस्ति सत्यं चैवानृतं च सत्यमेव देवा अनृतं मनुष्या अग्निरेतसं वै हिरण्यꣳ सत्येनाꣳशूनुपस्पृशानि सत्येन सोमं पराहणानीति तस्माद्वाऽअस्या हिरण्यं बध्नीते ॥ १ ॥ अथ ग्रावाणमादत्ते । ते वाऽएतेऽश्ममया ग्रावाणो भवन्ति देवो वै सोमो दिवि हि सोमो वृत्रो वै सोम आसीत्तस्यैतद्धरीरं यद्गिरयो यदश्मानस्तद्धरीरेणैवैनमेतत्समर्धयति कृत्स्नं करोति तस्मादश्ममया भवन्ति घ्नन्ति वाऽएनमेतद्यदभिषुण्वन्ति तमेतेन घ्नन्ति तथात उदेति तथा संजीवति तस्मादश्ममया ग्रावाणो भवन्ति ॥ २ ॥ तमादत्ते । देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामाददे रावासीति सविता वै देवानां प्रसविता तत्सवितृप्रसूत एवैनमेतदादत्तेऽश्विनोर्बाहुभ्यामित्यश्विनावध्वर्यू तत्तयोरेव बाहुभ्यामादत्ते न स्वाभ्यां पूष्णो हस्ताभ्यामिति पूषा भागदुघस्तत्तस्यैव हस्ताभ्यामादत्ते न स्वाभ्यां वज्रो वाऽएष तस्य न मनुष्यो भर्ता तमेताभिर्देवताभिरादत्ते ॥ ३ ॥ आददे रावासीति । यदा वाऽएनमेतेनाभिषुण्वन्त्यथाकृतिर्भवति यदाकृतिं जुहोत्यथ दक्षिणा ददात्येतद्धेष द्वयꣳ रासतऽआकृतीश्च दक्षिणाश्च तस्मादाह रावासीति ॥ ४ ॥ गभीरमिमधरं कृधीति । अधरो वै यज्ञो महान्तमिमं यज्ञं कृधीत्येवैतदाहेन्द्राय सुषूतम-

मितीन्द्रो वै यज्ञस्य देवता तस्मादाक्रेन्द्रायेति सुषूतममिति सुसुतममित्येवैतदाक्रोत्तमेन पविनेत्येष वाऽउत्तमः पवित्रयत्सोमस्तस्मादाक्रोत्तमेन पविनेत्यूर्ज्जस्वन्तं मधुमन्तं पयस्वन्तमिति रसवन्तमित्येवैतदाक्र यदाक्रोर्ज्जस्वन्तं मधुमन्तं पयस्वन्तमिति ॥५॥ अथ वाचं यच्छति । देवा क्र वै यज्ञं तन्वानास्तेऽसुररक्षसेभ्य आसङ्गाद्बिभ्यां चक्रुस्ते क्रोचुरुपाꣳशु यज्ञाम वाचं यच्छामेति तऽउपाꣳश्वयजन्वाचमयच्छन् ॥६॥ अथ निग्राभ्या आक्रयति । तास्वेनं वाचयति निग्राभ्या स्थ देवश्रुतस्तर्पयत मा मनो मे तर्पयत वाचं मे तर्पयत प्राणं मे तर्पयत चक्षुर्मे तर्पयत श्रोत्रं मे तर्पयतात्मानं मे तर्पयत प्रजां मे तर्पयत पशून्मे तर्पयत गणान्मे तर्पयत गणा मे मा वितृषन्निति रसो वाऽआपस्तास्वेवैतामाशिषमाशास्ते सर्वं च मऽआत्मानं तर्पयत प्रजां मे तर्पयत पशून्मे तर्पयत गणान्मे तर्पयत गणा मे मा वितृषन्निति स य एष उपाꣳशुसवनः स विवस्वानादित्यो निदानेन सोऽस्यैष व्यानः ॥७॥ तमभिमिमीते । घ्नन्ति वाऽएनमेतद्यदभिषुण्वन्ति तमेतेन घ्नन्ति तथात उदेति तथा संजीवति यद्वेव मिमीते तस्मान्मात्रा मनुष्येषु मात्रो यो चाप्यन्या मात्रा ॥८॥ स मिमीते । इन्द्राय त्वा वसुमते रुद्रवतऽइतीन्द्रो वै यज्ञस्य देवता तस्मादाक्रेन्द्राय त्वेति वसुमते रुद्रवतऽइति तदिन्द्रमेवानु वसूꣳश्च रुद्रांश्चाभजतीन्द्राय त्वादित्यवतऽइति तदिन्द्रमेवान्वादित्यानाभजतीन्द्राय त्वाभिमातिघ्नऽइति सपत्नो वाऽअभिमातिरिन्द्राय त्वा सपत्नघ्नऽइत्येवैतदाक्र सोऽस्योद्धारो यथा श्रेष्ठ योद्धार एवमस्यैषऽऋते देवेभ्यः ॥९॥ श्येनाय त्वा सोमभृतऽइति । तद्गायत्र्यै मिमीतेऽग्नये त्वा रायस्पोषदऽइत्यग्निर्वै गायत्री तद्गायत्र्यै मिमीते स यद्गायत्री श्येनो भूत्वा दिवः सोममाक्रत्तेन मा श्येनः सोमभृत्तेनैवास्या एतद्वीर्येण द्वितीयं मिमीते ॥१०॥ अथ यत्पञ्च कृत्वो मिमीते । संवत्सरसंमितो वै यज्ञः पञ्च वाऽऋतवः संवत्सरस्य तं पञ्चभिराप्नोति तस्मात्पञ्च कृत्वो मिमीते ॥११॥ तमभिमृशति । यत्ते सोम

दिवि ज्योतिर्यत्पृथिव्यां यदुरावन्तरिक्षे । तेनास्मै यजमानायोरु राये कृधि दात्रे वोच इति यत्र वाऽएषोऽग्रे देवानाꣳ ऋविर्बभूव तद्वेदां चक्रे मैव सर्वेणेवात्मना देवानाꣳ ऋविर्भूवमिति स एतास्तिसस्तनूरेषु लोकेषु विन्यधत्त ॥ १२ ॥ तद्वै देवा अस्पृणवत । तेऽस्यैतेनैवैतास्तनूराप्नुवन्त्स कृत्स्न एव देवानाꣳ ऋविरभवत्तथोऽएवास्यैष एतेनैवैतास्तनूराप्नोति स कृत्स्न एव देवानाꣳ ऋविर्भवति तस्मादेवमभिमृशति ॥ १३ ॥ अथ निग्राभ्याभिरुपसृजति । आपो ह वै वृत्रं जघ्नुस्तेनैवैतद्वीर्येणापः स्यन्दन्ते तस्मादेनाः स्यन्दमाना न किं चन प्रतिधारयति ता ह स्वमेव वशं चेरुः कस्मै नु वयं तिष्ठेमहि याभिरस्माभिर्वृत्रो हत इति सर्वं वाऽइदमिन्द्राय तस्थानमास यदिदं किं चापि योऽयं पवते ॥ १४ ॥ स इन्द्रोऽब्रवीत् । सर्वं वै मऽइदं तस्थानं यदिदं किं च तिष्ठधमेव मऽइति ता होचुः किं नस्ततः स्यादिति प्रथमभक्ष एव वः सोमस्य राज्ञ इति तथेति ता अस्माऽअतिष्ठन्त तास्तस्थाना उरसि न्यगृह्णीत तद्यदेना उरसि न्यगृह्णीत तस्मान्निग्राभ्या नाम तथैवैता एतद्यजमान उरसि निगृह्णीते स आसामेष प्रथमभक्षः सोमस्य राज्ञो यन्निग्राभ्याभिरुपसृजति ॥ १५ ॥ स उपसृजति । श्वात्रा स्थ वृत्रतुर इति शिवा ह्यापस्तस्मादाह श्वात्रा स्थेति वृत्रतुर इति वृत्रꣳ ह्येता अघ्न्याधोगूर्ता अमृतस्य पत्नीरित्यमृता ह्यापस्ता देवीर्देवत्रेमं यज्ञं नयतेति नात्र तिरोहितमिवास्त्युपह्वताः सोमस्य पिबतेति तदुपह्वता एव प्रथमभक्षꣳ सोमस्य राज्ञो भक्षयन्ति ॥ १६ ॥ अथ प्रहरिष्यन् । यं द्विष्यात्तं मनसा ध्यायेदमुष्माऽअहं प्रहरामि न तुभ्यमिति यो ह्येवैवमं मानुषं ब्राह्मणꣳ हन्ति तं न्वेव परिचक्षतेऽथ किं य एतं देवो हि सोमो घ्नन्ति वाऽएनमेतद्यदभिषुण्वन्ति तमेतेन घ्नन्ति तथात उदेति तथा संजीवति तथानेनस्यं भवति यद्यु न द्विष्यादपि तृणमेव मनसा ध्यायेत्तथोऽअनेनस्यं भवति ॥ १७ ॥ स प्रहरति । मा भैर्मा संविक्था इति मा त्वं भैषीर्मा संविक्था अमुष्मा

ऽग्रꣳ प्रक्रामि न तुभ्यमित्येवैतदाहोर्न्न धत्स्वेति रसं धत्स्वेत्येवैतदाह धिषणो वीड्वी सतो वीडयेथामूर्न्न दधाथामितोमेऽएवैतत्फलकेऽआहुरित्यु हैकऽआहुः किं नु तत्र योऽप्येते फलके भिन्द्यादिमे ह वै द्यावापृथिवीऽएतस्माद्ब्राह्मणात्सꣳरेजेते तदाभ्यामेवैनमेतद्द्यावापृथिवीभ्याꣳ शमयति तथेमे शान्तो न हिनस्त्यूर्न्न दधाथामिति रसं दधाथामित्येवैतदाह पाप्मा हतो न सोम इति तदस्य सर्वं पाप्मानꣳ हन्ति ॥ १८॥ स वै त्रिरभिषुणोति । त्रिः सम्भरति चतुर्निग्राभमुपैति तद्दश दशाक्षरा वै विराड्विराजः सोमस्तस्माद्दश कृत्वः सम्पादयति ॥ १९॥ अथ यन्निग्राभमुपैति । यत्र वाऽएषोऽग्रे देवानाꣳ हविर्ब्बभूव तद्वेमा दिशोऽभिदध्यावाभिर्दिग्भिर्मिथुनेन प्रियेण धाम्ना सꣳस्पृशेयेति तमेतद्वेवा आभिर्दिग्भिर्मिथुनेन प्रियेण धाम्ना समस्पर्शयन्यन्निग्राभमुपायंस्तथोऽएवैनमेष एतदाभिर्दिग्भिर्मिथुनेन प्रियेण धाम्ना सꣳस्पर्शयति यन्निग्राभमुपैति ॥ २०॥ स उपैति । प्रागपागुदगधराक्सर्वतस्त्वा दिश आधावन्त्विति तदेनमाभिर्दिग्भिर्मिथुनेन प्रियेण धाम्ना सꣳस्पर्शयत्यम्ब निष्परꣳ समरीर्विदामिति योषा वाऽअम्बा योषा दिशस्तस्मादाहाम्ब निष्परेति समरीर्विदामिति प्रज्ञा वाऽअरीः सं प्रज्ञा ज्ञानतामित्येवैतदाह तस्माद्या अपि विदूरमिव प्रज्ञा भवन्ति समेव ता ज्ञानते तस्मादाह समरीर्विदामिति ॥ २१॥ अथ यस्मात्सोमो नाम । यत्र वाऽएषोऽग्रे देवानाꣳ हविर्ब्बभूव तद्वेच्चां चक्रे मैव सर्वेणोवात्मना देवानाꣳ हविर्भूवमिति तस्य या जुष्टतमा तनूरास तामपनिदधे तद्वै देवा अस्पृण्वत ते होचुरुपैवैतां प्रवृहस्व सहैव न एतया हविरेधीति तां दूरꣳइवोपप्रावृहत स्वा वै मऽएषेति तस्मात्सोमो नाम ॥ २२॥ अथ यस्माद्यज्ञो नाम । घ्नन्ति वाऽएनमेतद्यद्दभिषुण्वन्ति तद्यदेनं तन्वते तदेनं जनयन्ति स तायमानो जायते स यज्जायते तस्माद्यज्ञो यज्ञो ह वै नामैतद्यद्यज्ञ इति ॥ २३॥ तत्रैतामपि वाचमुवाद । त्वमङ्ग प्रशꣳसिषो देवः शविष्ठ मर्त्यम् ।

न वदन्यो मघवन्नस्ति मर्डितेन्द्र ब्रवीमि ते वच इति मर्त्यो ह्येवैतद्वव्रुवाच त्वमेवेतो जनयितासि नान्यस्त्वदिति ॥२४॥ अथ निग्राभ्याभ्यो ग्रहान्विगृह्णते । आपो ह वै वृत्रं जघ्नुस्तेनैवैतद्वीर्येणापः स्यन्दन्ते स्यन्दमानानां वै वसतीवरीर्गृह्णाति वसतीवरीभ्यो निग्राभ्या निग्राभ्याभ्यो ग्रहान्विगृह्णते तेनैवैतद्वीर्येण ग्रहान्विगृह्णते होतृचमसाद्योषा वाऽऋग्घोता योषायै वाऽइमाः प्रजाः प्रजायन्ते तदेनमेतस्यै योषायाऽऋचो होतुः प्रजनयति तस्माद्धोतृचमसात् ॥२५॥ ब्राह्मणम् ॥५[१.४]॥ सप्तमः प्रपाठकः ॥ कण्डिकासंख्या ११४ ॥ नवमोऽध्यायः [२४.] ॥ ॥ अस्मिन्काण्डे कण्डिकासंख्या ८५१ ॥ ॥

इति माध्यन्दिनीये शतपथब्राह्मणे अधरनाम तृतीयं काण्डं समाप्तम् ॥३॥ ॥

EXTRACTS MADE FROM THE COMMENTARY OF SÂYANÂCÂRYA.

आधानपुनराधानेऽग्निहोत्रं ततः परम् । चातुर्मास्यानि च पशुर्द्वितीयकाण्डऽईरितम् ॥ अथ तृतीयचतुर्थाभ्यामेकाहाहीनसत्त्रलक्षणसकलसोमयागप्रकृतिभूतोऽग्निष्टोमोऽभिधीयते । तत्र तृतीयकाण्डस्य प्रथमाध्याये शालानिर्माणप्रभृति दीक्षाङ्गतिपर्यन्तं प्रतिपाद्यते । तत्रादौ शालानिर्माणार्थं देवयजनपरिग्रहं विधत्ते देवयजनमिति । प्राचीनवंशसदोहविर्धानादिनिर्माणपर्याप्तं देवयजनस्थानम् तद्धोषयन्ते सेवन्ते स्वार्थिको णिच् परिगृह्णीयुर्यजमानपुरुषाः । स इति प्रसिद्धौ यकब्दविशेषणमेतत् प्रसिद्धं यद्देवयजनं तद्वर्षिष्ठमतिशयेन वृद्धमुक्षितं शोषयितव्यम् । यद्यस्य (स्या Cod.) उपरि गृहीताया भूमेः अन्यत् परिसरस्थलं नातिशयीत अतिशयितमुक्षितं न स्यात् (न च Cod.) । निम्ने देवयजने इष्ट्वा स्वयमेवात्यन्तं नीच एव स्यात् । see कात्या° ७. १. १०. ॥१॥ वर्ष्मोन्नतम् ॥२॥ देवयजनप्राग्देशे देवयजनात्परिमितप्रदेशस्याधिक्यं निषेधति न पुरस्तादिवेति । स देशातिरेको यजमानभ्रातृव्यातिरेकाय भवति । दक्षिणोत्तरयोरतिरेकः स्वैच्छिकः । पश्चाद्भागे पुनरन्यस्य देवयजनस्य पर्याप्तप्रदेशोपेतं देवयजनं समृद्धिकरम् ॥३॥ वाष्ण्यर्षिं याज्ञवल्क्य उवाच यदा वयं देवयजनपरिग्रहाय गतास्तदानीं सात्ययज्ञ आह । अतो यत्र क्व च मन्त्रेण परिग्रहे सति तदुक्तलक्षणमेव भवेदित्यर्थः ॥४॥ याज्ञवल्क्यस्तु वक्ष्यमाणलक्षणैर्ऋत्विग्भिः परिग्रह एवोक्तलक्षणदेवयजनपरिग्रह इत्याह ऋत्विज इति ॥५॥ शाला दीर्घचतुरस्रं गृहम् विमितं सर्वतः समपरिमाणम् । यस्मात्प्राग्दिग्गतानृत्विग्यजमानान्प्रति (? प्रात्यक्कदिगंतान्द्विग्य° Cod.) पुरोदेशाद्यविर्भोजनाः प्रत्यङ्मुखोपावृत्ताः (? प्रात्यक्कमुखायावृत्ताः Cod.) ॥६॥ सा प्राच्यहीना समृद्धा ।

मानुषे मनुष्यार्हकर्मणि ॥७॥ वृष्ट्यादिपरिहाराय सर्वतः परिश्रयणं कर्तव्यम् दीक्षितस्येतरेभ्यो व्यवधानाय च ॥८॥ तत्रात्रैवर्णिकानां शूद्रादीनामभिप्राप्तिं निषेधति ॥९॥ इति एवम् मयेदानीमुक्तप्रकारेण ॥१०॥ समन्त्रकं शालाप्रवेशं विधत्ते अथेति । अध्यवस्यति शालां प्रविश्य मन्त्रेणैतद्देवयजनमिति निश्चिनुयात् । स्थूणाराजो मध्ये स्थित (? दित Cod.) उन्नतस्तम्भः तस्य पूर्वार्धमभिपद्य गृहीत्वा ॥११॥ मदति मोदते ॥१२॥१॥१॥

अथ दीक्षान्तकालं विधत्तेऽपराह्णऽइति ॥१॥ शालाया उत्तरभागे क्षौरार्थं परिश्रयणं विधत्ते अथेति ॥२॥ सर्वऽएव सर्वस्मिन्नपि देहे ॥३॥ गोदानं नाम कर्णस्योपरि प्रदेशः । वितारयति विभजेत् ॥५॥ परितस्तिर्यगस्यतऽइति पर्यासस्तिर्यक्कं च संदर्भः । अनु अनुलोममाक्षायतऽइति पर्यासस्तिर्यक्कं तु संदर्भः (! repetition) तानः । नीविरायत्तप्रदेशः । प्रघातः सर्वहननस्थानं (? सवहस° Cod.) निविडीभूतप्रदेशः । आरोका मध्ये छिद्राणि ॥१८॥ अयातयामतायै अशिथिलवाय । निष्पेष्टवै क्षालयितुम् । अस्य वस्त्रस्य यद्मेध्यमाकृणत्ति आश्लिष्टं करोति निर्माणकाले सहैव वयति च । पक्षान्तरमाह अथो यदिति स्नातेन पुरुषेणाक्षायं धार्यमपल्पूलनकृतं क्षारद्रव्यसहितेनाधौतम् (? °तेनध्येतं Cod.) प्रतिदिनं प्रक्षाल्य यदेव धार्यते तदित्यर्थः तेन वा दीक्षेत ॥११॥ स धेन्वै चेति धेनोः क्षीरादिकम् अनडुहः सम्बन्धि कर्षणसाध्यम् । अनयोः सर्वोपकारकत्वं विज्ञाय देवैर्वयसामन्येषां पशूनां वीर्यसारमादाय धेन्वनडुह्योः स्थापितवान्तदश्नतः (? बादश्नंत Cod.) सर्वाशनं भवति तस्य च ज्ञायायां (? तस्य वयां Cod.) गर्भसम्भवे सति तत्सर्वाशनं तं (त Cod.) रेतोरूपेण परिणतं गर्भं (गभो Cod.) हिंस्यात् तत्पापकीर्तिः स्यात्तदुभयोरन्नं नाश्नीयात् । यस्मादुभयाशने शरीरमंसलं भवति तस्मान्नयोरन्नमश्नीयाम् । एकहायनप्रभृत्यापञ्चहायना गावो वयांसि ॥२१॥२॥१॥

अपः (!) प्रणयनानन्तरं दीक्षाङ्गभूताया आग्नाविष्णवेष्टेः प्रयोगं विधत्ते अप इति । अग्निरपरार्ध्यः अपरार्धे पूर्वार्धे भव आदिमः ॥१॥ आदित्येभ्योऽदितेः पुत्रेभ्यो धात्रर्यमादिभ्यः सप्तभ्यः । तं परिवादं मन्त्रोदाहरणेन प्रदर्शयति (see ऋक्संहि° १०. ७२. ८.) अष्टौ पुत्रा धात्रादिविवस्वदन्ताः तेषु मध्ये सप्तभिः पुत्रैः सह देवानुपागात् (?°याणत् Cod.) मार्ताण्डं मृताण्डसम्बन्धिनमष्टममास्यत् परितत्याज ॥२॥ सप्त हैव विवस्वद्व्यतिरिक्ता अविकृतं कश्चरणादि विकार इति तद्रहितं (? कृतचरणादि तिकार इति कार इति ह तं Cod.) मार्ताण्ड ज्ञनयामासुः व्यत्ययेनैकवचनम् संदेहः सम्यगुपचितः सासमः (del.!) सर्वतः सम एवासीत् केचित्पुरुषवदूर्ध्वमात्रविशिष्टोऽभूदित्याशङ्क्य ॥३॥ पुरुषाज्ञानः पुरुषप्रकृतिकः ॥४॥ मे मम प्रज्ञायां प्रज्ञासु मध्ये यः कश्चिदादित्येभ्यश्चरुं निर्वपेत् स राधुवात् (!) । प्रज्ञानः सर्वैः प्रसिद्धः ॥५॥ देवते प्रधानसम्बन्धिन्यौ अग्नाविष्णू ॥६॥ शालायाः पुरोदेशे (? पुरो Cod.) तिष्ठन्सर्वाङ्गे नवनीताभ्यञ्जनं कुर्यात् । अस्त्रर्णात्मकः ॥७॥ यस्मान्नवनीतं फाण्टघृतयोरन्तरालवर्ति तस्मादन्यदनन्यच्च भवति ॥८॥ इतरावयववत्संस्पर्शासहिष्णुवादच्यस्त्रर्णो भवति । मम प्रशान् प्रशाम्येत् । इषोका (!) नेत्रयोर्मलं सास्य पुरुषस्याक्ष्णः भूय (!) एव अर्त्ते (!) दुरक्षवमेव ततोऽञ्जनेन नाशयति ॥१०॥ तस्य यज्ञमुपगक्न्दोक्षितोऽश्मपुरीं रक्षार्थं कृतवान्भवति ॥११॥ शरस्तृणविशेषः तस्य शलाका इषीका ॥१३॥ उत्तरावत् उत्कर्षवत् ॥१६॥

तदस्माऽऽह तत्तेनाशिषामारम्भवाचनेन सर्वासामाशिषामादावेव यज्ञमानेन परिगृहीतत्वात्स्वकीया एव सतोः ता एवाशिषः सर्वे ऋत्विजः (पंवदत्विजः Cod.) तन्मन्त्रेषु यज्ञमानार्थमाशासते ॥२४॥ एकैकेन मन्त्रेण हस्तद्वयेऽपि कनिष्ठिकादिक्रमेण द्वे अङ्गुलो संकोचयति । यज्ञस्य वासोदण्डादिवद्धस्ते धारयितुमशक्यत्वात् अत एव पोऽत्तान्मन्त्रेण मुष्टिबन्धनमेव प्रत्यनधारणमित्यर्थः ॥२५॥ वातेन प्राणेन व्याप्रियमाणत्वाद्वातो यज्ञः । वैशब्देन वातायज्ञः प्रयुज्यतामित्यादिमन्त्रप्रसिद्धिर्द्योत्यते ॥२६॥ दीक्षाङ्गत्यर्थं शालाप्रवेशनम् ॥२८॥३॥१॥

अथ दीक्षाङ्गतोर्विधातुमाह सर्वाणीति ॥१॥ सम्पद्यतऽइति सम्पत् काम्यते कामः सम्पद्याय स्वर्गफलाय । यथा लोके किंचित्फलं सिसाधयिषुः आदौ तद्ज्ञात्वा पश्चात्कामयित्वा तत्साधनमनुष्ठायाप्ते तल्लभते एवं त्रिभिः स्वर्गफलमाध्याय चतुर्थेन तत्साधनमनुष्ठाय पञ्चमेन तदुद्गृहीतवान्भवति ॥२॥ अथ पुरातनवृत्तान्तप्रदर्शनमुखेनैतेषां स्वर्गोद्ग्रहणे साधनतामुपपादयति यज्ञेनेति । see १. ६. २. १. ॥३॥ यथायमिति येन प्रकारेण देवानुष्ठितप्रकारं ज्ञानद्भिर्ऋषिभिरयं यज्ञः औद्ग्रभणहोमेन सम्भृतः एवमेतेषामनुष्ठानेनैष यज्ञमानोऽपि यज्ञं सम्भृतवान्भवति ॥४॥ अथातो होमस्यैवेति मन्त्रा व्याख्यायन्तऽइति शेषः । अग्रे यागानुष्ठानात्पूर्वमाक्रुवते (°क्रर्वन्ते Cod.) खलु कुटृशब्देन तत्प्रभावी मनोव्यापारो लक्ष्यते यज्ञेयेति (°तेति Cod.) संकल्पयतोत्यर्थः ॥६॥ अनूच्यतऽएवेति एवकारयावत्यमाह (? °थाव° Cod.) न ब्रिति (ब्रिति Cod.) ॥८॥ अनग्नेव अप्रत्यक्षमिव । अतोऽस्मात् आकूत्याऽइत्येवमादिकाद्वाक्यात् (कात् कात् वाक्या Cod.) एकमपीन्द्रादिकं देवं नोपलभामहे इति वदन्तः ॥११॥ आधीते आध्यानेन विषयीकृते ॥१२॥ दीक्षणीयेष्टेः सम्बन्धि यदाज्यं ध्रुवायामवशिष्टं तत्पश्चमाङ्गत्यर्थं स्रुक्षामवनयेत् एतदेकमवत्तम् अथाऽग्नेस्थाल्याः सकाशात्स्रुवेण स्रुक्षामुपरि त्रिरानयति (त्रिपाशनयति Cod.) एवं चतुरवत्तं भवति ॥१७॥ विश्वो देवस्येति विश्वदेवशब्दश्रवणात् इदं मन्त्रवाक्यं वैश्वदेवम् । नयनस्य सवितृव्यापारत्वात् नेतृशब्दश्रवणात्सावित्रम् । मर्तो वुरोतेत्येनेन मनुषैर्वरणीयत्वाभिधानात् मित्रस्य वरणीयवं प्रसिद्धम् ॥२१॥४॥१॥

दीक्षाङ्गतोर्विधायाथ कृष्णाजिनदीक्षामाह दक्षिणेनेति ॥१॥ तर्द्मसमुते इति यथोभयोर्मीसप्रदेशयोः सम्बन्धो भवति यथा च तर्दनप्रदेशेषु पश्चाद्भागे उते परस्परं स्यूते भवतः तथैकस्योपर्यपरमास्तृणुयात् ॥२॥ तर्हि तस्मिन्नेककृष्णाजिनपक्षे अक्तकमु अक्तप्रदेशमेव पश्चाद्भागे प्रत्यस्येत् संकोचयेत् संधिप्रदेशेन द्विगुणीकुर्यात् (णो Cod.) ॥४॥ ज्ञान्वाक्त उपविशेत् ज्ञानुकऽआरुख्योपविशेत् (°रुस्थो° Cod.) दक्षिणं ज्ञान्वाच्य ॥५॥ दुप्स्यति दृप्तः कुत्सितगातर्भविष्यति (कुसित° Cod.) ॥१॥ परिहरति (!) मध्ये परितो वेष्टयेत् । बल्यं बलार्हं बलकरं वसु नाविन्दन् (!) । व्रतात् तत्साधनात्पयसः ॥१०॥ शाणी शणमयो । पूतयो वाक्ति दुर्गन्धा भवन्ति ॥११॥ तस्याः मुञ्जशाखाभिः मिश्रितवं विधत्ते मुञ्जेति । स्तुका केशवेणी सा यथा सृज्यते तथा सृष्टा निर्मिता भवेत् ॥१३॥ वस्त्रान्तस्य समन्तकमुद्गूहनमाह अथेति । अग्रे सोमयागात्पूर्वम् ॥१५॥ वासस आच्छादनं विधत्ते अथेति । शिरः प्रोर्णुते ॥१६॥ सिग्वस्त्रान्तः । कृष्णविषाणोत्पत्त्यर्थमाख्यायिकामाह देवाश्च वाऽइति ॥१८॥ निपलाशमिव निपतितपर्णं वृक्षादिकमिव तथथा केवलं कम्पते एवं शिरश्चलते नोवाच ॥२०॥ मत् यस्मा-

देनं यज्ञं न युविता न मिलितवतो (मितितावतो Cod.) अतो न विश्वसितव्यम् ॥२२॥ अथ तेऽसुराः आत्तवचसो देवैः स्वीकृतवचसो हे अरयो हे अरय इत्युच्चारयितुमशक्ता हे अलवो हे अलव इति वदन्तः पराभूताः ॥२३॥ प्रसङ्गात्कंचिद्वाग्विषयं नियममाह तत्रेति । उपज्ञिज्ञास्यां ज्ञातव्यां संदिग्धां वाचमूदुरुक्तवन्तोऽसुराः । स म्लेक्षः संदिग्धार्थस्यापभ्रंशरूपस्य वचसो भाषणं यत् म्लेक्षनमित्यर्थः यद्वा य ईदृशीं वाचं वदति स म्लेक्षः तस्मान्न म्लेक्षेत् म्लेक्षो न भवेत् ॥२४॥ अम्वमपत्यम् (सं Cod.) ॥२६॥ यज्ञो हि कृष्णा इति हिशब्देन यज्ञो देवेभ्यो निलायत कृष्णी रूपं (!) कृवेत्यादिश्रुतिप्रसिद्धिरभिधीयते ॥२८॥ तया भूमेरुपरि समन्त्रकं लेखनं विधत्ते अथेति ॥३०॥ तदा स गर्भोऽपगक्रन्मृतिं प्राप्नुयात् । पामा विचर्चिका मत्वर्थीयो नः तद्वान्भवितुं समर्थो भवति । न केवलं दीक्षितः स्वयमेव पामनो भवति किंतु तदुत्पन्नाः पुत्रा अपि तादृशा भवन्तीत्याह दीक्षितं वाऽन्विति ॥३१॥ अथ दण्डेन दीक्षां विधत्ते अथेति ॥३२॥ मुखपर्यन्तं प्रत्यङ्गे वीर्यसम्भवात्ततोऽधःकण्ठादिसंमितं न कुर्यात् ॥३४॥ अतो हि अस्माद्दण्डग्रहणकालादूर्ध्वकाले किंचिदपि न ज्ञपिष्यन्भवति । अमुत्रैव प्रागुक्ते [१, ३, २५. २७] काले दर्भपावनानन्तरमेव ॥३६॥ उद्वदति उच्चैरावेदयति । अयं ब्राह्मणो दीक्षणीयेष्टिकृष्णाजिनादिदीक्षासंस्कारेण संस्कृतः ॥३९॥ सवनकृता निमित्तेन तद्बुबधेनेत्यर्थः ॥४०॥ १॥ २॥

गृहीतस्य वचसो विसर्गकालविधानाय पुनरनुवदति वाचमिति ॥१॥ स उक्तलक्षणः प्रजापतिः पुरा स्वयज्ञसमये अहन् अहनि अदीक्षिष्ट लुङ् दीक्षितवान् कृतदीक्षः प्रजापतिः रात्रिं प्राप्तवान् दीक्षितोपलक्षितां वाचं रात्रिपर्यन्तमन्ववर्तयत् अतस्तावत्पर्यन्तं वाग्यमनं कुर्वन्दीक्षितो यावान्यज्ञः संवत्सरप्रजापत्यात्मकोऽस्ति अस्य च यावतो मात्रा परिमितिरस्ति तावन्तं सकलमप्येतदेतेन नियमेनाप्त्वा वाचं विसृष्टवान्भवति ॥४॥ अनुष्ठूया सम्यक् ॥५॥ व्याकृतिर्व्याकरणं दैवमानुषयोर्विभागः ॥१६॥ प्रकरणात्पयोव्रतऽएव हस्तप्रक्षालनेऽयं मन्त्र इति प्राप्तौ सर्वव्रतावनेजनसाधारणतामाह स यावदिति ॥१७॥ सर्वत्रकर्तव्यवे कारणमाह कस्तद्वेदेति ॥१९॥ उपहन्ति उपाददीत ॥२०॥ प्राण एव न अपक्रामतीति शेषः ॥२३॥ अभिहरन्ति धनं प्रयच्छन्ति ॥२५॥ दैवीमेव वाचं वदेत् अर्थपरिस्खलनपरिणीतां (?अथपरिस्खलनंप° Cod.) संस्कृताम् । प्रसृता सर्वत्र व्याप्ता ॥२७॥ प्रसङ्गादीक्षितशब्दं निर्वक्ति ॥३०॥ २॥ २॥

एवं वाग्यमनादयो दीक्षितधर्मा उक्ताः अवसितासु दीक्षास्वनुष्ठेयां (दीक्षितास्वनुष्ठेयी Cod.) प्रायणीयेष्टिं संविधत्ते आदित्यमिति । अदितिर्देवता अस्येत्यादित्यः न वादित्या देवता अस्येति ॥१॥ एवं प्रायणीयेष्टौ चरुसाध्यमादित्ययागं विधायान्यांश्चतुरो यागान्विधित्सुस्तेषां कालमाह तद्वै निरुप्तमिति निरुप्तमिति हविःसंस्कारोपलक्षणम् आदित्यस्य हविषो निर्वापप्रोक्षणाद्यासादनान्ताः संस्काराः कृता भवेयुः प्रधानदेवता च अनिष्टा (अतिकृष्टा Cod.) अकृतयागा भवति तस्मिन्काले वक्ष्यमाणाश्चतस्रो देवता यष्टव्या इत्यर्थः ॥७॥ अथ तान्यागान्पूर्ववदाख्यायिकया विधित्सुस्तत्र प्रथमयागस्य विधिमर्थवादेनोन्नयति अथेति । पथोऽनपेता पथ्या धर्मपथ्यर्थन्यायादनपेता । स्वस्तिः शोभनरूपा ॥८॥ एवमाज्यहविष्कांश्चतुरः प्रधानयागान्कृत्वा प्रथमनिरुप्तेन हविषादितिर्यष्टव्येत्याह अथ यस्याऽकृति यस्मादेवं देवाः पञ्चमीमदितिमयजन् तस्मादिदानींतनोऽपि यजमानो यागसमये अदितियागं पञ्चमं कुर्यात्

॥ ११ ॥ पञ्चसंख्यामनूद्य प्रशंसति ता वाऽऽहुति । धानाः करम्भः परिवापः पुरोडाशः पयस्या तेन पङ्क्तिराप्यते तथज्ञस्य पाङ्क्तत्वमिति तैत्तिरीयकम् ॥ १२ ॥ तस्मादत्रास्मिन्लोके कुरुपञ्चालाख्येषु जनपदेषु उत्तरा उच्चतरा वाग्वदति भृशं शब्दायते अत्युन्नतभाषणस्य (अत्युन्नेत° Cod.) तत्रोपलम्भात् । देवमनुष्येत्यादौ [पा° ५. ४. ५६.] परिगणनाभावेऽपि बह्वलग्रहणात्कुरुपञ्चालशब्दादपि त्राप्रत्ययः ॥ १५ ॥ तस्मात्पश्चादवस्थितमग्निमाहवनीयरूपेण प्राञ्चमुद्गृत्योपासते अग्निहोत्रहोमादिरूपमुपासनं कुर्वन्ति ॥ १६ ॥ आतिथ्यायाः प्राक् प्रायणीयं (प्राक् यणीयं Cod.) कर्तव्यमित्यभिधातुं प्रायणीयोदयनीययोर्बाङ्मरूपतामातिथ्यायाः शिरोरूपतां चाह शिर इति । एते हविषी एतौ यागावित्यर्थः यागस्य हविःप्रधानत्वात् ॥ २० ॥ स्थालीमेक्षणयोरप्युदयनीयार्थमवस्थानमाह तां स्थालीमिति या प्रायणीयचरुस्थाली तां सक्षामकर्षाम् अग्निसंयोगेनान्तरोषद्दग्धश्चरुः (? °दाधश्चरुः Cod.) क्षामः तस्य कर्षो लोपः तत्सहिताम् क्षायो म इति [पा° ८. २. ५३.] निष्ठातकारस्य मत्वम् मेक्षणं चरुनिष्पादनसाधनं काष्ठम् तत्प्रमृज्य चरुणा लेपयित्वा स्थाल्यां सह निदध्यात् ॥ २१ ॥ एवं मेक्षणमिति बर्हिर्वदग्नौ प्रहरेदित्यर्थः । विप्रेताः विविधदेशं प्राप्ताः ॥ २२ ॥ इत्थात् इत्थमनेनेदानीं परिदृश्यमानेन प्रकारेण पञ्चाङ्गुलयो लभ्यन्ते हस्तद्वयमभिनीय प्रदर्शयितुं द्विरभिधानम् । प्रकृतिभूतदर्शपूर्णमासेष्टिवत्साकल्येनानुष्ठानप्रसक्तौ तत्प्रतिषेधति तङ्कम्यत्वमिति ॥ २३ ॥ ३ ॥ २ ॥

सोमक्रयं विधातुमाख्यायिकामाह दिवोति । परव्यामोहनकारी शक्तिर्माया । गन्धर्वाणां व्यामोहाय सृष्टवन्तः । होतृमैत्रावरुणादीनां शंसनप्रदेशेषु पुरतः स्थापिता अग्नयो धिष्ण्याः होत्रीयादयः ते खलु पुरा दिवि सोमरक्षकाः पश्चात्सोमे आहृते सति तेन सह भूमावागत्य देवेभ्यो लब्धवराः सन्तोऽत्रापि सोमरक्षणा[°णाय?] धिष्ण्यतां प्राप्ताः । see ६. २. २-२०. ॥ १ ॥ तेभ्यो देवेभ्योऽर्थाय [र्थीव Cod.] सुपर्ण्या निर्मिता गायत्री छन्दोदेवता पक्षिरूपेण दिवि स्थितं सोममभिमुखमगमत् । आहरत्यै आहरत्यास्तस्याः स्वभूतं सोममपजहार । परस्तात् द्युलोकात् ॥ २ ॥ अभिषहनमभीषट् अभिभवः तेन बलात्कारेण मा नैष्ट मा प्रहार्ष्ट । विक्ष्वयामहै यूयं वयं च वाचं विविधमाकारयाम ॥ ३ ॥ निमिश्लमा (!) इव विशेषेणैकीभूता अत्यन्तमनुरक्ताः ॥ ६ ॥ सिद्धार्थमनूद्य सोमक्रयं विदधाति तद्वाऽऽहुति ॥ ७ ॥ सोमक्रयात्प्राक्कर्तव्यं च कंचिद्धोमं विदधाति अथेति प्रायणीयार्थमुपयुज्य यद्घृतं ध्रुवायामवशिष्टं (?यद्वृतायामव° Cod.) तञ्जुह्वां चतुर्वारं गृहीत्वा दर्भेण हिरण्यं प्रबध्य तञ्जुह्वामवधाय भुञ्जयात् ॥ ८ ॥ अलग्नमिव (!) वक्तव्यपदार्थेन सहासंसृष्टमिव ॥ ११ ॥ हिरण्ये बद्धं तृणं विमुच्य बर्हिष्यपिसृज्य पुनः सूत्रेण बध्नीयात् ॥ १४ ॥ अध्वर्योरनुस्पर्शोऽन्वारम्भः । शालायै शालाया अपोर्णुवन्ति द्वाराणीति शेषः । द्वारे आहवनीयात्प्राक्तने । सोमक्रयणी गौः ॥ १५ ॥ अनूक्तेन अनुवचनेन वेदाध्ययनेन प्रकामोद्यमिक्या लौकिकभाषणम् गाथा गद्यपद्यगीत्याद्यात्मिका । स वक्ता यत् यस्मादेनया आदित्या उभयशिरस्कया निमित्तभूतया समानमेकमेव सदाख्यं विपर्यासं व्यत्यासेन वदति तथा हि भुङ्क्ष्व देवदत्त तिष्ठ विष्णुमित्रेत्यादौ यदेवापरं वचनं देवदत्त[विष्णुमित्रेत्यादिकं तत्पूर्वं देवदत्त भुङ्क्ष्वे]त्येवमादिरूपेण पूर्वं करोति उक्तवैपरीत्येन यत्पूर्वं भुङ्क्ष्व-तिष्ठेत्यादिकं तदपरं देवदत्त भुङ्क्ष्वेत्यादिरूपेणापरं च करोति त-

स्माद्वाग्रूपां सोमक्रयणीमुभयतःशीर्ष्ण्यदितिरसीत्याह मन्त्रः ॥१६॥ द्वारदक्षिणदेशस्थायाः सोमक्रयण्या उदक्प्रायणं सार्थवादं विधत्ते तामुदोचोमिति ॥२२॥४॥२॥

तृतीयाध्याये सोमक्रयण्यनुगमाद्युपसदन्तः प्रयोगो निरूप्यते तत्र सोमक्रयण्या अनुक्रमणं विधत्ते सप्तेति । केवलोऽपि वृत्तिराङ्पूर्वो द्रष्टव्यः आवर्तितवान्भवति । पार्श्वे उपरिभागे भवा पार्श्व्या । पदादिक्रमेण परस्तादवस्थितां गायत्र्याद्यन्तर्भावेन सर्वच्छन्दोरूपां शक्वरीं स्वाभिमुखमावर्तितवान्भवति (?°वर्तित° Cod.) ॥१॥ स्पृणुते हिनस्ति पदप्रदेशस्थां मृदमित्यर्थः ॥३॥ पदे समन्त्रकं होमं विधत्ते स इति ॥४॥ पदस्य परिलेखनं सार्थवादं विधत्ते अथेति ॥५॥ सप्तमपदपांसोः स्थाल्यां स्थापनं समन्त्रकं विधत्ते अथेति ॥६॥ परिलिखितप्रदेशे अपां निनयनं विधाय प्रशंसति यत्रेति ॥७॥ पदं स्थालोस्थं पदपांसुम् ॥८॥ प्रतिपराहरन्ति प्रयच्छेयुः ॥१०॥ तोत इति तोकसमानार्थः (समामार्थ्यः Cod.) रायो धनानि तोतः पुत्रः स्वीकरोतीत्यर्थः यद्वा तोतः त्वत्तः त्वयि रायः सन्तीति शेषः ॥११॥ त्रेधा बभ्रुरुणरोहिणीरूपेण त्रिविधाम् ॥१३॥ परकीयादाष्ट्राख्यां रोहिणीं वशीकुरुते (वशकु° Cod.) स्वीकरोति सा वार्त्रघ्नी । श्येताक्षी कृष्णालोचना ॥१४॥ अरुणा अव्यक्तरागा ॥१५॥ अप्रवीता अगृहीतगर्भा । चण्डा (!) आवर्धिष्णुः (!स्रावयिष्णुः?) अचण्डा (!) तद्विपरीता । एवमुत्तरत्रापि । कूटा एकशृङ्गी काणा एकाक्षी कर्णा छिन्नकर्णी लक्षिता तप्तायःशलाकया विहिता सप्तशफा एकस्मिन्पदे एकेन शफेन हीना । उक्तदोषवर्जितत्वमेवैकरूप्यम् सम्पूर्णावयवत्वेत्यर्थः ॥१६॥१॥३॥

प्रासङ्गिकमभिधायेदानीमध्वर्योः पात्रे पांसुप्रक्षेपणानन्तरं हस्तप्रक्षालनं विधत्ते पदमिति ॥१॥ अस्यामिति अनामिकाङ्गुल्याम् अभिनयेन प्रदर्शनम् ॥२॥ सोम उपनह्यते येन तत्सोमोपनहनं सोमबन्धनवस्त्रम् सोमपर्याणहनं शकटेन सह सोमस्य परितो बन्धनवासः उष्णीषं सोमोपनहने स्थापितस्य सोमस्य बन्धनार्थं वासः । यत्किंचिद्वासोमात्रमानयेति ब्रुवन्स्वयं यत्किंचिद्भवति लोकैरविदितप्रभासो (?°त आभासो Cod.) भवति ॥३॥ उष्णीषभाजनमुष्णीषस्थाने भवति ॥४॥ अग्रेण प्राचीनवंशस्य पुरोदेशे उपरवप्रदेशे (नुपर° Cod.) । विचिन्वन्ति साधयन्ति अनुपादेयांशमपनयन्ति । तत् तत्र क्रयप्रदेशे निहितोदकुम्भसमीपे ब्राह्मणः सोमविक्रयी निवसेत् तत्स्थानं प्रत्यभिगच्छन्ति प्राञ्चः सोमक्रयप्रदेशाभिमुखाः ॥५॥ ऋत्विग्यज्ञमानेषु क्रयदेशं समागच्छत्सु अध्वर्युर्यज्ञमानमेष इत्यमुं वाचयेत् । इत्येवंरूपं सोमस्तुत्यात्मकमेव वचनं मे सोमाय वा (!) अध्वर्यो ब्रूहि । छन्दोमाश्चतुर्विंशश्चतुश्चत्वारिंशाः (!) तेषां छन्दोमानां (!गानां Cod.) साम्राज्यं गच्छ स्तोमगतचतुर्विंशत्यादिसंख्यासाम्यात्गायत्र्यादयः छन्दोमाः (!) । एष क्रीयमाणः क्रयेण सम्पाद्यमानः सोम एकं वै एकं खलु प्रयाजनमभिलक्ष्य विक्रियते (!) अभिषवादिता (!दिना?) च सात्मना (!) संस्क्रियते ॥६॥ विचितः विचयनस्य शोधनस्य कर्तारः ॥७॥ ग्रसितं ग्रस्तं भुक्तिमनुहाय गृहीत्वा आकृष्य पृथक्कृत्य परास्यत बहिः प्रक्षिपेत् । यस्मात्सोमान्तर्गतं तृणादिकं सोमस्यान्नं तस्मात्स्वयमविवेचयन्यज्ञमानोऽभ्यवमर्शनमेव कुर्यात् शोधनार्थं तु विचिन्वन्त्वेति पठेत् ॥८॥ तत् तत्र वाससि । तस्मात्सोमोन्मानाद्धेतोः मनुष्येषु मात्रा षण्णवत्यङ्गुल्यादिरूपा (?षणनव°?) इदानीं वर्ततेऽत्यर्थः । पात्रो (!) यै (!) एवात्र सोमे सा मनुष्येषु सोमस्याखिलङ्गात्कार-

णत्वात् न केवलं मनुष्यगतैव अपि तु यो चापि यैव खल्वन्या पक्षिमृगवृक्षादिगता सापि सोममात्रात्मिकैव ॥१॥ एतया अभि त्यं देवमित्यनयैव सर्वाभिरङ्गुलीभिः पञ्चभिर्मीमोते । एवं दशवारमुन्मायानन्तरं पाणिद्वयं समस्याञ्जलिं कृत्वा तेनैकवारमधि मितस्य सोमस्योपरि आवपति शिष्टं सर्वं प्रक्षिपेत् ॥१३॥ अधः प्रसारितस्य वस्त्रस्य पर्यन्तप्रदेशानेकत्रोक्षं संगृह्य उष्णीषेण ग्रन्थिं कुर्यात् । शिरस अंसयोश्चान्तरालप्रदेशो यथा विलग्न-इव वर्तते एवं ग्रन्थिकरणेन कृतवान्भवति ॥१८॥ ग्रन्थिमध्ये सुषिरं समन्त्रकं विधत्ते अथेति ॥१९॥२॥३॥

सोमक्रयार्थं व्यवहारं विधत्ते स इति । कलया गोरेकदेशेन ॥१॥ प्रतिधुक् सद्यो दुग्धम् घृतं पक्वं पयः शरः पक्वक्षीरस्योपरि सारभूतम् घनीभूतं वस्तु दधि दधिभवं सारभूतमुदकं मस्तु (the explanation of नवनीत and घृत is wanting) आतञ्चनं दधिभावकारणम् आमिक्षा तप्ते पयसि दध्यानयने सति यद्घनीभूतं वस्तु ज्ञायते सामिक्षा दृढात्मकं वाजिनम् ॥२॥ अथ वयांसि प्रब्रूहीति सोमविक्रयी ब्रूयात् ॥३॥ अर्वाक् सम्पादनात्प्राक् । महितो महत्त्वोपेतः ॥४॥ एकहायन्या सह देयेषु हिरण्यवस्त्रकागादिद्रव्येषु मध्ये हिरण्ये दीयमाने सति यजमानं वाचयति शुक्रं वेति मन्त्रम् ॥६॥ अभिप्रकम्पयति हिरण्येन प्रलोभयति । ऋत्विग्भिः सह गच्छति तत्तत्कर्मस्विति सप्तमो यजमानः । तदभिप्रकम्पनसाधनं हिरण्यं यजमानं प्रत्यानीयास्मे तज्जेति मन्त्रेण स्थापयेत् हिरण्यस्य वीर्यरूपत्वात्तत्स्वीकारेणात्मनि वीर्यधारणम् ॥७॥ क्रयाय दत्तामङ्गां प्रतीचीनमुखीं कृत्वा ॥८॥ सव्येनाङ्गां प्रयच्छन्दक्षिणेन सोममादत्ते । यस्मादेतयाङ्गया सोममलतो (!) आङ्गदाभिमुख्येनागच्छत् (!) ॥९॥ तत्रार्घायकं वासः प्रत्युप्य प्रसार्य ॥१०॥ सोमक्रयणान्क्रयसाधनपदार्थान् । भाजयतीति भाजनं स्थानम् तेन तत्स्थानेनोपाधिना एते स्वानादयो धिष्ण्यानां सम्बन्धिनः ॥११॥ see २.१.१६. ॥१२॥ एनं यजमानमेष सोमो राज्ञा । श्रेष्ठस्यागमनात्प्रागेवोत्थानेन भवितव्यम् अत्र तद्वैपरीत्यान्मिथ्याकारणं तच्च व्रतं कर्म प्रमीणाति प्रहिनस्ति ॥१३॥ आरोहत्यत्रेति आरोहणं शकटम् ॥१५॥ इतीति हरणप्रकारोऽभिनीयते इति अनेन प्रकारेण शिरसा धृवेत्यर्थः । हरन्ति प्रथमं क्रयात्प्राक् पर्वतात् पश्चात्तु अनसा परिवहन्ति । तस्मादिदानीमपि आवापसमये कृष्टक्षेत्रं प्रति वीडं शिरसा हरन्ति पश्चात्फलितानामानयनसमये अनसोदावहन्ति ॥१७॥ धेन्वामाशिरस्य क्षीरादेः सम्भवात्तया क्रये सति सोमः साशिरो भवति ॥१८॥३॥३॥

शकटमध्ये सोमस्थापनाय कृष्णाजिनास्तरणं समन्त्रकं विधत्ते नीडज्जेति उद्यतप्रयुगफलकद्वयोपेतस्यानसो नीडे परितः प्रावृतः शकटमध्यदेशो नीडं तस्मिन् । एनं सोमम् ॥१॥ एनं सोममभिपद्यालम्भ्य ॥२॥ आस्पृणोति सर्वतो बलिनः (वलितः Cod.) कारयति । आस्पृता वलितः (!) कृताः ॥३॥ दीक्षायां यदि द्वे कृष्णाजिने स्वीकृते तयोरेकं प्रतिनाहभाजनं (!) भवति नद्यस्य (?) पुरोदेशप्रसारितो ध्वजः प्रतिनाहः तद्वाजनं तत्स्थानोयं भवति ॥८॥ प्रयुगसम्बन्धिफलके (?°संधिफ° Cod.) उद्यते प्रयुगादप्युन्नते चुबुकप्रमाणे भवतः तत्तयोः फलकयोरन्तरेण मध्ये सुब्रह्मण्यः(!) भूमिष्ठ एव सन्प्राञ्जति प्रेरयत्यनङ्वाहौ ॥१॥ यदेव सोमस्याङ्गं न्यक्तमवाक्पतितमासीत्तत्तदङ्गमिहापि अस्मिन्सोमज्ञएवासद्भवेत् । see १.७.१.१ ॥१०॥ ऐषमः अस्मिन्संवत्सरे ॥११॥ अपकृष्यालंव्यतज्जेति अपालम्बः शकटस्य पश्चाद्भागः

॥१३॥ हे सोम त्वं भद्रोऽसि ॥१४॥ वय एवैनमेतद्भूतं प्रपादयतीति (!) एतेन पाठेन पक्षिरूपमेव संन्त (!) प्रापितवान्भवति ॥१५॥ यदि प्रमादात्सोमं (प्रमान्सेमं Cod.) रक्षआदिर्हन्यात् (?रक्षआ° Cod.) तदानीं श्येनो भूत्वेति मन्त्रसामर्थ्येन श्येनोभावाद्उपादेयस्य सारांशस्याबध्यभावाद्यज्ञा शरीरमेवानुगत्य हन्ति नात्मानम् ॥१६॥ ब्रह्म देवानामाह्वानसाधनो मन्त्रः शोभनं ब्रह्म सुब्रह्म तदर्हतीति सुब्रह्मण्या काचन देवता तां सुब्रह्मण्येोमित्यादिनिगदेनाह्वयेत् ॥१७॥ the explanation of क° १२. is wanting ॥१२॥ शालायाः पुरोदेशे अग्नीषोमोयं पशुमादाय गच्छतः सोमस्याभिमुखं स्थापयेत् । अन्तर्ज्भे (अंतर्दंति Cod.) खादनस्थानं ज्रम्भः दन्तपङ्क्त्योरन्तरालः ॥२१॥ सारंगः शबलवर्णः । सारंगवर्णस्य सोमयोग्यत्वम् । लोहितस्याग्निवर्णसाम्यम् ॥२३॥ तस्मिन्नन्ते आगतऽइति शेषः ॥२४॥ उपस्तभ्यते प्रतिबध्यत ऽइत्युपस्तम्भनं शकटाग्राधारकाष्ठं तेनोपस्तभ्नाति शकटाग्रम् । वरुणस्योपनह्य स्थापितस्य सोमस्योत्तम्भनमसि शकटस्योत्तम्भकत्वात्तद्द्वारा वरुणस्याप्युत्तम्भकत्वम् ॥२५॥ नाभिप्रमाणा भवेत् (पा° ५.२.३७) । अत्रेति नाभिदेशस्याभिनयः ॥२८॥ प्राग्वंशस्य पुरोदेशे आसन्द्यां स्थापितं सोममासन्द्या सह प्राचीनवंशं गमयेत् । अध्वर्योः प्राधान्यात्तदपेक्षया प्रपादयतीत्येकवचनं वस्तु[°तस्तु] चत्वारः प्रपादयन्ति ॥३०॥४॥३॥

आतिथ्यस्य प्रायणीयानन्तर्यं विधत्ते शिर इति ॥१॥ यत्र वाऽअर्हत्तमागतं नापचायन्तेति (!) अर्हत्तं पूज्यं गृहमागतमात्रं नापचायन्त चायतेर्लटे (!) अडभावः छान्दसः (!) पूजां न कुर्युः स तत्र तस्मिन्नपचितिविषये क्रुध्यति । तथा ह तथा सति सोमप्रवेशात्प्रागेव हविर्ग्रहणे सति ॥३॥ अभितः साचयानि पुरः पश्चाच्च सहागन्तारः (सहानंतारः Cod.) प्रधानपुरुषाः । राजकृतः राजत्वसम्पादकाः पटभिषेकस्य (!) कर्तारः ॥७॥ कार्ष्मर्यो भद्रपर्णी प्रकृतौ पलाशवैकङ्कतादीनामैक्किकत्वादत्र नियमविधिः ॥१६॥ सार्धं संन्यासुः एकीकृत्य सम्यग्भूमौ प्रचिक्षिपुः ॥१७॥ बर्हिःप्रस्तरयोरन्तराले तिर्यक् प्रसार्यमाणौ दर्भौ विधृतौ ते अत्र इक्षुपत्ररूपे स्याताम् सलुन्यातै (!) पञ्चमलकार अकारः संलोभनमाकुलीभावो मिश्रणम् तद्व्यादैच्चव्यौ कर्तव्ये ॥१८॥ यूपतक्षणोत्पन्न अधरारण्या अधः स्थाप्यमानः शकलोऽग्निमन्थनशकलो यस्योपरि मथ्यते ॥२०॥ दर्भतृणके कोमलौ परस्परसदृशौ दर्भौ । स्त्रियै स्त्रियाः सकाशात्सहोत्पन्नौ याविमौ परस्परसदृशौ पुत्रौ एतौ दर्भौ एतावेव युगलौ पुत्रावेव (°त्रानेव Cod.) रूपकोपन्यासेनात्यन्तसादृश्यमभिमतमिति द्रष्टव्यम् ॥२१॥ आज्यं विलाप्यते यस्यां सा आज्यविलापनी स्थाली ॥२२॥ रश्मयोऽन्वायत्ता इति शेषः । प्रह्रियमाणाय आहवनीये प्रक्षिप्यमाणाय अनुब्रूहीत्यनुषज्यते ॥२३॥ हे आहवनीयनिर्मन्थ्यौ उभावग्नी ॥२४॥ अप्रैषीत्तार्पितवान्भवति ॥२५॥ प्रकृतदर्शपूर्णमासेष्टिवत्समापनप्रसक्तावाह तदिति ॥२६॥१॥४॥

अथ तानूनपत्रं विधातुमाख्यायिकामाह आतिथ्येनेति । अन्योन्यस्य श्रियै ज्योतिष्टोमफलरूपायै श्रियै त्वात्मन (!) अभिप्रायमप्रकाशयन्तः तामसहमानाः प्रकाशनेति (पा° १.३.२३) तिष्ठतेरात्मनेपदं श्लाघेति (पा° १.४.३४.) श्रिया ज्ञापयितुमिष्टत्वात् । शाखान्तरप्रसिद्धं पञ्चमं गणमुदाहृत्य सोपपत्तिकं पराचष्टे बृहस्पतिरिति ॥१॥ रध्यामः रध्यतिर्वशगमकर्मा वशं प्राप्ताः ॥२॥ यः शत्रूणां विश्लिष्टानां परस्तरामिव अत्यन्तं दूरदेशस्थो भवति स एनाननुप्रविशति ॥३॥ यथा न इदमैकमत्यं कर्म आप्रदिवमेव द्युलोकावस्थित्यवसानमङ्गर्यमविना-

श्यसद्भवेत् ॥४॥ सार्धमेकत्र समवदद्रिरे विभज्य स्थापितवन्तः । एतेन स्थापितेन शरीरेण नोऽस्माकं मध्ये स समयातिक्रमकारो नानासत् विना भवेत् एतदेव व्याचष्टे एतेन विषङ्ग सर्वतो भवेत् विशीर्णो भवेत्यर्थः । उपद्रष्टा साक्षी । तन्वो देहस्य न पातयिता रुद्रको देवस्तनूनप्ता अथवा सर्वतनूरात्मा प्रजापतिः तस्याकाशः पुत्रः तत्पुत्रो वायुरिति तनूनप्ता स च शाक्वरः शक्तः सर्वं कर्तुम् ॥५॥ सर्वेण बङ्गजनेन सह समवगतिं शपथपूर्वकं समयं न कुर्यात् । [नेत्] सर्वैः साकं समभ्यवायान् संगता न भवेयुः । सतनूनप्त्रिणे सम्भूय शपथकारिणे ॥१॥ गृहीतस्याज्यस्य सर्वैरवमर्शनं विधत्ते अथेति । स्पर्शकाले देवैः कृतमन्यसंकेतं दर्शयति एतदिति एतद्वक्ष्यमाणं भूयः समामिरे पूर्वोक्तसंगतमन्त्रेण पुनः संगता अभवन् अम गत्यादिषु । स इत्थं देवभूत एव सन् अमुथा अन्यथा प्रकारेणासत् देवभावाद्विनश्येदित्यर्थः ॥१३॥ अत्युत्सिच्य उपरि तदाज्यमासिच्य । इन्द्रभाजनमिन्द्रस्थानीयः । दक्षिणावता दक्षिणायुक्तेनैकाहादिना सोमयागेन ॥१५॥ तदवत्तं सार्धं [सं]जघ्ने तदाज्येन साकं प्रक्षिप्तं शरीरकदम्बकं संहतमेकमभूत् ॥१६॥२॥४॥

अवान्तरदीक्षां विधातुमाह आतिथ्येनेति । एतस्य तानूनप्त्रस्य शपथात्मकस्य परिहाराय । पापमवदन्निति सत्यं वदामि मेदमतिक्रमिषमित्येवंरूपम् ॥१॥ अग्निनैव वचं विविधं परि परितः आङ्गयन्त अवेष्टयन् अग्निमेव वचमकुर्वन् । संतरामाश्वत्त अतिशयेन संश्लिष्टा अङ्गुलीरकुर्वन् तथा मेखलामपि पूर्वं शिथिलाबद्धां (वद्धां Cod.) पुनः संलग्नामकुर्वन् ॥२॥ अवान्तरदीक्षां प्रज्ञासाधनत्वेन प्रशंसति प्रज्ञामु हैवेति ॥३॥ समिधं हरतीति समिद्धारः । स्वाध्यायं वा विसृजते उच्चारयति । तं ह समिदाहर्तारं वा ऋत्विजं मन्त्रोत्पष्टारं वा उपलक्षणमेतत् ऋत्विजां मध्ये यं कंचित्र व्यापृतम् (व्यापृतं Cod.) । समिदाहर्तृरूपेण समिदाहर्तारम् । तथा सति देवाः इति खलु मां वमचिकोर्षीः कर्तुमैक्षः इति जिघांसोः हन्तुमैक्षः इति पापं वदन्तः उपसमेयुरन्योऽन्यं प्राप्नुवन्ति ॥६॥ अस्त्येव रूपमसामेत्यादि स्पष्टम् । यद्यपि मेखलाकृष्णाजिनधारणादिकमपि दीक्षाङ्गं तथाप्यवान्तरदीक्षायां समिदाधानस्य मुख्यत्वात्समिधमेवेत्युक्तम् (मुख्यत्वात्समि° Cod.) ॥८॥ एनं सोमं यजमानं वा । तप्ता आपो मदन्त्यः ॥१०॥ मदन्त्युपस्पर्शनपूर्वकं राज्ञाप्यायनं विधत्ते अथेति ॥११॥ यस्मै सोमायैतदातिथ्यं क्रियते तमेवाग्रे आप्यायनादिभिः सत्कर्तुं युक्तम् । सोमसम्बन्धाभिप्रायेण चोद्यमुद्भाविते यागसम्बन्धेन परिहरति यज्ञस्येति एवंप्रकारक्रमविशिष्टं कर्मजातं यज्ञस्य खलु क्रियते । अत्र खलु एनान्कलहः प्राप्नोत् ते च देवाः पूर्वं संशममेवोपायन् कलहोपशमनरूपं तानूनप्त्रं कृतवन्तः शपथदोषपरिहारायानन्तरमेवावान्तरदीक्षा कार्या अतः परिशेषादाप्यायनस्यान्ते निवेशः ॥१२॥ तस्येन्द्रेण हतस्य वृत्रस्य शरीरं गिरयोऽश्मानश्चाभवन् सोमाख्यं वस्त्वेव सोमशरीरभूतेषु गिर्यादि[षु] वर्तते उशानाख्या (! उशानाख्या) ओषधिर्जायते इत्येवं श्वेतकेतुराह अतस्तामेव गिरावुत्पन्नामेवा (°मेतत्!) इदानींतना यजमाना अभिषुण्वन्ति न साक्षात्सोमम् अतस्तामोषधिं दीक्षादिभिः संस्कारैः साक्षात्सोमं कुर्वन्ति ॥१३॥ सरघसारक्षमधुकल्पनया (!) प्रशंसति मधु सारक्षमिति (!) वाऽआङ्गरित्यादिना ॥१४॥ एतदेवाप्यायनं गतसारत्वपरिहारात्मना प्रशंसति यज्ञेनेति ॥१५॥ एक एव सोमादिरूपो हविःपदार्थ एकं (एवं Cod.) धनं येषां ते देवा एकधनाः तान्विन्दति यज्ञे सोमपानाय लभते इतीन्द्रः एकधनवित् तस्मादेकैक एवांशुः

शतशो दशशो वा एकधनान्देवानाप्यायते वर्धयति शरीरोपचयं करोति अत उक्तप्रकारेण सोमाख्यैकधनेन देवानामेकधनत्वान्मन्त्र इन्द्रायैकधनविदऽइत्याह । सुत्यां सोमाभिषवम् । तदुपरिभाविनी ऋगृक्व तया समाप्तिर्लक्ष्यते ॥१८॥ प्रस्तरस्योपरि पाणौ सम्पुटीकृत्य । निह्नवोऽपलापे प्रसिद्धो लोके इहापि देवानां नमस्कारादिना सान्त्वनं विहितम् निह्नवं सोमाप्यायनकाले सम्भावितस्याग्न्यतिक्रमस्य परिहारत्वेन प्रशंसति उत्तरतउपचारो वै यज्ञ इति ॥१९॥ अक्तस्याविलम्बेनाग्नौ प्रहरणादनक्ताऽएव प्रस्तरे कर्तव्यम् ॥२०॥ तं प्रस्तरमग्निमुपर्युपरि अग्नेरूर्ध्वोर्ध्वभावे अतिहरति न प्रहरेत् । एतेन आतिथ्यार्थप्रस्तरेण । तमध्वर्युणा दत्तं प्रस्तरमाग्नीध्रः सुरक्षिते देशे स्थापयेत् ॥२२॥३॥४॥

इत्थमातिथ्यमभिधायाथोपसदस्तत्कालं चाह ग्रीवा इति । न प्रथमयज्ञे प्रवृञ्ज्यादिति निषेधसम्भवाद्यदि प्रवर्ग्यवानित्युक्तम् ॥१॥ अतिभारं (!) मुखप्रदेशभारयुक्तं करोति ॥८॥ समानत्र एकस्मिन्नेवाहवनीयदक्षिणदेशे । यथेतं (!) प्रचरन् यथा दर्शपूर्णमासेष्ट्यां यथेतं (!) येन मार्गेण गतस्तेनैव पुनरपि हविरवदानाय गच्छति तथात्र न कर्तव्यम् तथाविध एकत्रैव होम अभिजित्यै भवति । अनोकं वह्नस्य मुखप्रदेशः कल्पं (!) ततः पूर्वो भागः कुल्मलं तत्पुच्छभागः ॥१४॥ यासूपसत्सु यजमानो व्रतयति पयस्ता व्रतोपसदः । उपयुपार एकद्व्यादिस्तनवृद्ध्या व्रतवृद्धिर्यास्वस्ति ताः परउर्वोरुपसदः ताः केचनानुष्ठातारोऽनुतिष्ठन्ति । उक्तवैपरीत्ययुक्ताः परोऽह्नव्यः उपर्युपरि ह्रसीयस्यः ताः केचनोपतिष्ठन्ति । तद्विविधानामप्युपसदां स्वरूपतो विचार्यमाणे पर्यवसानस्यैकरूप्यान्न भेदोऽस्ति ॥२६॥ परोऽह्नोषु उपर्युपरि स्तनह्रासेन पयोह्रासात्तपोवृद्धिरुपर्युपरि भवति । प्रथमेषु चतुर्षु दिनेषु प्रतिदिनं त्रींस्त्रीन्स्तनान्दोहयेत् द्वितीये चतुरहे द्वौ द्वौ तृतीये चैकैकम् ॥२७॥४॥४॥

आतिथ्या तानूनप्त्रं च सोमाप्यायननिह्नवौ । उपसच्चेति पञ्चार्थाः चतुर्थेऽध्याये निरूपिताः ॥ अथ पञ्चमे सौमिकवेदिकरणादिकं निरूप्यते । य एष प्राचीनवंशस्य पूर्वभागे आहवनीयपुरोदेशे वर्तमानः पृथुस्तम्भोऽस्ति । सोऽग्नःपातः ऐष्टिकवेदेर्महावेदेश्चान्तरालसंचरः ॥१॥ सार्थवादमुत्तरवेदिनिर्माणं विधत्ते नासिकेति ॥१२॥ उत्तरवेदिव्याधारणविध्यर्थमाख्यायिकामाह द्रव्य इति । श्वःसुत्यां परेद्युः क्रियमाणमभिषवम् । वमप्यनेन सोमयागेनास्मान्याज्ञयेति (!) ॥१३॥ धियामहै (!) अवस्थापयिष्यामः ॥१५॥ दीक्षासोमक्रयादीनां सद्य एव क्रियमाणत्वान्सद्यःक्रीरिति नाम ॥१७॥ न व्यमुच्यत विमुक्तं नासोत् सम्पूर्णं नाभवत् ॥१८॥ तस्य पुरोदेशे रुक्मो हिरण्यफलको वर्तुलाकारः ॥२०॥ आददाना जिन्वमाना (? जिन्वत्सषा Cod.) ममोपस्थं सर्वं स्वोकुर्वतो ॥२१॥ इदानीमुत्तरवेदिव्याधारणं विधत्ते स यदिति । अग्नौ उत्तरवेदेरुपरि धार्यमाणे सति ॥२३॥ युगशम्येन युगेन शम्यया च ॥२४॥ अन्येन परित्यक्तां दक्षिणाममा मह स्वात्मनि न कुर्वीत । अस्य यजमानस्य समानबन्धुरेकविधिनिबन्धनः एकविषयः ॥२५॥ सौमिकवेदेरुत्तरांसस्य शङ्कुकः । सा चाबालस्य गात्रा यैवोत्तरवेदेरुक्ता सैवेत्यर्थः चाबालखननोत्पन्नयैव मृदोत्तरवादेकरणात् ॥२६॥ चाबालस्य सर्वतः परिलेखनप्रकारं तन्मन्त्रांश्च दर्शयति स इति । दक्षिणश्रोणिन्यूपवेष्टनात् । स परिलिखति शम्यानुगुण्येन लेखनं कुर्यात् अनेनैव पश्चादवधिनिर्देशः कृतो भवति । हे भूमे । तप्तः पुरुषः दारिद्र्येण दुःखितः सन्धनादिसाधनेच्छया ॥२७॥ विविदानः धनादिकं लब्धवान् ॥२८॥ अ-

नेन चावालस्य दक्षिणसोमोच्यते । यत्र नाथेयावेधनादिकम् (?) ॥ २१ ॥ चावालस्योत्तरावधिपरिलेखने ॥ ३० ॥ तत्रोत्तरवेदिदेशेऽग्नोडुपविशति । see १. २. ३. १. । निदानेन मूलकारणेन ॥ ३१ ॥ स मृदो हर्ता अध्वर्युः स्फ्येन प्रहरति खनेत् । तदवदारितं (!) समीरयति उत्तरवेदिं प्रति सम्यगीरयति । आनोताया मृदो वेद्याकारेण स्थापनं समन्त्रकं विधत्ते क्रुवेति ॥ ३२ ॥ अनुक्रमेण व्यूहनं मृत्प्रसारणं (मारणं Cod.) कुर्यात् ॥ ३३ ॥ षडशीत्यङ्गुलपरिमिता युगमात्रो । अल्पा नाभिर्नाभिका । एकत्र स्थित्वा सर्वत्रोत्तरवेद्यां व्याधारणस्याशक्यत्वात्तत्सिद्धये मध्ये नाभिकरणम् ॥ ३४ ॥ हिन्वतिः प्रीणनकर्मा ॥ ३५ ॥ यज्ञियवृक्षशाखया प्रक्षादयति ॥ ३६ ॥ १ ॥ ५ ॥

उत्तरवेदिनिर्माणमभिधायाथोत्तरवेद्यामग्निप्रणयनप्रयोग (°याष्ठोत्त° Cod.) इत्युच्यते इध्ममिति । आहवनीयेऽग्नौ प्रणीयमानानामङ्गाराणां सम्पादनाय काष्ठसमूहं स्थापयेयुः । उप अग्नेरधस्ताद्यम्यत्तऽइत्युपयमन्यः सिकताः । व्याधारणार्थमाज्यमग्नावधिश्रयति विलापयेत् । आज्यमुत्पूतं कृत्वा स्रुवेण स्रुचि पञ्चवारं गृह्णीयात् ॥ १ ॥ इध्मे प्रदीप्ते सत्यथ अनन्तरमेवेध्ममङ्गारतां प्राप्तमूर्ध्वं धारयेत् इध्मपात्रस्याध उपयमनीरुपयच्छेत् अग्नये प्रह्रियमाणाय उत्तरवेदिं प्रति नीयमानाय तदनुकूलं सूक्तं पठेति होतारं ब्रूयात् एकस्फ्यया एक स्फ्यो यस्यां रेखायां सा तथोक्ता तया मामनुगाक् (मागनु Cod.) स्फ्येन रेखां कुर्वन्ननुगच्छेति प्रतिप्रस्थातारं ब्रूयात् । यतः प्रणयति स गार्हपत्य इति न्यायादाहवनीयादुत्तरवेदिं प्रति प्रणयनस्योक्तत्वादाहवनीय एव गार्हपत्य इत्युच्यते रेखाकर्षणेनान्तःपात्यचूपो व्यवच्छेदः परिक्षतो भवति ॥ २ ॥ रेखानुगतिविषये केषांचित्पक्षमुपन्यस्य व्यवच्छेदपरिहाराय प्रयोजनाभावाभिप्रायेण निराचष्टे तदिति ॥ ३ ॥ अध्वर्योः प्रोक्षण्यादानविधानादग्निप्रणेताग्नीदेव ॥ ४ ॥ ताः प्रोक्षणीर्यन्त्रेण अत्यन्तानदेशेन ॥ ८ ॥ उत्तरवेदिनाभिदेशे गुग्गुलुसुगन्धितेजनादिसम्भाराणां (°भावारं Cod.) प्रक्षेपं समन्त्रकं विधत्ते अग्नेः पुरोषमिति ॥ १४ ॥ अस्य अग्नेः । पोतुदारुरुडुम्बरविशेषः ॥ १५ ॥ सुगन्धितेजनाख्यौषधिविशेषे अग्नेर्गन्धः संक्रान्तः ॥ १७ ॥ वृषिर्मेषस्तस्य स्तुका रोम ॥ १८ ॥ २ ॥ ५ ॥

उत्तरत्र सदोहविर्धानादिकं विधास्यति तदुपोद्घातत्वेन तेषां पुरुषाकारसंनिवेशतामाह पुरुष इति । अत्र यज्ञशब्देन तदाधारभूतसदोहविर्धानादिक (°भूतास° Cod.) उच्यते ॥ १ ॥ हविर्धानस्य यज्ञशिरस्त्वे द्वारमाह वैष्णवमिति विष्णुदेवताकैर्मन्त्रैर्निर्मातव्यत्वाद्वैष्णवत्वम् विष्णोः सर्वदेवतानामुत्तरत्वाच्छिरसोऽप्यङ्गानामुत्तमत्वायुक्तं हविर्धानस्य शिरस्त्वम् ॥ २ ॥ स्तुपः केशनिचयः । हविर्धानस्योत्तरस्यामाग्नीध्रीयः दक्षिणस्यां मार्जालीयः ॥ ४ ॥ सौमिकवेदेः पश्चाद्भागे अग्नी आहवनीयगार्हपत्यौ ॥ ६ ॥ अन्तपर्यन्तं सुषिरवान्भवति ॥ ७ ॥ क्रदिः तृणमयं कटम् । राद्ध्यां हविर्धानयोर्मुखप्रदेशे उक्ष्णायीभ्यां तोरणकाष्ठाभ्यामन्तराले (?°काव्याभ्या° and in an repetition काष्टाभ्या° Cod.) परिश्रये पश्चात्पृष्ठभागेऽपि क्रदिरधिनिदध्यात् ॥ १ ॥ व्याधारणायाज्यं ग्रहीतुं पूर्वमाहवनीयं प्रति गतत्वात् पुनः प्रपद्येत्युच्यते ॥ १० ॥ see २. ४. १६. ॥ ११ ॥ हविर्धानशकटस्य दक्षिणचक्रोखायाम् । संतप्यते चक्रसंघर्षणेनेति संतापः चक्रवलयसंस्पर्शप्रदेशः ॥ १३ ॥ असक्तत्रियात्यत्रेति नियानो मार्गः ॥ १५ ॥ उत्तरवेदेः पश्चात्संचराय विक्रमत्रयं परित्यज्य ॥ १९ ॥ यथा नाभ्याधारफलके भूमिष्ठे भवतस्तथा कुर्यात् उत्तरत्र प्रदेशस्य भूस्पर्शे भ्रंशः कदाचिद्भवेत् ॥ २० ॥ उपस्तभ्नाति यथाधो न पतेत् । मेथीं स्तम्भम् ॥ २१ ॥ राद्ध्यां राष्ट्रीम् । श्नथत्रे

सृक्किणी ओष्ठे संधी ॥२४॥ लस्पूञनो नाम सोवनसाधनः सूच्यादिः तत्र सम्बद्धया रज्ज्वा। द्वारशाखां दर्भैरावेष्ट्य रज्ज्वा विष्णोः स्यूरिति मन्त्रेण सोव्येत्। तं ग्रन्थिं प्रकृते कर्मन् कर्मणि प्रकर्षेण कृते परिसमाप्ते विष्यति विमुञ्चेत्। ग्राहो गृह्णाति विश्लेषे सति स न भवति। निष्ठितं सोवनेन सुनिष्पन्नम् ॥२५॥३॥५॥

सोमाभिषवायोपरवाणां खननं विवक्षुः खननस्योभयार्थतामाह द्वयमिति। कर्णाक्किद्रे द्वे नासिकाक्किद्रे द्वे ॥१॥ द्वेष्यबधार्थं भूमौ स्थापिताः कृत्याविशेषा वलगाः ॥२॥ अस्पृण्वत हिंसितवन्तः ॥३॥ मध्ये-मध्ये प्रादेशमात्रान्तरालं विहाय समचतुरस्रे खननप्रदेशे चतुरोऽवटान्प्रादेशमात्रान्परिलिखेत् ॥५॥ खननमपि परिलेखनक्रमेण कर्तव्यम् ॥८॥ खाताया मृद उद्वपनेऽपि खननक्रम एव ॥९॥ अङ्गुलिप्रादेशाद्यपेक्षया बाङ्प्रमाणस्यान्तरालस्यातोऽधिकात्प्रदेशान्मृदुद्धर[ण]स्याशक्यत्वाद्बाङ्मात्रस्यान्तरालम् (°त्रव्यांत Cod.)। तानन्तराया संतृन्दन्ति पूर्वयोर्दक्षिणस्यापरयोरुत्तरस्य चान्तरालदेशम् ॥१३॥ अन्तःप्रदेशनिष्पेषान्नवपरिहाराय संमृशेत् ॥१४॥ संमृशेते परस्परं हस्तसंस्पर्शं कुर्याताम् ॥१५॥ सँविद्रे संविद्रुते सगता भवन्ति लोपस्त इति (पा° ७. १. ४१.) तलोपः वेत्तेर्विभाषेति (पा° ७. १. ७.) रुट् ॥१७॥ अधि उपरि सूयते सोमोऽनयेत्यधिषवणे। पर्यूहति परिवृंहति परितो मृदा (मृद्भा Cod.) दृढीकुर्यात् ॥२२॥ अधिषवणचर्मणि अभिषवसाधनान्पाषाणान्पश्चाद्धरन्ति ॥२४॥४॥५॥

यज्ञशिरस्त्वं हविर्धानस्योक्त्वा तत्समर्थ्येदानीं सदसो यज्ञोदरत्वं प्रतिपादयितुं पूर्वोक्तमनुवदति उदरमिति ॥१॥ खातं मृन्निचयं (°तांमृ° Cod.) प्राञ्चमवटस्य समीपे प्राग्देशे उत्किरति। यजमानप्रमाणां कृत्वा परिवासयति अवशिष्टमंशं क्षिनत्ति। औदुम्बरोप्रमाणानि बर्हींषि औदुम्बर्या उपरि निदधाति आच्छादयेत् ॥६॥ अस्पृण्वत सर्वा ओषधीर्वधितवन्तः (!)। अयुवत अमिश्रयन् ॥१॥ वनेऽनिखाता दृढमूला स्वभावेनोत्पन्ना। यथा ओषधिषु सहोत्पन्नेषु तृणगुल्मादिषु मध्ये मिता भवति सबर्हिष्के गर्ते मिता शाखाप्येवं भवति ॥१४॥ उक्षयति ऊर्ध्वं स्थापयेत् ॥१५॥ मिनोतु अवटे प्रक्षिपतु ॥१६॥ पर्यूषति परितः संघट्टयेत्। भूमिसाम्ये सति अगर्ते मिता भवति मिनोतेः कर्मणि क्विप् ॥१८॥ अभिपद्य शाखामालम्ब्य ॥२०॥ विष्टपं विशाखमभि विष्टपस्यायभागस्याभिगर्भतः (??) यथा शाखाया अग्रमूलभागौ मध्यदेशश्चाक्ता भवन्ति एवमाज्यं जुहोति ॥२१॥ स्तोत्रशस्त्रपाठाश्रयत्वादेवं भक्षणसम्भवान्मानुषं चेति मिश्रे ॥२३॥ आग्नीध्रमाग्नीध्रीयं मं[ड]पं कुर्यात् ॥२६॥ द्वितीयं प्रकारमाह देवा इति। सदोनिविष्टान्देवान्सदसो निष्काशितवन्तः न केवलं तान्देवानपि (ता च देव अपि Cod.) तु अन्तःसदसं सदोमध्येऽवस्थितान्धिष्ण्यानग्नीन् ॥२७॥ सदसो निष्काशिता आग्नीध्रप्रविष्टाः तत्राप्यसुरैः संरुद्धाः ते देवा आग्नीध्रधिष्ण्यगतस्याग्नेरर्धं (°धीष्म° Cod.) समीपं प्राप्य तानसुरान्निरगुः ॥२८॥ तानुद्घातितान्धिष्ण्यान्पुनरदीपयन् यथा प्रत्यवस्येत् प्रतितिष्ठेत् यद्वा प्रत्यवसानं भोजनं यथा आङ्क्त्याधारो भवेत् ॥२९॥१॥६॥

धिष्ण्योपधानपदार्थविधानार्थमाख्यायिकामाह (धिष्णोपदार्थ° Cod.) विज्ञायमान इति। भ्रातरो बान्धवाः। समङ्गाः समानचिह्नाः। एते खलु अस्य यज्ञस्यात्याराः (°त्मानः?!) ॥१॥ न्यषञ्चि स्थाणौ निषक्तमभूत् ॥४॥ see २. ४. १. ॥७॥ कृशयोरायुधयोः। क्षुरपवी क्षुरधारे तीक्ष्णाग्रे। निमेषं-निमेषं सर्वदा। ते के इमे सदसि वर्तमाना धिष्ण्याः इमे (!) होत्रकाः

(°त्राकाः Cod.!) होतृमैत्रावरुणादयः ॥१॥ खदिरस्यातिसारत्वात्तं साधनं कृत्वा सोमं भक्षितवतो । अच्छावाकस्य गोपनायाम् होत्रकाणामेव सोमरक्षकगन्धर्वरूपवादच्छावाकाख्यो होत्रको यदा सोमरक्षकेषु मध्ये रक्षितवान् तदा । अतोऽच्छावाको हीनो निकृष्टोऽभूत् ॥१२॥ अत एवेतरहोत्रकवत्प्रथमत एव सदःप्रवेशमपि [न] समालभत तमिन्द्राग्नी ऐन्द्राग्नशस्त्रपाठेन संतुष्टौ अनुसमतनुतां संतानमनुप्रवेशमकुरुताम् ॥१३॥ यथायाज्ञत्या शालाकैस्तृणसमूहैर्विकृतान्धिष्ण्यान्घृतेन व्याघारयति ॥१९॥ अभिमानो हिंसेच्छा । शालायां प्राग्वंशे ॥२०॥ द्युलोकं सर्वथा परित्यज्य भूमौ कृतनिवासानां पुनः द्युगमने सति ज्ञिप्सता स्यात् सर्वेषां केवलमनुदेशने भूलोके प्रत्यक्षता न स्यात् ॥२२॥ सन्ति आत्मानं लभन्ते इदानीमप्यपराभूता अपरिनिष्ठा वर्तन्ते । हविर्धानशकटस्य दक्षिणभागे चमसेषु (चामा° Cod.) ये सोमाङ्कितावशिष्टा (°तावशि° Cod.) भक्षिता (!) पुनराप्यायिताश्च (°राप्यापि° Cod.) वर्तन्ते ते नाराशंसाः ॥२५॥ सम्पा सहपीतिः । प्रथमं देवैरग्निमुखेन पानं पश्चान्मनुष्यैः सदसि शेषपानम् पश्चान्नाराशंसेन (°सन) पितॄणामिति ॥२६॥२॥६॥

वैसर्जनीयानि विधातुमाह सर्वमिति ॥१॥ अपिव्रतः व्रतं भोजनं यज्ञमानेन सह प्राप्तभोजनः बन्धुवर्गः ॥२॥ इत्थं वैसर्जनानि विधाय तद्धोमकालं मन्त्रं च विधास्यन्नन्नकालवर्तिनमग्नीषोमीयप्रयोगमाह स इति । तस्मिन्दिने एकस्वानव्रतार्धस्य (?) प्रातर्व्रतार्थमुपयुक्तावादर्धव्रतं प्रदायेत्युक्तम् । सप्तमपदपांसुम् see ३. १. ३-१०. । प्राचीनवंशगतस्याहवनीयस्य पश्चाद्भागे प्रक्षिपेत् ॥४॥ पदपांसु चतुर्धा विभज्य ॥५॥ इदानीं समन्त्रकमाहवनीये वैसर्जनहोमं विधत्ते अथेति ॥७॥ अप्नुः मूल्मरूपः सोमः । कनीयःशब्दार्थमाह स्तोकमेवेति ॥८॥ द्रोणकलशः सोमाधारः प्रभूतः पात्रविशेषः । वायव्यानि ग्रहाः । परिध्याद्याः पश्वर्थाः ॥१०॥ तम् प्रणीतमग्निम् ॥११॥ इतरमिध्मबर्हिरादिकमग्नीषोमीयार्थम् ॥१३॥ समिदाधानपर्यन्तं पश्वर्थमङ्गीकृतं कृत्वा पश्चाद्वैसर्जनीयं होमं तुरीयं जुहोति उर्विति ॥१५॥ एष सोमः पूर्वं य एव यादृग्यज्ञरूपः तं तादृग्रूपं करोति ॥१६॥ सोमं हविर्धानं प्रवेशयति ॥१७॥ अनुसृज्य विसृज्य ॥१९॥ हविर्धानात् ॥२०॥३॥६॥

अथ यूपप्रयोग उच्यते यूपमिति । व्रश्च्यन् छेत्स्यन् ॥१॥ रातमनाः दत्तचित्तः कर्मार्थमङ्गीकृतमनस्कः ॥७॥ न विद्यतेऽक्षस्य शकटाङ्गस्य स्तम्भो यस्मिन्नक्षनकर्मणि तदनक्षस्तम्भम् अक्षसंस्पर्शो यथा न स्यादेवं सर्वं वृश्चेत् ॥११॥ परिवासयति आक्षिनत्ति ॥१७॥ ४॥६॥

यूपस्यानाष्टो (!°तष्टो?) मूलभाग उपरः । एतावन्मात्राणि मुष्टिपरिमितानि । see ६. १. ४-१४. ॥१-७॥ गर्ते प्रास्यति । एष हि यज्ञुषा स्वधिते मैनमिति मन्त्रेण निष्पादितः अत एव मेध्यः ॥८॥ चषालो यूपस्योपरि प्रतिमोक्तव्याष्टाश्रिमाबद्धसन्नाहो (°श्रिर्मध्ये संगृहीता?) वलयी (°लभी?) । प्रतिमुञ्चति उपरि बध्नाति । यदेवेदं सम्बन्धनं सम्यक् बन्धनसाधनं वृत्तं (वृत्तं Cod.) फलं चात्तरा वृत्तफलयोर्मध्ये उपेनितमिव उपनितमाल्यपरिमाणम् (?°मल्पप°?) ॥१२॥ अग्निष्ठा अग्नेरभिमुखाश्रिः । परिव्ययणं रशनावेष्टनप्रदेशः तं प्रतिसमक्षमाज्येन परिमृशेत् ॥१३॥ अग्नेः सकाशात् ॥१६॥ अत्रैव नाभिप्रदेशे ॥१९॥ रशनायास्त्रैगुण्यमाह त्रिवृतेति ॥२०॥ यूपशकलं स्वरुम् ॥२२॥ अभिपद्य गृहीत्वा ॥२६॥ यूपे निगूढस्य स्वरोरुत्त-

त्र प्रतिपत्तिकर्मत्वेन यूपप्रतिनिधित्वात्मना होममभिधातुमाह तमिति ॥२१॥ तत् तेनैव खल्वेष यज्ञः स्वर्गाकृतः स्वं स्थानं प्राप्तः कृतप्रतिपत्तिक आसीत् ॥३१॥१॥७॥

अग्नीषोमीययूपप्रसङ्गायूपैकादशिनीं विधातुमुपोद्घातयति यावतोति । यूपानां समीपे शेतऽइत्युपशयः । वितष्टः विशेषेणोपरप्रदेशेऽपि तष्टः ॥१॥ श्वः परेद्युः क्रियमाणायाः सुत्यायाः पूर्वस्मिन्दिने अग्निष्टप्रमुखान्सर्वान्यूपान्त्रिखनति । the explanation of प्रकृब्रतायै to the end of the kaṇḍikâ is wanting: the immediately following words are: तं पक्षं निराचष्टे तदु तथेति । तस्मिन्काले अग्निष्टमेकमेव उत्तरवेदेः पुरोदेशस्थमेवाग्नीषोमीयपश्वर्थमुत्कृयेत् इतरेषामपि पूर्वेद्युरुत्कृयणे दोषमाह इदं वाऽइत्यादिना इदं वक्ष्यमाणं भवतीत्यर्थः । नान्वर्जति नैव हस्तस्पर्शं परित्यजेत् । प्रातः परेद्युः ॥४॥ प्रसङ्गात्पात्नीवतपशुप्रयोजनमाह अथेति ॥८॥२॥७॥

पशुनियोजनाय सर्वथा यूपेनैव भवितव्यमित्यमुमर्थमाख्यानेनोपपादयति पशुरिति अविनाभूतावित्यर्थः (?°नाधूता° Cod.) ॥१॥ प्राप्नोयत्त (!) प्रकर्षेण प्लोना अवनता अभवन् ॥२॥ प्रासङ्गिकं यूपैकादशिनीपक्षं परिसमाप्य प्रकृतमग्नीषोमीयपशुप्रयोगमाह अथेति ।, नोपावेयुः नोपगताः ॥३॥ यानं (!) प्रायम् । अभ्यवैष्यन्ति अवगांतें प्राप्स्यन्ति ॥४॥ पशोर्निरोधं करवाणि । असहायस्य व्यापारात्तमत्वात् ॥८॥ परस्तात्परोदेशे ॥१३॥३॥७॥

समन्त्रकं बन्धनमाह पाशमिति ॥१॥ उपगृह्णाति प्रोक्षणीशेषं पानार्थं मुखसमीपे धारयेत् ॥६॥ तयोरग्नियज्ञमानयोः ॥११॥४॥७॥

होत्रादिप्रवरणानन्तरभाविनं प्रयोगमाह तदिति । होतृषदनं वेदेरुत्तरा श्रोणिः ॥१॥ समित्तनूनपादित्याद्येकादश प्रयाजा आप्रियः ॥२॥ पर्यग्निं पशोः परितोऽग्निं करोति । तलस्थानमभिलक्ष्येनमुल्मुकं (!) पाकार्थमाहरेत् ॥६॥ तेषां शामित्रं प्रति गमनम् ॥१॥ तस्मिन्समये प्रतिप्रस्थाता वपाश्रपणीभ्यां पशुमन्वारभते ॥१०॥ अमुया अमुत्रात्तारिक्षे अनभिमतप्रदेशे न भवति न विनश्यति ॥१४॥ क्रूरेण शृङ्गेण शृङ्गं गृह्णीवा । नैव कर्णस्य पश्चाद्भागमग्रभागं गृह्णीवा । वेष्कं मुखवेष्टनं वा शब्दाभावाय कुर्यात् । हे शमितः सांज्ञपयासौ तु अन्वगान् अनुगतोऽभूत् ॥१५॥१॥८॥

संज्ञपनानन्तरप्रयोगमाह यदेति ॥१॥ विशसनप्रयोगमाह अथोत्तानमिति ॥१२॥ आक्ष्नयति आक्षिनत्ति । तत् तृणम् ॥१४॥ समया सांमुख्येनैव सामीप्येन ॥२०॥ इतःप्रदाना वै वृष्टिः अस्माल्लोकात्प्रजाता । ते अग्निना भक्षिता एते [घृतस्तोकाः] पुनरुदकात्मना परिणताः पृथिव्यां वर्षन्ति ॥२२॥ चरकशास्त्रोक्ताध्वर्यवप्रयोगकर्तारः चरकाध्वर्यवः । दधिमिश्रमाज्यं पृषदाज्यम् ॥२४॥ एतावान्कालो वपाप्रथमाभिघारणेनैव गतः अथापि प्राणाश्च न निर्गत इत्यर्थः ॥२५॥ समोच्यौ परस्पराभिमुखे ॥२८॥२॥८॥

अनुनिर्वाप्यपुरोडाशं तद्देवतां च विधत्ते यद्देवत्य इति ॥१॥ पशुपुरोडाशस्य पशुक्रिदुपूर्तिरूपप्रयोजनं सर्वेषु पशुष्वतिदिशति एष इति ॥२॥ शमिता । तत्रा शमितुरेवमनुशासनं कुर्यात् हे शमितः त्रिः प्रच्यावयतात् प्रधानस्विष्टकृद्भेदेन (?) त्रिविधमङ्गानि त्रिविधचिह्नानि यथा स्युः तथा प्रच्यावय त्रिःप्रच्युतस्य पशोः हृदयमवयवं स्रुवं (!) उत्तममुपरिभावं कुरु ॥३॥ मस्तिष्कः कपालः अनूक्यश्च तन्मांसम् मज्जा तदाश्रितः सारः ॥११॥ ए-

कचास्य दोष्णः सव्यात्। तनिष्ठो यकृतः। वृक्कयोः वृष्यं (!वृश्यं?) कुक्ष्युभयपार्श्वस्थं (कुक्षूभ° Cod.) ग्रामकारमांसद्वयम् (?°काम°?) ॥१७॥ गुदाङ्गेषु यदतिस्थूलम्। ऋङ्गेषु मध्ये ऽवद्येत्। एकचारायै श्रोणेर्दक्षिणायाः ॥१८॥ स्विष्टकृदर्थमाह अथेति। त्रीण्यङ्गानि यस्येति ऋङ्गं सौविष्टकृतं हविः तान्येवाह दोष्ण इति सव्यस्य प्रधानार्थमभिहितत्वाद्दक्षिणस्य दोष्णः सकाशादित्यर्थः। ऋङ्गयायै श्रोणेः स्विष्टकृदर्थायाः श्रोणेः सकाशात् सव्यायाः श्रोणेरित्यर्थः ॥१९॥ लेलयेवेति द्रुवद्रव्यवादितस्ततश्चलनं विवक्षितवा[द्रु]व्याख्यातम् ॥२०॥ पार्श्वेन पार्श्वास्थिना ॥२४॥ मतस्ने वृक्कौ ॥२५॥ अक्ष्णया पादश्रोण्योर्व्यत्यासेन। अंसौ बाह्वोरुपरिप्रदेशौ। अनूको वङ्क्षर्याधारः आयतः पृष्ट्यास्थिविशेषः। ऊर्वोरुपरिभूतौ उक्षितावयवौ सक्थौ (°कथ्यो Cod.) ॥२७॥ इतः पृथिव्याः सकाशात् ॥३०॥ ये च रात्तसा मे (!) मदीयं यज्ञमुपतिष्ठन्ते प्राप्नुवन्ति ते पशुं विमथिष्यन्ते ॥३६॥३॥८॥

प्राणस्य श्रेष्ठत्वकारणाभिधानमुखेन गुदस्य प्रधानस्विष्टकृदुपयोगिष्ठार्थं (°यदुष्टार्थ Cod.) त्रेधा विभज्य विनियोगं प्रशंसन्प्रयाजादीनामितराङ्गत्वमाह त्रीणीति। अनुयाजानन्तरं यष्टव्या एकादशोपयज्ञ उपरिष्टादाम्नास्यन्ते ॥१॥ शिवः श्रेष्ठः ॥२॥ यो यज्ञमान एनं मेधं मेधार्हं प्रवृक्तमुपनयेत् उपगच्छेत्प्राप्नुयात् ॥५॥ अंसलः प्रवृद्धांसः पुष्टाङ्गः ॥६॥ एको होता। अध्वर्यवे उपयष्ट्रे प्रतिप्रस्थात्रे च ॥१०॥ अत्युपयजूंषीमकाश्चत्वार उपयाजसन्नकानामनन्तरमाधिक्येन यष्टव्याः ॥१८॥४॥८॥

अत्युपयाजमन्त्रान्विधाय पुनः सृष्ट्यभिवृद्धिहेतुतया (सृष्टाभि° Cod.) प्रशंसति स इति ॥१॥ ज्ञाघनी वालदण्डः ॥५॥ तज्जोषाय भक्षणायालं पर्याप्तं भवति प्रयुगनुविद्धत्वान्न यागार्हं स्यादित्यर्थः तस्मात्पाकात्पूर्वं मूल (!) परित्यज्य पाकं कुर्यात् मूलात्पाक इति (पा° ५.४.६५.) डाजन्तः (डाच अंतः Cod.) पाकात्पूर्वं मूलेन परितर्दनाक्रुग्घृदयमूलं प्राप्नोतीत्यर्थः। पाकोत्तरकालं हृदयं मूलात्प्रवृत्य इतरावयवानामुपरि स्थापयेत् ॥८॥ मूलोपगूहने (हनी Cod.) विषयविशेषं निषेधति स वै नेति ॥११॥५॥८॥

अथ पञ्चैकादशिनीं विधातुमाख्यायिकामाह प्रजापतिरिति। रिरिचान-इवामन्यत आत्मानं रिक्तमिव अबुध्यत ॥१॥ अरिक्षि अतिरिक्तोऽभूवम् असृक्षि प्रजासृष्टिमकार्षम् ॥२॥ तस्माद्यः पुमान्प्रस्वामि (!) अनल्पः (?अतल्पः Cod.) सोऽन्नादो भवति ॥१॥ यस्माद्ब्राह्मणस्य पशुषु स्वामित्वमस्ति तस्मादेव कारणात्सव ब्राह्मणेभ्यो दत्त्वा अजिनमाक्राय संचरति ॥३२॥१॥१॥

अथ सोमाभिषवार्थं वसतीवरीग्रहणं विधातुमाह यत्रेति ॥१॥ ऐत् अस्रवत् ॥४॥ इलयति इतस्ततश्चलति। नेलयन्ति न प्रति विवर्तन्ते ॥५॥ निनाय्यात् स्वगृहस्थितप्रभूतघटादेः सकाशात्। उपावसिते (!) समीपे गृहेऽवस्थितः पर्यवसितो वा दूरगृहस्थितो वा ॥८॥ संतिष्ठते पत्नीसंयाजान्तः समाप्तो भवति। अथ तदा परिहरति वसतीवरीर्वेदेः परितो नयेत् ॥१३॥ दक्षिणेन द्वारेण प्राग्वंशान्निष्क्राम्योत्तरवेद्या दक्षिणश्रोणी सादयति ॥१४॥ उत्तरवेदेरुत्तरश्रोणी सादनं कंचिन्मन्त्रं निर्दिश्य तस्य वक्ष्यमाणसम्पदतिरेकेण प्रातिकूल्यमभिधाय दक्षिणवेदिश्रोणिसादनमन्त्रमेव सम्पदनुकूलत्वात्सिद्धान्तयति मित्रावरुणयोरित्यादिना यस्मादयं मन्त्रोऽतिरिक्तोऽधिकः अतो वक्ष्यमाणा सप्तपदोपेतशक्वरीछन्दःप्राप्तिलक्षणा सम्पन्न स-

म्पद्यते इन्द्राग्न्योरित्यनेनैव चेदनतिरेकात्सम्पद्यते (?वेदन° Cod.) ॥१५॥ परितोऽङ्क्तयन्ते ह्रियन्ते (द्वि° Cod.) ॥१६॥ पराध्यां पार्धे भवा श्रेष्ठा ॥१७॥२॥१॥

अथ सुत्यादिवसप्रातःकालोनं सवनीयपश्वर्थप्रयोगमाह तानिति । ऋत्विजः ॥१॥ अधिषवणचर्मोपरिप्रदेशं प्रत्यधो नयति । ज्ञनूर्ज्ञन्मभूमिः ॥२॥ ईषे आयतौ (त्यै Cod.) शकटदण्डौ ॥३॥ अनुसृज्य वेष्टितं वस्त्रं विसृज्य । पापवस्यसं पापं च वसीयश्च पापवस्यसं साधुसाधुमिश्रणम् ॥७॥ स निमेषव्यापार एव प्रतिगरस्थानीयः । निद्राभङ्गं निमेषं च न कुर्यात् । प्रचरत्यनया जुह्वपभृतोर्व्यापारदशायामिति प्रचरणी सा स्रुग्भवति तया चतुर्गृहीतमाज्यं जुह्वयात् ॥११॥ अपः प्रति इष्य इक्ष अपः प्रतिगमनोचितं प्र देवत्रेत्यापोनप्त्रीयमनुब्रूहि (देवत्रेत्या°?) । एताद्र (!) उ चैवैतदिति उशब्दोऽप्यर्थे अपि च एता (!) एकधनाख्या अप उद्दिश्य एतदनुतिष्ठते । नेदेना (!) इति । एता (!) अपो नाष्ट्रा नाशकानि रक्षांसि हिनसन् हिंस्युः ॥१५॥ दश चमसाध्वर्यवश्चमसप्रयोक्तारः तेषु यो मैत्रावरुणस्य चमसाध्वर्युः स सम्बोध्यते एहि उदकानयनार्थमागच्छ । एकधना उदकानि तेषां धारकाः कुम्भा वा प्रत्यगेकधनानयुग्मानित्यासादनाभिधानात्तेषां ग्रहीतार एकधनिनः एत आगच्छत । चावालदेशे यावदागमनं प्रत्युपतिष्ठ ॥१६॥ तेषां जलानयनार्थं निर्गमनमार्गमाह तञ्इति ॥१७॥ प्सातो भक्षितः । उपस्तृण्यन् अभिषवकाले सोमस्य संसर्गं करिष्यन् ॥२६॥ एतेन मैत्रावरुणाख्येन ऋत्विजा प्रैषैस्तत्कृति(°तैः?)गमनसाधनैराह्वानवाक्यैः प्रैषं यज्ञस्य गमनमैक्षन् । निविद्भिर्निवेदनसाधनैरग्निर्देव इत्यादिभिर्वाक्यैर्न्यवेदयन् परस्परं निवेदितवन्तः । पुरो याज्यानुवाक्याभ्यां पुरस्ताद्रुचिमिक्षां जनयन्ति देवताया इति पुरोरुचः पापराधेगा (?) इत्याद्याः ताभिः प्रारोचयन् प्ररोचनामजनयन् । अतो मैत्रावरुणस्य प्रैषादिसाधनवात्तदीयश्चमसः प्रशस्तः ॥२८॥ अप्सम्भरणानन्तरमनुष्ठेयं विधत्ते तञ्इति पुनर्देवयजनं प्रति आगच्छेयुः । आपः मैत्रावरुणचमसगता अद्भिः होतृचमसस्थाभिर्वसतीवरीभिः ॥२१॥ ऐव नयन्तीति सम्बन्धः आनयन्त्येवेत्यर्थः । आ मैत्रावरुणचमसाद्वसतीवरीषु उपसर्गवशान्नयन्तीत्यनुषज्यते । आग्नीध्रहस्तस्थं होतृचमसमध्वर्युरादाय पूर्वेद्युराहृता वसतीवरीरध्वर्युः गृह्णाति कस्माऽउपयोगाय निग्राभ्याभ्यः होतृचमसे निगृह्यमाणवान्निग्राभ्या इति संज्ञा ॥३०॥ अवेः लब्धवानसि । नंनमुः अत्यर्थमानता अभवन् ॥३१॥ स वर्तमानः क्रतुरग्निष्टोमसंस्थश्चेत् । मन्त्रे यन्मर्तलिङ्गकवं तत्प्रशंसति मर्तवत्येति ॥३२॥ अग्निष्टोमादुपर्युक्थ्यसंस्थे क्रतौ । समुचैव यमग्ने पृत्स्विति मन्त्रमुक्त्वैव तूष्णीमेत्य देवयजनं प्रपद्येत । यज्ञक्रतूनग्निष्टोमादिकान्परस्परव्यावृत्तान्कगाति ॥३३॥ इदानीमेकधनघटानामयुग्मसंख्याविकल्पमाह (°धनमघटा° Cod.) अयुग्मा इति । सधनं समानमेकमेव धनम् । तस्मादयुग्मसंख्याका उदकविशेषा एकधननामकाः सम्पन्नाः ॥३४॥३॥१॥

इत्थमभिषवसाधनानामपां ग्रहणमभिधायाथ सोमाभिषवप्रयोगं वक्तुमुपक्रमते अथेति । अधिषवणे दारुमये फलके । अस्यामनामिकाङ्गुल्याम् ॥१॥ रासते ददाति ॥४॥ तासु आगतासु एनं यजमानम् । उपांशुग्रहार्थः सोमोऽभिषूयते येन स उपांशुसवनः पाषाणः स निदानेन मूलकारणविचारेण विवस्वत्संज्ञक आदित्य एव तस्यैवैतदात्मनावस्थानात् ॥७॥ तमुपांशुसवनमभि तस्योपरि सोमं मिमीते क्रयकालीनमानेन सोमं संस्कुर्यात् । मानं प्रशंस-

ति यद्वेवेति उशब्दोऽप्यर्थे यापि मात्रा सोमे कृता तस्मात्सोमस्य मितत्वात् (त् त Cod.) मनुष्येषु व्यवहारार्थं प्रस्थकुडवाढकद्रोणादिमात्रा सम्पन्ना या चापि उकारप्रश्लेषः अपि च या चान्या मात्रा एकद्वि-इत्यादिसंख्याप्रयुक्ता सापि सोममानप्रयुक्ता ॥८॥ न किंचन वस्तु लोष्टकाष्टपाषाणादिकं प्रतिधारयते (!) प्रतिबध्नाति । तस्थानं तिष्ठतेः कानचि रूपम् ॥१४॥ अनेनस्यं न विद्यते एनः पापं यस्य स अनेनास्तस्य भावः ॥१७॥ अतो यत्परम्परया आङ्गतिभावं गच्छन् ज्ञायते पुनः सम्भवति अतो यन् ज्ञायतऽइति यन्जः अतो वस्तुतो यंज्ञ इति तस्य नाम तद्यज्ञ इति परोऽक्षेण व्यवहरति ॥२३॥ अस्य मन्त्रस्य तात्पर्यमाह मर्त्यो हैवैतद्भगवन्तुवाच (!) वमेवेत्यादिना स्पष्टोऽर्थः ॥२४॥ तच्च ग्रहणं होतृचमससकाशाद्भवति होतृचमसं दशापवित्रस्योपरि धारयित्वा तत्र सोमरसमासिच्य धारां सम्पाद्य ग्रहणात् ॥२५॥४॥१॥

इति सायणाचार्यविरचिते माधवीयवेदार्थप्रकाशे माध्यन्दिनीयशतपथभाष्ये तृतीये काण्डे नवमोऽध्यायः सप्तमश्च प्रपाठकः ॥ ॥ समाप्तं चेदमध्वरनाम तृतीयं काण्डम् ॥३॥ ॥

VARIOUS READINGS.

Adhyâya १. १. १ नातिशयीत Sây. - ४ Read: यान्नयेदिति. - ५ Read: °न्नेदिष्ठतमामिव. - ६ Read: तक्षालां वा. - २. ११ यं घृतेन पुनंस्तस्मादाहु A. - १९ अमेध्यमाकृणात्ति Sây. - Read: मेध्यमसदिति. - २१ निरवंधीदिति A. - ३. १ यज्ञस्यापरार्धो Sây. - ३ संदेहो Sây. - ५ राध्नुवात् Sây. - ७ यदभ्यङ्क्ते A. यदभ्यङ्क्ते B. - १० यदद्यावः AB. - ४. १ उद्गृह्णीते Sây. —

Adhyâya २. १. १० दीक्षिता न बल्यमविन्दन् Sây. but see also ४, २, १. ३, १. and ६, १, २१. - २२ संस्कृते AB. - ३१ °दुपास्यं मित्त्ये° AB. - २. २७ प्रतिगुह्य° Sây. - २९ सम्भवति AB. - ३. १५ उत्तरा वाक् Sây. - २१ निदधति ताः A. - २३ संस्करोति AB. - ४. ११ अलग्नमिव Sây. —

Adhyâya ३. १. १५ आशान्नियात् AB. - २. ४ वा ऋजुलं B. - ६ छन्दोमा-

नां Sây. - ८ विवा AB. भिवा Sây. - ९ पात्रे A pr. m. पात्रो A sec. m. B. Sây. - १२ कविं । AB. The last word of a quoted *ric* is generally left unaccented. - १४ °र्मिमीत A. - ३. १ राजाऽइति AB. - ९ आजत् Sây. - ११ तान्मा दभन् Sây. - ४. २ अथैनमभिपद्य Sây. against the accent. - ८ प्रतिनाह्° Sây. - ९ °ब्रह्मण्यः Sây. °ब्रह्मणा AB. which reading I now prefer, see ४, ३, ४, २२. - १३ अपालव्° A अपालंब्° B. - १५ प्रपायतयति B the first time. प्रपाद्यति Sây. - १६ संस्कृत° AB. - १९ °नोपज्ञातं AB. °तेत्यहे AB. —

Adhyâya ४. १. ३ नापचायन्त Sây. - १८ संल्कुर्म्यते B सलुन्यति Sây. - २६ संस्कारो° AB. - ३. ६ विसृज्यते AB विसृज्ञते Sây. - ८ समाश्नवत AB. - ९ व्रयास्वे व्रतया A. - १२ तमेवाग्रे Sây. तमेवाय A. तमेवाग्र B. - २२ °दल्यापाऽइति AB, see ३. ३. १. - ४. ८ अतिभारं Sây. - १४ यथेद् B. यथेतं Sây. - २२. २३. २४ गल्हरेष्ठा । AB. —

Adhyâya ५. १. २३ याज्ञयेति Sây. - १५ धियाम° Sây. घ्रियाम° AB. - २. ८ तां न्यक्तेन A. ता न्यक्तेन the schol. at Kâtyây. ५. ४. १२. - १६ गुग्गुलु Sây. - ३. ९ Read: भित्तिं प्रत्या°. - १४ दशस्या । AB. - क्वेतत्द्वायत्यन्यानि AB. - २५ तं निष्ठित° AB. - The fifth adhyâya is reckoned by Sâyaṇa as containing five brâhmaṇas and accordingly the sixth as having three only. —

Adhyâya ६. १. २५. २६ तं निष्ठि° AB. - २७ तां दद्धि° AB. तां धिष्ण्या° AB. - २८ °त्वमयाज्ञय° AB. - २९ This passage shows clearly, (what is manifest too from the Padapâṭha, wherever the words occur,) that आर्ति (आर्ज्नति in the Pada) and आर्त are not be derived from अर्द्, but from ऋ + आः see also १, ४, ३, ११-२२. ५, १, २. ६, १, १६. - २. १ आत्मानः Sây. (?) - ८ निष्क्रिणीष्वेति

AB. - १ इमे क्षोत्रकाः Sây. - २२ जिक्या A. - ३. १० Read: विधृती. - ११ विद्वान्। AB. - ११ °मन्तर्ज्ञभ A. - ४. ५ अगान्ना° A. - ११ Read: तथानो. - १६ °वल्गूशो, °वल्गूशा A. —

Adhyâya ७. १. ८ बाक्यशकल° Sây. - १६ Read: सम्प्रत्य°. - २. ३ ?प्रकुव्द्र° A pr. m. प्रकुब्द्र° A sec. m. प्रकुव्र° B: this line is omitted in the commentary. - ८ सर्वत्वाय त्वेव B. and Sây. तन्न सञ्स्था° AB. - ३. २ प्राप्नोयन्त Sây. - ४ यानं विदु° Sây. - ४. २ स यदैव AB. —

Adhyâya ८. २. ६ सञ्हृत्य A. - ११ °त्राण्यसन्नि° A. °त्राण्येसन्नि° B. - ३. २ °शेन प्रचरति मध्य° AB. - १५ प्राणाः संभवति Sây. - नर्थ्या A pr. m. मर्थ्याः B. - ३२ Are we to read: प्राणत्यश्चोदनत्यश्चा°? see २, ५, २, २. ४, १, २, १६. - ३६ ये म ऽउपति° Sây. - ब्राह्मणं ॥५॥ संलग्नानाम् B. —

Adhyâya १. १. ८ प्रस्वामि (?) Sây. - २. १० and १२ हविष्मांऽ३ A. - ३. १५ एता उ and नेदेना अत्तरा Sây. - ३० °मुपोद्क्रा° AB. - ३४ Read सधनं यो. - ४. १४ प्रतिधारयते Sây. - १७ तन्त्वेव AB. - २३ यंज्ञायते तस्माद्यंज्ञो यंज्ञो ह AB. - २४ °द्भगवन्नुवाच Sây.